श्रीविजयनेमिसूरिग्रन्थमालारत्नम्-३७

आशैशवशीलशालिने श्रीनेमीश्वराय नमः ।

धाराधीशासादितसरस्वतीविरुदेन विप्रवर्गाग्रगेन कमनीयकवितालतालवालकल्पेन
परमार्हतेन धनपालविदुषा विरचिता

# ॥ तिलकमञ्जरी ॥

तदुपरि-

पूर्णतलगच्छीय-विबुधशिरोमणि-श्रीशान्त्याचार्यविरचितं

## टिप्पनकम्-

❀

तपोगच्छाधिपति-सर्वतन्त्रस्वतन्त्र-शासनसम्राट् श्रीविजयनेमिसूरीश्वर-
पट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन
श्रीविजयलावण्यसूरिणा विरचितश्च—

## परागः ।

❀

प्रकाशकः—श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिर, बोटाद, सौराष्ट्र.

❀

| वीरसंवत् | विक्रमसंवत् | नेमिसंवत् |
| --- | --- | --- |
| २४७८ | २००८ | ३ |

मुद्रक—
निर्णयसागर प्रेस, २६.२८
कोलभाट स्ट्रीट, मुंबइ नं. २ [का.२०]
तथा
कथासार, प्रस्तावना, टाईटल
मुद्रक
नयन प्रीन्टींग प्रेस-रीचीरोड-अमदावाद.

## प्राप्तिस्थान—

१ विजयलावण्यसूरीश्वर ज्ञानमन्दिर, बोटाद, सौराष्ट्र.
२ सरस्वती पुस्तक भण्डार, ठे. रतनपोल, हाथीखाना, अमदावाद.
३ मास्तर जसवंतलाल गिरधरलाल. ठे. १२३८ रुपासुरचंदनी पोळ, अमदावाद.

## द्रव्यसहायक—

साहित्यसृष्टिमां शिरोमणिसमा तिलकमञ्जरी जेवा जैनग्रन्थना प्रकाशन कार्यमां (अमदावाद) शाहपुर निवासी श्रेष्ठी **छोटालाल भायचंदे** जे सहायता समर्पण करी छे ते अनुमोदनीय अने ज्ञानरसिक श्रीमंतोने अनुकरणीय छे.

॥ ॐ अर्हं नमः ॥

# શ્રી તિલકમંજરી કથાનો અતિસંક્ષિપ્ત ભાવાર્થ:

લેખક:—**પન્ન્યાસ શ્રી સુશીલવિજયજી ગણી.**

ઉત્તર **કોશલ** દેશમાં **અયોધ્યા** નામની રમણીય નગરી છે. જ્યાં ઈક્ષ્વાકુવંશનો અલંકારભૂત **મેઘવાહન** નામનો રાજા રાજ્ય કરે છે. તેને **મદિરાવતી** નામની રમણીય પટ્ટરાણી છે. નવયૌવન વય અને વિપુલ વૈભવ છતાં એક પણ સંતાન નથી, આ બાબતનું રાજાને અત્યંત દુઃખ રહ્યા કરે છે.

એક દિવસ સવારના **ભદ્રશાલ** નામના મ્હેલની અગાશીમાં બેસીને રાજા–રાણી સંતાન સમ્બન્ધિ વાતચીત કરી રહ્યા છે. પ્હોર દિવસ ચઢયો છે. તેવામાં દક્ષિણ દિશા તરફથી ગગન માર્ગે આવતા એક પ્રશાન્ત મૂર્ત્તિ વિદ્યાધર મુનિરાજને નિહાળ્યા, અને દમ્પતી આશ્ચર્યમગ્ન બન્યા. મુનિ મ્હેલની નિકટમાં આવ્યા. રાજા–રાણી ઉભા થઇ થોડા સન્મુખ ચાલ્યા. મુનિ મ્હેલની અગાશીમાં ઉતર્યા. રાજા રાણીએ સત્કાર કરી સુવર્ણાસને બેસાર્યા. ભૂપતિએ મુનિજનને ઉચિત સર્વપ્રકારનો વિનયોપચાર કર્યા બાદ, ભૂતલ પર બેસી નમ્રતાપૂર્વક કહ્યું—

ભગવન્! આપના ચરણારવિંદના સ્પર્શથી અમિદૃષ્ટિથી અને પ્રણામ કરવાથી એમ સર્વ રીતે હું ભાગ્યશાલી બન્યો છું. આમ છતાં પણ વિશેષ તૃપ્તિની ખાતર વિનવું છું કે–'આ મારા રાજ્ય વૈભવોમાંથી આપને જેની જરૂરત હોય તે વિના સંકોચે સ્વીકારી મને આભારી કરશો!'

મુનિરાજે કહ્યું—'રાજન્! તમારા જેવા ઉદારાશયવાળા આવી પ્રાર્થના કરે તે ઉચિત છે, પરંતુ અમો નિઃસ્પૃહી મુનિ છીએ, ભિક્ષામાત્રથી મળેલ આહાર એજ અમારૂ ભોજન છે. તે પણ દેહને ટકાવી ધર્મસાધના કરવા માટેજ, નહિ કે આસક્તિથી. મુક્તિ એજ અમારા જીવનનું ધ્યેય છે.'

રાજન્! હવે હું તમને પૂછુ છું કે—

'આ નગરી કઈ? તમે કોણ? કયા ઉત્તમ વંશમાં તમારો જન્મ? આ નારી કોણ? શું નામ? તમો દમ્પતી અંતરમાં સંતપ્ત જણાઓ છો તે શાથી? આ સ્રી હમણાંજ રૂદન કરીને છાની રહી હોય એમ દેખાય છે તેનું કારણ શું? શું કોઇ પ્રિયબંધુનો વિયોગ થયો છે? અથવા તો કોઇ શું આકસ્મિક સંકટ આવી પડયું છે? છે શું? આ સર્વનો પ્રત્યુત્તર અમને જણાવવામાં કોઇ પણ જાતનો બાધ ન હોય તો સુખેથી કહો.'

ભગવન્! આપના જેવા નિસ્પૃહી પરોપકારી સંત–મહર્ષિ આગળ છૂપાવવા જેવું શું હોય? આપની પ્રશ્નમાળાનો પ્રત્યુત્તર સંક્ષેપમાં નીચે પ્રમાણે કહું છું—

'દિલીપ, રઘુ, દશરથાદિ રાજાઓની વંશપરંપરાની રાજધાની આ **અયોધ્યા** નામની પુરાણી નગરી છે. ઇક્ષ્વાકુવંશમાં જન્મ પામેલો, સમસ્ત ભારતવર્ષના ભૂપતિઓમાં સર્વ પ્રકારે આગળ પડતો અને તેનો ભોક્તા **મેઘવાહન** નામે હું નૃપતિ છું, અને ઉત્તમ રાજકુલમાં ઉત્પન્ન થયેલી **મદિરાવતી** નામની આ મારી મુખ્ય પટ્ટરાણી છે.'

'નથી પ્રિયબન્ધુવર્ગનો વિયોગ કે આકસ્મિક સંકટ, માત્ર નિ:સંતાનપણું એજ એક અસ્વસ્થતાનું કારણ છે.

એ એટલું બધું અસહ્ય થઇ પડયું છે કે–અમારા બન્નેની ઉનાળાની નાની રાત્રિઓ પણ એ ચિંતામાં ને ચિંતામાં રૂદનમય પસાર કરતાં શતવર્ષ જેવડી થઇ પડી છે.'

રૂદનનું કારણ માત્ર એજ કે–'આજે પ્રભાતે એની એજ ચિંતામાં ને ચિંતામાં સવેળા વહેલો જાગી ગયો, અને પાછો એના એજ વિચારમાં નિમગ્ન હતો તેવામાં બંદીએ પ્રસંગોપાત અપરવક્ત્ર છંદમાં ગાએલ શ્લોક મારા સાંભળવામાં આવ્યો—

" विपदिव विरता विभावरी ! नृप निरपायमुपास्स्व देवताः ।
उदयति भुवनोदयाय ते कुलमित्र माण्डलमुष्णदीधितेः ॥१॥ "

'રાજન્ ! જેમ રાત્રિ દૂર થઇ અને સૂર્ય ઉદય પામે છે તેમ તમારી આપદા દૂર થશે, અને તમારૂં કુલ જગતના ઉદયને માટે ઉન્નતિના પંથે જશે, રૂડીરીતે દેવતાની ઉપાસના કરો.'

સાંભળીને આનંદ થયો. રાજવૈભવ તજી સંતાન અર્થે અરણ્યમાં જઇ દેવની આરાધના કરવા નિર્ણય કર્યો. પ્રાતઃકૃત્ય કરી ચિત્રશાલાના આગણામાં ઓટલા પર બેઠેલી આ રાણીને દુઃખપૂર્વક કહ્યું—

'પ્રિયે ! તારે માટે સંતાન નિમિત્તે વરદાન મળે ત્યાં સુધી અરણ્યમાં જઇ કોઇ દેવની આરાધના કરવાનો મેં દઢ નિર્ણય કરેલ છે. આ કાર્ય પૂર્ણ કરી પાછો ન આવું ત્યાં સુધી, અહિંજ રહીને તું વડિલોની સેવા કરજે.'

સ્વામિની અણધારી આ વાત સાંભળી રાણી એકદમ મૂર્છિત બની, અને મૂર્છાનો વેગ શાંત થયે ગદ્‌ગદ્ કંઠે બોલી—

'આર્યપુત્ર ! સુખેથી કાર્ય સિદ્ધ કરો, પરંતુ હું તમારી સાથે આવીશ. તમારા વિના ક્ષણભર રહી શકું તેમ નથી. આમ છતાં મને મુકીને જશો તો હું જીવી શકીશ નહિં. બસ ! આપનું આ અંતિમ દર્શન કરી લઉં છું.'

આ રીતે હઠ કરી અરણ્યમાં જતાં મને અટકાવે છે, તો હે પૂજ્ય ! મુનિરાજ ! આપે પણ આને ઉચિત શિખામણ આપવી ઘટે છે. મુનિએ યોગનિદ્રાથી નિહાળીને કહ્યું—

'રાજન્ ! સંતાન પ્રાપ્તિને રોકનાર કર્મ ઘણું ભોગવાઇ ગયેલ છે. માત્ર સ્વલ્પજ બાકી છે. અરણ્યમાં જવાની જરૂરત નથી. અહીંજ (પ્રમદવનમાં) રહી અરણ્યોચિત કષ્ટ સહન કરી મુનિવ્રતની ક્રિયા કરો, અને રાજ્યની અધિષ્ઠાત્રી લક્ષ્મીદેવીની ઉપાસના કરો, તેજ અલ્પ સમયમાં ઉચિત વરદાન આપશે. વળી **અપરાજિતા** નામની મંત્રવિદ્યા પણ હું તમને આપું છું. તેનો પણ દેવપૂજા બાદ જાપ કરવો.'

આમ કહી મુનિએ વિદ્યા સમર્પી. **મદિરાવતીને** પણ ઉચિત નિયમો કરાવી વિદ્યાધર મુનિ ગગનમાર્ગે રવાના થયા.

ત્યારબાદ રાજા **મેઘવાહને** પ્રમદવનમાં આક્રીડ પર્વતની નજીક નાજુક મન્દિર બંધાવી, તેમાં લક્ષ્મીદેવીની ભવ્ય મૂર્તિ પ્રતિષ્ઠાપૂર્વક પધરાવી, આરાધના શરૂ કરી.

એકદા રાજા **શક્રાવતાર** નામના જિનમન્દિરે દર્શનાર્થે ગયા. દ્વારમાં પ્રવેશ કરતાંજ યુગાદિદેવ શ્રી **આદિનાથ** પ્રભુનાં દર્શન કરી બહાર આવતાં એક વૈમાનિક દેવને જોયા. હર્ષિત થયેલા રાજાએ તેમનું સ્વાગત કર્યું. વૈમાનિક દેવે પણ કહ્યું—

'રાજન્! ઇન્દ્રસભામાં ઘણીવાર તમારા ગુણોની પ્રશંસા સાંભળી મળવાની ભાવના થયેલ, તે આજે આદિદેવના દર્શન પ્રભાવે સફળ થઈ. હું સૌધર્મદેવલોકવાસી **જ્વલનપ્રભ** નામનો **દેવ** છું. સપરિવાર ગગનમાર્ગે જતો હતો, રસ્તામાં આ શક્રાવતાર તીર્થ કે જેમાં ઇન્દ્રે સ્વયં શ્રીઆદિનાથ પ્રભુની ભવ્યમૂર્ત્તિની પ્રતિષ્ઠા કરી છે. તેને નિહાળી એકાકી દર્શન કરવા ઉતર્યો છું.

અહિંથી શ્રી **નન્દીશ્વર** દ્વીપ જવા ચાહું છું. જ્યાં મારો પરમમિત્ર **સુમાલી** નામનો દેવ **સ્વયંપ્રભા** નામની દેવી સાથે જિનમન્દિરના દર્શનાર્થે ગયેલ છે, અને તેની સાથે લીલા અનુભવે છે.

આજ દ્વીપમાં તેની **રતિવિશાલા** નામની નગરી છે. તે વિવિધ ઉત્પાતોથી ઘેરાયેલી છે. આવા ઉત્પાતો તેના નાયકના મરણને સૂચવે છે. આથી મારા મિત્રને દુઃખ થાય તે સ્વાભાવિક છે. માટે તેને આશ્વાસન આપી તે દુઃખને શમાવવા અને પરલોકને હિતકારી સન્માર્ગમાં જોડવા હું ઇચ્છા રાખું છું.

આ કાર્ય તત્કાળ પતાવી સવારનાજ હું ત્યાંથી પાછો ફરીશ. કારણ કે—મારૂં પણ દેવાયુષ્ય અલ્પ છે. તેથી ધર્મારાધનમાં વિશેષ ઉદ્યમ કરવાનો છું.'

હે ઇક્ષ્વાકુવંશના ચન્દ્ર નૃપચન્દ્ર! સકલ વિઘ્નનો નાશ કરનાર આ **ચન્દ્રાતપ** નામનો હાર તમને સમર્પણ કરૂં છું, એમ કહી મેઘવાહન નૃપતિના કંઠમાં હાર સમર્પિ વૈમાનિક દેવ એકદમ અદૃશ્ય થઇ ગયો. રાજા હાર ખેસના છેડે બાંધી, શ્રી આદિનાથ પ્રભુના દર્શન કરી સ્વસ્થાનકે આવ્યો, અને સાયંકાલે શ્રી લક્ષ્મીદેવીની પૂજા કરી દૈવિક હાર આગળ ધર્યો.

એ સમયે ભયંકર અટ્ટહાસ્યનો ધ્વનિ ઉછળ્યો, અને ડાબી બાજુએ શબના મસ્તકની હારમાળાવાળો વેતાલને નિરખ્યો. નરપતિએ તેને અટ્ટહાસ્યનું કારણ પૂછ્યું. વેતાલે કહ્યું—

'રાજન્! લક્ષ્મીદેવીના પરિવારમાં હું અગ્રણી અનુચર છું. મને આહારનું પ્રદાન પણ કર્યા સિવાય તેં લક્ષ્મીદેવીની આરાધના શરૂ કરી? આથીજ મને આવું હસવું આવ્યું. અમે પ્રસન્ન હશું તોજ દેવી પાસેથી તમે વરદાન મેળવી શકશો!'

રાજાએ તુરતજ વિવિધ પ્રકારના ફળાદિ આગળ ધર્યાં. વેતાલે કહ્યું—

'રાજન્! અમે કોઇ માનવ કે પશુ–પંખી નથી કે આવું ભોજન કરીએ. અમારે તો માંસનો જ આહાર હોય છે. તે પણ અમને અનેક રીતે મળી શકે તેમ છે, છતાં પણ મારે તો લક્ષણવંતા રાજાની ખોપરી જ જોઇએ છે.

જેમાંથી નીકળેલા રૂધિરથી પવિત્ર–ઘમઘોર કાળી ચૌદશના દિવસે દુષ્ટ ભૂપતિએ હણેલા મારા પિતાને તર્પણ કરવાનું છે.'

ભૂપતિએ પણ પોતાનું મસ્તક કાપી ખોપરી આપવાનું સ્વીકાર્યું. વેતાલે દૈવિક તીક્ષ્ણ ખડ્ગ હાજર કરી. રાજાએ કહ્યું—

'આ દેવતાઇ શસ્ત્રના સ્પર્શને યોગ્ય હું નથી. આ મારા ખડ્ગથીજ મસ્તક કાપીને ખોપરી આપું! એમ કહી કરમાં પોતાની દેદિપ્યમાન ખડ્ગ પકડી સ્વ ગરદન પર ચલાવી. સહજ ગરદનને લાગતાજ તેની ધાર એકદમ બંધાઇ ગઇ. રાજા ખડ્ગ ચલાવવા ખુબ પ્રયત્ન કરે છે, છતાં ખડ્ગ આગળ ચાલતી નથી. રાજા પણ ધૈર્ય અને પ્રતિજ્ઞા વચનથી લેશમાત્ર ચલાયમાન થતો નથી.

એવામાં દેવાંગનાઓનો હાહાકાર શબ્દ થયો, અને આગળ લક્ષ્મીજીને જોયાં. ભૂપતિએ પૂછયું–

'આપ કોણ છો? અને અહીં શા માટે પધાર્યા છો?' લક્ષ્મીદેવીએ કહ્યું—

'રાજન્? હું રાજલક્ષ્મી છું! તારી ભક્તિથી આકર્ષાઇને તારૂં કાર્ય શીઘ્ર સફળ કરવાને આવી છું! જોઇએ તે માંગી લે!

રાજા કહે છે—

'ભગવતિ! આપના પૂનિત દર્શનથી હું કૃતાર્થ થયો છું, પરંતુ આપના અનુચરને મારા મસ્તકની ખોપરી આપવા મેં વચન આપેલ છે! ઘણી મહેનત કરૂં છું, છતાં ખડ્ગ કે બાહુ ચાલતા નથી, તો તે તુરત ચાલે તેવી કૃપા કરો જેથી હું પ્રતિજ્ઞા પૂર્ણ કરી અનૃણ થાઉં.'

લક્ષ્મીદેવીએ કહ્યું—'રાજન્? હું સૌમ્ય પરિવારવાળી છું! મારે ત્યાં આવા અનુચરો છે જ નહિં, પરંતુ તારી પરીક્ષા કરવા ખાતર **મહોદર** નામના પ્રતીહારે આ ઇન્દ્રજાલ રચેલ છે. માટે તે આગ્રહ જતો કર અને જેની જરૂર હોય તે માગી લે.'

રાજાએ કહ્યું—'હે રાજલક્ષ્મી દેવિ! આપ જો ખરેખર પ્રસન્ન થયા છો તો, રાણી **મદિરાવતી** વીર સંતાનને સુજન્મ આપનારી થાય તેવી કૃપા કરો.'

લક્ષ્મીદેવીએ પુત્ર વરદાન આપ્યું અને કહ્યું કે 'રાજન્? જ્યારે પુત્ર મોટો થાય ત્યારે આ **ચન્દ્રાતપ** હાર તેને પહેરવા માટે, અને વિપત્તિ સમયે વિપત્તિ હરવા માટે આપજો, એમ કહી હાર પાછો આપ્યો, અને તદુપરાંત **બાલારૂણ** નામની રત્નમય વીંટી આંગળીમાંથી કાઢી સમર્પણ કરી લક્ષ્મીદેવી અદ્રશ્ય થઈ ગયાં.

સુખમય રાત્રિ પસાર થઇ, પ્રભાતે આવેલ પૌરજનને સર્વ વૃત્તાંત કહી હાર તથા વીંટી બતાવ્યાં. સૌ કોઇ આશ્ચર્યચકિત થયા. અંતે ભૂપતિએ **મહોદધિ** નામના મુખ્ય રત્નાધ્યક્ષને રત્નભંડારમાં મૂકવા હાર આપ્યો. અને **વજ્રાયુધ** નામના સેનાધિપતિના પરમમિત્ર **વિજયવેગને** કહ્યું કે 'દક્ષિણપથમાં શત્રુસાથે સંગ્રામ ખેલી રહેલા **વજ્રાયુધને** રાત્રિના સંગ્રામમાં શત્રુનું જ્યારે આક્રમણ થાય ત્યારે તેને કાબુમાં લાવનાર આ વીંટી આંગળીમાં પહેરવા માટે મોકલાવજો, એમ કહી વીંટી પણ આપી.

ત્યારબાદ પૌરજનાદિથી પરિવરેલા ભૂપતિ મહાન ઉત્સવપૂર્વક રાજમન્દિરે ગયા.

[ અપૂર્ણ. ]

॥ ॐ अर्हं नमः ॥

# श्री तिलकमञ्जरी कथासारः

[ शिखरिणी-वृत्तम् ]

युगादीशं नत्वा ऋषभजिनराजं जगदिनं
तथा शान्तीशानं सुरपतिनतं शान्तिजनकम् ।
सुशीलं नेमीशं सुगुणयुतपार्श्वेशममलं
महावीरं धीरं समितभवतीरं शुभगिरम् ॥ १ ॥

[ शार्दूलविक्रीडित-वृत्तम् ]

श्रीमन्नेमिसूरीश्वरं सुचरणं तीर्थोन्नतौ प्रोद्यतं
सूरिं शास्त्रविशारदं कविवरं वाचस्पतिं व्याकृतौ ।
लावण्यं प्रगुरुं गुरुं च विमलं पन्न्यासदक्षाभिधं
स्मृत्वा चैव सदार्हतीं भगवतीं सत्यां च मुक्तिप्रदाम् ॥२॥

[ अनुष्टुप्-वृत्तम् ]

कमनीयां कथां चक्रे, नाम्ना तिलकमञ्जरीम् ।
भोजभूपालविज्ञप्त्या, धनपालपरमार्हतः ॥ ३ ॥
मनो मोदाय बालानां, संक्षेपरुचिशालिनाम् ।
पन्न्यासेन सुशीलेन, गणिना मुनिना मुदा ॥ ४ ॥

[ आर्या-वृत्तम् ]

तिलकमञ्जरी जलधेरुद्धृतः कौस्तुभस्तारः ।
कथाकुतुकिनां कण्ठे हारः स्यात् सत्कथासारः ॥ ५ ॥

अस्तितमामुत्तरकोशलेषु चिरन्तनी सूर्यवंशराजधानी रिपुभिरयोध्या काचिदयोध्यानाम्नी नगरी । तस्यां रघु-दिलीप-दशरथादिदिव्यक्षोणीपतिप्रथितेक्ष्वाकुकुलसम्भवो मेघवाहनो नामा सार्वभौमो नृपतिरासीत् । तस्य सचिवचयोह्यमानराज्यभारस्य सततमसीमसौख्यसागरनिमज्ज-

न्मानसस्यातिक्रामति तारुण्येऽपत्यचिन्तासन्तापश्चेतसि प्रादुर्बभूव । एकदा प्रहरमात्रे दिवसे भद्रकालसंज्ञकस्य मद्धामासादस्योपरि निषण्णः स्वदेव्या अन्तःपुरपरिजनोपास्यमानया मदिरावत्या सह प्रवृत्तालापः स दक्षिणापथादागच्छन्तं विद्याधरमुनिमवेक्ष्य बहलकुतूहलो देव्या साकमभ्युत्तस्थौ । स मुनिरपि मुहुरुपगीतस्वागतं तमवलोकयान्तस्तरङ्गित प्रीतिस्तदभिमुखं गगनतलादवततार । ऊर्ध्वकुट्टिमावतीर्णं तमुपसृत्य सपर्यया सत्कृत्य च सुवर्णमयासने समुपवेश्य स्वयमवनितलोपविष्टस्तेन पृष्टः सर्वमात्मवृत्तान्तमनपत्यतादुःखान्तमाचष्ट । तदनु च स्वदेव्या रोदननिदानमावेदयता तेन—

"विपदिव विरता विभावरी नृप ! निरपायमुपास्स्व देवताः ।
उदयति भुवनोदयाय ते कुलमिव मण्डलमुष्णदीधितेः ।। १।।"

इति निशावसाने प्राभातिककर्तव्यावेदनार्थप्रविष्टवन्दिवक्त्र—निर्गतमपरवक्त्रपद्यमाकर्ण्य तदनुसारमिष्टसिद्ध्यर्थमरण्यमध्युष्य देवताराधनमध्यवस्यता मया यावदहं सिद्धसमीहितस्ततः प्रत्यागच्छामि तावद्गुरुजन परिचर्यापरया त्वयाऽत्रैव स्थेयमित्यभ्यर्थिता देवी सपदि मूर्छिता । परिजनेनोपचरिता सती निःश्वस्य "सन्तानसिद्धये वनम्प्रस्थातुकामस्य ते नाहम्प्रति बध्नामि प्रस्थानम्, परं त्वया विरहिता क्षणमपि नाहं स्थातुं पारयामीति मामिह विसृज्य व्रजसि चेत् तवेदमन्तिमं दर्शनमित्यभिधाय करुणमश्रुधाराभिरनयाऽमन्दमक्रन्दि । तदस्यामवस्थायां मया किमनुष्ठेयमिति भवाननुज्ञातुमर्हति"

इत्युदीरितो मुनिस्तत्क्षणं योगनिद्रामाश्रित्योन्मीलितलोचनः प्रत्युवाच—

"नृपते ! किञ्चिदेवावशिष्टं सम्प्रति त्वदीयमपत्योत्पादप्रतिपन्थिदुरदृष्टं मया दृष्टम् । तस्मादरण्यप्रयाणसंकल्पमपहाय निजनिकेतनमेवाधितिष्ठन्नुपास्व क्षोणीपतिप्रतीक्ष्येक्ष्वाकुभरतभगीरथादिभूतपूर्वभूपतिभिरभ्यर्हितां भगवतीं **राजलक्ष्मीम्** । सैव तेऽभीष्टार्थवरमचिरेण वितरीष्यति । अपि चापराजिता नाम्नीं मन्त्रविद्यां तुभ्यं प्रतिपादयामि देवतार्चनानन्तरजपाय । नास्ति तदिष्टं यन्नेष्टे तदुभयमनुष्ठितं सम्पादयितुम् "

इत्यभिधाय तां विद्यामपि प्रत्यपादयत् । तदनु पुष्पफलपत्रांशुकैरत्नालङ्करणैश्च नृपकृतार्चां गृहीत्वा **मदीरावती**मपि कतिपयनियमानुपदिश्य च जम्बूद्वीपवर्तिप्रधानतीर्थप्रस्थानानुमतिं गृहीत्वा मुनिः स्वासनादुत्तस्थौ । अनूत्थिताभ्याञ्च ताभ्यां कृत प्रणतिभ्यां दम्पतिभ्यामाशिषं दत्त्वा अन्तरिक्षमार्गमुत्पपात ।

तदनु समाहूतगुरुबान्धवबुद्धिसचिवैः साकमालोच्य प्रमदवनमध्य एवाक्रीडपर्वतान्तिके निर्मापिते देवालये लक्ष्म्याः प्रतिमाम्प्रतिष्ठाप्य मुनिदर्शितदिशा प्रत्यहमुपासीनस्य तस्य बहुतिथेषु दिवसेष्ववसितेषु नृपतिरसावेकदा पर्वदिवसे श्रियो देव्याः सायन्तनीमर्हणां सम्पाद्यपृथिव्याम्प्रथमतीर्थतया प्रथितं **शक्रावतारं** नामसिद्धायतनमव्राजीत् ।

तत्र प्रविशन्नेव तद्द्वारदेशे भगवन्तमादिनाथम्प्रणम्याभिमुखमागच्छन्तमेकं वैमानिक-मद्राक्षीत्। दर्शनमात्रेण प्रतीतदिव्यताकस्य तस्य सौम्येऽपि शरीरे, लोकोत्तरप्रभाप्राग्भारेणातीव विस्मितमानसोऽसौ कृतार्थमात्मनं मत्वा रचिताञ्जलिरञ्जसा किञ्चिदुपसृत्य स्वागतमकार्षीत्।

वैमानिकोऽपि तमुपसृत्य प्रचुरप्रीतिजुषा चक्षुषा सुचिरमामूलचूलमवलोक्य मधुरेण स्वरेण वक्तुमारेभे—

"राजन्! स त्वमद्य चक्रवर्तिलक्षणैश्चक्रवर्तित्वेन लक्ष्यमाणोऽसि यो देवासुरसन्दोहसंकुले देव-सदसि पुरन्दरपुरस्तान्नृपतिततिवर्णनावसरे मर्त्यभुवनवार्ताऽऽवेदननियुक्तैः प्रमुखदेवजनैः शौर्यौ-दार्यादिगुणैः स्तूयमानस्तत्सदस्येन मया श्रुतोऽसि। अतर्कितोपनतेनेदानीन्तनेन त्वदवलोक-नेन मम चक्षुः कृतार्थमजनि, फलितञ्चादिनाथदर्शनजातमधुनैव पुण्यञ्जातम्।

अहन्तु सौधर्मसुरलोकवास्तव्यो ज्वलनप्रभनामधेयो वैमानिकः स्वर्गात् प्रस्थाय गगनमार्गेण गच्छन् पथि देवालयमिमं वीक्ष्य भगवता शक्रेण स्वयमिहैव तीर्थङ्कराणामाद्यो भगवान् ऋषभदेवः प्रतिष्ठापित इति निश्चित्याकाशदेश एव स्वपरिजनान् परिहाय एकाकितयैवात्रागत्य भगवन्तमा-दिनाथमद्राक्षम्।

अतः परमहं नन्दीश्वराख्यं द्वीपं जिगमिषामि, यत्र मत्परममित्रभूतः सुमाली नाम देवः स्वयम्प्रभानाम्न्या देव्या जिनायतनलक्ष्मीं द्रष्टुमानीतो नन्दीश्वरोदसागरनिकटवर्तिकटकका-ननेषु कान्तासमेतः क्रीडति। तस्य च तद्द्वीपवर्तिनीं रतिविशालानाम्नीं नगरीमधिवसतो महदरिष्टमुपस्थाय महत् कष्टमनुभावयति समग्रपरिजनम्, सूचयति च तस्य तत्प्रधानकलत्रस्य वाऽचिरभावि देवलोकात् प्रच्यवनम्। अतः सर्वभावानां भङ्गुरस्वभावताकीर्तनेनादसीयवेदना-मुपशमय्य प्रातस्ततोऽपि मया परावर्तितव्यम्। यतो ममापि स्वर्गोपभोगजनकं पुण्यमुपक्षीणप्रायम्, अतः स्वर्गच्यवनकालोचितं शुभकर्माविलम्बेनानुष्ठेयम्।

"इक्ष्वाकुकुलचन्द्र! चन्द्रातपाख्यमखिलप्रत्यूहापहारं हारं तुभ्यमुपहरामि, अयं हि क्षीरोदेन स्वरक्षितरत्नकोशादतिस्थूलानि वर्तुलानि च मुक्ताफलान्युद्धृत्य स्वयमतिकौतुकेनागुम्फितः, स्वयंवरसमनन्तरं स्वभर्तुर्विष्णोर्गृहङ्गच्छन्त्या लक्ष्म्याः कण्ठाभरणताङ्गमितः, लक्ष्म्यापि जयन्त-जन्मोत्सवे ज्येष्ठभार्येति मत्वा इन्द्राण्यै समर्पितः, इन्द्राण्यापि सुचिरं निजघनस्तनमण्डलमण्डनता-मापाद्य स्वसखीस्नेहवशेन मद्भार्यायाः प्रियङ्गुसुन्दर्या ग्रीवायामर्पितः। क्वचन धर्मकर्मणि स्वभार्यां नियुज्य प्रस्थितेन मया तद्विरहवेदनापनोदनाय स्वकण्ठे समारोप्य मया नीतः। मत्-प्रणयप्रार्थनाभङ्गमकृत्वा निर्वितर्कमिमं गृहाण मदुपहारं हारम्। क्षीणायुषो मम स्वर्गच्यवनोत्तरं मां विमुच्य स्वर्ग एव तिष्ठेदयं हारः, भवता गृहीतस्त्वयं कदाचन मर्त्यभुवनजनिष्यमाणयो-

राघयोर्दम्पत्योः पुनर्नयनानन्दनाय सम्भवति" इत्युक्त्वा कण्ठकाण्डान्मुक्त्वा नरेन्द्राय हारमुपजहार। नरेन्द्रोऽपि सादरञ्जग्राह। तदनु वैमानिकोऽपि झटिति तिरोबभूव।

तदनन्तरं तं हारमतिनिश्चलेन लोचनेनावलोक्य स्वकीयोत्तरीयाञ्चले बध्वा च शक्रावतारमभ्यङ्गत्वा भगवन्तमादिनाथमाराध्य स्वसदनमागत्य श्रियै सायन्तनसपर्यासमये "त्वद्वरिवस्यानुभावेनैव लब्धमिदं दिव्यमाभरणं दिव्यां त्वदीयमूर्तिमेवालङ्कर्तुमर्हति" इत्यभिधाय समर्पयामास।

अत्रान्तरे नितान्तगम्भीरो भुवनत्रयोत्थापितप्रतिध्वनिर्हासध्वनिरुत्तस्थौ। तमाकर्ण्य तदनुसन्धानसञ्चारितचक्षुरसौ क्षितिपतिर्वामभागे सन्निहितमेकं शवस्रगलङ्कृतशिरस्कं वेतालमद्राक्षीत्। तमामूलचूलमवेक्ष्य तादृगट्टहासकारणमप्राक्षीच्च।

"श्रीदेव्याः प्रधानपरिवारं मामगाहारदानमात्रेणाप्यपरितोष्य यत् तस्या आराधनमुपक्रान्तं, तदेव मदीयहासकारणम्। यतः सेव्यदेवतापार्श्ववर्तिजन एव सेव्यसेवकयोः सम्बन्धमादधानः सेवकसमीहितसिद्धावुपकरोति" इत्युक्तवति वेताले तदुक्तमतियुक्तमभ्युपेत्य विविधफलमूलसंवलितमोदकादिकं भक्ष्यबलित्वेन तस्मै परिवारायापि नृपतिरुपकर्तुमङ्गीचकार। तन्निशम्य पुनरपि सहासमसौ जगाद—

नृपते! राक्षसा वयं न फलानि मूलानि मोदकानि च मानवा इवाहरामः, अपि तु व्याघ्रा इवामिषम्, तदपि क्षुद्रसाधकशरीरेष्वेव लभ्यम्। अतस्त्वया संग्रामनिहतेषु क्षत्रियक्षोणीपतिषु कस्यचिल्लोकत्रयश्लाघ्यौदार्यगाम्भीर्यगुणस्य नरपतेरभिनवं शुभलक्षणोद्भासुरं कपालकर्परमेकमुपहर, यन्निर्गतैः रुधिरैः पुण्यासु कृष्णचतुर्दशीषु दुष्टक्षत्रियक्षोणीपतिनिहतस्य स्वपितुस्तर्पणं कुर्याम्। तन्निशम्य नृपतिः प्रत्युवाच—

'प्रेतप्रवर! संग्रामेषु निहतानामप्यसंख्यक्षत्रियक्षोणीपतीनामनपेक्षणीयतया मया न संगृहीतानि कपालानि। अतस्तत्प्राप्तये प्रतीक्ष्यतां कियान् कालः, अन्यथा गृह्यतां मदीयमेव कपालम्, यदि भवदभिमतगुणकम्भवेत्' इत्याचक्षाणे नृपे शुभलक्षणोपेतं तदीयं शिरःकपालमेव ग्रहीतुमङ्गीकृत्य वामकरतलाकलितकपालकर्णवर्तिकायां कर्तिकां निघृष्य दक्षिणपाणिना तस्मै ददौ।

अथापि पृथ्वीपतिर्धैर्यन्दधानः—राक्षसेन्द्र! दिव्यमस्त्रविधं नास्मादृशां करसम्पर्कमर्हति, किन्तु मामकीन एव कृपाणः करिष्यति भवदभिमतं कार्यमिति ब्रुवाणस्तत्क्षणमेवाबद्धपरिकर आराध्यदेवतां प्रणम्य वामकरेण गृहीतोर्ध्वबद्धकचकलापो दक्षिणकरेण कृपाणमाकृष्य स्कन्धतले स्थापयामास। शिरस्यर्धच्छिन्नग्रीवे सति चलितुमक्षमं दक्षिणबाहुमवेक्ष्य विस्मयमापन्नो वामेन पाणिना केशकलापादवतारितेन कृपाणमादाय कर्तनसौकर्याय कृतकर्तनरन्ध्रं प्रकटयितुमवनमिते शिरसि भूयोऽपि कृपाणं व्यापारयन् मूर्छामकिञ्चिद्विलुप्तसंज्ञः स्वप्न इव देवाङ्गनाजनहाहा-

कारमश्रौषीत्। तदनुसारसञ्चारितचक्षुः पुरस्तात् किञ्चिदन्तिके देवीं श्रियमद्राक्षीत्। बिभीषिकापन्नस्तामप्राक्षीच्च--कल्याणि! का त्वम्? किमर्थञ्च देवतामन्दिरमिदमागतासि?। सा प्रत्यवोचत्—'राजन्! मेदिनीपालमौलिलालितपादतला राजलक्ष्मीरहं त्वदभिमतार्थसम्पादनार्थमेवागतास्मि। कथय किमस्ति त्वदभिप्रेतं कार्यं वस्तु? नृपोऽपि तदवस्थ एवादरभरेण प्रणम्य गद्गद्गिरा जगाद—

भगवति! त्वद्दिव्यरूपावलोकनेन कृतार्थोऽहं न किञ्चिदन्यदभ्यर्थये, अपि तु त्वत्परिवारप्रमुखाय रात्रिञ्चराधिपतये समर्पयितुमुत्तमाङ्गं कृन्ततो ममाकस्मादाकुण्ठितवीर्यौ बाहू पुनरुज्जीवितसामर्थ्यौ स्यातां, येनाहमनृणः स्यामित्येतदेव'। इत्याकर्ण्य भूयोऽपि भगवती श्रीरवादीत्—

'नरेन्द्र! सर्वदा सौम्यपरिजनपरिवृताया मम न जातु नक्तञ्चराः परिवारतामर्हन्ति, योऽयं बीभत्सवेषाकृतिभ्यां तव पुरस्तादुग्रकावमकार्षीत्, नासौ नक्तञ्चरः, अपि तु मत्प्रतीहाराणामग्रेसरो महोदरो नाम यक्षः सत्त्वपरीचिक्षिषया मायाजालं निर्मायोपक्षिप्तवान्। अतो विजहीहि तस्मै स्वकीयोत्तमाङ्गोपहरणदुरध्यवसायम्। सर्वातिशायिभिस्तव सत्त्वसाहसादिभिरतिप्रसादितहृदयाऽहमस्मीति वृणीष्वाभिमतं वरम्, सत्त्वरमहं सम्पादयामि सर्वं यद्यन्मनसि ते वर्तते' इत्यालपन्तीं तामुपचितानन्दथुरसौ नृपः सप्रश्रयम्प्रत्यवादीत्—

'देवि! नूनमर्हसि प्रसन्ना स्वप्रणयिजनेभ्यः सर्वमपि प्रणिदातुम्, परमहं पैतृकैरेवोपभोग्यवस्तुभि स्तुष्यामि, न जात्वभिलष्यामि ततोऽधिकमैहिकमामुष्मिकं वा किञ्चन। केवलं मदिरावती मे देवी साम्प्रतं यावदप्रसूतापत्या यथा जगदेकवीरधीरमात्मजम्प्रसूयेक्ष्वाकुवंशनृपमहिषीणां महिमानमर्हति, तथा प्रतिविधातुमर्हसि' इत्युक्तवति राजनि राजलक्ष्मीरभिलषितात्मजोत्पत्तिवरं दत्त्वा जनिष्यमाणस्य तदात्मजस्य नवतारुण्यश्रियामेधिष्यमाणायामाभरणाय विपत्तिवेलायामुपकरणाय च चन्द्रातपाभिधानं हारमपि तस्मै प्रत्यर्पयामास। स्वकरतलादवतार्य बालारुणाख्यं रत्नाङ्गुलीयकमपि समर्पयामास। तदनु हिमालयशिखरवर्तिनि स्वनिवासभूते पद्ममहाह्रदे प्रत्यावर्तनाय झटिति तिरोबभूव।

व्यतीतायाञ्च तस्यां रजन्यामसौ प्रातरुपस्थितान् पौरजनान् शक्रावतारगमनमारभ्य राजलक्ष्मीस्वस्थानप्रत्यागमनान्तं यथावृत्त प्रदोषवृत्तमुक्त्वा दिव्यं हारमङ्गुलीयकञ्चोपदर्श्य महोदधिनाम्ने प्रधानरत्नाध्यक्षाय तदुभयं निक्षिप्य च चन्द्रातपाभिधानो हारश्चिन्तामणिप्रभृतीनां प्रधानरत्नानां मध्ये स्थापनीयः, बालारुणाख्यमङ्गुलीयकन्तु रजनीयुद्धेषु प्रबलशत्रुसैनिकाक्रान्तस्य वज्रायुधस्य करतलालङ्करणतां नेतव्यमिति तत्प्रधानप्रणयिनं विजयवेगं विज्ञाप्य मर्यादामतिक्रान्तानां दुष्टसामन्तानां दमनाय दक्षिणापथमधितिष्ठतो वज्रायुधस्य पार्श्वे प्रस्थापयितुमाज्ञपयामास। तदनु तैः पौरजनैः परिवृतो राजा राजकुलमगमत्।

[अपूर्णः]

॥ ॐ अर्हं नमः ॥

## ❀ प्रस्तावना ❀

मुनीन्द्रं तीर्थपं सार्वं, नौमि नेमिं जगद्गुरुम् ।
लावण्यशीलशालिनं, दक्षमोदक्षमं मुदा ॥ १ ॥

सुविदितमेतदनवद्यगद्यपद्यविद्याविद्योतितान्तःकरण-सुमनोमनोरमनोमण्डलीषु, यदुत—गद्यं पद्याद्विशिष्यते। यद्यपि गद्य-पद्यभेदाभ्यां श्रव्यकाव्यमुभयविधम्। तत्र वृत्तबन्धविरहितं काव्यं गद्यम्, तद्बद्धञ्च पद्यम्। तथापि पद्यकाव्ये प्रतिनियन्त्रिताक्षर-मात्रानुवृत्त-वृत्तबन्धमनुरुन्धानः कविः सनिर्बन्धोऽपि न निबन्धुमीष्टेऽभीष्टरसानुगुण-गुणरीत्यलङ्कारान्, वैयञ्जनिकार्थसम्भारांश्च। अपि च कवेश्छान्देनातिस्फुटोऽप्यर्थः पददारिद्र्याद् दुर्वेद्यतामापद्यते। कृतमधिकेन ? वस्तुतस्तत्र कमनीयकाव्यजननी कविप्रतिभाभगवती शृङ्खलितेव विपद्यते, व्यापद्यते वा सद्यो दुर्बाधित्वमात्मनो विशङ्कमाना।

**गद्य-काव्योत्कर्षबीजम्**

गद्यकाव्ये तूक्तनियन्त्रणनिर्मुक्ततया कविरप्रतिहतं प्रभवति यथायथं प्रथयितुमात्मनः प्रतिभामिति तत्र तत्त्वतस्तदीयं समस्तमन्तस्तत्त्वमुद्भासते। तदुक्तम्—

"कथायां सरसं वस्तु, गद्यैरेव विनिर्मितम्।
क्वचिदत्र भवेदार्या, क्वचिद् वक्त्राऽपवक्त्रके ॥ १ ।" इति

अत्र वक्त्रापवक्त्रकपदेनोपलक्षणविधयाऽन्यच्छन्दसामपि ग्रहणान्मध्येगद्यकाव्यं तदन्यच्छन्दोबद्धकतिपयपद्यसत्त्वेऽपि न न्यूनता। तस्मात् स्वच्छन्दतया शक्यसर्वांगसौन्दर्यके गद्यकाव्ये पद्यकाव्य इवैकाङ्गसङ्गि सौन्दर्यं न कवेरुत्कर्षाय कल्पते, प्रत्युत सर्वाङ्गसौन्दर्यसम्पादनादाक्ष्यमेवोपक्षिपतीति कविरत्नोत्कर्षपरीक्षणोपायतया गद्यकाव्यं सहृदयसामाजिकजनान्निकषा निकषायतेतराम्। तस्माद् गदितुमर्हमित्यर्थे विशिष्य गद्यपदमनुशिष्यते, सामान्येन तु पद्यपदं पादवत्यर्थे। तस्मात् स्वच्छन्दमुद्भाव्याद् गद्यकाव्यात् पादानुपजीव्य निष्पद्यमानपद्यकाव्यस्यावद्यत्वं गद्य-पद्यपदव्युत्पत्तिरपि व्यनक्ति।

**जैनजगति प्रभूतं साहित्यं गद्यात्मकम्**

प्राच्यप्राज्यगणधरनामपुण्यकर्मणा संख्यातीतदेशकालभावलीनभावभावभावनानिपुणयाऽप्रतिमया प्रतिभया भासुरैः श्रुतकेवलिभिः सर्वाक्षरसन्निपातितया विविधनिबन्धनिबन्धनवैदग्धीदिग्धवाग्वैभवैरपि श्रीमज्जिनेन्द्रचन्द्रवदनारविन्दतस्त्रिपदीमासाद्यान्तर्मुहूर्त्तेनानेहसा द्वादशाङ्गीं प्रणेतृभिर्गणधरैर्गुम्फितेषु जैनागमेषु बाहुल्येन गद्यात्मकत्वं दृष्टिपथमवतरति।

विश्ववन्द्यस्य विश्वपूज्यस्य परमेश्वरस्य श्रीमहावीरजिनेन्द्रस्य शिष्यत्वेन प्रसिद्धस्य गुणिगणमणि–'श्रीधर्मदासगणिवर'--विरचिता प्राकृतवाग्देहा गद्यात्मिकाप्यासाद्यतेऽतीवप्राचीनतमा 'वसुदेवहिण्डी' महाकथा कथासाहित्ये ।

पूर्वधरेणापूर्वतत्त्वज्ञानपारावारपारीणेन सूरिपुरन्दरेण भगवता श्रीमदुमास्वातिना जैनराद्धान्तरहस्यमयं समग्रं श्रीतत्त्वार्थसूत्रं गद्यत्वेनैव गुम्फितं वरीवर्तीति ।

न्यायशास्त्रे तु प्रमाणसम्राट्स्याद्वादविद्योदधि'श्रीदेवसूरिकुञ्जर'कृतप्रमाण--नयतत्त्वालोकालङ्कारः स्वोपज्ञ'स्याद्वादरत्नाकर'--टीकोपेतो ग्रन्थोऽनवद्यगद्यतामञ्चतीति ।

कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिभगवत्प्रणीतं 'श्रीसिद्धहेमचन्द्रशब्दानुशासन'नामकं स्वोपज्ञपञ्चाङ्गीभूतं संस्कृत–प्राकृतादिभाषासप्तकव्युत्पादकं महाव्याकरणमपि गद्यात्मकमेव सन्दृब्धं दरीदृश्यते । 'छन्दोऽनुशासनम्, काव्यानुशासन'–श्वेति छन्दःशास्त्र–काव्यशास्त्रग्रन्थावपि तैरेव पूज्याचार्यप्रवरैश्च गद्यमयौ प्रणीतौ स्तः ।

मोहालिप्त–शेमुषीदीप्त–पूज्यश्रीपादलिप्ताचार्यवर्यविरचिता चारुरङ्गवती 'तरङ्गवती' कथाऽपि गद्यानुस्यूतैव समुपलभ्यत इति ॥

**जैनेतरजगत्यपि विपुलं साहित्यं गद्यमयम् ।**

अत एव वाग्वैभवप्राग्भारोद्भासि–शेषावतारोऽपि पतञ्जलिर्गद्यात्मकमेव महाभाष्यश्चरकञ्च चकार । अत एव च व्याकरणकरणनैपुणीकोऽपि पाणिनिराञ्जवमुद्दिश्य गद्यरूपाण्येव सूत्राणि प्राणैषीत्, धीमान् कात्यायनश्च वार्त्तिकानि । एवमन्येऽपि प्राचीनाः सूत्र–वर्त्तिक–भाष्यभूता ग्रन्थाः प्रायेण गद्यानुस्यूता एवोपलभ्यन्ते । संहिता–ब्राह्मणभागाभ्यां विभक्तस्यापौरुषेयस्य वेदस्यापि विधि–निषेधार्थवादात्मकब्राह्मणभागस्तु गद्यात्मक एवाद्याप्यासाद्यते । संहिताभागेऽपि यजुस्संहिताया आदितः कियदंशे छन्दःकल्पनया पद्यात्मकत्वोपपत्तावपि अंशान्तरे गद्यात्मकतैवावशिष्यते । स्मृतीनामृषिप्रणीतानां गद्यात्मकत्वे तु विप्रकीर्णानां वर्णानामेकस्यापि वर्णस्यावापोद्वापाभ्यां केनाप्यर्थपरिवर्तनापत्तिभिया छन्दोबद्धेन पद्यात्मना प्रणयनम् । वाल्मीकिप्रणीतस्यादिकाव्यस्य रामायणस्य पद्यात्मकत्वन्तु पारायणे स्वराणामारोहणावरोहणाभ्यां सङ्गानसरण्या सौश्रव्यसम्पत्तये । अत एव महर्षेस्तत्प्रणेतुराश्रमे लव–कुशाभ्यां तद्गानमुक्तमुपपद्यते । तथाविधपारायणन्तु पुण्यातिशयाय कल्पते, तत्काव्यनायकस्य श्रीमतो रामचन्द्रस्य सत्वरसाम्मुख्याय च । एवमेव महाभारतस्य पुराणानाञ्च पद्यरूपत्वमपवादतयोपपाद्यम् । गद्यात्मकत्वन्तु काव्यानामौत्सर्गिकम् ।

इत्येतदखिलमालोच्य दण्डीव दशकुमारचरितम्, सुबन्धुरिव वासवदत्ताम्, बाणभट्ट इव कादम्बरीम्, महाकविमानसमरालो धनपालोऽपि गद्यमयीमेव तिलकमञ्जरीं मञ्जसा जग्रन्थ, तच्च गद्यकाव्यम् ।

**कथं गद्यमयी तिलकमञ्जरी?**

**कस्मिन्काव्यभेदे तिलकमञ्जरी ?** गद्यकाव्यं मुक्तक–वृत्तगन्ध्युत्कलिकाप्राय–चूर्णकभेदैश्चतुर्विधमभ्यधायि, परमत्रोत्कलिकाप्रायमेव प्रायशो गद्यम्,

"आद्यं समासरहितं, वृत्तभागयुतं परम् । अन्यद्दीर्घसमासाढ्यं, तुर्यञ्चाल्पसमासकम् ॥ "

इत्येवं तद्भेदचतुष्टयस्य तत्र तत्र लक्षितत्त्वात् ॥

**साहित्यदृष्ट्या पात्रपरिचयः** (१) अत्र हरिवाहनोऽनुकूलधीरोदात्तनायकः । तल्लक्षणन्तु–"अनुकूल एकनिरतः" । "अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः॥ स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥" इति ।

(२) विद्याधरी तिलकमञ्जरी पाणिग्रहणात् प्राङ् मुग्धा परकीया च, तदुत्तरन्तु मध्या स्वकीया च नायिका । तदुक्तम्–"परकीया द्विधा प्रोक्ता, परोढा कन्यका तथा"। "कन्यात्वजातोपयमा सलज्जा नवयौवना" इति । प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ॥ कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥

**कोऽत्र रस ?** पूर्वरागात्मकविप्रलम्भशृङ्गारः प्रधानरसः । तल्लक्षणन्तु–"यत्र तु रतिः प्रकृष्टाः नाभीष्टमुपैति विप्रलम्भोऽसौ" इति ।

"श्रवणाद्दर्शनाद्वापि, मिथःसंरूढरागयोः ।
दशाविशेषो योऽप्राप्तौ, पूर्वरागः स उच्यते ॥" इति च ॥

**का रीतिः ?** पाञ्चाली प्रधानरीतिः । तल्लक्षणन्तु–"समस्तपञ्चपपदो बन्धः पाञ्चालिका मतः" इति ।

**कोऽत्रगुणः ?** माधुर्यम्प्रधानगुणः। तल्लक्षणन्तु–"चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते"इति ।

## –अथ दशकुमारचरित–वासवदत्ता–कादम्बरीभ्योऽस्या उत्कर्षः–

१. दशकुमारचरिते कथाप्राग्भारभरिते पदलालित्यादिगुणसत्त्वेऽपि कथानामत्याधिक्येन तच्छ्रवणप्रवणतया वैयग्र्यमन्तःकरणमापद्यते ॥

वासवदत्तायामपि प्रत्यक्षरश्लेष–यमकानुप्रास–प्रासक्रशितकथांशस्यातीव फल्गुतया न मनागपि वल्गुत्वमुपपद्यते ।

तस्मात् कादम्बरी तदुभयमधरीचरीकरीति । तिलकमञ्जरी तु तामपीत्यत्र नास्त्यतिशयो-

क्लिशोऽपि । तथाहि– पुण्डरीकशापाच्चन्द्रात्मनश्चन्द्रापीडस्य प्राणोत्क्रमणकीर्त्तनेन कादम्बरी कथायामापाततोऽप्यमङ्गल्यः करुणविप्रलम्भशृङ्गारः प्रधानरसः, तिलकमञ्जरीकथायान्तु पूर्वरागात्मक एवासाविति व्यक्तो व्यतिरेकः ।

२. किञ्च कादम्बर्यामगणितविशेषणैर्वर्णनाडम्बरः कथारसास्वादं व्यवदधानो व्याहन्ति, तिलकमञ्जर्यान्तु प्रतिपदमतीक्षितप्रागुण्यभूषणैः परिगणितविशेषणैर्वर्णनमभ्यर्णतामेवाधत्ते कथा-रसानामित्येषोऽपि व्यतिरेकः ।

३. अपि च कादम्बर्यामनुपदवर्णितवर्णनाटोपौपयिकविशेषणगवेषणप्रवर्त्तमानान्तःसंघट्टेन भट्टेन यमकानुप्रासाभ्यां शब्दसौन्दर्यमुपैक्षि, तिलकमञ्जर्यान्तु सर्वतोमुखकाव्योत्कर्षधनपालेन धनपालेन परिसंख्याद्यर्थालङ्कारस्थलेऽपि शब्दालङ्कारप्राग्भारः प्रतिपदमपैक्षीत्यपि वैलक्षण्यमुपल-भ्यते । यथा–अयोध्यावर्णने

"उच्चापशब्दः शत्रुसंहारे, न वस्तुविचारे ।
गुरुवितीर्णशासनो भक्त्या, न प्रभुशक्त्या ।
वृद्धत्यागशीलो विवेकेन, न प्रज्ञोत्सेकेन ।
अवनितापहारी पालनेन, न लालनेन ।
अकृतकारुण्यः करचरणे, न शरणे ।" इत्यत्र श्लेषानुप्राणितपरिसंख्याल-

ङ्कारस्थलेऽपि प्रतिवाक्यमन्त्यानुप्रासो न्यवेशि ।

एवम्–"सतारकावर्ष इव वेतालदृष्टिभिः, सोल्कापात इव निशितप्रासदृष्टिभिः" इत्यत्र सभर-संघट्टोत्प्रेक्षास्थलेऽपि ।

एवम्–"सगरान्वयप्रभवोऽप्यमृतशीतलप्रकृतिः, शत्रुघ्नोऽपि विश्रुतकीर्त्तिः, अशेषशक्त्युपे-तोऽपि सकलभूभारधारणक्षमः, रक्षिताखिलक्षितितपोवनोऽपि त्रातचतुराश्रमः" इत्यत्र विरोधा भासस्थलेऽपि ।

एवम्– वैताढ्यगिरिवर्णने–मेरुकल्पपादपालीपरिगतमपि न मेरुकल्पपादपालीपरिगतम्, वनगजालीसंकुलमपि न वनगजालीसंकुलम्" इत्यत्र विरोधाभासस्थलेऽपि यमकं पर्यरक्षि ।

एवम्– मेघवाहननृपवर्णने—"दृष्ट्वा वैरस्यवैरस्यमुज्झितास्त्रो रिपुव्रजः ।
यस्मिन् विश्वस्य विश्वस्य कुलस्य कुशलं व्यधात् ॥"
इत्यतिशयोक्त्यलङ्कृतपद्येऽपि ॥

४. किं बहुना ? श्रुत्यनुप्रासेन प्रायः सर्वत्रैव सुश्रव्यत्वं समपादि ॥

५. किञ्च कादम्बर्यामन्यत्रान्यत्रोपलब्धपूर्वा एव शब्दा उपलभ्यन्ते, तिलकमञ्जर्यान्तु 'तनी-

मेण्ठ–लम्बा–लाकुटिक–लयनिका–गल्वर्कप्रभृतयोऽश्रुतपूर्वा अपीत्यस्या अपूर्वापूर्वशब्दरत्नाकरात्मककविकृतित्वमपि व्यतिरेकः ॥

"तिलकमञ्जरीमञ्जरिसञ्जरिलोलद्विपश्चिदलिजालः ।
जैनारण्येऽसालः कोऽपि रसालः पकाल धनपालः ॥ १ ॥"

**प्रकृतमहाकवेरितिवृत्तम्**

अस्ति काचिदखण्डब्रह्माण्डमण्डलाखण्डलस्य मर्त्यभुवनमण्डलस्य महामहिषीवासीमसौभाग्यसम्पद्विशाला भारतमहाभूरुहोत्तुङ्गशाला विशालानाम्नी समधिकधाम्नी नगरी ।

अदसीयमध्यप्रदेशसंकाशमान'सांकाश्य'समाख्यनिवेशलब्धजन्मा 'देवर्षि'नामा भूदेवर्षिरासीत् ।

तस्यानेकश्रीमन्मान्यस्य स्वसद्वैदुष्यसन्तुष्यदवनीपतिततिप्रतिपादितातिमात्रधनसम्पदा दान्यस्य वश्रम–क्रमाभ्यामभ्यस्तसमस्तवाङ्मयः सकलासु ललितकलासु कलितनिरतिशयोदयः 'सर्वदेव'नामाऽऽत्मजन्मा बभूव । तस्य 'धनपाल'नामा ज्यायान्, 'शोभन'नामा च कनीयांस्तनूजन्मा. तयोः कनीयसी 'सुन्दरी'नाम्नी चैका कन्यका समजनि ।

तत्कुटुम्बनिकुरम्बमितस्ततो विघटितमपि सिन्धुराजसमये–ऽवन्तिराजधान्या एवान्तर्न्यविविक्षतेति लक्ष्यते । समुल्लसद्विमल–विप्रकुलबालतोचितबाह्यान्तरद्युतिजालः श्रीधनपालः शैशवादेवाभ्यस्यन्नविकलया कलया साकमखिलवेद–वेदाङ्ग–स्मृतीतिहास–पुराणेषु प्रकाण्डपाण्डित्यमापन्नस्तरुणिमनि 'धनश्री'नाम्नीमतिकुलीनां कन्यकामुदवोढ ।

स च मालवदेशाधिपतेर्मुञ्जराजस्य, तद्भ्रातृव्यस्य भोजराजस्य च समकालिकः श्रूयते ।

१०३१ वैक्रमसंवत्सरादारभ्य १०७८ वैक्रमसंवत्सरं यावन्मुञ्जराजस्य राज्यसमय आसीत्, ततः पश्चाच्च तेन स्वपदेऽभिषिक्तस्य भोजराजस्य ।

राजसभायामतिकमनीयाशुतरकवित्वव्युत्पत्त्या प्रत्युत्पन्नप्रतिपत्त्या च तयोः समन्तादन्तस्तर्पयन्नसौ तत्सदस्यानां कवीनामुत्तमाङ्गमणितामापेदे । मुञ्जराजः स्वसभामभ्यागच्छन्तममुं प्रत्यक्षसरस्वतीपदेन व्याहरन्नतीव सत्करोति स्म कृत्रिमपुत्रवद्व्यवहरति स्म च ।

स च धनपालः कदाचन स्वपितुरुपाश्रयमभ्यागतेन वर्धमानसूरिणा पुत्रमेकं स्वशिष्यताम्प्रतिग्राहयितुम्प्रतिज्ञापितेन स्वपित्राऽत्यन्तमागृहीतोऽपि जैनधर्मविद्वेषितया न मनागपि जिघृक्षाञ्चकार जैनदीक्षाम्, प्रत्युत "हस्तिना ताड्यमानोऽपि न गच्छेज्जैनमन्दिरम्" इत्येवमार्हतमतमशोभनमुपदिशन् निजानुजं शोभनमपि ततो वारयामास ।

तथापि पितुः प्रतिज्ञाभङ्गपातकभयेन पित्राज्ञा–भ्रात्राज्ञयोर्बलाबलविचारेण पित्राज्ञाया एव

प्राबल्यनिर्णयेन च तच्छिष्यत्वमुररीकृत्य, तदन्ते वसन् 'शोभन'–स्तदुपदिष्टयम–नियमाभ्यामुन्मथ्यमानमिथ्यामतिः शनैः शनैः सम्यक्त्वसम्पत्तिशाली समपादि ।

अत्रान्तरे शोभनगृहीतजैनधर्मामर्षवशेन श्रीमद्भोजराजसाम्राज्ये प्राप्ताप्रतिमप्रतिपत्तिकेन धनपालेन द्वादश वर्षाणि तद्राज्ये जैनदर्शनप्रवेशे महताभिनिवेशेनावरुद्धे, तद्धर्मोपासकैस्तत्प्रचारार्थमत्यर्थमभ्यर्थनया धारानगरमानीतेनावगाहितागमग्रन्थिसुरधुनिना शोभनमुनिना सह प्रवृत्ताभ्यामुक्ति–प्रत्युक्तिभ्यामाकृष्टेन हृष्टेन चेतसा जैनधर्ममङ्गीकृत्य कदाचन नृपेण साकमरण्यङ्गत्वा मृगयायां तेन मृगं बाणेन विद्धमवलोक्य जीवदयोद्रेकार्द्रहृदयः सन्–

"रसातलं यातु तवाऽत्र पौरुषं, कुनीतिरेषा शरणो ह्यदोषवान् ।
निहन्यते यद् बलिनाऽपि दुर्बलो, हहा ! महाकष्टमराजकं जगत् ॥ १॥ "

इत्येवं तं भर्त्सयन्मृगयाव्यसनान्निवर्त्तयामास ।

एवं क्वचन यज्ञमण्डपे यूपबद्धछागस्य करुणक्रन्दनमाकर्ण्य

"यूपं कृत्वा पशून् हत्वा, कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे, नरके केन गम्यते ॥ १ ॥
सत्यं यूपं तपो ह्यग्निः, कर्माणि समिधो मम ।
अहिंसामाहुतिं दद्यादेवं यज्ञः सतां मतः ॥ २ ॥ " इत्येवमहिंसामुपदिश्य राजानमपि जैनधर्मे प्रवर्त्तयामास ॥

## –तिलकमञ्जर्याः कथायाः टिप्पनकारस्य श्रीशान्तिसूरिमहाराजस्य– ऐतिहासिकः परिचयः—

प्रस्तुत'तिलकमञ्जरी'कथायाः पदपद्धतेः श्लेष–भङ्गप्रभृतिवैषम्यस्य पञ्चाशदधिकसहस्रश्लोकप्रमितटिप्पनरूपाया विवृतेः कर्त्तारः श्रीशान्तिसूरयः श्रीपूर्णतल्लगच्छीयाः सन्तीति तच्चरमपद्येनावगम्यते। चरमपद्यद्वयमपरार्वाचीनायां प्रतौ नोट्टङ्कितं दरीदृश्यते, अपि तु 'अणहीलपुर–पत्तन(पाटण)स्थ'संघपतिपाटक(संघवीपाडा)गतजैनभण्डारस्य १२५ सपादशततमायाः प्रतेः प्रान्ते दृष्टिपथमवतरति । तच्च (गायकवाड ओरीएन्टलसिरिझ नं. ७६ संस्थाद्वारा प्रकाशित–) 'पाटण जैन–भण्डार–कॅटलॉग'–प्रथमभागस्य ८७ तमे पृष्ठे मुद्रितमस्ति, 'वडोदरा(वटपद्र)–प्राच्यविद्यामन्दिर'–स्य हस्तलिखितप्रतावपि तत् समवलोक्यते ।

"श्रीशान्तिसूरिरिह श्रीमति पूर्णतल्ले,
गच्छे वरो मतिमतां बहुशास्त्रवेत्ता ।

तेनाऽमलं विरचितं बहुधा विमृश्य,
संक्षेपतो वरमिदं बुध ! टिप्पितं भोः ! ॥
इदं विधाय यत्पुण्यं, निर्मलं समुपार्जितम् ।
तेन भव्या दिवं लब्ध्वा, पश्चान्निर्वान्तु मानवाः ॥"

[ग्रन्था० पञ्चाशदधिकं सहस्रम् ।]

श्वेताम्बरजैनसम्प्रदायस्य 'कोटिकगण'स्य 'वज्रशाखा'यां 'चन्द्रकुल'स्यालङ्कारभूतप्राच्य'-गच्छेषु 'पूर्णतल्ल(प्रा० पुन्नतल्ल)गच्छः प्रतिष्ठितगच्छ आसीत् । सुप्रसिद्धश्री-'हेमचन्द्राचार्य-सदृशा विद्वद्वृन्दावतंसा अप्येतस्मिन्गच्छे संजाताः । श्रीदेवचन्द्रसूरिणा 'श्रीसिद्धराजजयसिंह'स्य साम्राज्ये नभोरसेन्दुविधु-(११६०)मिते वैक्रमेऽब्दे श्रीस्थंभनपुरे (खंभाताभिधे नगरे) विरचितस्य प्रा० श्रीशान्तिनाथचरित्रमहाकाव्यस्यान्ते या गुरुपरम्परा प्रदर्शिता, तत्राऽप्यात्मीयपूर्वज-'श्रीयशोभद्रसूरिकुञ्जरस्य परिचयं प्रदर्शयताऽस्य गच्छस्योल्लेखः कृतः—

"सिरिपुन्नतल्लगच्छुब्भवेण, कयमणसणं विहाणेण ।
कलिकाले वि हु वट्टंतयंमि, दिवसाइं तेरस उ ॥"

['पाटण-जैन भण्डार कॅटलॉग (भा. १, पृ० ३३८)]

उज्जयन्तशैलापरनाम 'गिरनारगिरि-'शिखरे विधिपूर्वकं त्रयोदशदिवसं यावदनशनं कृत्वाऽमरपुराऽऽतिथ्यमुपेयुषां तेषां यशोभद्रजुषां यशोभद्रसूरीशानां शिष्यावतंसाः श्रीप्रद्युम्नसूरयः संजातास्तेषां पट्टे संजातानां सूरिभूरिगुणसेनासमन्वितानां श्रीगुणसेनसूरीणां पट्टप्रभावकाः 'श्रीदेवचन्द्रसूरयः' संजाताः । तेषामन्तिषदा कलिकालसर्वज्ञेत्युपपदेन जगति सुप्रसिद्धिमापन्नेन श्रीमता भगवता हेमचन्द्रसूरिणाऽपि स्वविरचिते 'श्रीत्रिषष्टिशलाकापुरुषचरित्रे' महाकाव्ये चरमायां प्रशस्तावप्येषैव गुरुपरम्परा प्रदर्शितास्तीति ॥

जैनजगति यद्यपि श्रीशान्तिसूरिनामानोऽनेके जैनाचार्या बभूवुस्तथापि प्रस्तुतटिप्पनकारेणात्मनात्मीयं परिचयं प्रदर्शयता 'पूर्णतल्लगच्छीयाचार्यता' प्रदर्शिताऽस्ति। मतिभावैभवभासुरोत्तमेन बहुशास्त्रवेत्तृणा सारविचारसम्भारशीलेनानेन सूरिणा स्वगुरुनामधेयमस्मिन् टिप्पनके न ज्ञापितम्; तथाऽपि सद्भाग्येनास्य सूरिवरस्यैतादृश्योऽन्याः कृतयोऽप्युपलभ्यन्ते, तासां चरमोल्लेखतो ज्ञायते यत्तेषां गुरुवर्याणां नामधेयं 'वर्धमानसूरि'-रासीदिति । तैश्चैवायं शान्तिसूरिः स्वपदे संस्थापित इति व्यक्तनिर्देशोऽन्यत्र विहितः । विद्वद्वृन्दवृन्दारकेनानेनाचार्येण यमकमयानामत्यन्तकठिनानां वृन्दावनादिपञ्चकाव्यानामुपर्यप्युत्तमां *वृत्तिं विरच्याभ्यासिनां सुगमता कृताऽऽ-

---

*"वृन्दावनादिकाव्यानां, यमकैरतिदुर्विदाम् । वक्ष्ये मन्दप्रबोधाय, पञ्चानां वृत्तिमुत्तमाम्॥"
—जै. भं. ग्रन्थ सूचि (अप्रसिद्ध पृ० ५९)—

सीत्। बाणेन्दुनयनेन्दु (१२१५)–मिते विक्रमेऽब्दे लिखिता प्राच्या ताडपत्रीया यस्याः प्रतिकृतिः 'जेसलमेरदुर्गस्य बृहच्चित्कोषे समासाद्यते [ दृश्यताम्–जेसलमेरभण्डारग्रन्थसूचिपृष्ठं त्रिचत्वारिंशत्तमम्, अप्रसिद्ध. पृ० ५८, ५९].

१. चन्द्रदूतकाव्यम्, २ मेघाभ्युदयकाव्यम्, ३ वृन्दावनयमकम्, ४ राक्षसमहाकाव्यम्, ५ घटखर्परकाव्यश्चैतत्काव्यपञ्चकं जे. भ. ग्रन्थसूचौ ३४५ तमेऽङ्के संसूचितमस्ति। तत्र द्वितीयस्य मेघाभ्युदयकाव्यस्य विवृतावन्ते निम्नोक्तोल्लेख उपलभ्यते—

"श्रीपूर्णतल्लगच्छ सम्बन्धि—श्रीवर्धमानाचार्यस्वपदस्थापित—श्रीशान्तिसूरिविरचिता मेघाभ्युदयकाव्यवृत्तिः ॥"

श्रीवर्धमानाचार्यनामानोऽन्येऽनेके आचार्या जाताः, अतस्तत्स्पष्टीकरणायात्र पूर्णतल्लगच्छस्य निर्देशः कृतस्तेनेदं स्पष्टमायातं यदुत—ते पूर्णतल्लगच्छीया बभूवुस्तस्यैव गच्छस्य श्रीवर्धमानाचार्याश्चामुं श्रीशान्तिसूरिं स्वपदे (आचार्यपदे) स्थापयामासुः, आचार्यपदारोहणादनु प्रस्तुतकाव्यस्य वृत्तिविरचनं समजनीति ॥

श्रीमालवावनीपतिश्रीभोजराजस्य जैनकथाशुश्रूषाप्रेरणातः श्रीमुञ्जमहीपतिद्वारा लब्ध-'सरस्वती'पदेन, वर्णतो विप्रेण, धर्मतो जैनेन परमार्हतेन महाकविधनपालेनैषा तिलकमञ्जरीकथा महाराजभोजराजराज्यसमये वैक्रमैकादश्याः शताब्द्या उत्तरार्द्धे संदब्धा ज्ञायते। तस्य चेदं टिप्पनकं तदूर्ध्वमेकस्यां शताब्द्यामेव विनिर्मितमवबुध्यते। जेसलमेरदुर्गस्य चित्कोषे तिलकमञ्जर्या एका ताडपत्रीया प्रति ११३० वर्षे लिखिता वर्तते, उपर्युक्तयमकमयकाव्यपञ्चकविवृतिप्रतिरेका १२१५ संवत्सरे लिखिता लभ्यते, ततस्तत्समयसत्कं कियदनुमानं कर्तुं शक्यते। टिप्पनरचनाया निर्णीतः समयस्तत्र नोपदर्शितस्तथाऽपि तद्विक्रमस्य द्वादश्याः शताब्द्याः पूर्वार्धे विरचितं भवेदित्यनुमीयते ॥

श्रीशान्तिसूरिभिर्न केवलं कठिनकाव्योपरि विवृत्तिर्विरचिताऽपि तु न्यायविषयक-'न्यायावतार'—ग्रन्थस्य वार्त्तिकस्यापि 'विचारकलिका'नाम्नी वृत्तिर्विरचिताऽस्ति, तदन्ते पूर्णतल्लगच्छस्य निर्देशो यद्यपि नास्ति तथापि चन्द्रकुलस्थ वर्धमानसूरिपुरन्दरस्य शिष्यत्वेनाऽयमेव श्रीशान्तिसूरिवरोऽवबुध्यते।

"इति श्रीशान्त्याचार्यविरचितायां वार्तिकवृत्तौ आगमपरिच्छेदः।
सूरिश्चन्द्रकुलामलैकतिलकश्चारित्ररत्नाम्बुधिः,
सारं लाघवमादधाति च गिरेर्यो वर्धमानाभिधः।

तच्छिष्यावयवः स सूरिरभवत् श्रीशान्तिनामाऽकृत,
येनेयं विवृतिर्विचारकलिकानामा स्मृतावात्मनः ॥"
—पाटणजैनभण्डारग्रन्थ सूचि. भा. १. पृ. ८७—

'सिन्धी जैनग्रन्थमाला' (ग्रं० २०) द्वाराऽयं ग्रन्थः प्रकाशितोऽस्तीति ॥

अस्या वार्तिकवृत्तेरवतरणानां द्वादश्याः शताब्द्या अन्ते तथा त्रयोदश्याः शताब्द्याः प्रारम्भे गुम्फितेषु ग्रन्थेषूपलभ्यमानत्वात् श्रीशान्तिसूरेः समय वैक्रमैकादशी–द्वादश्योः शताब्द्योर्मध्यमोऽवसीयते इति हृदयम् ॥

**तिलकमञ्जर्यां परागस्योपयोगः**

परिणतपरागपरीतैव मञ्जरी जरीहर्ति चेतश्चञ्चरीकजनानामित्यालोच्य सत्स्वपि शान्त्याचार्यादिकृतटिप्पणकादिषु तेषामपूर्णत्वात् प्रतिपदमर्थागमकत्वाच्च यथायथमनुपयोगितया, श्रीमत्तपोगच्छाधिपति–भारतीयभव्यविभूति–सूरिचक्रचक्रवर्त्ति–सर्वतन्त्रस्वतन्त्र—शासनसम्राट्–श्रीकदम्बगिरिप्रमुखानेकतीर्थोद्धारक–दक्षजनमोदक्षम–क्षमापालावलिपूजितपादपद्म–ब्रह्मसद्म-जगद्गुरु–करुणासिन्धु—भट्टारकाचार्यमहाराजाधिराजश्रीमद्**विजयनेमिसूरीश्वर**—पट्टालङ्कार–व्याकरणवाचस्पति–कविरत्न–शास्त्रविशारद–विहितानेकतर्कव्याकरणसाहित्यादिविषयकशासनप्रभावकटीकाग्रन्थसन्दर्भनिरुपमव्याख्यानसुधावर्षि–परमकृपालु–श्रीमद्गुरुदेव–भट्टारकाचार्य–श्रीमद्विजय**लावण्यसूरीश्वरा**स्तत्रातीवरमणीयां 'परागविवृति'–मकार्षुः,

इयन्तु प्रतिपदमर्थविस्फोरणमुखेन स्थले स्थलेऽलङ्कारकोडीकार–पदव्युत्पादनप्रकार–पाठान्तरतारतम्यविचार–कतिपयापेक्षितान्यग्रन्थांशोद्धरण–प्रतिभासितविरोधरणधुरीणतया तिलकमञ्जरीमधुञ्जरी परीक्षितुमनसां सुमनसां परागरूपतयोपयोगिनी परागविवृतिर्न कस्यचिदपरागभाजनतामर्हति, प्रत्युत सहृदयजनतासभाजनतामेवेति विश्वसिमि ॥

**प्रकृतपराग प्रणेतुः परिचयः**

क्लेशकुल्माषगुल्मोद्वर्जनभ्राष्ट्र–समग्रराष्ट्रकिरीट–'सौराष्ट्र'–प्रदेशान्तर्वर्तिनि 'बोटाद'ग्रामे १९५३ वैक्रमेऽब्दे शीलालङ्कारशालिन्या मृदुलतासरलतालताल वालतामालिन्या प्रकृत्या लोके सदाचारामृतम्पायिन्या विसाश्रीमालीज्ञातीय 'वगडीया' वंशावतंस–श्रमणोपासकसद्धर्मजीवनलाल–'श्रीजीवणलाल'–धर्मपत्न्या 'अमृत'–नाम्न्या गर्भादाविर्भूय 'लवजी'–ति सांसारिकसंज्ञया मातापितृभ्यामुपाहूय 'ठाकरशी'–संज्ञकेन सोदरेण 'शिव(बेन)'नाम्न्या भगिन्या च साकमुपलालना–पालनाभ्यामुपबृंहितोऽष्टादशवर्षदेशीय एव जगद्गुरूणां शासनसम्राजां श्रीमद्विजयनेमिसूरिभगवतामभ्यर्णे संसारसिन्धुतरणीसन्निभां मुक्तिकनीनिकावरमालाकल्पामनन्ततीर्थंकर–गणधर–युगप्रधान–चक्रवर्त्तिप्रभृति-

भिर्महात्मभिस्संसेवितां सर्वसावद्यविरतिरूपां जैनीं परमपावनीं पारमेश्वरीं परिव्रज्यां (दीक्षां) समवाप। दीक्षाग्रहणादनु मुन्यवस्थायामनुष्ठिततपोयोगैरुपचितबाह्याभ्यन्तरलावण्योल्वणश्च 'मुनि-श्रीलावण्यविजय'-नाम्ना परितः प्रसिद्धिम्प्राप।

**परागप्रणेत्रा कृता ज्ञानोपासना** मूल-निर्युक्ति-भाष्य-चूर्णि-वृत्तिकलिता अखिलाः पञ्चाङ्गीरूपा विद्यमाना जैनागमग्रन्था यैश्शास्त्रविधिपूर्वकं योगोद्वहनं कृत्वा पठितास्सुपरिशीलिता यथायथमन्येभ्योऽध्यापिताश्च।

एवं 'कम्मपयडी-पञ्चसंग्रह'प्रमुखाः प्रकरणग्रन्थाः, 'तत्त्वार्थ-लोकप्रकाशपंचाशक-प्रवचनसारोद्धार'-प्रभृतयो जैनसिद्धान्तरहस्यभूता ग्रन्था अपि यैस्सुज्ञाताः सम्यगध्यापिताश्च।

**न्यायशास्त्रे**—'मुक्तावली-दीनकरी-रामरुद्री-कुसुमाञ्जली-प्रभृतयः प्राच्यन्यायग्रन्थाः, पञ्चलक्षणी माथुरीविवृतियुता जागदीशीवृत्तिसहिता च, सिंहव्याघ्रलक्षणम्-साध्याभाववदवृत्तित्व विवेचना-सिद्धान्तलक्षण-व्युत्पत्तिवादादयो नव्यन्यायग्रन्था अपि सम्यगधीता अध्यापिताश्च निजनिशिताप्रतिमया प्रतिभया।

**व्याकरणशास्त्रे**—कलिकालसर्वज्ञेन भगवता श्रीहेमचन्द्रसूरिणा प्रणीतं 'श्रीसिद्धहेमचन्द्रशब्दानुशासन'-महाव्याकरणानुसारि प्रक्रियाबद्धं श्री'बृहद्धेमप्रभा'-ख्यं निजगुरुवरविरचितं द्वादशसहस्रश्लोकमितं व्याकरणं सम्पूर्णमधीतं सम्यक्, तत्र प्रकाण्डपाण्डित्यं चावापि। तदनु-श्रीसिद्धहेमचन्द्रशब्दानुशासनस्य बृहद्वृत्ति-लघुन्यास-बृहन्न्यासार्णवश्च सम्पूर्णं सम्यग्सूक्ष्मेक्षिकयावगाहितः।

एवं नवाह्निकभाष्य-'परिभाषेन्दुशेखरविजया'धातुपारायण-क्रियारत्नसमुच्चय-न्यायार्थमञ्जुषा-लिङ्गानुशासनादयो वृत्तिसमेताः सम्यगवधारितास्तेन च व्याकरणशास्त्रेऽनुपमं प्रागल्भ्यमासाद्य ते ते ग्रन्थाश्चारुतयाऽध्यापिता अपि।

**साहित्ये छन्दसि च**—साहित्यदर्पण-काव्यानुशासन-वृत्तरत्नाकर-छन्दोऽनुशासनप्रभृतयोऽनल्पा ग्रन्था अपि सवृत्तिकाः सुपरिशीलिताः पाठिताश्च।

**ज्योतिश्शास्त्रे**—मुहूर्तमार्तण्ड-मुहूर्तमाला-मुहूर्तचिन्तामण्यारम्भसिद्धि-दिनशुद्धि-लग्नशुद्धिप्रमुखा ग्रन्था सम्यगवगाहिताश्च॥

शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-श्रीमद्विजयनेमिसूरीश्वरवरप्रगुरुचरणैस्समग्रवाङ्मयार्णवमुद्रारीत्योत्तार्य क्रमेणेमे दत्तरागपरागप्रणयनकर्त्तारः श्रीमद्गुरुवर्याः 'प्रवर्त्तक-गणि-पन्न्यासोपाध्यायव्याकरणवाचस्पति-कविरत्न-शास्त्रविशारदाचार्यपदवीभिरलमकारि॥

**परागप्रणेतॄणां गुरुचरणानां श्रीमद्गुरुचरणानां चमत्कृतकृतिततिकृतिप्रततिः—**

१. **धातुरत्नाकरस्य** सार्धलक्षचतुष्टयसंख्यक (४५००००) श्लोकमिताः सप्त भागाः प्रणीताः, यत्र सकलप्रक्रियासम्बन्धीनि सर्वेषां धातूनां रूपाण्युल्लसन्ति।

२. कलिकालसर्वज्ञश्रीहेमचन्द्रसूरीश्वरस्य शब्दानुशासनस्योपरि चतुरशीतिसहस्र (८४०००) श्लोकात्मकस्य स्वोपज्ञ'शब्दमण्हार्णवन्यास(अपरनामबृहन्न्यास)स्याद्यत्वे विंशतिसहस्र (२००००)श्लोकात्मकतयैवोपलभ्यमानस्य न्यासस्यसंशोधनं त्रुटितस्थले च विशालकायमनुसन्धानं निरमायि ।

३. तत्त्वार्थाधिगमसूत्रान्तर्गतदर्शनमूलभूतत्रिसूत्री—तद्भाष्य–तद्विवरणावष्टम्भिनी सहस्रचतुष्टय (४०००) संख्यकश्लोकात्मिका 'त्रिसूत्रिप्रकाशिका' विवृतिश्च विरचिता ।

४. न्यायाचार्य–न्यायविशारद—महामहोपाध्याय ' श्रीयशोविजयगणिप्रवरप्रणीत- ' 'नयरहस्य'ग्रन्थोपरि सहस्रत्रय (३०००) श्लोकप्रमिता 'प्रमोदा'ख्या विवृत्तिरपि कृतिजनप्रमोदाय निरभायि ।

५. तद्गणिवरग्रथित 'सप्तभङ्गी–नयप्रदीपप्रकरणोपरि सहस्रद्वय (२०००)–संख्यकश्लोकात्मिका 'बालावबोधिनी वृत्तिः' समपादि ।

६. तद्गणिवरविरचित 'जैनतर्कपरिभाषा'–ऽपरनामका–'ऽनेकान्तव्यवस्था'–ग्रन्थोपरि चतुर्दशसहस्र (१४०००) श्लोकप्रमिता 'तत्त्वबोधिनी' विवृतिर्न्यबन्धि ।

७. तद्गणिवरोपज्ञ 'नयोपदेश'टीका 'नयामृततरङ्गिणी' ग्रन्थोपरि (१६०००) षोडशसहस्रश्लोकप्रमिता 'तरङ्गिणीतरणि'नामा विवृतिर्व्यरचि ।

८. चतुश्चत्वारिंशदधिकचतुर्दशशतप्रमितग्रन्थानां प्रणेतृश्रीहरिभद्रसूरीश्वरकृत 'शास्त्रवार्तासमुच्चयग्रन्थोपरि (२५०००) पञ्चविंशतिसहस्रश्लोकप्रमिता विवृतिर्व्यधायि ।

९. कलिकालसर्वज्ञस्य भगवतः श्रीहेमचन्द्राचार्यस्य 'काव्यानुशासन'स्योपरि (३००००) त्रिंशत्सहस्रश्लोकप्रमिता वृत्तिरकारि ।

१०. प्रस्तुत तिलकमञ्जर्या उपरि 'पराग' विवृतिर्व्यभासि ॥

एवमनल्पनानाविधग्रन्थरत्नानामध्ययनाध्यापन–विरचनादिना परागप्रणयनकृद्भिरस्मद्गुरुचरणैरनल्पा ज्ञानोपासना कृता कारिता चेति फलति ।अमीषां प्रकाण्डपाण्डित्यसाक्षात्कारमदसीयग्रन्थावलेरवलोकनतः प्रकटं कुर्वन्तु कृतिनः सुकृतिनः । एतादृशग्रन्थराशेरध्ययनादिकं निर्माय निर्मायीभूय निर्वाणं यन्तु जन्तुनिवह इत्याशासमानो विरमति—

पन्न्यास दक्षविजयो गणिः ।

स्थलम्—
सीसोदरा
('नवसारी'निकटवर्ति)

समयः—
वस्वाकाशाम्बरेन्दुमिते विक्रमाब्दे
माघधवला षष्ठी ।
[ श्री कुन्थुनाथप्रभृतिचमत्कृतलोकप्रतिष्ठावसरम् ]

# પ્રકાશકીય નિવેદન

———(○)———

સાહિત્યસૃષ્ટિમાં અનેરી ભાત પાડતો, પરમાર્હત્ **મહાકવિ ધનપાલ** કૃત આ **'તિલકમંજરી'** નામનો સાહિત્ય ગ્રંથ પ્રકાશિત કરતાં અમો અપૂર્વ આનંદ અનુભવીએ છીએ.

પરમપૂજ્ય પ્રતિભામૂર્તિ શ્રી **શાન્ત્યાચાર્ય** વિરચિત **ટિપ્પન** તથા વ્યાકરણ-વાચસ્પતિ કવિરત્ન શાસ્ત્રવિશારદ પ. પૂ. આ. **શ્રીમદ્વિજયલાવણ્યસૂરીશ્વર** વિરચિત **'પરાગટીકા'**થી અલંકૃત પ્રસ્તુત ગ્રંથ સાહિત્યક્ષેત્રમાં 'સુવર્ણમાં સુગંધ'ની જેમ અતીવ આકર્ષક ને આદરપાત્ર બનશે અને સાહિત્યપિપાસુઓની દીર્ઘકાલીન પિપાસાને અચૂક રીતે શાંત કરશે અને નૂતન ચૈતન્ય પ્રકટાવશે એવું અમો ચોક્કસ માનીએ છીએ.

પરમપૂજ્ય શ્રી **શાન્ત્યાચાર્ય** કૃત ટિપ્પન તથા અત્યંત શુદ્ધ કરેલી તિલક-મંજરીની મૂલ પ્રતિ સાહિત્યરસિક મુનિરાજ શ્રી **'પુણ્યવિજયજી મ૦'** દ્વારા પ્રાપ્ત થઈ છે. અને બીજી ટિપ્પનની પ્રતિ **'આનંદ પુસ્તકાલય'** સુરત તરફથી મળેલ છે. આથી તે બંનેનો સહૃદય આભાર માનીએ છીએ.

વળી આ ગ્રંથ-પ્રકાશનને વધુ આદરણીય બનાવવા માટે ટીકાકાર મહર્ષિના શિષ્યરત્ન વિદ્વત્શિરોમણિ પૂજ્ય પંન્યાસપ્રવર શ્રી **દક્ષવિજયજી** ગણિવર્ય મહારાજશ્રીએ સંસ્કૃત ભાષામાં ગ્રંથની તલસ્પર્શી મહત્તા અને તુલના દર્શાવતી પ્રસ્તાવના લખી આપી છે. અને તેમના શિષ્યરત્ન વિદ્વદ્વર્ય પૂજ્ય પંન્યાસજી શ્રી **સુશીલ-વિજયજી** ગણિવરે 'તિલકમંજરી કથા સાર' ગુજરાતી તેમજ સંસ્કૃત ભાષામાં તૈયાર કરી આપેલ છે, તેથી તે બંને મહાત્માઓના પણ અમો અત્યંત ઋણી છીએ. વળી આ ગ્રંથ ઉપર ગુજરાતી ભાષામાં વિશાળકાય પ્રસ્તાવનાના લેખક **પંડિત મફતલાલ ઝવેરચંદ ગાંધી**નો પણ અમો સહૃદય આભાર માની આનંદિત થઈએ છીએ.

પ્રાન્તે આ ગ્રંથના પ્રકાશનમાં આર્થિક સહાયક શાહપુર નિવાસી શ્રેષ્ઠિવર્ય શ્રી **છોટાલાલ ભાઇચંદભાઇને** પણ સ્વોપાર્જિત લક્ષ્મીનો સદ્વ્યય કરવા બદલ સહૃદય સાનુમોદન ધન્યવાદ આપીએ છીએ.

આ ગ્રંથના સાદ્યંત પ્રુફ સંશોધક વ્યાકરણતીર્થ પંડિત શ્રી **અંબાલાલ પ્રેમચંદ**નો પણ આભાર માનવાનું અમો ભૂલી શકતા નથી. એજ. **પ્રકાશક.**

# પ્રા સ્તા વિ ક

**वचनं श्री धनपालस्य चन्दनं मलयस्य च**
**सरसं हृदि विन्यस्य कोभून्नाम न निर्वृत्तः**

'ધનપાલનું વચન અને મલયાચલનું રસસહિત ચંદન જેના હૃદયને સ્પર્શ્યું તે શાંત અને સુખી ન થાય એવો જગતમાં કોણ છે?'

## ભારતની સંસ્કૃતિ

આપણે સારી રીતે જાણીયે છીએ કે ભારતવર્ષ ઐહિક જીવન પરાયણ દેશ નથી. આ દેશમાં જન્મનાર માણસને પરભવ, આત્મા, મોક્ષ વિગેરે શબ્દો કાને પડ્યા વિના કે પોતાના કલ્યાણ માટે ધર્મના આલંબનોનું દર્શન ભાગ્યેજ થયા વિના રહે છે. ભારતનું નાનામાં નાનું ગામડું કે જંગલ દેવની પ્રતિમા વિનાનું કે ધર્મના આખ્યાન વિનાનું ભાગ્યેજ હોય છે. કોઈ જગ્યાએ દેવાલય હશે તો કોઇ જગ્યાએ દેવનો ગોખલો પણ હશેજ. તેમજ ભારતને ખુણે ખુણે રામાયણ, મહાભારત કે કોઇને કોઈ ધર્માખ્યાન કરનારા બાવા, યતિ, બ્રાહ્મણ કે પરિવ્રાજક પણ હશેજ. ભારતવર્ષમાં જન્મનારને આ રીતે દેવ અને ધર્મના સંસ્કાર તેના વાતાવરણમાં જ મળે છે.

ભારતની સંસ્કૃતિ એ અધ્યાત્મ સંસ્કૃતિ છે અને તેની જડ નિવૃત્તિમાં છે. જ્યારે બીજા દેશોની સંસ્કૃતિ પૌદ્દગલિક સંસ્કૃતિ છે અને તેની જડ પ્રવૃત્તિમાં છે. કલા, વિજ્ઞાન, સંપત્તિ વિગેરેમાં ભારત સર્વ દેશો કરતાં પુરોગામી રહ્યા છતાં ભારતની પ્રધાનતા તો હું ક્યાંથી આવ્યો? ક્યાં જઇશ? વિગેરે તત્ત્વવાદને ઉકેલવામાં જ મનાઇ છે. અને આથી જ હજારો વર્ષો પૂર્વે ભારતદેશના રાજવીઓએ રાજમહેલ છોડી જંગલવાસ સ્વીકારી તપશ્ચર્યાઓ કરી તત્ત્વગવેષણા પાછળ જીવન વીતાવ્યાં છે. અને પોતાની શક્તિ મુજબ જુદાં જુદાં તત્ત્વ જગત્ આગળ ધર્યાં છે. આ તત્ત્વવાદ કે જે અધ્યાત્મવાદ પ્રધાન હોવાથી ભારત દેશ હંમેશાં નિવૃત્તિ પ્રધાન રહ્યો છે અને તેથી જ ભારતવાસીઓ અલ્પ વસ્ત્રે, અલ્પ ખોરાકની વાનગીએ જીવન જીવી નિવૃત્તિમય જીવનથી તત્ત્વવાદમાં ઉંડા ઉતર્યા છે.

## ભારતની સંસ્કૃતિમાં જૈન સંસ્કૃતિનું સ્થાન

ભારતની સંસ્કૃતિ બ્રાહ્મણસંસ્કૃતિ અને શ્રમણસંસ્કૃતિ (શ્રમણસંસ્કૃતિ–બૌદ્ધશ્રમણસંસ્કૃતિ અને જૈન શ્રમણસંસ્કૃતિ) એ બે પ્રકારે છે. છતાં ભારતમાં તો શ્રમણ સંસ્કૃતિમાં જૈન શ્રમણસંસ્કૃતિ રહી છે. કારણ કે બૌદ્ધ ધર્મ ભારતમાં થયો છતાં અનેક ફેરફારોને લઇ ભારત બહાર ગયો. આ બન્ને સંસ્કૃતિએ ભારતની કીર્તિને ઉજ્વળ બનાવી છે

ભારતની સંસ્કૃતિમાં જૈન મુનિમહારાજાઓએ અનેકવિધ ફાળો આપ્યો છે અને ભારતની સંસ્કૃતિમાં નિવૃત્તિ પ્રધાનની સૌરભ તો તેમનાજ હાથે પુરાઇ છે આથી શ્રી કવિ ન્હાનાલાલને કહેવું પડયું છે કે 'ભારતના દેહમાં નાક જૈન સંસ્કૃતિ છે અને ભારતના દેવળમાં દેવ જૈન સંસ્કૃતિ છે. દેવ વિનાનું દેવળ અને નાક વિનાનો દેહ બેડોળ લાગે છે તેમ જૈન સંસ્કૃતિ વિના ભારતની સંસ્કૃતિ અપૂર્ણ જ છે.'

ભારતની દિગંત ખ્યાતિ દર્શાવનારાં તેનાં મૂર્ત સ્મારકો સમાં મંદિરો, જ્ઞાનભંડારો અને ધર્મસ્થાનોમાં જૈનસંસ્કૃતિનો પ્રબળ હિસ્સો છે. આજના વૈજ્ઞાનિક કાળમાં પણ શિર ડોલાવે તેવાં શિલ્પવાળાં આબુ

વિગેરેના જૈન પ્રાસાદોની રક્ષા અને જૈન જૈનેતરોના સેંકડો હજારો વર્ષ ઉપર લખાયેલ પ્રતિઓ, તામ્રપત્રો અને શિલાલેખોને અવ્યાબાધ સાચવનારા ભંડારોની સાચવણી એ જૈન સંસ્કૃતિનોજ પરોપકારપરાયણતા દાન પ્રવાહ અને ધર્મપ્રેમનો પરિપાક છે,

આમ આજે વિદ્યમાન અનેક જિનમંદિરો. ગ્રન્થ ભંડારો અને અનેકવિધ સાહિત્ય એ જૈન સંસ્કૃતિના મૂર્ત સ્મારકો છે. અને આ બધા મૂર્ત સ્મારકોમાં પાદવિહારે વિચરતા નિરીહ જૈન શ્રમણ મહાત્માઓનોજ મૂખ્ય હિસ્સો છે, તેમણે સ્વકલ્યાણ સાથે પરકલ્યાણને પણ મૂખ્યપણે રાખ્યું છે.

**સંસ્કૃતિમાં ભાષાનું સ્થાન.**

મન, વચન અને ક્રિયાની એકતા એ મહાત્મા પુરૂષોનું લક્ષણ છે. અને ભારતની સંસ્કૃતિ એ મન, વચન અને ક્રિયાની એકતાવાળી નિર્મળ સંસ્કૃતિ છે. 'વસુધૈવ કુટુમ્બક'ની ભાવનાપૂર્વક ભારતના મહર્ષિઓએ તત્ત્વવાદ-અધ્યાત્મવાદનો વિચાર કર્યો છે. અને એ અધ્યાત્મવાદને જણાવનારાં વચનો ભારતનાં ધર્મશાસ્ત્રો અગર ગ્રંથો છે. ભારતદેશનું એકેક સુવિહિત સાહિત્ય પછી ભલે તે ન્યાય, વ્યાકરણ, શિલ્પ અર્થ, નીતિ કે ગમે તે પ્રકારનું હોય તો પણ તે ધર્મશાસ્ત્રજ છે. કારણકે તેના કોઇ પણ સાહિત્યની પાછળ નિવૃત્તિ કે અધ્યાત્મવાદ ભૂલાયો નથી હોતો.

ભારત દેશના ન્યાય, વ્યાકરણ, શિલ્પ, નીતિ કે ધર્મ વિગેરે તમામ વસ્તુ તત્વને જણાવનાર શાસ્ત્રોની પ્રાચીન ભાષા એ ગિર્વાણ ભાષા છે. આ ગિર્વાણ ભાષામાંજ ભારતનું દર્શનશાસ્ત્ર અને વ્યવહારશાસ્ત્ર ગુંથાયું છે. ગિર્વાણ ભાષાના અભ્યાસ વિના ભારતની સંસ્કૃતિનો અભ્યાસ અપૂર્ણજ છે. કેમકે ભારતના દેવ, ગુરૂ, ધર્મ અને વિશિષ્ટ તત્ત્વોનો સંસ્કાર ભારતના પૂર્વ મહર્ષિઓએ આ ભાષા અને આ લીપિમાં જણાવ્યો છે, ભારતની પ્રાંતે પ્રાંતની બંગાળી, ગુજરાતી. હિંદી, મરાઠી વિગેરે સર્વ ભાષાનું મૂળ એ ગિર્વાણભાષા છે. આ ગિર્વાણભાષા એ ખરી રીતે વૈજ્ઞાનિક ભાષા છે. કેમકે તે ભાષામાં ઉચ્ચારાનુરૂપ લિપિવિધાન છે અને લિપિને અનુરૂપ ઉચ્ચારાભિધાન છે.

જૈન શ્રમણ મુનિ પુંગવોએ તપ-ધ્યાન ક્રિયાનુષ્ઠાન અને આચારમાં રક્ત રહી જૈન આગમ ગ્રંથોના નિદિધ્યાસનપૂર્વક તે ગ્રંથોને વિશદ કરવા વિવિધ ટીકા ટીપ્પણ ગ્રંથો, તે ગ્રંથોના ગૂઢાર્થોને સમજાવનારા અનેકવિધ સ્વતંત્ર પ્રકરણ ગ્રંથો, ધર્માનુષ્ઠાનની વિધિને જણાવનારા વિધિગ્રંથો અને જનતાને ઉપદેશ કરનારા ઔપદિશ ગ્રંથોની અનેકવિધ રચના કરવા ઉપરાંત સર્વસામાન્ય, વ્યાકરણ, જ્યોતિષ વિગેરે સર્વ વિષયોના પ્રતિભાસંપન્ન પણ અનેકવિધ ગ્રંથો રચ્યા છે, નિષ્પરિગ્રહી ત્યાગી મહાત્માઓના હાથે સર્જયેલ આ સર્વ સામાન્ય ગ્રંથો પણ ખુબજ ઉત્તમ કોટિના ગ્રંથો તરીકે પ્રસિદ્ધિ પામેલા છે. અને એ રીતે પૂ. સિદ્ધસેન દિવાકરસૂરિ. ૧૪૪૪ ગ્રંથ પ્રણેતા પૂ. હરિભદ્રસૂરિ, કલિકાળ સર્વજ્ઞ હેમચંદ્રસૂરિ વિગેરે પૂર્વ મહર્ષિઓએ વ્યાકરણ, કાવ્ય, ન્યાય વિગેરે તમામ વિષયના અનેકવિધ સ્વતંત્ર ગ્રંથો રચ્યા છે.

વ્યાકરણ ન્યાયના અધ્યયન વિના દર્શનશાસ્ત્રનો સચોટ અભ્યાસ ન થઇ શકે, આ કારણે સર્વતંત્ર સ્વતંત્ર જૈનશ્રમણ મુનિપુંગવોએ ન્યાય વ્યાકરણ સાહિત્યના અનેકવિધ ગ્રંથો રચ્યા છે.

વાલ્મિકી, વ્યાસ. કાલિદાસ, સંબંધુ, બાણ, દંડી વિગેરે કવિઓ જેમ અનેકવિધ ગદ્યપદ્ય સાહિત્ય રચનાર જૈનેતર પંડિતો છે તેમ પૂ. પદ્મલિપ્તસૂરિ, પૂ. છત્રદેવસૂરિ, પૂ. હરિભદ્રસૂરિ, પૂ. ભદ્રકીર્તિસૂરિ, પૂ. રાજશેખરસૂરિ, પૂ. મહેન્દ્રસૂરિ વિગેરે જૈન શ્રમણ મુનિપુંગવોએ પણ અનેકવિધ ગદ્યપદ્ય સાહિત્ય રચ્યું છે.

**તિલકમંજરી અને તેના રચયિતા સિદ્ધસારસ્વત કવિ ધનપાલ.**

પૂર્વપુરૂષોની ગદ્યપદ્ય સાહિત્ય રચના મૂખ્યત્વે દેવ, ગુરૂ, ધર્મ અને ઉપદેશ માટેનીજ હોય છે અને તેથી રઘુવંશ, કિરાત, ઉત્તરરામ વિગેરે કાવ્ય ગ્રંથો તેને અનુલક્ષીને રચાયા છે અને કેટલાક ગ્રંથો ઉપ-

દેશને અનુલક્ષીને રચાયા છે. આમ છતાં બાણની કાદંબરી, પાદલિપ્તસૂરિની તરંગવતી અને ધનપાલકવિની તિલકમંજરી એ કોઈ અનેરી ભાત પાડનારા ગ્રંથો છે.

આ ગ્રંથોમાં લોકવ્યવહાર, માન્યતા અને ગ્રંથકારનો આદર્શ તે તે કથામાં આબેહુબ રીતે આવે છે. અહિં ગ્રંથકાર ધનપાલ કવિએ પણ આ કથામાં લોકવ્યવહાર, માન્યતા અને આદર્શને રજુ કરવા સાથે જૈનધર્મ ઉપરનો દઢરાગ અવશ્ય વ્યક્ત કર્યો છે.

આ તિલકમંજરીના રચયિતા ધનપાલ કવિ સંબંધી માહિતી આપનાર અનેકવિધ સાહિત્ય છે તે પૈકી કેટલાકનો અમે અહિં નિર્દેશ કરીએ છીએ.

૧ તિલકમંજરી અવતરણિકા ૫૧ થી ૫૩
૨ શ્રી પ્રભાચંદ્રસૂરિકૃત પ્રભાવકચરિત્ર ગત શ્રી મહેન્દ્રસૂરિપ્રબંધ.
૩ શ્રી મેરતુંગાચાર્યકૃત પ્રબંધચિંતામણિ.
૪ શ્રી સંઘતિલકસૂરિકૃત સમ્યક્ત્વ સપ્તતિકા.
૫ શ્રી રત્નમંદિરગણિકૃત ભોજપ્રબંધ.
૬ શ્રી ઇન્દ્રહંસગણિકૃત ઉપદેશકલ્પવલ્લી.
૮ શ્રી હેમવિજયગણિકૃત કથારત્નાકર.
૮ શ્રી જિનલાભસૂરિકૃત આત્મપ્રબોધ.
૯ શ્રી વિજયલક્ષ્મીસૂરિકૃત ઉપદેશ પ્રાસાદ.
૧૦ જૈન સાહિત્યસંશોધક અંક.
૧૧ જૈન સાહિત્ય ઇતિહાસ.

મધ્ય પ્રદેશમાં આવેલ **સાંકાશ્ય** નામના ગામમાં (હાલ ફરૂકાબાદ જિલ્લામાં સંકિસ નામનું ગામ છે) દેવર્ષિ નામનો બ્રાહ્મણ હતો. આ દેવર્ષિને સર્વશાસ્ત્રમાં નિપુણ **સર્વદેવ** નામનો પુત્ર હતો. સર્વદેવને **ધનપાલ** અને **શોભન** નામે બે પુત્રો અને **સુંદરી** નામે પુત્રી હતી. ધનપાલે વ્યાકરણ, સાહિત્ય અને ધર્મશાસ્ત્ર વિગેરેનો સારો અભ્યાસ કર્યો હતો. આ ધનપાલને **ધનશ્રી** નામે પત્ની હતી. ધનપાલ **ભોજ**રાજાની સભાનો નામાંકિત પંડિત હતો, અને **મુંજ**રાજા જે કાવ્યરસિક રાજા તરીકે પ્રસિદ્ધ છે તેણે પણ ધનપાલને સરસ્વતી બિરૂદ આપ્યું હતું.

ધનપાલ મુંજ અને ભોજ બન્ને રાજાઓને માનીતો વિદ્વાન કવિ હતો. ભોજનો રાજ્યાભિષેક વિ. સં, ૧૦૭૮ના મહા સુદી ૩ રવીવારે થયો હતો. એટલે ધનપાલનો સત્તાસમય વિક્રમની ૧૧મી શતાબ્દિના પહેલા પાદથી ચોથા પાદ સુધીનો છે. ધનપાલ કવિના બનાવેલા ગ્રંથો નીચે પ્રમાણે છેઃ-

પાઇયલચ્છી નામમાલા, તિલકમંજરી, શ્રાવકવિધિ પ્રકરણ, શોભન સ્તુતિવૃત્તિ, વીરસ્તુતિ, ઋષભપંચાશિકા, સત્યપુરીય મહાવીર ઉત્સાહ, પ્રાકૃતનામમાલા વિગેરે વિગેરે.

**ધનપાલનું સમ્યક્ત્વ.**

સર્વદેવવિપ્રને શ્રી **વર્ધમાનસૂરિ** સાથે પરિચય અને રાગ હતો. સર્વદેવના પૂર્વજોની પાસે સારી સંપત્તિ હતી પણ સર્વદેવને તે માલુમ નહિ પડી. તેણે સૂરિજી પાસેથી યુક્તિથી જાણી લીધું અને સૂરિજીએ પણ યુક્તિથી સંપત્તિનો અર્ધભાગ આપવાનું માગી લીધું. સર્વદેવને સંપત્તિ મળી. સર્વદેવે સૂરિજીને સંપત્તિ આપવા માંડી પણ કંચનકામિનીના ત્યાગી સૂરિજીએ તેનો સ્વીકાર નહિ કરતાં તેની પુત્ર સંપત્તિમાંથી એકની માગણી કરી. સર્વદેવે ખુબ ખુબ પ્રયત્ન પછી નાનાપુત્ર શોભનને સૂરિજીને સોંપ્યો અને તેણે દીક્ષા લીધી. સર્વદેવ મૃત્યુ પામ્યો, ધનપાલ ભાઇના શ્રમણ થવાથી શ્રમણો ઉપર દ્વેષવાળો બન્યો.

રાજ્યમાન્યપણાને લઈ મુનિઓની તેની દ્વારા થતી તર્જનાથી જૈન મુનિઓ આમ ધારામાં આવતા અટક્યા. એક વખત શોભન મુનિના ગુરૂ મહેંદ્રસૂરિએ મુનિશ્રી શોભનને ધારામાં જવા આજ્ઞા કરી. શિષ્યમંડળ લઈ ધારા તરફ શોભન મુનિએ વિહાર કર્યો. ધારાનગરીના પરિસરમાં ધનપાલ સામે મળ્યો. તેણે મુનિને ઓળખ્યા નહિ અને હાસ્ય કરતાં તેણે કહ્યું કે 'ગધેડાના દાંત જેવા હે સાધુ તમને નમસ્કાર' જવાબમાં મુનિએ પણ કહ્યું 'માંકડાના મુખ સરખા હે ભાઇ! તું સુખી છે ને?' ધનપાલે જાણ્યું કે મુનિ તેજસ્વી અને વિદ્વાન્ છે ફરી ધનપાલે કહ્યું 'મહારાજ કોને ઘેર ઉતરશો?' મુનિએ જવાબ આપ્યો કે 'ઇચ્છા હોય તો તમારે ત્યાં,'

એકવખત ધનપાલે મુનિને પોતાને ત્યાં વ્હોરાવવા માંડ્યું. એ દીવસ વીતેલ દહિ છે તેમ જાણી મુનિએ ન ખપે તેમ કહ્યું. ધનપાલે કહ્યું કે 'જીવડાં છે?' મુનિએ અળતાના રસથી જીવડાં બતાવ્યાં. ફરી મુનિને લાડુ વ્હોરાવવા માંડ્યા મુનિએ ન લીધા. ધનપાલે કહ્યું 'ઝેર નાંખ્યું છે?' મુનિએ કહ્યું 'હા'. ધનપાલે તપાસ કરી તો ખરેખર ઝેરના લાડુ હતા. ધનપાલ મુનિને ભાવથી નમ્યો અને પોતાના જીવિતદાન માટે ઉપકાર માનતો પોતાના ભાઈ શ્રમણ મુનિને સંભાળવા લાગ્યો. મુનિએ કહ્યું તારો ભાઇ શ્રમણમુનિ હુંજ છું બન્ને ભાઇઓ મળ્યા. ધનપાલ ચુસ્ત જૈનધર્મી સમ્યક્ત્વી બન્યો એટલુંજ નહિ પણ શાસ્ત્રોના પાને પાને દૃઢ સમકિત તરીકે તેનો ઉલ્લેખ પછીના ગ્રંથકારોએ કર્યો છે.

આ તિલકમંજરી ગ્રંથ ધનપાલની સમકિતપણાની મહોરછાપવાળો ગ્રંથ છે.

'स वः पातु जिनः कृत्स्नं समीक्षते यः प्रतिक्षणम्
रूपैरनन्तैरेकैकजन्तोर्व्याप्तं जगत्त्रयं । '

ધનપાલ કવિને સમ્યક્ત્વ મોડું સ્પર્શ્યો બદલ કેટલો પશ્ચાતાપ હતો તે તેમનાજ શબ્દોમાં

" कतिपयपुरस्वामीकायव्ययैरपि दुर्ग्रहो
मितवितरिता मोहेनासौ पुरानुसृतो मया ।
त्रिभुवनविभुर्बुद्धयाराध्योऽधुना सुपदप्रदः
प्रभुरपि गतस्तत्प्राचीनो दुनोति दिनव्ययः ॥

આ તિલકમંજરી ગ્રંથ ભોજરાજાની માગણીથી બનાવ્યો હતો. આ ગ્રંથ રાજસભામાં સુવર્ણ-સ્થાળમાં મુકી ભોજે ધનપાલ પાસે સાંભળ્યો. ભોજને ગ્રંથ ખુબ ગમ્યો પણ તેને અભિમાન આવ્યું અને ધનપાલને કહ્યું કે 'કથા તો સુંદર છે' પરંતુ તું 'વિનિતાની જગ્યાએ મારી નગરી' અને 'સ વઃ પાતુ જિનઃ' ની જગ્યાએ 'સ વઃ પાતુ શિવઃ' વિગેરે મુક અને પછી જેટલું ધન માગવું હોય તે માગી લે.'

ધનપાલ બોલી ઉઠ્યો

दो मुहय निरक्खर लोहमइय नाराय तुज्झ किं भणिमो
गुञ्जाहि समं कणयं तोलन्तु न गओसि पायालं

રાજાને ક્રોધ ચઢ્યો અને ધનપાલનો આખો ગ્રંથ ભસ્મીભૂત કર્યો. ધનપાલ ખિન્ન થયો. ઘેરે આવ્યો. પોતાની પુત્રી તિલકમંજરીએ ખિન્ન થતા પિતાને કહ્યું 'મને યાદ છે તે લખી લો' ધનપાલે લખ્યો લગ્ર-ભગ અર્ધો લખાયો અને અર્ધો નવીન રચી ગ્રંથનું નામ તિલકમંજરી રાખી પુરો કર્યો.

તિલકમંજરીના દહન બાદ ધનપાલે ધારાનગરીને છોડી અને ત્યારપછીનો શેષ કાળ સાચોરમાં કાઢ્યો

પણ ભોજને પશ્ચાતાપ થયો તે ધનપાલને ધારાનગરીમાં બોલાવી લાવ્યો અને વિદ્યાવ્યાસંગથી રહિત બનેલ કરી પોતાની રાજસભાને વિદ્યાવ્યાસંગવાળી કરી.

ધનપાલ કવિના બધા ગ્રંથોનું તેમના હાજરજવાબીપણાનું અને ભોજ તથા મુંજ સાથેના બધા પ્રસંગોનું ટુંક ટુંક અવતરણ કરતાં પણ એક સ્વતંત્ર ગ્રંથ થઈ જાય તેમ હોવાથી આ સંબંધમાં વધુ જાણવાની ઇચ્છાવાળાઓને ઉપર જણાવેલ સાહિત્યની ભલામણ કરી અમે વિરમીએ છીએ,

ધનપાલ શ્રમણોપાસક વિદ્વાન્ ગૃહસ્થી કવિ છે. રાજ્યાશ્રયથી નભનારા છે છતાં ધર્મ પ્રત્યેનો તેમનો અતિદ્રઢરાગ હોવાથી શાસ્ત્રકારોએ તેમના જીવનને સેંકડો ગ્રંથોમાં ઠેર ઠેર દાખલ કર્યું છે.

તિલકમંજરી ગ્રંથના અવતારિકાના ૫૩ શ્લોકો સંસ્કૃત સમગ્ર સાહિત્ય અને સાહિત્યકારોની સંક્ષિપ્ત સમાલોચના કરી જાય છે. મહાકવિ શ્રી ધનપાલે આ અવતારિકામાં ભગવાન શ્રી ઇન્દ્રિભુતિથી માંડીને પોતાના કાળ સુધીના ગદ્ય પદ્ય ગ્રંથકારોનું સ્મરણ બહુજ ઉદારભાવે કર્યું છે. તેમજ કાવ્ય, કવિ અને કથા કેવી હોવી જોઈએ તેનું પણ તેમણે સુંદર દિગ્દર્શન કરાવ્યું છે.

કવિ ધનપાલ પોતાના બાંધવ શોભનમુનિના ગુરૂ મહેંદ્રસૂરિના પરમ ભક્ત હતા અને તેમની પાસેથી તેમણે તત્ત્વજ્ઞાન મેળવ્યું હતું. તદ્ઉપરાંત પોતાના લઘુબંધુ શોભનમુનિ કૃત સ્તુતિઓ ઉપર તેમણે વિશદ્ ટીકા રચી છે અને તેની પ્રશસ્તિમાં તે બધી વાત તેમણે સ્પષ્ટ કરી છે.

**બીજા ગ્રંથકારોએ કરેલ ધનપાલનું સ્મરણ.**

કલિકાલ સર્વજ્ઞ હેમચંદ્રસૂરિવરે ધનપાલ કવિની તિલક મંજરીના પદ્યો કાવ્યાનુશાસન અને છન્દાનુશાસનમાં ઉલ્લેખિત કર્યા છે.

મુનિ સુંદરસૂરિએ ઉપદેશ રત્નાકરમાં અને વાગ્ભટે પોતાના કાવ્યાનુશાસનમાં ઠેર ઠેર ધનપાલ કવિના પદ્યોનો ઉપયોગ કર્યો છે.

કીર્તિકૌમુદીકાર, અમરચરિત્રકાર, પૂ. મુનિરત્નસૂરિજી, પંચલિંગીપ્રકરણકાર પૂ. શ્રી જિનેશ્વરસૂરિ વિગેરે આચાર્ય પુંગવોએ તેમના કાવ્યોની પ્રશસ્તિ ગાઇ છે.

જિનમંડનગણિકૃત કુમારપાલ પ્રબંધમાં કહ્યું છે કે–

કલિકાલ સર્વજ્ઞ હેમચંદ્રસૂરીશ્વરજી મહારાજે ધનપાલ કવિની બનાવેલ ઋષભપંચાશિકાના સુક્તોદ્વારા ભગવાનની સ્તુતિ કરી ત્યારે પરમાર્હત્ કુમારપાળે કહ્યું કે 'ભગવાન્! આપ નવી સ્તુતિ ન બનાવતાં અન્યકૃત સ્તુતિ કેમ બોલો છો?' જવાબમાં પૂ. હેમચંદ્રસૂરિ ભગવાને કહ્યું રાજન્! આવી સ્તુતિ બનવી અમારાથી અશકય છે.

**अथ प्रदक्षिणावसरे सरसापूर्वस्तुतिकरणार्थमभ्यर्थिताः श्री हेमसूरयः सकलजनप्रसिद्धां 'जय जंतुकप्पपायव!' इति धनपालपञ्चाशिकां पेठुः॥ राजादयः प्राहुः भगवन् भवन्तः कलिकाले सर्वज्ञाः परकृतस्तुतिं कथं कथयन्ति?। गुरुभिरूचे राजन्! श्री कुमारदेव! एवंविधसद्भूतभक्तिगर्भास्तुतिरस्माभिः कर्त्तुं न शक्यते॥**

આ તિલક મંજરીનું સંશોધન વાદિવેતાળ શાંતિસૂરિ જેવા સમર્થ આચાર્ય ભગવંતે કર્યું હતું. આ સંબંધમાં પ્રબંધ ચિંતામણિમાં કહ્યું છે કે–

**अशोधयदिमां चासावुत्सूत्राणां प्ररूपणात्।**
**शब्दसाहित्यदोषास्तु सिद्धसारस्वतेषु किम्॥ २०२॥**

ધનપાલ કવિની પ્રથમ કૃતિ **પાઇયલચ્છી નામમાલા** અને છેલ્લી કૃતિ **સૂર્યપુર મહાવીર ઉત્સાહ** સંભવે છે. કારણ કે છેલ્લી અવસ્થા ધનપાલે સાચોરમાં પસાર કરી હતી.

( ૨ )

## ટિપ્પણકાર પૂ. શાંતિસૂરિજી મહારાજ

પ્રસ્તુત મુદ્રિત તિલક મંજરીના ટિપ્પણકાર શાંતિસૂરિ છે. જૈનશાસનમાં શાંતિસૂરિ ૭ થયા છે.

**૧ વાદિવેતાળ શાંતિસૂરિ ( થારાપદ્રગચ્છીય )**
**૨ નાગેંદ્રગચ્છીય શાંતિસૂરિ**
**૩ ચંદ્રગચ્છીય શાંતિસૂરિ**
**૪ સાંડેરકગચ્છીય શાંતિસૂરિ ( સં. ૧૫૫૭ )**
**૫ બૃહદ્ગચ્છીય શાંતિસૂરિ**
**૬ પૂર્ણતલ્લગચ્છીય શાંતિસૂરિ**

**૧ વાદિવેતાળ શાંતિસૂરિ** જેમની ઉત્તરાધ્યયન સૂત્ર ઉપર પાઇય ટીકા છે તે ધનપાલ કવિના સમકાલીન છે અને તેમણે તિલકમંજરી શોધી છે. આ સૂરિવરનો સ્વર્ગવાસ ૧૦૯૬માં થયો હતો.

**૨ નાગેંદ્રગચ્છીય શાંતિસૂરિ** મહારાજ સિદ્ધરાજના સમયમાં થયા છે. સિદ્ધરાજે આ આચાર્યના શિષ્ય અમરચંદ્રસૂરિને સિંહશિશુક નામનું બિરૂદ આપ્યું હતું.

**आनन्दसूरिरिति तस्य बभूव शिष्यः पूर्वोऽपरः शमधरोऽमरचन्द्रसूरिः**
**बाल्येऽपि निर्दलितवादिगजो जगाद यौ व्याघ्रसिंहशिशुकाविति सिद्धराजः**

( ધર્માભ્યુદય પ્રશસ્તિઃ )

**૩ ચંદ્રગચ્છીય શાંતિસૂરિજી** મહારાજ ચંદ્રગચ્છમાં ભદ્રેશ્વરસૂરીશ્વરજી મહારાજની પરંપરામાં થયા છે અને તેમની પરંપરામાં દેવેન્દ્રસૂરિએ ઉપમિતિભવપ્રપંચ કથા સારોદ્ધાર ૫૭૩૦ શ્લોક પ્રમાણ વિ. સં. ૧૨૯૮ માં રચ્યું છે.

**૪ સાંડેરકગચ્છીય શાંતિસૂરિએ** ૧૫૫૦ માં સાગરદત્ત રાસની રચના કરી અને તેમના શિષ્યે ૧૫૫૮માં લલિતાંગ ચરિત્ર રચ્યું.

**૫ બૃહદ્ગચ્છીય શાંતિસૂરિ** એ નેમિચંદ્રસૂરિના શિષ્ય છે. અને વિ. સં. ૧૧૬૧માં પૃથ્વીચંદ્ર ચરિત્ર વિગેરેની રચના કરી છે. આ શાંતિસૂરિની પાટે મહેન્દ્રસૂરિ, વિજયસિંહસૂરિ,, દેવેન્દ્રચંદ્રસૂરિ. પદ્મદેવસૂરિ. પૂર્ણચંદ્રસૂરિ, જયદેવસૂરિ, હેમપ્રભસૂરિ અને જિનેશ્વરસૂરિ એમ આઠ આચાર્યો થયા અને તેમનો ગચ્છ પિપ્પલગચ્છના નામે પ્રસિદ્ધિ પામ્યો હતો

**૬ પૂર્ણતલગચ્છીય શાંતિસૂરિએ** આ ધનપાલ કૃત તિલકમંજરી ઉપર ટિપ્પણ રચ્યું છે. તદુપરાંત તેમણે જૈનતર્કવાર્તિકવૃત્તિ, વૃન્દાવન કાવ્ય, મેઘાભ્યુદય કાવ્ય, શિવભદ્ર કાવ્ય, ચંદ્રદુતકાવ્ય એ નામના પાંચ યમક કાવ્યો ઉપર વૃત્તિ રચી છે. પૂ. આ શાંતિસૂરિના ગુરૂ વર્દ્ધમાનસૂરિ હતા. તે વિક્રમની ૧૧મી અને ૧૨મી સદીની વચ્ચે થયા હતા,

પ્રસ્તુત મુદ્રિત ગ્રંથમાં જે ટિપ્પન આવ્યું છે તે આ શાંતિસૂરિ મહારાજનું છે. આ ટિપ્પન તિલકમંજરી ગ્રંથના વાંચકો માટે કઠિન શબ્દોના અર્થ સમજાવવા માટે ખુબ ખુબ ઉપયોગી છે.

આ તિલકમંજરી ઉપર વિ. સં. ૧૬૩૦ માં થયેલ ઉપાધ્યાય ધર્મસાગર ગણિના ગુરૂભાઈ વિમળસાગરજીના શિષ્ય **પદ્મસાગરે** નવહજાર શ્લોક પ્રમાણવૃત્તિ રચી છે. પદ્મસાગરે આ ઉપરાંત

સૂરીશ્વર ચરિત્ર, જગદ્ગુરુ કાવ્ય, સ્થૂલિભદ્ર ચરિત્ર, ધર્મપરીક્ષા, યુક્તિપ્રકાશ વૃત્તિ વિગેરે ગ્રંથોની રચના કરી છે.

વિ. સં. ૧૨૮૧માં ધનપાલ કૃત તિલકમંજરીને સંક્ષેપમાં કરી શ્વેતાંબર સંપ્રદાયના પંડિત **લક્ષ્મીધરે** તિલકમંજરી કથાસાર નામે ગ્રંથ તૈયાર કર્યો છે.

તિલકમંજરી ઉપર આમ આજસુધીનાં જે ટીકા ટિપ્પણો હતાં તે અભ્યાસીને પૂર્ણ ઉપયોગી થાય તેવાં ન હોવાથી તિલકમંજરી ઉપર વિસ્તૃત વૃત્તિની ખુબજ આવશ્યકતા હતી અને તે પૂ. આચાર્ય લાવણ્યસૂરિ મહારાજે પરાગ નામની વૃત્તિ રચી પુરી પાડી છે.

( ૩ )

## પરાગ ટીકાકારના ગુરુદેવ.

આ તિલકમંજરી ગ્રંથની પરાગ ટીકાના રચયિતા પૂ. આ. લાવણ્યસૂરીશ્વરજી મહારાજ **છે.** તેઓશ્રીનો અલ્પ પરિચય પણ તેમના ગુરૂ અને સકલજૈનશાસનના શિરતાજ આચાર્યદેવ **વિજયનેમિસૂરીશ્વરજી મહારાજ સાહેબના** પરિચય વિના અપૂર્ણજ રહે તેમ છે.

### નેમિસૂરિયુગ

તપાગચ્છની પરંપરામાં પૂજ્ય આચાર્યદેવ વિજયનેમિસૂરીશ્વરજી મહારાજ ૭૪મી પાટે આવે છે.

પૂર્વકાળમાં હરિભદ્રયુગ, હૈમયુગ વિગેરે અમુક સમયને તે તે કાળના પ્રભાવિક પુરૂષના નામથી સાહિત્યકારોએ અને ઇતિહાસકારોએ તે કાળની સમગ્ર પ્રવૃત્તિ ઉપર તે પ્રભાવક પુરૂષનો પ્રભાવ હોવાથી તે કાળને તે તે મહાપુરૂષના યુગ તરીકે આળેખ્યો છે. તેમ વર્તમાનમાં પણ વિ. સં. ૧૯૬૪ પછીથી આજસુધીનો કાળ વિજયનેમિસૂરિયુગ કહીએ તો વાંધા જેવું નથી.

પૂ. આ. વિજયહીરસૂરીશ્વરજી મહારાજ, પૂજ્ય આચાર્ય વિજયસેનસૂરીશ્વરજી મહારાજ, પૂ. આચાર્ય વિજયદેવસૂરીશ્વરજી મહારાજ અને પૂ. આચાર્ય વિજયસિંહસૂરીશ્વરજી સુધીનો બધો કાળ હીરસૂરિયુગ તરીકે પ્રસિદ્ધ છે. જો કે પૂ. વિજયહીરસૂરિજીના કાળ કરતાં પણ સવાઇ જૈનશાસન પ્રભાવના પૂ. વિજયદેવસૂરિજીમ.ના કાળમાં જૈન મંદિરો, વિદ્વાનો અને પૂ. શ્રમણ મુનિઓની પ્રાચુર્યતાથી થઇ હોવા છતાં તે બધામાં મૂળરૂપ પ્રભાવ તો પૂ. વિજયહીરસૂરીશ્વરજી મહારાજનોજ હતો. તેમ આ કાળમાં બીજા બીજા આચાર્યોના હાથે કેટલાંક વિવિધ શાસનનાં સુવિહિત કાર્યો થયા છતાં આ બધામાં પ્રેરણા અને વિચાર ઉદ્ગમના મૂળ તો પૂ. આચાર્ય વિજયનેમિસૂરીશ્વરજી મહારાજજ છે.

### યોગોદ્વહન.

પ્રસિદ્ધ વાત છે કે, પૂ. વિજયસિંહસૂરીશ્વરજી મહારાજ પછી યોગોદ્વહનપૂર્વક આચાર્યપદવીની પરિપાટિ ભૂલાઇ હતી એટલુંજ નહિ પણ યોગોદ્વહનપૂર્વક આચાર્યપદ લેવાની શરૂઆત પણ થઇ ચૂકી હતી. દીર્ઘદ્રષ્ટા સ્વ. પૂજ્ય આચાર્યદેવે વિચાર્યું કે જો આ રીતિ વિકસી તો યોગો-

દ્વહન રીતિજ જતે દીવસે નાશ પામશે અને શ્રદ્ધા તથા જ્ઞાનભક્તિમાં શિથિલતા આવશે. આથી યોગોદ્વહન તથા પંચપ્રસ્થાનની આરાધનાપૂર્વક સંઘના અતિઆગ્રહથી ભાવનગરમાં વિ. સં. ૧૯૬૪માં સ્વ. પૂજ્ય ગુરૂદેવ આ કાળના પ્રથમ આચાર્ય થયા.

યોગોદ્વહનપૂર્વકની પૂજ્યશ્રીની આચાર્યપદનું પરિણામ એ આવ્યું કે યોગોદ્વહન વિના કોઇપણ કાર્ય શુદ્ધ નથી તે માન્યતા સમાજમાં દઢ બની અને જૈન સમાજ તેના શ્રદ્ધા અને સંસ્કાર વળાંકમાં ખુબજ મક્કમ બન્યો એટલુંજ નહિ પણ જે કોઇ યોગોદ્વહન વિના આચાર્યપદ લેનારા હતા તેમની પરંપરામાં પણ યોગોદ્વહન દાખલ થયાં અને તેઓ પણ યોગોદ્વહનની મહત્તાના પૂજક બન્યા '**गुरोस्तु मौनव्याख्यानं छिन्नत्ति शिष्यसंशयान्**' આ પદને સ્વ. પૂજ્ય આચાર્યદેવે કોઇની કાંઇપણ ટીકા કર્યા વગર સમગ્ર શાસનમાં પ્રવર્તાવ્યું અને શાસનના મૂળરૂપ શ્રદ્ધાના બીજક યોગોદ્વહન ક્રિયાને વિના વિવાદે સર્વસંમત બનાવી.

**જ્ઞાન.**

આપણે સૌ કોઇ જાણીએ છીએ કે સ્વ. પૂજ્ય આચાર્યદેવના દીક્ષાકાળ વખતે કલ્પસૂબોધિકા વાંચી શકે તેવા મુનિઓ પણ મહાવિદ્વાન્ ગણાતા. સામાન્ય પ્રકરણજ્ઞાન, ટબા, સ્તવન, સજ્ઝાય વિગેરેનું જ્ઞાન આથી તે કાળના મુનિઓને માટે પર્યાપ્ત ગણાતું. સ્વ. પૂજ્ય આચાર્યદેવે જ્ઞાનની પિપાસાનો નાદ મુનિઓમાં પ્રવર્તાવ્યો. તેમણે પોતે વ્યાકરણ, ન્યાય સાહિત્યના ગ્રંથોના અભ્યાસ સાથે જૈન શાસનનાં સર્વ શાસ્ત્રો અવગાહ્યાં અને વ્યાકરણ, ન્યાય વિગેરેના અનેક મહાકાય ગ્રંથો બનાવ્યા. આનુ પરિણામ એ આવ્યું કે આનો પ્રભાવ સમગ્ર શાસન ઉપર પડયો અને જૈન શાસનમાં અભ્યાસની રૂચિ પ્રગટી. ઠેર ઠેર તત્ત્વજ્ઞાનની જિજ્ઞાસા જાગી અને સર્વ સમુદાયો પણ પઠન પાઠનની પ્રવૃત્તિથી ગાજવા લાગ્યા.

આમ ખરૂં કહીયે તો આ કાળમાં જ્ઞાનનાદને પલ્લવિત કરવાનું મૂળ તો સ્વ. પૂજ્ય આચાર્યદેવજ છે.

**પ્રતિષ્ઠા અંજનશલાકા.**

શાસન અને તેનાં બધાં અંગોનું અસ્તિત્વ અને વિકાસ તેના દેવતત્ત્વ ઉપર છે. આગમો એ દેવની વાણી છે. મુનિઓ એ દેવના વચનને અનુસરીને વેષ લેનારા છે અને ક્રોડોનો વ્યય પણ શ્રાવકો દેવના વચનને અનુલક્ષીને કરે છે. ભગવાનની મૂર્ત્તિ દેવસદૃશજ છે તે તો પ્રતિષ્ઠા અને અંજનશલાકાથીજ બની શકે તેમ છે. અંજનશલાકા અને પ્રતિષ્ઠાથી દેવતત્ત્વ પ્રગટાવવું એ પવિત્ર અને પ્રભાવક પુરૂષ સિવાય સંભવતું નથી. સ્વ. પૂ. આચાર્યદેવે સેંકડો વર્ષથી વિસરાયેલી આ વિધિને જાગૃત્ કરી અને વિશાળસ્વરૂપમાં સૌ પ્રથમજ તેમના હાથે અંજનશલાકા, કદંબગિરિમાં થઈ. આ રીતે સર્વ વિધિવિધાનોના ઉદ્દગમ પણ આ કાળે સ્વ. પૂજ્ય આચાર્ય દેવજ છે.

**પ્રભાવના.**

આતપના કે પ્રભાવના કોને કહેવાય તેની શબ્દોથી આપણે ભલે વ્યાખ્યા કરીએ પણ ખરી સમજ તો આ કાળે જેણે પામવી હોય તે તેમના દર્શન વિના પામી શકે તેમ નહતું.

મોટા મોટા મુંડધારી અને ફટાટોપ કરનારા સંન્યાસીઓ સર્વશાસ્ત્રના પારગામીપણાનો અભિમાન ધરાવતા વિદ્વાનો. આજની કેળવણીથી મોટી મોટી વિશ્વવિદ્યાલયના અધ્યક્ષપદે બિરાજતા ચેરમેનો કે દલીલ અને વકીલાતમાં સર્વશ્રેષ્ઠ ગણાતા કાઉન્સીલરો, ધનથી જમીનથી અદ્ધર ચાલનારા ધનાઢયો, રાજ્યખટપટ અને કુશળતામાં પંકાતા જુદા જુદા રાજ્યના કર્મચારીઓ અને અતિવૈભવથી ઉછરેલા રાજવીઓ આ બધાએ જેઓના પ્રથમ દર્શને પોતાને અલ્પ માની તેમના ચરણકમળમાં ઝુકાવતા. આ સર્વ આ કાળે નિહાળવું હોય તો સ્વ. પૂજ્ય આચાર્યદેવને નિહાળતાંજ બની શકે તેમ હતું.

ભાવનગર અને ધાંગધ્રાના દીવાનો, માલવીયાજી અને આનંદશંકર બાપુભાઈ જેવાં આધુનિક વિદ્વાનો, સેતલવડ અને ભૂલાભાઈ જેવા ધારાશાસ્ત્રીઓ, સ્વ. મનસુખભાઈ ભગુભાઈ અને સ્વ. લાલભાઈ દલપતભાઈ જેવા ક્રોડાધિપતિઓ અને ભાવનગર નરેશ, વળાનરેશ વિગેરે રાજવીઓને જેમની પાસે બેસી તત્ત્વપાન કરતાં જેમણે નિહાળ્યા છે તેજ ખરેખર પ્રભાવના અને આતાપના કોને કહેવાય તે સમજી શકે તેમ છે.

ક્ષમાવિજયજીએ મહાવીર ભગવાનના સ્તવનમાં ગાયું છે કે 'જેહનું ઝેર નિવારણ મણિ સમ તુજ આગમ તુજ બિંબજી' આ સ્તવનમાં તેમણે જણાવ્યું છે કે હે ભગવંત કલિકાળનું ઝેર નિવારવામાં તમારૂં આગમ અને તમારૂં બિંબ એ બે મણિસમાન છે. સ્વ. પૂ. આચાર્યદેવે તેમના કાળમાં શાસ્ત્રપઠનપાઠન અને જિનબિંબની અંજનશલાકા પ્રતિષ્ઠાથી કલિયુગનું ઝેર નિવારવામાં અપૂર્વ ફાળો આપી જૈનશાસનને ઉજવળ કર્યું છે. અને ફરી હૈમયુગ, હીરયુગ વિગેરે યુગની સ્મૃતિ સાથે કલિકાળ સર્વજ્ઞ હેમચંદ્રસૂરિ અને જગદ્ગુરૂ વિજયહીરસૂરિજીની સ્મૃતિ આ કાળમાં તેમના દર્શને તાજી કરાવી છે.

જગતના અનેક ઝંઝાવાતો, કુતર્કના ઠેર ઠેર તોફાનો, જડવાદનો સુસવાટા પવન આ બધું છતાં જૈનશાસન ઉપર એકછત્ર આણા પ્રવર્ત્તાવવાનું આ કાળમાં જો કોઈના સદ્ભાગ્યે લખાયું હોય તો આ મહાપુરૂષને લલાટેજ હતું.

## તીર્થોદ્ધાર.

કાપરડા, કદંબગિરિ, શેરીસા વિગેરે તીર્થોના ઉદ્ધારને દેખનારાને ખ્યાલ આવશે કે સ્વ. પૂજ્ય આચાર્યદેવ કેવળ જીર્ણ મંદિરનો ઉદ્ધારજ કરાવનાર ન હતા પણ શાસનની પ્રભાવના કરે અને હજારો વર્ષ સુધી ચિરંજીવ રહે તેવાં તીર્થોને અસ્તિત્વમાં લાવી પ્રભાવના કરનાર હતા. શેરીસા તીર્થના સંબંધમાં શાસ્ત્રોમાં ઠેરઠેર ઉલ્લેખ છે પણ કોણ જાણે કયારે તે નામ શેષ બન્યું ? આ તીર્થનો ઉદ્ધાર અને મહિમા સ્વ. પૂજ્ય આચાર્યદેવના પ્રતાપનુંજ પરિણામ છે. શત્રુંજયની સ્મૃતિ કરાવે તેવું કદંબગિરિ તીર્થ સ્વ. પૂજ્ય આચાર્યદેવની દીર્ઘદૃષ્ટિ અને શાસનના રાગને જણાવે છે. કાપરડા તીર્થનો ઉદ્ધાર તીર્થકાજે ખપી છુટવા સુધીની સ્વ. પૂ. આચાર્યદેવના ખમીરને યાદ કરાવે છે. આ એક બે ત્રણ નહિ પણ ઠેર ઠેર સ્વ. પૂજ્ય આચાર્યદેવના હસ્તકે થયેલ તીર્થોના ઉદ્ધાર અને જીનમંદિરો ઉભાં ઉભાં આજે પણ તેમની જીવનગાથાને ઉચ્ચારી રહ્યાં છે.

**સંઘયાત્રા.**

છહરી પાળતા નાના મોટા સંઘ તો ઘણાએ આ કાળમાં નીકળતા આપણે જોયા હશે. પણ જે સંઘમાં હજારો માણસો, સેંકડો ગાડાંઓ અને સેંકડાની સંખ્યામાં મુનિરાજો હોય તેવા સંઘો તો સ્વ. પૂજ્ય આચાર્યદેવની સાન્નિધ્યતામાં નીકળેલ. શેઠ માણેકલાલ મનસુખભાઇ અને શેઠ નગીનદાસ કરમચંદના સંઘો તો કવચિત્ નીકળ્યા છે. સંઘના દર્શનાર્થે પચીસ પચાસ ગાઉથી ઉલટતી માનવમેદની, રાજાઓ મહારાજાઓદ્વારા થતાં સંઘના સામૈયાં અને સાધાર્મિક ભાઇઓ હસ્તક થતા સંઘના આદરસત્કારે તો કોઇને ધર્મબીજ, કોઇને સમકિત અને કોઇને વિરતિપણું આપી જીવન તાર્યાં છે.

**અજોડ વ્યકિતત્વ.**

સ્વ. પૂજ્ય આચાર્યદેવની આંખમાં કોઇ અપૂર્વ બ્રહ્મચર્યનું તેજ હતું તેમની સામે વધુ વખત એકીટસે જોઇ શકાતું નહિ. પ્રથમદર્શનેજ તેમની આંખ આવનારને નખશિખ ઓળખી લેતી. તેઓ આવનાર શું કહેવા માગે છે અને શા આશયે આવ્યો છે તે પ્રથમ દર્શનેજ પારખી લેતા. અર્થાત્ તેમની ચક્ષુ આરપાર ઉતરી પૂર્વપશ્ચાત્ સર્વને નિહાળી શકતી.

તેમની જીવનની એકે પ્રવૃત્તિ એવી નથી કે આરંભ્યા પછી છોડવી પડી હોય કે આરંભેલી પ્રવૃત્તિ નિષ્ફળ ગઇ હોય. પ્રવૃત્તિને તેઓ આરંભતા પહેલાં ખુબ ખુબ વિચાર કરતા અને આરંભ્યા પછી કીડી સામે કટક જેટલી તે તૈયારી રાખતા. તેમના જીવનકાળ દરમિયાન આવા ઘણાએ પ્રસંગો આવ્યા છે પણ જેમાં તેમણે ઝુકાવ્યું તેમાં કોઇ દિવસ નિષ્ફળતા સાંપડીજ નથી. તેમનો પ્રભાવજ એવો હતો કે તેમનું નામ સાંભળતાંજ અર્ધું કાર્ય ઉકલી જતું. તેમજ એ પણ સાથેજ છે કે શાસનની સર્વમુખી કોઇ એવી પ્રવૃત્તિ નથી બની કે જેમાં તેમની દોરવણી ન મળી હોય તે સાંગોપાંગ સફળ થઇ હોય.

તેમનો અવાજ, તેમની આકૃતિ અને તેમનો સ્વભાવ આ સર્વે નાયકતાને સૂચવનારાં હતાં. તેમના અવાજમાં સત્તાવાહિતા હોવા છતાં ઉંડી સમજ હતી. તેમની આકૃતિ સામાને તેજથી આંજતી હોવા છતાં સૌમ્યભરી હતી. તેમનો સ્વભાવ હસમુખ છતાં પૂર્વાપરની સર્વ વસ્તુનો અવગાહક હતો.

આણંદજી કલ્યાણજીની પેઢીના પ્રતિનિધિઓ, સમાજના અગ્રગણ્યો વિગેરે સૌના તે આધારભૂત, સમગ્ર શાસનના હિતચિંતક અને સમગ્ર શાસનના રક્ષક હોવાથી સમાજ તેમને શાસનસમ્રાટ્ તરીકે ઓળખતો તે ખરેખર વ્યાજબીજ હતું.

તેમનો જન્મ, દીક્ષા, પદપ્રદાન, તેમના હાથે થયેલાં શાસનપ્રભાવનાના કાર્યો વિગેરે બધી વિગતો તો મહાકાય ગ્રંથથીજ કહી શકાય તેમ છે. પણ અહિં તો માત્ર તેમનું આછું દર્શન આપ્યું છે. અને તે એ કે સ્વ. પૂ. આચાર્યદેવ નેમિસૂરીશ્વરજી મહારાજ આ કાળના **શાસનસમ્રાટ્ યુગપ્રધાન કે શાસનના કોહીનૂર** જે કહો તે બધા હતા.

## સ્વ. પરમપૂજ્ય આચાર્યદેવનું શિષ્યમંડળ.

સ્વ. પૂજ્ય આચાર્યદેવનો આજે પણ શાસન જેનાથી ઉન્નત શિર રહી શકે તેવો બહોળો વિદ્વાન્ શિષ્યસમુદાય છે. દર્શનશાસ્ત્રના પૂર્ણ અભ્યાસી અને ખંડનખંડખાદ્ય જેવા મહાકાય ગ્રંથોની વૃત્તિના રચયિતા શાસ્ત્રવિશારદ પૂ. **દર્શનસૂરીશ્વરજી** મહારાજ, આ કાળે સૌને આદર્શરૂપ અને તેવા, પરમ ગુરૂભક્ત, ભદ્રિક, શિલ્પ, જ્યોતિષ અને અખંડ આગમજ્ઞાતા પૂ. **વિજયોદયસૂરીશ્વરજી** મહારાજ, વ્યવહારદક્ષ અને કોઇના પણ તેજમાં અંજાયા સિવાય સ્પષ્ટ અને સત્ય કહેનાર, ન્યાય વિશારદ, કવિરત્ન પૂ. **નંદનસૂરીશ્વરજી** મહારાજ, અવસર જાણ, સરલ પરિણામી પૂ. **વિજયવિજ્ઞાનસૂરીશ્વરજી** મહારાજ, પ્રાકૃત અને ગુજરાતી ભાષામાં અનેક સાહિત્યનું સર્જન કરનાર પૂ. **વિજયપદ્મસૂરીશ્વરજી** મહારાજ, સાહિત્ય અને કાવ્યના અખંડ અભ્યાસ સાથે વિવિધ કાવ્યો ગુંથનાર પૂ. **વિજયામૃતસૂરીશ્વરજી** મહારાજ, ન્યાય સાહિત્ય અને વ્યાકરણના પ્રકાંડ અભ્યાસી અને ત્રણે શાસ્ત્રોના વિપુલકાય ગ્રંથરચયિતા વ્યાખ્યાન વાચસ્પતિ પૂ **લાવણ્યસૂરીશ્વરજી** મહારાજ, પ્રાકૃતભાષાના પ્રકાણ્ડ-વિદ્વાન્ પૂ. વિજય**કસ્તુરસૂરીશ્વરજી** મહારાજ, ભદ્રિક અને આગમ તથા પ્રકરણ ગ્રંથોના સારા અભ્યાસી પૂ. પં. **સુમિત્રવિજયજી** ગણિવર, વ્યવહારનદીષ્ણુ વિવિધગ્રંથાભ્યાસી પૂ. પં. **મેરૂવિજયજી** ગણિવર, ન્યાય, વ્યાકરણ સાહિત્ય, સંગીત તથા ગુજરાતી ભાષાના સારા અભ્યાસી પૂ. પં. **દક્ષવિજયજી** તથા પૂ. પં. **સુશીલવિજયજી** ગણિવર, ન્યાયના પ્રકાંડ અભ્યાસી બુદ્ધિવૈભવી **જયાનંદવિજયજી** મહારાજ, ન્યાય સાહિત્ય અને ગુજરાતીના સરસ અભ્યાસ સાથે રોચક લેખનશૈલિવાળા પૂ. પં. **ધુરંધરવિજયજી** મહારાજ, નવીન ન્યાય વિશારદ પૂ. પં. **શિવાનંદવિજયજી** મહારાજ તથા સાહિત્ય વ્યાકરણ ન્યાયના સારા અભ્યાસી પૂ. **મહિમાપ્રભવિજયજી** મહારાજ વિગેરે અનેક વિદ્વાનો જૈનશાસનને શોભાવી રહ્યા છે.

(૪)

## પરાગ ટીકાકાર

સ્વ. પૂજ્ય આચાર્યદેવના ઉપરોક્ત વિદ્વાન્ શિષ્ય મંડળમાં પરાગ ટીકાના રચયિતા પૂજ્ય આચાર્યદેવ **વિજયલાવણ્યસૂરીશ્વરજી મહારાજ** ગણનાપાત્ર મહાપુરુષ છે. તેઓનો સંક્ષિપ્ત પરિચય આ પ્રમાણે છે.

આ ટીકાકાર મહાત્માનો અનેક મહારત્નોને ઉત્પન્ન કરનાર સૌરાષ્ટ્રમાં આવેલ બોટાદના બગડીયા કુટુંબમાં પ્રસિદ્ધ **જીવણલાલ** પિતા અને માતા **અમૃત**બેનને ત્યાં વિ. સં. ૧૯૫૩ ભા. વ. ૫ ના રોજ જન્મ થયો હતો. ગૃહસ્થપણામાં તેમનું નામ **લવજી** પાડયું. ૧૯ વર્ષની ઉંમરે વિક્રમ સંવત્ ૧૯૭૨ અષાડ સુદ ૫ ના રોજ સાદડી મુકામે તેમણે પરમપૂજ્ય સ્વ. આચાર્યદેવ વિજય નેમિસૂરીશ્વરજી મહારાજ સાહેબના પુનિત હસ્તે પરમપાવન કલ્યાણકારી ભાગવતી **દીક્ષા** અંગીકાર કરી. અને ત્યાં તેમનું નામ મુનિ **લાવણ્યવિજયજી** રાખવામાં આવ્યું, થોડાજ વખતમાં તેમણે પ્રકરણ, આગમ, વ્યાકરણ ન્યાય સાહિત્યનો સારો અભ્યાસ કર્યો અને તેઓ યોગદ્વહનપૂર્વક વિ. સં. ૧૯૯૦માં ભાવનગરમાં **ગણિપદ** અને **પન્યાસ-**

**પદારૂઢ** સ્વ. પૂજ્ય આચાર્યદેવના વરદ હસ્તે થયા. વિ. સં. ૧૯૯૦ના જેઠ માસમાં મહુવામાં સ્વ. પૂજ્ય આચાર્યદેવે તેમને **ઉપાધ્યાય** પદવી આપી અને વિ. સં. ૧૯૯૨ના વૈશાખ સુદ ૪ના દીવસે હજારો માનવમેદની સમક્ષ અમદાવાદમાં સ્વ. પૂજ્ય આચાર્યદેવના સ્વહસ્તે **આચાર્યપદાધિષ્ઠિત** કર્યા અને ઉ. લાવણ્યવિજયજી ગણિ વિજય **લાવણ્યસૂરીશ્વરજી** બન્યા.

## પરાગ ટીકાકારનું ગ્રંથ નિર્માણ.

પરાગ ટીકાકાર વિજય લાવણ્યસૂરીશ્વરજી મહારાજ વર્તમાનમાં સાધુસમાજમાં વ્યાકરણશાસ્ત્રના સર્વશ્રેષ્ઠ સમર્થ વિદ્વાન્ છે અને સાહિત્ય ન્યાય અને ધર્મશાસ્ત્રના પણ અજોડ ગણનાપાત્ર વિદ્વાન્ છે.

પૂજ્ય આચાર્ય વિજય લાવણ્યસૂરીશ્વરજી મહારાજે વ્યાકરણ, ન્યાય અને સાહિત્યમાં વિપુલકાય ગ્રંથો રચ્યા છે તેની યાદી આ પ્રમાણે છે.

૧ ધાતુરત્નાકરના સાત ભાગ ૪૫૦૦૦૦ સાડાચાર લાખ શ્લોક પ્રમાણ.

૨ કલિકાળ સર્વજ્ઞ હેમચંદ્રસૂરિવિરચિત શબ્દાનુશાસન ઉપરના ન્યાસના ત્રુટિત સ્થળનું અનુસંધાન અને સંશોધન.

૩ કલિકાળ સર્વજ્ઞ હેમચંદ્રસૂરિ વિરચિત કાવ્યાનુશાસન ઉપર ત્રીસ હજાર શ્લોક પ્રમાણ વૃત્તિ.

૪ તત્ત્વાર્થસૂત્રમાં આવેલ ત્રણ સૂત્ર ઉપરની ત્રિસૂત્રિ પ્રકાશિકા ટીકા ૪૦૦૦ શ્લોક પ્રમાણ.

૫ મહામહોપાધ્યાય ન્યાયાચાર્ય ન્યાયવિશારદ શ્રીમદ્યશોવિજય ગણિવર પ્રણીત નયરહસ્ય ઉપર ૩૦૦૦) ત્રણ હજાર શ્લોક પ્રમાણ ટીકા.

૬ જૈનતર્કભાષા અગર અનેકાન્ત વ્યવસ્થા ગ્રંથ ઉપર તત્ત્વાવબોધની નામની ૧૪૦૦૦ શ્લોક પ્રમાણવૃત્તિ.

૭ સપ્તભંગી–નયપ્રદીપ ઉપર ૨૦૦૦ શ્લોક પ્રમાણ બાળાવબોધિની વૃત્તિ

૮ નયામૃતતરંગિણી ગ્રંથ ઉપર ૧૬૦૦૦ શ્લોક પ્રમાણ તરંગિણી તરણિ નામની વૃત્તિ.

૯ ૧૪૪૪ ગ્રંથ પ્રણેતા પૂજ્ય હરિભદ્રસૂરિકૃત શાસ્ત્રવાર્તા સમુચ્ચય ઉપર ૨૫૦૦૦) શ્લોક પ્રમાણવૃત્તિ.

૧૦ તિલકમંજરી ઉપરની પ્રસ્તુત પરાગ ટીકા,

આ પરાગટીકા કેવળ સાહિત્યનોજ ગ્રંથ નથી રહ્યો પણ વ્યાકરણ ન્યાય સાહિત્ય અને ધર્મશાસ્ત્રની અનેકવિધ સામગ્રી આ ટીકામાં આપવામાં આવી છે. પ્રથમ શ્લોકની વૃત્તિ તપાસતાં આપણને આ વાત સ્પષ્ટ સમજાશે કે આ વૃત્તિમાં વ્યાકરણ સાહિત્ય અલંકાર ન્યાય અને ધર્મશાસ્ત્ર તમામ આવે છે. પદેપદની અન્વયપૂર્વક વૃત્તિ આપવા સાથે પદેપદનો કોષ, પદેપદનો ફલિતાર્થ અને પદેપદની સિદ્ધિ કરવામાં આવી છે, આ પરાગ વૃત્તિ વાંચતાં આપણને વૃત્તિકારના વિસ્તીર્ણ જ્ઞાન, બુદ્ધિ, પ્રતિભા અને સ્મૃતિનો ખરો ખ્યાલ આવે છે.

આ જડવાદના ભૌતિકવાદમાં માણસોની ચિત્તવૃત્તિ એટલી બધી અસ્થિર અને ચંચળ બનતી જાય છે કે તે તેને શાસ્ત્રીય તલસ્પર્શી અભ્યાસ થવા દેતી નથી. તેની પાસે વિવિધ ટીકા ટિપ્પણ અને ટાયલાવાળું એટલું બધું સાહિત્ય ખડકાય છે કે જેથી વાંચક વિના પરિશ્રમે વિદ્વત્તાનો ડોળ કરતાં શિખે છે અને શાસ્ત્રીય અધ્યયનથી પરાઙ્મુખ રહે છે. આવા વિકટ કાળમાં પણ આપણે ત્યાં સાહિત્ય વ્યાકરણ ન્યાયના પ્રકાણ્ડ અભ્યાસી અને તેજસ્વી ગ્રંથકાર સાંપડયા છે તેથી સમાજે ગૌરવ લેવા જેવું છે. આજે તો પ્રાચીન વિદ્યાનો અભ્યાસ ભૂલાતો જાય છે અને કદાચ થાયછે તો તે પણ માત્ર કામપુરતો થાય છે.

**પરાગ ટીકાકારનું વ્યક્તિત્વ.**

આમ પરાગ ટીકાકાર વિજયલાવણ્યસૂરીશ્વરજી મહારાજ વ્યાકરણ, ન્યાય સાહિત્ય અને ધર્મશાસ્ત્રના સમર્થ વિદ્વાન્ હોવા સાથે સુંદર વક્તા અને પ્રતિભાસંપન્ન આચાર્ય છે.

જૈન સમાજમાં આંગળીને વેઢે ગણાતા સારા વ્યાખ્યાતાઓમાં તેમનું સ્થાન અગ્રગામિ છે. તેઓની વક્તૃત્વશક્તિની ખાસ ખાસીયત એ છે કે ગ્રંથકારના ગ્રંથને અનુલક્ષીને વિવરણ, સુંદર રહસ્યોદ્‌ભાવન અને પૂર્વાપર વ્યવસ્થિત સંકલના સાથે સ્વાનુભવ અને અભ્યાસને દર્શાવવાપૂર્વક શ્રોતાને તત્ત્વથી પરિપ્લાવિત કરવાની છે. આવી રીતના શાસ્ત્રીય વ્યાખ્યાતાની આજે સમાજમાં ઘણીજ ખોટ છે. આજે તો વ્યાખ્યાતા જગતના પ્રવાહમાં તણાઇ જનતાના લાભ કરતાં જનતાની પ્રશંસા માટેજ વલખાં મારે છે. તેથી પરિણામ એ આવે છે કે શ્રોતા ઘણું ઘણું સાંભળ્યા છતાં કુથલીમાં પડી તત્ત્વવિમુખ બને છે. અને વ્યાખ્યાતા લોકની પ્રશંસા સિવાય બીજું કાંઈ પામી શકતો નથી.

તેઓશ્રીની પ્રતિભા અને વ્યવહારદક્ષતાનો જૈનસમાજને સાધુસંમેલનના વખતથી સારો ખ્યાલ છે. સાધુસંમેલનમાં સ્વર્ગસ્થ પૂજ્ય આચાર્યદેવની આજ્ઞાથી તેમણે લીધેલ ભાગ અને મુનિસંમેલનની પ્રતિકાર સમિતિમાં તેમણે કરેલ સક્રિય કાર્ય તેઓશ્રીની પ્રતિભા અને વ્યવહારદક્ષતાને બરાબર સમજાવે છે.

આધારપૂર્વક સ્પષ્ટ સત્ય અને પરિમિત બોલતા, શાસનની વફાદારીપૂર્વક પ્રત્યેક ધર્મપ્રભાવનાના કાર્યમાં મશગુલ રહેતા અને કામથી કામ રાખનાર આ આચાર્ય દેખીતા અલિપ્ત લાગતા છતાં અધ્યયન, અધ્યાપન અને ચિંતનમાં સદાયે લિપ્તજ રહ્યા છે.

પરાગ ટીકામાં તેમનો આ અભ્યાસ પ્રતિભા અને સુસ્પષ્ટ વક્તૃત્વની છાપા સ્પષ્ટ તરવરે છે.

મહાપરિશ્રમે તૈયાર કરાયેલ આ ગ્રંથ સારા કાગળ અને સારા ટાઈપમાં મુદ્રિત કરવા સાથે વાંચકને મૂળ અને વૃત્તિનો પરસ્પર સંબંધ તુર્ત ખ્યાલ આવે તે માટે (अ) (आ) વિગેરે અક્ષરો મૂકી વિભાગો પાડી ગ્રંથને ખુબજ સુવાચ્ય બનાવવા પ્રયત્ન કર્યો છે.

ધનપાલ કવિ–પૂ. તિલકમંજરી અને સ્વ. પૂજ્ય આચાર્યદેવ સંબંધી સ્વતંત્ર ગ્રંથ થાય તેટલું કહી શકાય તેમ છે. પરંતુ આ પ્રસ્તાવના બહુ લાંબી ન થઇ જાય તે લક્ષ્યરાખી અતિ સંક્ષેપમાં માત્ર તેનું આછું દર્શનજ આપ્યું છે.

**ઉપસંહાર.**

અંતે આ પ્રસ્તાવના લખવામાં જે કાંઇ વિપરીત કે ખોટું લખાયું હોય તેની ક્ષમા માગી અને પૂ. આચાર્યદેવ વિજયલાવણ્યસૂરિ મહારાજે આ કામ સોંપી મને પૂર્વાચાર્યોની કૃતિને જોવામાં પ્રેરણા આપવા બદલ તેમજ પૂર્વ પુરૂષો સાથે સ્વર્ગસ્થ પૂજ્ય આચાર્યદેવના ગુણગ્રામ કહેવા માટે તક આપવા બદલ આભાર માની વાંચકો આનો યોગ્ય લાભ ઉઠાવી શાસનને ઉજ્વલિત કરે એ અભ્યર્થના સાથે: વિરમું છું.

૧૫–૨–૫૨

**પંડિત મફતલાલ ઝવેરચંદ,**
ખેતરપાળની પોળ–**અમદાવાદ.**

॥ अर्हँ ॥

आशैशवशीलशालिने श्रीनेमीश्वराय नमः ।

श्रीजिनेन्द्रशासनैकरसिक-धाराधीशासादितसरस्वतीबिरुद-कवीन्द्र-
विप्राग्रणी-परमार्हत-श्रीधनपालसुधीशेन विरचिता

# तिलकमञ्जरी ।

स वः पातु जिनः कृत्स्नमीक्षते यः प्रतिक्षणम् ।
रूपैरनन्तैरेकैकजन्तोर्व्याप्तं जगत्त्रयम् ॥ १ ॥ [ मविपुला ]

---

## विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् ।

सम्यग् नत्वा महावीरं रागादिक्षयकारणम् । उत्पन्नानन्तविज्ञानं देवपूज्यं गिरीश्वरम् ॥ १ ॥
तिलकमञ्जरीनाम्याः कथायाः पदपद्धतिम् । श्लेषभङ्गादिवैषम्यं विवृणोमि यथामति ॥ २ ॥

---

श्रीमत्तपोगच्छाधिपति-सर्वतन्त्रस्वतन्त्र-शासनसम्राड्-जगद्गुरु-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण
व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन श्रीविजयलावण्यसूरिणा प्रणीता

## परागाभिधा विवृतिः ।

समं सर्वत्रैव स्फुरदमृतगुः कौशिकमुदं, विधत्ते सत्तेजःकुमुदवनसौभाग्यरसिकः ।
न मन्देनापेक्ष्यः क्षपयतितरामान्तरतमो, जिनेन्द्रो भव्यानामभिनवदिनेन्द्रो विजयते ॥ १ ॥ [ शिखरिणी ]

---

**परागमङ्गलपद्यव्याख्या**—व्याख्या परागपद्यानां हृद्यानां श्लेषशालिनाम् । तन्यते बालबोधाय सुधीमोदाय च स्फुटम् ॥ १ ॥

**समं सर्वत्रे**त्यादि—सर्वत्रैव न तु क्वचिदेव, सममेव सहैव, युगपदेवेत्यर्थः, न तु पर्यायेण; अथवा तुल्यमेव यथा स्यात् तथा न तु क्वचिन्न्यूनाधिकम्, एवशब्दस्योभयत्रान्वयात्; स्फुरन्त्यः समवसरणवेलायां संचरन्त्यः, मोक्षरूपामृतप्रयोजकत्वाद् अमृतवद् आह्लादकत्वाद् वा अमृतानि गावो वाचो यस्य, अमृतवदुज्ज्वलसमानत्वाद् वा अमृतानि शरीररश्मयो यस्यासौ **स्फुरदमृतगुः**, कौशिकस्येन्द्रस्य तद्वेलायां स्वर्गादापतितस्य मुदं विधत्ते जनयति विशेषेण पुष्णाति वा । सत्तेजसा परिपूर्णसम्यग्ज्ञानरूपान्तःप्रकाशेन, कोः पृथिव्याः, तद्वासिजनानामित्यर्थः, मुदा अवनम्, मुदो वा अवनं रक्षणम्, तेन यत् सौभाग्यं सौन्दर्यं तत्र रसिकः प्रणयीति **सत्तेजःकुमुदवनसौभाग्यरसिकः** । मन्दानाम् इनः श्रेष्ठः, तेन नापेक्ष्योऽपेक्षणीयो न भवति, तस्य तत्राप्रत्ययात् । अन्तर्भवमान्तरम्, अज्ञानरूपं तमो ध्वान्तं **क्षपयतितराम्** अतिशयेन नाशयति, समूलमुन्मूलयतीत्यर्थः । प्रसिद्धदिनेन्द्रस्तु न तथा, प्रत्युत तस्योष्णगोरेव सत्त्वात्, क्वचिदेव कदाचिदेव च स्फुरणात्, कौशिकस्योलूकस्य मुदो व्याघातकत्वात्, मन्दाख्येन शनैश्चरेण स्वपितृत्वेनापेक्षणीयत्वात्, बाह्यतमस एव केवलतिरोधायकत्वाच्च । तस्माद् भव्यानां मोक्षार्हजनानां कृते, अभिनवदिनेन्द्रोऽपूर्वदिनेशरूपो जिनेन्द्रो विजयते सर्वोत्कर्षेण वर्तते ।

अभिनवपदगम्यस्य प्रसिद्धदिनेन्द्रव्यतिरेकस्य श्लिष्टपदैः परिपोषणेन श्लेषानुप्राणितव्यतिरेकालङ्कारः, द्वितीय-तुरीयचरणयोश्छेकानुप्रासश्चेत्यनयोः संसृष्टिः । जिनेन्द्रादिविषयकरत्याख्यभावरूपासंलक्ष्यक्रमव्यङ्ग्यरूपध्वनिसत्त्वेनोत्तमकाव्यत्वं तु सर्वत्रैव ।

"साकं सत्रा समं सह" इति, "वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्" इति, "महेन्द्र-गुग्गुलूलूक-व्यालग्राहिषु कौशिकः" इति चामरः; "गोशब्दः कथितो बाणे वाचि दिग्वज्रयोर्जले । षण्डनेत्रमयूखेषु भूमौ स्वर्गे च दृश्यते" ॥ इति, "मन्दो मूढे च रोगार्ते स्वैरे भाग्ये शनैश्चरे" इति च नानार्थसंग्रहः ॥ १ ॥

लब्धाऽनल्पार्थसार्थो मकरधिमधरीकृत्य यः सत्तयाऽऽस्ते, प्रोद्यत्कल्लोलमालाऽपि जडपरिणतिर्गाहते यं च नित्यम् ।
सद्वंशो वारिराशौ सदमृतसरणिं संसृतौ संश्रितोऽस्तु, पोतः श्रीनाभिजातो विलसनवसतिर्धीवराणां नराणाम् ॥ २ ॥
[ स्रग्धरा ]

भव्यग्रामप्रशास्ता चरणजयकृतौ केसरी शास्त्रविद्योदचद्वीर्येण दाता प्रतिदिनरजनि क्षेत्रभृद्राज्यभीतेः ।
यः स्निग्धैर्दान्तराजैः प्रविचरति सदाचारलब्धस्वरूपः, शान्तिं श्रीशान्तिनाथो जनयतु जनतान्तः क्षमाभृत्सुचक्री ॥ ३ ॥
[ स्रग्धरा ]

---

समुचितेष्टदेवतया जिनसामान्यं मङ्गलपथमवतार्य युगादीशत्वाज्जिनविशेषमादिनाथं मङ्गलपथमवतारयति—**लब्धेत्यादिना । पोतः** शिशुः प्रवहणरूपो वा, **श्रीनाभिजातः** श्रीनाभिनन्दनः, आदिनाथ इत्यर्थः । **धीवराणां** धिया बुद्ध्या वराः श्रेष्ठास्तेषाम्, विद्वद्वराणामित्यर्थः, प्रवहणपक्षे मात्सिकानाम् उपलक्षणत्वाज्जलयात्रिकानामित्यर्थः । **विलसनवसतिः** विलासास्पदम् । **अस्तु** भवतु । स केन साधर्म्येण तद्रूप इत्याह—**लब्धानल्पार्थसार्थः** लब्धो भूपालललामतयाऽधिकृतोऽनल्पः प्रचुरोऽर्थसार्थो हिरण्यधान्यादिधनराशिर्येन, यद्वा लब्धो गृहवासेऽपि निर्मलमति-श्रुता-ऽवधिज्ञानत्रिककलितत्वाद् अधिगतोऽनल्पो विपुलोऽर्थसार्थः शब्दार्थसमूहः पदार्थसमूहो वा येन, यद्वा लब्धः संयमावस्थायां केवलज्ञान-केवलदर्शनाभ्यामशेषविशेषसामान्यधर्मपुरस्कारेण साक्षात्कृतोऽनल्पः सकलोऽर्थसार्थो वस्तुसमूहो येन, यद्वा लब्धः संवेगरङ्गेण प्राप्तोऽनल्पः सर्वविषयावधिकोऽर्थसार्थो निवृत्तिनिकरो येन, यद्वा लब्धः कृतकृत्यतया प्राप्तोऽनल्पः सकलोऽर्थसमूहः प्रयोजनसमूहो येन स तथा, पक्षे लब्धः स्वस्मिन् धृतः पारप्रापणीयस्तथाविधधनराशिर्येन स तथा । मकरो धीयते पताकारूपेण धार्यते येन तं **मकरधिं** कामम्, बाहुलकात् कर्तरि किः । **सत्तया** सौन्दर्यलक्षणया ब्रह्मचर्यलक्षणया वा उत्तमतया । **अधरीकृत्य** तिरस्कृत्य, य **आस्ते** वर्तते । पक्षे मकरो धीयते स्थाप्यते यस्मिन्, धीयते पुष्यते येन वाऽसौ मकरधिः समुद्रः, अधिकरणे कर्तरि वा किः, तं **मकरधिम् । सत्तया** उपरिस्थित्या, **अधरीकृत्य** नीचैः कृत्वेत्यर्थः । प्रकर्षेण उद्यती उद्भवन्ती कल्लोलस्य आनन्दस्य माला परम्परा यस्यामसौ **प्रोद्यत्कल्लोलमाला । जडपरिणतिरपि** जडानां भोगभूमिकाले स्त्रीपुरुषयुगलरूपेण जातानामृजुजडानां मानवानाम्, अद्यतनानां वक्रजडानां वा, **परिणतिः** अन्तःकरणपरिणतिः, चित्तवृत्तिरित्यर्थः, **अपि**शब्दाद् ऋजुप्राज्ञानाम् । यं **नित्यम् अवगाहते** विषयीकरोति । पक्षे ड-लयोरैक्याद् **जलपरिणतिः** जलविकृतिरूपा, प्रोद्यती कल्लोलस्य महातरङ्गस्य माला, यम् **अवगाहते** आस्फालयति । सन् प्रशस्तो विशुद्ध इत्यर्थः, वंशः कुलं यस्य, पक्षे सन्तो दृढतरा वंशाः संवाहकवेणवो यस्मिन्नसौ सद्वंशः । **वा**शब्दो विशेषणसमुच्चयार्थकः । अरीणां 'भेको धावति, तं च धावति फणी, सर्पं शिखी धावति' इति रीत्या परस्परप्रतिपक्षभावापन्नानां जीवानां राशौ समूहस्वरूपायां **संसृतौ** संसारे, सतः समीचीनस्य अमृतस्य मोक्षस्य सरणिं सम्यग्दर्शन-ज्ञान-चारित्ररूपं मार्गमिति **सदमृतसरणिम्, संश्रितः** प्राप्तः, तन्मार्गोपदेष्टेत्यर्थः । पक्षे **वारिराशौ** समुद्रे, **संसृतौ** संचरणार्थम्, सतीं समीचीनाम्, शैत्यसुखावहामित्यर्थः, **अमृतसरणिं** जलमार्गम्, आश्रितः ।

अत्रोपमेये श्रीनाभिनन्दने उपमानपोतामेदारोपस्य श्लिष्टविशेषणैः पोषणात् श्लेषानुप्राणितः साङ्गरूपकालङ्कारः ॥

"अर्थो हेतौ प्रयोजने । निवृत्तौ विषये वाच्ये प्रकार-द्रव्य-वस्तुषु" इति, "पोतः शिशौ प्रवहणे" इति, "कल्लोलोऽरौ हर्ष-वीच्योः" इति चानेकार्थसङ्ग्रहः । "सन् साधौ धीर-शस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम्" ॥ इति, "अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरि-देवयोः ॥ इति च मेदिनी । "वा स्याद् विकल्पोपमयोरेवार्थेऽपि समुच्चये ।" इत्यमरः ॥ २ ॥

शान्तिनिदानं शान्तिनामानं षोडशं जिनं मङ्गलपथमानयति—**भव्यग्रामेत्यादिना** । क्षमां क्षान्तिं बिभ्रति धारयन्तीति क्षमाभृतो मुनयः, क्षमां पृथिवीं बिभ्रति पुष्णन्तीति क्षमाभृतो राजानश्च, तेषूभयेषु, **चक्री** चक्रवर्ती श्रीशान्तिनाथः, **जनतान्तः** जनतान्तःकरणे, जनसमूहमध्ये वा, **शान्तिम्** अशिवोपशमं कामादिदुःखोपशान्तिं वा जनयतु, गर्भं गतेनापि येनाशिवोपशमो विहितः सोऽधुना तु सुतरामेव विदध्यादित्यभिसन्धिः । कथमुभयत्र तस्य चक्रवर्तित्वमित्याह—**भव्यग्रामप्रशास्ता** भव्यानां मोक्षार्हजनानां ग्रामः समूहस्तत्प्रशास्ता तदुपदेष्टा, पक्षे भव्यानाम् उर्वरक्षेत्ररमणीयानां ग्रामाणाम्, तदुपलक्षितनगरजनपदानां च, निखिलभरतक्षेत्रस्थप्रदेशानामित्यर्थः, प्रशास्ता अधिकर्ता । आचरणस्य सदनुष्ठानस्य जयः, आचरणं चारित्रमभिव्याप्य जयो वा, चरणस्य चारित्रस्य जयो वा रागाद्यान्तररिपूत्सारणेन उत्कर्षः, तस्य कृतौ सम्पादने, **केसरी** सिंहः, तद्वद् विक्रमीत्यर्थः । पक्षे चशब्दस्य विशेषणसमुच्चयार्थकतया रणे संग्रामे जयकृतौ वैरिविजयक्रियायां सिंहश्च । शास्त्रविद्यया शास्त्रसम्बन्धिविद्यया, पक्षे शस्त्रस्येयं शास्त्री, तया विद्यया शास्त्रविद्यया, **उदञ्चता उद्गच्छता** वीर्येण आध्यात्मिकबलेन, क्षेत्रभृतां देहभृतां या राजिः समूहस्तस्या अभीतेरभयस्य, **प्रतिदिनरजनि** सर्वदा, **दाता**

विस्फूर्जत्स्फीतवाचो नवसुरकुरुहः शश्वदाकाङ्क्षितानां, दानेमीनः सदावस्थितिजुष उदरे शान्तिसिन्धोर्विहाय ।
कान्तां भौर्गीं च राजीं जितमदनमदस्तीर्थराजः प्रभासः, सर्वाधिव्याधिशून्यं शमनिधि ददतामक्षरस्थानमिष्टम् ॥ ४ ॥
[ स्रग्धरा ]

---

दायकः, पक्षे तादृशेन वीर्येण पराक्रमेण, क्षेत्रभृद् धान्यादिक्षेत्रविशिष्टं यद् राज्यं तस्य भीतेः अवग्रहादिभयस्य **दाता** खण्डयिता निवारयितेत्यर्थः । **स्निग्धैः** स्नेहास्पदैः, **दान्तराजैः** दन्तिनां हस्तिनां समूहो दान्तम्; तत्र राजानः श्रेष्ठास्तैर्वाहनभूतैः, पक्षे दान्तानामिन्द्रियदमनवताम्, मुनीनामित्यर्थः, ये राजानः श्रेष्ठास्तैः सहेत्यर्थः । यः **प्रविचरति** प्रकर्षेण विहरति । **सदाचारलब्धस्वरूपः** सदाचारेण सम्यक्चारित्रेण लब्धं साक्षात्कृतं स्वस्य आत्मनो रूपं तत्त्वं येन, पक्षे **सदा** सर्वदा चारेण गुप्तचरद्वारा लब्धमधिगतं स्वेषामात्मीयानां वशवर्तिनृपादीनां रूपं स्वभावो येन स तथा ।

अत्राद्यपादे सभङ्गश्लेषानुप्राणितरूपकालङ्कारः, तदन्यत्र पादत्रये श्लेषविच्छित्त्या आध्यात्मिकाधिभौतिकसम्पद्वर्णनात् तदनुप्राणित उदात्तालङ्कारश्च बोध्यः ।

"क्षमा क्षान्तौ क्षितौ" इत्यनेकार्थसंग्रहः, "क्षेत्रं देहे कलत्रे च केदारे सिद्धधामनि" इति, "ग्रामः पुरे जनावासे शब्दादिपूर्वको गणे" इति, "चारश्चर-प्रवासयोः" इति च नानार्थसंग्रहः, "दन्ती दन्तावलो हस्ती" इत्यमरः ॥ ३ ॥

आशैशवशीलशालिनं नेमिनामानं द्वाविंशतितमं तीर्थङ्करम्, निजगुरुम्, सकलतीर्थङ्करांश्च वचनश्लेषभङ्ग्या मङ्गलपथमवतारयति—**विस्फूर्जे**त्यादिना । **प्रभासः** प्रकृष्टा भासा कान्तिर्यस्याऽसौ तथा, भासतेर्व्यञ्जनान्तगुरूपान्त्यलक्षणेन स्त्रीलिङ्गविहितेन अप्रत्ययेन भासाशब्दः सिध्यति, अत एव निर्मलशीलधारणाद् वा **जितमदनमदः** दूरीकृतकामगर्वः । **तीर्थराजः** तीर्थस्य द्वादशाङ्गीरूपप्रवचनस्य अर्थरूपेण प्रकाशनात्, तदाधारभूतस्य प्रथमगणधरस्य गुरुत्वात्, चतुर्विधश्रमणसङ्घस्य पूज्यत्वाद् वा राजा प्रभुः, तीर्थङ्कर इति भावः, गुरुपक्षे **तीर्थराजः** गुरुराजः, गुरुवर इत्यप्यर्थः, तीर्थशब्दो गुरावपि वर्तते । नेमिश्चासौ इनश्चेति नेमीनः, नेमिनाथनामा तीर्थङ्करो नेमिसूरिनामा गुरुश्च । **शमनिधि** शमः सर्वप्रपञ्चोपरमो नितरां धीयते धार्यते भव्यैर्यस्मिस्तत् तथा, अत एव **सर्वाधिव्याधिशून्यम्,** शून्यं निष्प्रपञ्चम्, अत एव **इष्टं** सर्वाभीष्टम्, **अक्षरस्थानं** मोक्षस्थानम्, **सदा** सर्वदा, **वः** युष्मभ्यम्, "व्यत्यये लुग् वा" [ सि० हे० १. ३. ५६. ] इति विसर्गलुकि **'व'** इति, **ददतां** यच्छतु, ददिधातोरेकवचने रूपम् । कीदृशः सः ? इत्याह—**विस्फूर्जत्स्फीतवाचः** विस्फूर्जन्त्यः परितः स्फुरन्त्यः स्फीता भ्रम-प्रमाद-विप्रलिप्सादिदोषैरकलुषिता वाचा वाणी यस्य स तथा, भागुरिनये व्यञ्जनान्तेभ्योऽप्यापः साधुतया वाचाशब्दः सिध्यति, अथवा विस्फूर्जितं स्फीतं च यथा स्यात् तथा वक्तीति विस्फूर्जत्स्फीतवाचः, विस्फूर्जत्स्फीतयोः क्रियाविशेषणतया कर्मत्वनये कर्मोपपदादण्णा तत्सिद्धिः । **आकाङ्क्षितानाम्** अभिलषितानाम्, **शश्वत्** सन्ततम्, **दा** दायकः, दाधातोर्विचा तत्सिद्धिः । **नवसुरकुरुहः** नवोऽभिनवो लौकिककैवल्यलक्षणालौकिकोभयविधफलप्रसवितया प्रसिद्धदेववृक्षविलक्षणः, एवंविधः सुरकुरुहो देववृक्षः कल्पवृक्ष इति यावत्, अथवा अनवो महिमांशे जीर्णः सुरकुरुहो येन, अविद्यमानो नवः स्तवो यस्य सोऽनवः, तथाभूतः सुरकुरुहो येन वा स तथा, स्तुतिवचनाद् नुधातोरलि नवशब्दसिद्धिः । **भौर्गीं** भोगराजात्मजाम्, **राजीं** नामैकदेशेन नामग्रहणाद् राजीमतीनाम्नीम्, **कान्तां** कमनीयवधूम्, **भौर्गीं** भोगसम्बन्धिनीम्, **कान्तां** कमनीयाम्, **राजीं** सामग्रीं वा, **विहाय** परित्यज्य, **शान्तिसिन्धोः** शमसागरस्य, **उदरे** मध्ये, सान्द्रात्मानन्दे इत्यर्थः, **स्थितिजुषः** स्थितिं कुर्वाणः, निवसन्नित्यर्थः, अत्रापि 'सदा' इति योज्यम् । भोगराजस्यात्मजां राजीमतीं परिणेतुं भूयसा समारम्भेण तदीयनिकेतनमायातोऽपि स भगवानुपहार्थमांसाय निबद्धं मृगनिकरं निरीक्ष्यानुकम्पार्द्रितचेता विरज्य दीक्षामग्रहीदिति तदीयमितिवृत्तम् । सामान्येन तीर्थङ्कराणां पक्षे—आकाङ्क्षितानां दाने नवसुरकुरुहोऽमी तीर्थराजो नोऽक्षरस्थानं ददतामित्यन्वयः, कीदृशास्ते ? विस्फूर्जत्स्फीतवाचः, कान्तां भौर्गीं राजीं विहाय शान्तिसिन्धोरुदरेऽवस्थितिजुषः, जितमदनमदः, प्रभासश्च, अत्र 'नवकुरुह्, तीर्थराज्, विस्फूर्जत्स्फीतवाच्, अवस्थितिजुष्, प्रभास्, जितमदनमद्' इति व्यञ्जनान्ताः शब्दा बहुवचनान्ता ज्ञेयाः, मदनं मद्, क्विपि रूपम्, अदसो बहुवचने 'अमी' इति, अस्मदश्चतुर्थीबहुवचने 'नः' अस्मभ्यमितिस्थाने, 'ददताम्' इति दाधातोर्बहुवचने रूपं यच्छन्त्विति तदर्थश्च, इति वचनश्लेषः ।

"अक्षरमपवर्गे स्यात्" इति, "राजा तु पार्थिवे । निशाकरे प्रभौ शक्रे यक्ष-क्षत्रिययोरपि" इति, "तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रा-ऽवतारयोः । ऋषिजुष्टे जले सत्रिण्युपाये स्त्रीरजस्यपि" ॥ इति चानेकार्थसङ्ग्रहः, "तित्थं पुण चाउवण्णे समणसंघे पढमगणहरे वा" इत्यभिधानचिन्तामणिवृत्तिः ॥ ४ ॥

जडप्रधानोऽपरभङ्गगोऽपि, सपङ्कजातः सगरान्वयोऽपि ।
नीचः प्रकृत्यामृतमाश्रितोऽपि, सप्ताम्बुराशिप्रकरः पृथिव्याम् ॥ ५ ॥
यच्छत्रसप्तस्फटशालिनागाधिराजसद्व्याजनिषेवणेन ।
महाशयत्वं समवाप नित्यं, पायादपायाज्जिनपः स पार्श्वः ॥ ६ ॥ [ उपजातियुग्मम् ]

येनोदञ्चति कौमुदच्छवितितिर्यस्तारकोपासितः, सर्वाशासुखसम्पदां प्रथयिता शश्वत् सुधामाश्रयन् ।
यश्चञ्चद्धरिणाङ्कितः शमनिधिः सद्वृत्तसौभाग्यभूर्वन्देऽज्ञानतमोहरं बुधवरं वीरं तमिन्दुं सदा ॥ ७ ॥ [ शार्दूलविक्रीडितम् ]

---

पुरुषादानीयं त्रयोविंशतितमं पार्श्वनाथनामानं तीर्थङ्करं पद्यद्वयेन मङ्गलपथमवतारयति—**जडप्रधे**त्यादिना । **प्रकृत्या** स्वभावेन **नीचोऽपि** अधमोऽपि, **जडप्रधानोऽपि** महाजडोऽपि, परेणाऽन्येन यो भङ्ग आमर्दनमालोडनमित्यर्थः, तं गच्छतीति **परभङ्गगोऽपि, सपङ्कजातोऽपि** अघंकलापकलितोऽपि, **सगरान्वयोऽपि** गरेण विषेण सहितोऽन्वयः परम्परा यस्य तथाभूतोऽपि, **मृतं** मरणम्, विनाशमित्यर्थः, आश्रितोऽपि, **सप्ताम्बुराशिप्रकरः** सप्तद्वीपसमुद्रनिकरः, यस्य पार्श्वनाथस्य छत्रेण छत्रभूतेन सप्तस्फटेन सप्तानां स्फटानां फणानां समाहारेण शालते शोभत इति यच्छत्रसप्तस्फटशाली, स चासौ नागाधिराजो भुजगेन्द्रस्तस्य सद्व्याजेन सम्यक्छलेन निषेवणं तस्य भगवतो नितरां सेवनं तेन, तत्पुण्येनेति यावत् । जडप्रधानत्वादिविरुद्धं पृथिव्यां **नित्यम्** आकल्पं **महाशयत्वं** महान् महनीय आशयोऽभिप्रायो यस्य तत्त्वं **समवाप** सम्यग् अवाप्तवान्, स **जिनपः** जिनेन्द्रः, **पार्श्वः** पार्श्वनाथः, **अपायात्** विनाशात्, **पायात्** रक्षतात् ।

तत्त्वतस्तु ड-लयोरैक्याद् **जलप्रधानः,** नास्ति पर उत्कृष्टो वेगवत्तायां येभ्यस्तेऽपराः, ते च ते भङ्गास्तरङ्गास्तांस्तैर्वा गच्छतीति **अपरभङ्गगः, सपङ्कजातः** कर्दमकलापकलितः, समुद्रेऽपि कमलसद्भाव इति मतमाश्रित्य पङ्कजातैः कमलैः सहितः, कविजनरूढ्या च पङ्कजेन कमलेन सहितः सपङ्कजः, नाभिजकमलोपलक्षितो हरिः, पङ्केन सह जायन्त इति सपङ्कजाः, कर्दमकलिते समुद्ररूपैकाधारे जातत्वाद् चन्द्रादयो वेत्यर्थः, तं तान् अतति आधारतया गच्छतीति सपङ्कजातः, **सगरान्वयः** सगरपुत्रैरुत्खातत्वात् सगरजन्मा, **नीचः** निम्नः, **अमृतं** जलम्, आश्रितः, महांश्चासौ आशयो जलाशयश्च महाशयः, तत्त्वं **महाशयत्वम्** इत्थमिह विरोधाभासोपपत्तिः ।

"भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये । कौटिल्ये भय-विच्छित्त्योः" इति, "पङ्कोऽघे कर्दमे" इति, "जातं जात्योघ-जनिषु" इति चानेकार्थसङ्ग्रहः, "स्फटा तु फण-दन्तयोः" इति मेदिनी, "आशयं विदुराधारं स्यादभिप्राय आशयः" इति शाश्वतः ॥ ५,६ ॥

वर्तमानशासनाधीशतया परमोपकारिणं चरमजिनवरं श्रीमहावीरं वन्दनवीथीमवतारयति—**येने**त्यादिना । **इन्दुं** चन्द्ररूपं तं **वीरं** महावीरस्वामिनं **वन्दे** स्तौमि अभिवादये च । केन साधर्म्येण चन्द्ररूपत्वमित्याह—**येनोदञ्चती**ति–येन महावीरस्वामिना, कौ पृथिव्यां मुद आनन्दस्य अच्छा स्वच्छा दुःखामिश्रितेत्यर्थः, विततिः सन्ततिः, उदञ्चति उद्भवति; पक्षे कौमुदस्य कुमुदसमूहस्य छवितितिर्द्युतिततिरुदेतीत्यर्थः । यश्च **तारकोपासितः** तारकैः संसारसागराद् उत्तारकैः, मुनिजनैरित्यर्थः, पक्षे तारकाभिस्ताराभिः, उपासित आश्रितः । पुनः **शश्वत् सुधाम** आध्यात्मिकं तेजः, **आश्रयन्** दधानः, पक्षे **सुधाम्** अमृतम्, आश्रयन् । **सर्वाशासुखसम्पदां** सर्वेषां भक्तजनानाम् आशायाः, तदनुरूपस्य सुखस्य, तत्साधनरूपायाः सम्पदः सिद्धिसम्पदश्च, **प्रथयिता** सत्यसङ्कल्पतया विस्तारयिता, पक्षे **सर्वाशासु** सर्वदिक्षु, **खसम्पदां** खस्य गगनमण्डलस्य सम्पदां चन्द्रिकादिकृतरमणीयत्वादिगुणोत्कर्षरूपसम्पत्तीनाम्, बाहुल्यविवक्षया बहुवचनम्, **प्रथयिता** जनयिता । यश्च पुनः **चञ्चद्धरिणाङ्कितः** चञ्चता पराक्रमेणोद्वेलता, हरिणा पादस्थेन रेखासन्निवेशविशेषनिर्मितसिंहाकारेण, अङ्कितश्चिह्नितः, पक्षे हरिणेन स्वमण्डलस्थेन मृगाकारेण । यश्च पुनः **शमनिधिः** शमस्य प्रपञ्चोपरमस्य, पक्षे सुधाशैत्यस्य निधिः । **सद्वृत्तसौभाग्यभूः** सद्वृत्तं सच्चारित्रं तस्य सौभाग्यस्य सुश्लोकत्वादेश्च, पक्षे सत् समीचीनं वृत्तं वर्तुलाकृतिस्तेन यत् सौभाग्यं सौन्दर्यं तस्य भूः स्थानम् । तम्, **अज्ञानतमोहरं** जाड्यान्धकारापहारिणम्, पक्षे चाक्षुषज्ञानरोधकान्धकारापहारिणम् । **बुधवरं** तत्त्वज्ञश्रेष्ठम्, पक्षे बुधस्य बुधग्रहस्य वरं श्रेष्ठम्, पितरमित्यर्थः । अत्र श्लेषानुप्राणितरूपकालङ्कारः ।

"धाम तेजसि गेहे च प्रभाव-जन्मनोरपि" इति, "आशा ककुभि तृष्णायाम्" इति च नानार्थसङ्ग्रहः, "वृत्तं वृत्तौ दृढे मृते । चरित्रे वर्तुले छन्दस्यतीता-ऽधीतयोर्वृते" ॥ इति, "भगोऽर्क-ज्ञान-माहात्म्य-यशो-वैराग्य-मुक्तिषु । रूप-वीर्य-प्रयत्नेच्छा-श्री-धर्मैश्वर्य-योनिषु" ॥ इति चानेकार्थसङ्ग्रहः, "बुधौ ग्रह-विचक्षणौ" इति शाश्वतः, "वदुङ् स्तुत्यभिवादनयोः" इति धातुपारायणम् ॥ ७ ॥

अमन्दं दीव्यन्ती सरससुमनोमानसमिता, जडोल्लासी भङ्ग्या विलसितमरुत्पक्षकृतया ।
कलध्वाना सम्यग्गतिरुपचिता मौक्तिकफलैर्जिनोक्ता गीराली विलसति मरालीव जगति ॥ ८ ॥ [ शिखरिणी ]

श्रीवृद्धिचन्द्रो मतिमच्चकोरमुदृद्धिचन्द्रो द्युतिपूर्णचन्द्रः ।
सिद्धान्तसारोदधिवृद्धिचन्द्रश्चकास्ति भव्यामृतवृद्धिचन्द्रः ॥ ९ ॥ [ उपजातिः ]

मान्यो मेरुरिव क्षमाधरवरो मध्यस्थतामाश्रितः, श्रद्धाबन्धुरवैबुधाञ्चितपदः श्लाघ्यादिगन्तस्थितिः ।
जैनेन्द्रागमजातचारुविभवः सौवर्णरूपः सदा, भव्यानां वितनोतु मङ्गलततिं श्रीनेमिसूरीश्वरः ॥१०॥ [ शार्दूलविक्रीडितम् ]

---

विद्याविलासविवृद्धये जिनवाणीमुपवर्णयति—**अमन्दमि**त्यादिना, जिनोक्ता **गीराली** वागावली **मराली** हंसी इव जगति विलसति । कथं तस्यास्तत्सादृश्यमित्याह—**सरससुमनोमानसमिता** सरसं शान्तिरसार्द्रं सुमनसां देवानां बुधानां वा मानसं हृदयम् इता गता सती, अथवा सरससुमनसां मानसैर्मिता अर्थांशे परिच्छिन्ना प्रमिता वा सती, **अमन्दम्** अत्यन्तम्, **दीव्यन्ती** द्योतमाना, उच्चरन्तीत्यर्थः, स्वमनोगतानामेव स्वप्रमितार्थानामेव च शब्दानां प्रेक्षावद्भिरुच्चारणात् । पक्षे सरसं सजलं सुमनसां देवानां मानसं तन्नाम्ना ख्यातं सरोवरम्, इता गता सती, अमन्दं दीव्यन्ती क्रीडन्ती । **विलसितमरुत्पक्षकृतया** विलसिताः प्रमुदिता मरुतो देवा यैस्तैः पक्षैर्नयवादैः, पक्षे विलसिता उल्लसिताः, उद्धता इत्यर्थः, मरुतो वायवो याभ्यां ताभ्यां पक्षाभ्यां पतत्राभ्यां कृतया जनितया सहकृतया वा, **भङ्ग्या** जिनागमविदितया सप्तभङ्ग्या, पक्षे तरङ्गेण, जातावेकवचनम्, ततस्तरङ्गैरित्यर्थः, सप्तभङ्ग्याश्च नयवादजनितत्वं नयवादसहकृतत्वं वा स्याद्वादवादिनां सुप्रसिद्धम्, **अजडोल्लासी** अजडान् बुधजनान् उल्लासयति प्रमोदयतीति तथा, पक्षे **जडोल्लासी** ड-लयोरैक्येन जलोल्लासी, जलमुल्लासयति संचालयतीति तथा । **कलध्वाना** कलो मधुरः, पक्षेऽव्यक्तमधुरो ध्वानो ध्वनिर्यस्याः सा तथा । **सम्यग्गतिः** समीची गतिरूर्ध्वगतिः सम्यग्ज्ञानं वा यया, पक्षे समीची गतिर्गमनं यस्या सा तथा । **मौक्तिकफलैः** सकलकर्मक्षयादिरूपा मुक्तिः, मुक्तिरेव मौक्तिकम्, विनयादिगणपाठादिकण्, मुक्तौ भवं वा मौक्तिकम्, अनन्तसुखादि, अध्यात्मादित्वादिकण्, तद्रूपैः फलैः, पक्षे मुच्यन्ते शुक्तिभिरिति मुक्ताः, मुक्ता एव मौक्तिकानि, विनयादित्वादेवेकण्, तद्रूपैः फलैः अलङ्कारभावं चारभावं वा गतैर्मुक्ताफलैरित्यर्थः, **उपचिता** समृद्धा, एकत्र तदात्मत्वेनाऽन्यत्रालङ्करणेनाऽशनविधिना वा । अत्र श्लेषानुप्राणितोपमालङ्कारः ॥

"सुमनाः पण्डिते पुष्पे मालती-देवयोरपि" इति, "मरुद् वात-दिवौकसोः" इति च नानार्थसङ्ग्रहः, "मानसं स्वान्त-सरसोः" इति, "भङ्गिः पुनः । भक्तिवीच्योः" इति, "गतिर्वृहद्व्रणे ज्ञाने यात्रोपाय-दशा-ऽध्वसु" इति, चानेकार्थसङ्ग्रहः, "केशे पक्षः समूहार्थः पक्षः साध्य-विरोधयोः । बले काले पतत्रे च रुचौ पार्श्वे विकल्पिते" ॥ इति, "अव्यक्तमधुरे कलः" इति च शाश्वतः ॥ ८ ॥

शमनिधानं वृद्धिचन्द्रनामानं निजगुरुगुरुं स्तौति—**श्रीवृद्धिचन्द्रे**त्यादिना । स्पष्टार्थकमेतत् ॥ ९ ॥

अथाऽनल्पोपकारकारिणं गुणगणगुरुं निजगुरुं स्तौति—**मान्य** इत्यादिना । मेरुरिव **मान्यः** पूज्यः । **क्षमाधरवरः** क्षमाधरेषु मुनिजनेषु, पक्षे भूधरेषु, वरः श्रेष्ठः । **मध्यस्थतां** मध्ये विवदमानयोरन्तराले तत्त्वनिर्णायकतया तिष्ठतीति मध्यस्थः, तत्ताम्; पक्षे मध्ये तिर्यग्दिगपेक्षया सङ्ख्यातीतद्वीप-समुद्राणां मानवक्षेत्रस्य जम्बूद्वीपस्य च मध्यभागे कमले कर्णिकावत्, ऊर्ध्वा-ऽधोदिगपेक्षया परस्पराऽसंलग्नप्रान्तयष्टिशकलद्वययोजकान्तरालस्थकिलिकावच्च तिष्ठतीति मध्यस्थः, तत्ताम्, **आश्रितः** प्राप्तः । **श्रद्धाबन्धुरवैबुधाञ्चितपदः** श्रद्धया बन्धुरं परिपूर्णं यद् वैबुधं बुधसमूहस्तेनाञ्चिते पूजिते पदे चरणौ यस्य, पक्षे वैबुधेन देवसमूहेन अञ्चितानि स्वावस्थानेन विशेषितानि पदानि स्थानानि यस्मिन् स तथा । **श्लाघ्यादिगन्तस्थितिः** श्लाघ्या प्रशंसनीया आदिगन्तं दिगन्तपर्यन्ता स्थितिर्मर्यादा, पक्षे अवस्थितिर्यस्य स तथा । **जैनेन्द्रागमजातचारुविभवः** जिनेन्द्रेण प्रोक्तं जैनेन्द्रम्, आगमजातं सिद्धान्तसन्दोहः, तदेव चारुविभवः शोभनं धनं यस्य, जैनेन्द्रागमजातेन चारुविभवश्चारोर्बृहस्पतेर्विभव इव विभवो बुद्धिविभवो यस्य वा, पक्षे जैनस्य जिनसमूहस्य इन्द्राणां च, य आगमो जन्माभिषेकोत्सववेलायामागमनम्, तेन जातश्चारुविभवः प्रतिष्ठासम्पत्तिर्यस्य स तथा । **सौवर्णरूपः** सुवर्णस्य समूहः सौवर्णम्, तदेव रूपमाकृतिर्यस्य, पक्षे तद्वद् रूपं भास्वररूपं यस्य स तथा । श्रीनेमिसूरीश्वरो भव्यानां **मङ्गलततिं** कल्याणपरम्परां **वितनोतु** विस्तारयतु । अत्र श्लेषानुप्राणित उपमालङ्कारः ॥

"स्थितिः स्त्रियामवस्थाने मर्यादायां च सीमनि" । इति मेदिनी, "विबुधः पण्डिते सुरे" इति, "पदं स्थाने विभक्त्यन्ते शब्दे वाक्येऽङ्क-वस्तुनोः । त्राणे पादे पादचिह्ने व्यवसाया-ऽपदेशयोः" ॥ इति चानेकार्थसङ्ग्रहः, "जानीयादागमं शास्त्रं स्यादागमनमागमः" इति शाश्वतः, "चारुर्बृहस्पतौ पुंसि शोभने त्वभिधेयवत्" । इति मेदिनी ॥ १० ॥

लावण्यपूर्णमतिहृद्यगुणस्वरूपं, सन्नन्दनं स्ववचसाऽमृतमेधयन्तम् ।
श्रीनेमिसूरिमतिभूरिविभूतिभाजं, भ्राजन्तमन्तरनिशं गुरुमानमामि ॥ ११ ॥ [ वसन्ततिलका ]

कम्रालङ्कारकीर्णा सुललितपदन्यासनैपुण्यपूर्णा, प्रोदञ्चच्चारुवर्णा स्वररुचिरतया शश्वदाकृष्टकर्णा ।
उन्मीलद्भूरिभावा नवरसहृदया श्लिष्यमाणा प्रसन्ना, स्वान्ते कान्तेव पुंसामुपहरति रसं भारती नेमिसूरेः ॥ १२ ॥
[ स्रग्धरा ]

यः सर्वदारोचितचित्तवृत्तिस्तथाऽप्यदारोचितचित्तवृत्तिः ।
सिद्धानुरागान्वितचित्तवृत्तिस्तथापि सिद्धान्तसुचित्तवृत्तिः ॥ १३ ॥ [ उपजातिः ]
निरस्तधामाऽपि विकीर्णधामा, सुधीवरो धीवरताहरोऽपि ।
सदर्पणो वर्जितदर्पणोऽपि, स नेमिसूरिर्जगतीह जीयात् ॥ १४ ॥ युग्मम् ॥ [ उपेन्द्रवज्रा ]

---

**लावण्यपूर्णं** लावण्येन बाह्यान्तरिकसौन्दर्येण, नामैकदेशन्यायाद् विजयलावण्यसूरिणा शिष्येण च, पूर्णं समेधितम् । **अतिहृद्यगुणस्वरूपम्** अतिहृद्यानामतिप्रियाणां गुणानां स्वरूपं मूर्तिम्, अतिहृद्यमतिप्रियं गुणस्य श्रीगुणविजयस्य स्वरूपं यस्य तं च । **सन्नन्दनं** सतां सुधियां साधूनां वा, नन्दनं स्वसुधीत्वातिशय-साधुत्वातिशयानुभवानन्देन समेधकम्, नन्दनः श्रीविजयनन्दनसूरिः, सन् सुधीः साधुश्च येन तं च । **स्ववचसा** स्वसदुपदेशवाक्येन, **अमृतं** भव्यजनानां मोक्षं श्रीविजयामृतसूरिं च, **एधयन्तं** वर्धयन्तम्, श्रीनेमिसूरिं गुरुम्, **अन्तः** अन्तःकरणे, **अनिशं** सदा, **भ्राजन्तं** दीप्यमानम्, **आनमामि** आ समन्ताद् नमामि । अत्र विजयलावण्यसूरिप्रभृतीनामन्योन्यमैत्रीनियन्त्रितानां सह दीक्षां जिघृक्षूणां सौराष्ट्रान्तर्गतबोटादाख्यैकग्रामजन्मनां मुनीशानामुल्लिखितनामान्यप्येकदेशन्यायेन निस्सरन्तीति वैचित्र्यम् ॥ ११ ॥

**कम्रालङ्कारकीर्णा** कम्रैः कमनीयैः, अलङ्कारैः—अनुप्रासोपमादिभिः शब्दा-ऽर्थालङ्कारैः, पक्षे हार-कङ्कणादिभिः शरीरालङ्कारैः, कीर्णा व्याप्ता । **सुललितपदन्यासनैपुण्यपूर्णा** सुललितानाम् अतिमनोहराणाम्, पदानां विभक्त्यन्तशब्दानाम्, न्यासे विन्यासे नैपुण्यं निपुणता, तेन पूर्णा, पक्षे सुललितः पदन्यासश्चरणविक्षेपः, तन्नैपुण्यपूर्णा । **प्रोदञ्चच्चारुवर्णा** प्रकर्षेण उदञ्चन् उच्चरन् चारुवर्णो माधुर्यादिव्यञ्जकमक्षरं यस्याम्, प्रकर्षेण उदञ्चन् उद्भ्राजन्, चारोर्बृहस्पतेः, वर्ण इव वर्णो यश इव यशो यस्या वा, सा तथा, पक्षे उदञ्चन् चारुवर्णो गौरवर्णो यस्याः सा तथा । **स्वररुचिरतया** स्वराणाम् अकारादीनाम्, रुचिरतया लघुत्वादिवशेन रुचिरच्छन्दोऽनुगुणतया, पक्षे निषादर्षभादिस्वरसौष्ठवेन, **शश्वदाकृष्टकर्णा** शश्वत् सन्ततम्, आकृष्टः सर्वतो व्यावृत्य स्वस्मिन् एकाग्रितः, कर्णो लोकानां श्रोत्रेन्द्रियवृत्तिर्यया सा तथा । **उन्मीलद्भूरिभावा** उन्मीलन्तः शब्दवृत्त्या आविर्भवन्तः, भूरिभावा वक्तुर्विविधाभिप्रायाः, पक्षे कटाक्षविक्षेपादिभिः स्फुटीभवन्तो विविधसम्भोगाभिप्रायाः स्वेदकम्पादयो व्यभिचारिभावा वा यया सा तथा । **नवरसहृदया** नवसङ्ख्यकरससहिता, पोषकशक्त्या, व्यापृत्या तु प्रशस्तरसप्रधाना, पक्षे नवोऽभिनवः, लोकोत्तर इत्यर्थः, रसः शृङ्गाररसो यस्मिंस्तादृशं हृदयं यस्याः सा तथा । **श्लिष्यमाणा** एकवृन्ताश्रितानेकफलन्यायेन नानार्थैः सम्बध्यमाना **प्रसन्ना** प्रसादगुणान्विता, पक्षे **श्लिष्यमाणा** आलिङ्ग्यमाना सती, **प्रसन्ना हृष्टा** । नेमिसूरेर्**भारती** वाणी, **कान्तेव** कामिनीव, **पुंसां** सहृदयजनानाम्, स्वान्ते, **रसं** शान्तिरसम्, पक्षे आलम्बनविधया शृङ्गाररसम्, **उपहरति** उपानयीकरोति । अत्र श्लेषानुप्राणितरूपकालङ्कारः ॥

"अलङ्कारस्तु हारादावुपमादावलङ्कृतौ" इति, "भावः सत्ता-स्वभावा-ऽभिप्राय-चेष्टात्म-जन्मसु । क्रिया-लीला-पदार्थेषु विभूति-बुध-जन्तुषु ॥ इत्यादौ च" इति, "प्रसादोऽनुग्रहे काव्यगुण-स्वास्थ्य-प्रसत्तिषु" । इति च मेदिनी "वर्णो गुणा-ऽक्षर-यशः-शुक्लादि-ब्राह्मणादिषु । वर्णः स्तुतौ कुथायां च वर्णः स्याद्भेद-रूपयोः" ॥ इति शाश्वतः, "स्वरो नासासमीरे स्यान्मध्यमादित्रिकस्वरे । उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमान्" ॥ इति विश्वः ॥ १२ ॥

**यः सर्वदे**त्यादि । सर्वदाराणामुचिता तुल्यप्रणयास्पदत्वेन अनुकूला परिचिता वा चित्तवृत्तिर्यस्य स सर्वदारोचितचित्तवृत्तिः, तथाप्यदारोचितचित्तवृत्तिरिति विरोधः, परिहारे तु सर्वदा रोचिता रागादिमलापसारणेन उज्ज्वलिता स्वस्य परस्य च चित्तवृत्तिर्येन स तथा । **सिद्धेषु** अणिमादिसिद्धिशालिषु, अनुरागः प्रीतिः, तदन्विता चित्तवृत्तिर्यस्य स तथा, तथापि सिद्धान्ते सिद्धजननिधने सुचित्तवृत्तिरिति विरोधः, परिहारे तु सिद्धान्तेषु आगमेषु सुचित्तवृत्तिः । निरस्तं त्यक्तं धाम तेजः प्रभावो वा येन तथाभूतोऽपि विकीर्णधामा विस्तीर्णधामेति विरोधः, परिहारे तु निरस्तधामा त्यक्तगृहः, मुनिरिति यावत् । हिंसाप्रतिषेधकतया धीवरताहरोऽपि मात्स्यिकतानिवार-

वर्णवर्गान्त्यवर्गान्त्यौ, निजनामावलम्बिनौ । न-मौ गुणश्रियोद्भास्य, स्पर्शख्यातिं नयन्ति ये ॥ १५ ॥
तेषां श्रीनेमिसूरीणां, गुरूणामनुकम्पया । सम्भवन्ति न किं दक्षा मादृक्षा जडशेखराः ॥ १६ ॥ युग्मम् ॥ [ अनुष्टुप् ]
परागो न परागोऽपि, सुवर्णोऽन्यः सुवर्णतः । दुष्प्राप्यसदलङ्कारधनपालार्थनायकः ॥ १७ ॥
वैबुधागम आमोदप्रदः प्रेम्णा प्रसाध्यते । लावण्यविबुधेनाथ, मया मूलमधुग्रहः ॥ १८ ॥ युग्मम् ॥ [ अनुष्टुप् ]

---

कोऽपि, सुधीवर इति विरोधः, परिहारे तु सुधियां पण्डितानां वरः श्रेष्ठ इति सुधीवरः । वर्जितं दर्पणम् अभिमानः, मण्डनाननुरागितया आदर्शो वा येन तथाभूतोऽपि सदर्पण इति विरोधः, परिहारे तु सतां सद्वस्तूनाम् अर्पणः समर्पक इत्यर्थः । विरोधाभास-यमकयोरत्र संसृष्टिः ॥

"अन्तः प्रान्ते स्वरूपे च समीपे निधनेऽपि च" । इति, "उन्चितो युक्तेऽनुमते निश्चिता-ऽभ्यस्तयोरपि" । इति च नानार्थसङ्ग्रहः ॥ १३ ॥ १४ ॥

**वर्णे**त्यादि । वर्णानां ककारादीनां वर्गाः कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गरूपाः पञ्च पञ्चकाः, तेषामन्त्यौ वर्गौ तवर्ग-पवर्गौ, तदन्त्यौ तत्र चरमौ **न-मौ** नकार-मकारौ, यतो **निजनामावलम्बिनौ** निजनामनिवेशिनौ, अतो **गुणश्रिया** गुणस्य गुणपदेन व्याकरणपरिभाषितस्य एकारस्य तदुभयमध्यस्थस्य श्रिया शोभया, उद्भास्य, **स्पर्शख्यातिं** स्पर्शपदव्यपदेशम्, **नयन्ति** प्रापयन्ति, अत ऊर्ध्वं स्पष्टार्थम् । वर्णानां ब्राह्मणादीनां वर्गश्चतुष्कः, तस्यान्ते भवो यो वर्गः, अन्त्यजवर्ग इत्यर्थः, तदन्त्यमपि, अत्यन्ततुच्छमपि जनम्, आस्तामितरमित्यर्थः, निजनामजपादिना, उद्भास्य प्रकाश्य, श्रीमन्तं कृत्वेत्यर्थः, स्पर्शेन दानगुणेन ख्यातिं वदान्यत्वेन प्रसिद्धिमापादयन्तीत्यनुरणनरूपेण निर्गलितोऽर्थः । अत्र निजनामावलम्बनस्य पदार्थस्य उद्भासनाङ्गतया काव्यलिङ्गालङ्कारः ॥

"स्पर्शो वर्गाक्षरे दाने स्पर्शने स्पर्शने रुजि" इत्यनेकार्थसङ्ग्रहः ॥ १५ ॥ १६ ॥

**अथ** मङ्गलाचरणानन्तरम्, मया **लावण्यविबुधेन** विजयलावण्यसूरिणा, **वैबुधागमः** विबुधस्य भावो वैबुधम्, तद् आगमयति प्रापयतीति तथा । **आमोदप्रदः** सत्काव्यव्यसनिनां विनोदप्रदः । **मूलमधुग्रहः** मूलस्य मञ्जरीपदास्पदस्य व्याख्येयग्रन्थस्य, मधु पुष्परसः, तद्वदास्वाद्यत्वात् प्रस्तुतकाव्यरस इत्यर्थः, तस्य ग्रहो ग्रहणमास्वादनं यतः, प्रस्तुतकाव्यरसास्वादकारणमित्यर्थः । दुष्प्राप्याः काव्यान्तरदुर्लभाः सदलङ्काराः सुन्दरालङ्कारा यस्मिन् स चासौ धनपालार्थो धनपालोत्प्रेक्षितप्रस्तुतकाव्यार्थः, तस्य नायकः प्रापकः, ज्ञापक इत्यर्थः । सुवर्णतोऽन्योऽपि सुवर्ण इति विरोधः, परिहारे तु सुवर्णद्रव्यव्यतिरिक्तोऽपि सुन्दरवर्णमयः । **न परागोऽपि** परागभिन्नोऽपि पराग इति विरोधः, परिहारे तु अनपगतो रागो यस्मादित्यनपरागः, **परागः** परागनाम्नी विवृतिः । **प्रेम्णा** तिलकमञ्जरीप्रीत्या, न तु कस्यापि नियन्त्रणया, **प्रसाध्यते** प्रकर्षेण प्रणीयते । कुसुमकणरूपपरागपक्षे तु—**वैबुधागमः** विबुधानां देवानाम्, आगम इहागमनहेतुः, यद्वा अगमो वृक्षः, कल्पतरुरित्यर्थः, तत्सम्बन्धी । **आमोदप्रदः** परिमलप्रदः । दुष्प्राप्याः सदलङ्कारा यस्मिन् तादृशस्य धनपालार्थस्य कुबेरवैभवस्य नायकः प्रापकः, कल्पतरुपत्रस्यापि सर्वप्रदत्वं किमुत तत्सारभूतस्य परागस्य । **आमूलमधुग्रहः** आमूलं मूलपर्यन्तं मधुग्रहा मधुपा यस्मिन्नसौ, परागः, **मया** लक्ष्म्या फलत्वेन हेतुभूतया, **लावण्यविबुधेन** लावण्यपूर्णदेवेन, शाकपार्थिवादित्वान्मध्यमपदलोपः **प्रसाध्यते** विभूष्यते । अन्यत् स्पष्टम् । अत्र यमक-विरोधाभासालङ्कारयोः संसृष्टिः ॥

"परागः सुमनोरजः" इति, "वृक्षो महीरुहः शाखी विटपी पादपस्तरुः । अनोकहः कुटः सालः पलाशी द्रु-द्रुमा-ऽगमाः" ॥ इति चाऽमरः "आमोदो गन्ध-हर्षयोः" इति, "मा लक्ष्म्यां वारणेऽव्ययम्" इति चानेकार्थसङ्ग्रहः ॥ १७ ॥ १८ ॥

इति परागमङ्गलपद्यव्याख्या सम्पूर्णा ॥

[स वः पातु जिनः कृत्स्न,-मीक्षते यः प्रतिक्षणम् । रूपैरनन्तैरेकैक,-जन्तोर्व्याप्तं जगत्त्रयम् ॥ १ ॥]

---

**टिप्पनकम्**—इह जगति सर्वेऽपि शिष्टा अभीष्टे वस्तुनि प्रवर्तमाना अभीष्टदेवतानमस्कारपूर्वकं प्रवर्तन्त इति मत्वा परमश्रावको धनपालकविः 'स वः पातु' इत्यादिश्लोकपञ्चकेनेष्टा-ऽभिमता-ऽधिकृतदेवतानां नमस्कारान् करोति, तत्राद्येन श्लोकद्वयेन जिनस्य चतुर्विंशतितीर्थकृतां चेष्टदेवतानमस्कारः, अपरेण चाभिमतदेवताया नाभेयस्य, एकेन चाधिकृतदेवताया सरस्वत्या इति । तत्र रागादिजेतृत्वादिसामान्यगुणेनेष्टदेवता, गोत्रपारम्पर्यविघ्नविनाशकत्वादिगुणं चाश्रित्याभिमतदेवता, शास्त्रकरणे च प्रवर्तमानस्य विशिष्टवागर्थप्रापकत्वेनाधिकृतत्वाद् अधिकृता देवता सरस्वती । तत्र तावद् आद्यं श्लोकद्वयं व्याख्यायते—**स जिनो** रागादिजेता देवः, **पातु** रक्षतु, **वो** युष्मान्, **य ईक्षते** सामान्यरूपतया [पश्यति, विशेषरूपतया] च जानाति, दर्शनज्ञानार्थत्वादीक्षतेः । किं तत् ? **जगत्त्रयं** भुवनत्रयमधोमध्योर्ध्वम्, चतुर्दशरज्ज्वात्मकं लोकमित्यर्थः, एतच्चोपलक्षणम्, तथाऽ[तथा चा]लोकमपि धर्मादिपदार्थशून्यमनन्तं पश्यति जानाति च । कीदृशं जगत्त्रयम् ? **व्याप्तं** युक्तम् । कैः ? **रूपैः** शरीरैः । कियद्भिः ? **अनन्तैः** अनादित्वेन, न पुनः पर्यवसानैः, मुक्तानां शरीरपर्यवसानां नन्तरत्वादसम्भवात् (?) [अनादित्वेन, न पुनरपर्यवसानेन, मुक्तानां शरीरपर्यवसानेनानन्तत्वासम्भवात्] । कस्य रूपैः ? **एकैकजन्तोः** एकैकस्य जीवस्य, अनादित्वं रूपाणामनादौ संसारेऽनन्तशो जन्ममरणप्राप्तेः । पुनः कीदृशम् ? **कृत्स्नं** परिपूर्णं समग्रम्, नैकदेशम् । कथमीक्षते ? **प्रतिक्षणं** निरन्तरम्, न पुनरन्तरमस्तीति ॥ १ ॥

---

**परागाभिधा विवृतिः**—अथ विश्वविस्तारनिस्तारविश्वविश्वस्तसमस्तकालनिर्विशेषनिरवशेषविशेषविविक्तविमर्शिभिर्दूरदर्शिभिः प्रकृतप्रबन्धपूर्तिप्रतिबन्धकदुरितदूरीकरणाय शश्वदूरीकृतं मङ्गलमत्यन्तनिर्वृजिनजिनसामान्यविशेषकर्तृकरक्षणाद्याशीरूपेण प्रणीय कमनीयकवितालताऽऽलवालो मनीषिमानसमरालो धीमान् धनपालो निजनिबन्धभालोपरि भ्राजयति—**स वः पातु जिन** इति । 'य एकैकजन्तोरनन्तै रूपैर्व्याप्तं कृत्स्नं जगत्त्रयं प्रतिक्षणमीक्षते स जिनो वः पातु' इत्यन्वयः । **यः** अनवधृतनामधेयः समभिव्याहृततत्पदजन्यबोधविषयत्वेन वक्तृतात्पर्यविषयः कश्चित् । **एकैकजन्तोः** जायते नरामरादिरूपेणोत्पद्यत इति जन्तुः, जन्मपरम्परानिपतितो जीव इत्यर्थः, एकैकश्चासौ जन्तुरेकैकजन्तुस्तस्य, प्रत्येकप्राणिन इत्यर्थः । **अनन्तैः** अनादित्वेन गणनापर्यवसानाभावाद् अनन्तसङ्ख्यकैः, अनादित्वं च रूपाणामनादौ संसारेऽनन्तो जन्म-मरणप्राप्तेः । **रूपैः** पर्यायपदवाच्यैः स्वरूपैः, स्वकृतकर्मविपाकोपनीतैश्चतुरशीतिलक्षयोन्यनुरूपैर्दुःखावलिसंवलितैर्दशाविशेषैरित्यर्थः, **रूपैः** नाटकीयरूपैर्वा । **व्याप्तं** परितः पूर्णम्, यदुक्तम्—"समस्तलोकाकाशेऽपि नानारूपैः स्वकर्मतः । वालाग्रमपि तन्नास्ति यन्न स्पृष्टं शरीरिभिः" ॥ [योगशास्त्रम्], पर्यायार्थे व्याप्तत्वं जीवे नियतम्, न तु तदाश्रिते लोके इति कथं तदुपवर्णनमिति न शङ्क्यम्, 'मञ्चाः क्रोशन्ति' इतिवत् तात्स्थ्यात् तद्व्यपदेशन्यायेन विरोधाभावात् । **जगत्त्रयं** स्वर्ग-मर्त्य-पाताललक्षणं त्रिभुवनम्, जैननये अधोलोकमध्यलोकोर्ध्वलोकलक्षणं तत्, चतुर्दशरज्ज्वात्मकलोकाकाशमिति भावः । **प्रतिक्षणं** क्षणे क्षणे समये समये इति प्रतिक्षणम्, निरन्तरमित्यर्थः, क्षणो नाम सर्वज्ञेनापि विभज्य साक्षात्कर्तुमशक्यः कालस्य निरंशोंऽशः, ईदृक्षाः क्षणा अक्ष्णो निमेषे उन्मेषे वा सङ्ख्यातीता व्यपगच्छन्ति । **ईक्षते** निखिलसामान्य-विशेषपुरस्कारेण साक्षात्करोति, प्रतिक्षणमीक्षणेनास्य भगवतः सर्वज्ञता सर्वदर्शिता चाऽऽवेदिता, सर्वज्ञज्ञानस्यैव प्रतिसमयमात्मलाभात्, असर्वज्ञज्ञानं तु अन्तर्मुहूर्तेनैवात्मलाभं लभते, समयनवकाद् आरभ्य समयोनमुहूर्तं यावत् सर्वोऽपि कालोऽन्तर्मुहूर्तशब्देन परिभाष्यते, सामान्य-विशेषोभयात्मकं वस्तु, तत्र सामान्यांशावगाही बोधो दर्शनम्, विशेषांशावगाही बोधो ज्ञानमिति जैनदर्शनविवेकः । सिद्धान्तिता हि सर्वज्ञसिद्धिः "सूक्ष्मा-ऽन्तरित-दूरार्थाः प्रत्यक्षाः कस्यचिद् यथा । अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः" ॥ इत्यादिना । स **जिनः** जयति रागाद्यन्तरङ्गरिपूनिति जिनः, वीतरागो भगवान्, योगसंवलितरूढ्या वा तादृशोऽर्हन्, जातावेकवचनम्, तेन निखिला जिना इत्यर्थः । **वः** निरुक्तरूपैः कदर्थ्यमानान् युष्मान् । **पातु** निरुक्तरूपेभ्यो रक्षतु ।

ननु सत्त्वसामान्यस्य रागाद्यव्यभिचारितया तस्य वीतरागता कथं सङ्गतिमङ्गति, तत्त्वे वा कथं रक्षणकर्तृत्वमिति चेत्, न– "दृष्टो रागाद्यसद्भावः क्वचिदर्थे यथात्मनः । तथा सर्वत्र कस्यापि तद्भावे नास्ति बाधकम् ॥ रागोऽङ्गनासङ्गमनानुमेयो द्वेषो द्विषद्दारणहेतुगम्यः । मोहः कुवृत्तागमदोषसाध्यो नो यस्य देवस्य स चैवमर्हन्" ॥ इत्याद्यागमप्रामाण्येन तदव्यभिचारोपपत्तेः, तस्य वीतरागत्वेऽपि कल्पतरु-चिन्तामणिवन्नैसर्गिकरक्षणकर्तृत्वाक्षतेश्च । संसारवर्तिजन्तूनां दुःखावलिसंवलिता दशा नाटकीय-रूपता च योगशास्त्रे हीत्थम्—

"संसारिणश्चतुर्भेदाः श्वभ्र-तिर्यग्-नरा-ऽमराः । प्रायेण दुःखबहुलाः कर्मसम्बन्धबाधिताः ॥

न केवलं नारकास्तिर्यञ्चश्च दुःखिनः, किन्तु नरा-ऽमरा अपि, यदुक्तम्—

"रुग्-जरा-मरणैर्ग्रस्ता नीचकर्मकदर्थिताः । तां तां दुःखदशां दीनाः प्रपद्यन्ते दयास्पदम् ॥ १ ॥
जरा रुजा मृतिर्दास्यं न तथा दुःखकारणम् । गर्भावासो यथा घोरनरके वाससन्निभः ॥ २ ॥
सूचिभिरग्निवर्णाभिर्भिन्नस्य प्रतिरोम यत् । दुःखं नरस्याष्टगुणं भवेत् तद् गर्भवासिनः ॥ ३ ॥
योनियन्त्रान्निष्कामन् यद् दुःखं लभते भवी । गर्भवासभवाद् दुःखात् तदनन्तगुणं खलु" ॥ ४ ॥ इति,
"शोका-ऽमर्ष-विषादेर्ष्या-दैन्यादिहतबुद्धिषु । अमरेष्वपि दुःखस्य साम्राज्यमनुवर्तते" ॥ १ ॥ इति च ।

तथा नानायोनिषु संसरणरूपः संसारो नाट्यम्, तत्र नटवत् संसारी जन्तुश्चेष्टते, यथा हि नाट्ये विविधवर्णकादियोगाद् भूमिकान्तरं नटाः प्रतिपद्यन्ते तथैव संसारी विविधकर्मोपाधिः श्रोत्रियादितां प्रतिपद्यते, न पुनरस्य तथाविधं परमार्थतो रूपमस्ति । यदुक्तम्—

"श्रोत्रियः श्वपचः स्वामी पत्तिर्ब्रह्मा कृमिश्च सः । संसारनाट्ये नटवत् संसारी हन्त ! चेष्टते" ॥ १ ॥ इति,

हरिणाऽप्युक्तम्—

"क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः, क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुर्नटः संसाराङ्के विशति यमधानीजवनिकाम्" ॥ १ ॥ इति ।

दुःखावलिसंवलिततया नाटकीयरूपतया च निरुक्तजन्तुरूपाणामीक्षणमेव भगवतः कारुण्यमुद्दीप्यैव प्रकृतपद्यप्रतिपाद्यरक्षण-क्रियायामुपयुज्यते, न तु द्रव्यान्तररूपेक्षणमिति प्रकृते तदनुपादानम्, अन्यथा सर्वज्ञो भगवान् यथा व्याख्यातरूपाणीक्षते तथा लोकान्तर्गतस्य मुक्तात्मनो ज्ञानादीनि रूपाणि धर्मास्तिकायादेरचेतनद्रव्यस्य गमनानुग्रहादीनि रूपाणि, एवं द्रव्यान्तरशून्य-स्यानन्तस्यालोकाकाशस्यागुरुलघुपर्यायप्रभृतीनि रूपाणि च प्रतिक्षणमीक्षत एवेति तदुपादानमपि कर्तव्यतां श्रयेदिति ।

अत्र निरुक्तजगत्त्रयेक्षणस्य प्रकृतवाक्यार्थस्य रक्षणहेतुत्वेन विवक्षणात् काव्यलिङ्गालङ्कारः, 'न्त' 'क्ष' शब्दयोः सकृत् साम्याच्छेकानुप्रासश्चेति तयोः संसृष्टिः ।

"जिनोऽर्हति च बुद्धे च पुंसि स्याज्जित्वरे त्रिषु" । इति मेदिनी, "ग्रन्थावृत्तौ पशौ शब्दे नाटकादि-स्वभावयोः ।

रूपमाकार-सौन्दर्ये नाणक-श्लोकयोरपि" ॥ इति शाश्वतः ॥

इदं मविपुला नाम विषमवृत्तम्, "तुर्यान्नतभ्रम्सास्तद्विपुला" [छन्दोऽनुशासनम्] इति तल्लक्षणम्, अयमस्यार्थः– ओजे पादे चतुर्थादक्षरात् परं यगणं बाधित्वा न-त-भ-र-म-साश्चेत् तदा क्रमेण नविपुला तविपुला भविपुला रविपुला मविपुला सविपुला भवति, 'युजोः षड्भ्यो लः' इति तु स्थितमेव, 'ओजे' इत्यत्र जातिपक्षे द्वयोरपि पादयोर्ग्रहणम्, व्यक्तिपक्षे पुनरेकस्य प्रथमस्य तृतीयस्य वेति । प्रस्तुते व्यक्तिपक्षाश्रयः ॥ १ ॥

प्राज्यप्रभावः प्रभवो धर्मस्याऽस्तरजस्तमाः ।
ददतां निर्वृतात्मा न आद्योऽन्येऽपि मुदं जिनाः ॥ २ ॥ [भविपुला]

---

**टिप्पनकम्—ददतां** ददातु, 'दद दाने' अस्य पञ्चम्यात्मनेपदैकवचने तामि रूपम् । कः ? **जिनः**, वचनविपरिणामेन सम्बन्धः । कीदृशः ? **निर्वृतात्मा** मुक्तस्वरूपः, रागादिरहित इत्यर्थः । पुनः किंनामा ? **आद्यः** ऋषभनाथः । कां ददताम् ? **मुदं** धर्मादिप्रकाशकत्वेन हर्षम् । केषाम् ? **नः** अस्माकम् । न केवलमाद्यो जिनः, अन्येऽपि जिना **ददतां** प्रयच्छन्तु, 'डुदाञ् दाने' अस्य पञ्चमीपरस्मैपदबहुवचने अन्तामि रूपम् । तेऽपि कीदृशाः ? **निर्वृतात्मानो** मुक्तस्वरूपाः । काम् ? **मुदम्** । केषाम् ? **वः** युष्माकम् । किंभूत आद्यः ? किंभूताश्चान्ये जिना अजितादिवर्धमान्ताः ? **प्राज्यप्रभावः** प्रचुरानुभावः, **प्राज्यप्रभाः** प्रचुरतेजसस्तथा । **प्रभवो** जनकः, कस्य ? **धर्मस्य** अहिंसादिलक्षणस्य, **प्रभवः** स्वामिनस्तथा । **अस्तरजस्तमाः** अस्ते क्षिप्ते अपनीते रजस्तमसी बध्यमान-बद्धे बद्ध-निकाचिते वा कर्मणी येन स तथोक्तः, **अस्तरजस्तमाः** अस्तं रजः पापं यैस्ते तथोक्ताः, अतिशयेन अस्तरजसोऽस्तरजस्तमाः, प्रकर्षे तमादित्वात् तमप्रत्ययः । इत्येकवचन-बहुवचनश्लेषः ॥ २ ॥

---

**परागाभिधा विवृतिः**—अथाऽऽद्येन पद्येन जिनसामान्यमनुनीय जिनविशेषमनुनेतुकामः कविश्चतुर्विंशतितीर्थङ्करेष्वाद्यत्वेन भगवन्तमृषभनाथमनुनयन्नेकेनैव पद्येन वचनश्लेषभङ्ग्याऽन्यानपि जिनाननुनयति—**प्राज्यप्रभाव** इति । 'अस्तरजस्तमाः, धर्मस्य प्रभवः, प्राज्यप्रभावः, निर्वृतात्मा, आद्यो जिनो नो मुदं ददताम्' इत्याद्यजिनपक्षेऽन्वयः, 'अस्तरजस्तमाः, धर्मस्य प्रभवः, प्राज्यप्रभाः, निर्वृतात्मानः, अन्येऽपि जिनाः, वः, मुदं ददताम्' इत्यन्यजिनपक्षेऽन्वयः । **अस्तरजस्तमाः** अस्ते ज्ञानसुखादिधर्मेणा सत्त्वगुणेन अभिभूते रजस्तमसी दुःखमोहात्मकौ रजोगुण-तमोगुणौ यस्य सः, उद्भूतसत्त्व इत्यर्थः । अत एव **धर्मस्य** अभ्युदयनिश्रेयसहेतोरहिंसादिरूपस्य, **प्रभवः** प्रभवत्यस्मिन्निति व्युत्पत्त्या उद्भवास्पदम्, प्रभवति येनेति व्युत्पत्त्या परितः प्रचारणादिना तदुद्भवहेतुश्च, 'धर्मो ज्ञानं विराग ऐश्वर्यम्, सात्त्विकमेतद्रूपम्' इति साङ्ख्यसमयेन धर्मादिधर्मोऽपि सत्त्वगुणः स्वविरुद्धवृत्तिकमन्यगुणद्वयमनभिभूय न शक्नोति धर्मादिरूपेण परिणन्तुमिति तत्र तदुद्भवोपयोगः । ननु सत्त्वगुणोद्भवो नाकस्मिकः, सर्वदा सर्वत्र च तदापत्तेः, अपि तु धर्महेतुक एवेत्यन्योऽन्याश्रय इति चेत्, न—"पुण्यो वै पुण्येन भवति" "पापो वै पापेन" इतिश्रुतिसाक्षिकाऽनादिताकस्य तस्य बीजाङ्कुरयोरिव कार्यकारणभावाव्याघातकत्वात् । यतस्तथाभूतः, अतः **प्राज्यप्रभावः** प्राज्यो निरतिशयः, लोकोत्तर इत्यर्थः, प्रभावः शारीरिककान्तिरूपं बाह्यम्, आध्यात्मिकं चाणिमादिशक्तिरूपं तेजो यस्य सः "सूर्या-चन्द्रमसावेतौ विश्वोपकृतिहेतवे । उदयेते जगत्यस्मिन् नूनं धर्मस्य शासनम्" इति योगशास्त्रेण "धर्मेण सूर्यस्तपति" इति श्रुत्या च बाह्यतेजसोऽपि धर्मप्रयोज्यत्वात् । यतस्तादृशप्रभाववानतो **निर्वृतात्मा** निर्वृतः—अनुभूताखिलसौख्यः, रागादिराहित्येन सुस्थः, सकलकर्मक्षयान्मुक्तिं गतो वा आत्मा यस्य सः । **आद्यः** तीर्थप्रवर्तकेषु प्रथमः, भगवान् ऋषभनाथ इत्यर्थः । **नः** अस्मभ्यम् । **मुदं** कैवल्यकल्याणम् । **ददताम्**, अनुभावयताम् ।

अन्यजिनपक्षे—अकारान्ततमशब्दस्यापि तमोगुणवाचकस्य सत्त्वात् **'अस्तरजस्तमाः'** इति बहुवचनान्तमूहनीयम्, तदुक्तं शब्दस्तोममहानिधौ—'तम, पु०, ताम्यति तम्—अच् । तमोगुणे, मतान्तरे राहौ च' इति । अत एव **धर्मस्य** उक्तरूपस्य, **प्रभवः** स्वामिनः, व्यवस्थापकाः प्रतिष्ठापकाश्चेत्यर्थः । अत एव **प्राज्यप्रभाः** निरतिशयबाह्यान्तरिककान्तयः । अत एव **निर्वृतात्मानः, अन्येऽपि** आद्यव्यतिरिक्ता अपि, अजितादयो वर्धमानान्तास्त्रयोविंशतिस्तीर्थङ्करा इत्यर्थः । **वः** युष्मभ्यम् । **मुदम्** उक्तरूपाम्, **ददताम्** अनुभावयन्तु, अत्र पक्षे ददातेः पञ्चम्यां [ लोटि ] प्रथमपुरुषबहुवचनान्तमिदं क्रियापदम्, आद्यपक्षे तु ददतेः पञ्चम्यां प्रथमपुरुषैकवचनान्तमिति बोध्यम् । अत्र पूर्वपूर्वपदार्थस्योत्तरोत्तरपदार्थहेतुतया काव्यलिङ्गालङ्कारः, एकवचनबहुवचनश्लेषः, 'पावनः पवनः' इत्यत्रेव 'प्रभावः प्रभवः' इत्यत्र छेकानुप्रासः, आद्ये पदे सभङ्गश्लेषश्चेत्येकाश्रयानुप्रवेशात् तेषां संकरः, एवम् 'अस्तरजस्तमाः' इत्यत्र सकार-तकारेष्वपीति बोध्यम् ॥

"प्रभावस्तेजसि शक्तौ" इति, "अथ निर्वृतिः । मोक्षे मृत्यौ सुखे सौस्थ्ये" इति चानेकार्थसङ्ग्रहः । "प्राज्यं प्रभूतं प्रचुरमदभ्रं बहुलं बहु" । इत्यमरः ॥

व्यक्तिपक्षमाश्रित्येदं भविपुलावृत्तम्, 'निर्वृतात्मानः' इति पाठादरे तु तृतीयपादस्य मविपुलात्वात् प्रथमपादस्य भविपुलात्वात् सङ्कीर्णविपुलावृत्तम् ॥ २ ॥

---

**पाठा०—१** 'निर्वृतात्मा' इति पाठमादृत्येदं व्याख्यानमाभाति, तादृशपाठे संकीर्णविपुला ज्ञेया ।

दिशतु विरतिलाभानन्तरं पार्श्वसर्पन्नमि-विनमिकृपाणोत्सङ्गदृश्याङ्गलक्ष्मीः ।
त्रिजगदपगतापत् कर्तुमात्तान्यरूपद्वय इव भगवान् वः सम्पदं नाभिसूनुः ॥ ३ ॥ [ मालिनी ]

---

**टिप्पनकम्**—तथापरस्य श्लोकद्वयस्य कियत्पदव्याख्या क्रियते । **विरतिलाभः** सर्वसावद्ययोगनिवृत्तिप्राप्तिः । **पार्श्वसर्पन्नमि-विनमिकृपाणोत्सङ्गदृश्याङ्गलक्ष्मीः** पार्श्वयोरुभयपक्षयोः सर्पन्तौ चलन्तौ नमि-विनम्योः राजपुत्रयोः कृपाणौ खड्गौ तयोरुत्सङ्गे दृश्ये दर्शनयोग्ये अङ्गलक्ष्म्यौ मूर्त्तिलक्षणे यस्य स तथोक्तः, अत्र च बहुव्रीहौ समासे नदी-लक्षणः को न भवति, तत्रैकवचनान्तस्यैव लक्ष्मीशब्दस्य कविधानात् । एतेन भगवतो रूपत्रयं जातमिति दर्शितम्, एतदुत्प्रेक्षते कविः—**आत्तान्यरूपद्वय इव** गृहीतापरमूर्त्तिद्वितय इव । किं कर्तुम् ? **त्रिजगत्** त्रिभुवनम्, **अपगतापत्** निवृत्तविपत्तिकं कर्तुम् । तच्च शरीरत्रयेण सुखेनैवाऽपायरहितं क्रियते रक्षणात् । [ **स्वपदं** ] स्वं पदमात्मीयं स्थानम्, मुक्तिमित्यर्थः, **सम्पदं** स्वर्गापवर्गसमृद्धिम् ॥ ३ ॥

---

**परागाभिधा विवृतिः**—तीर्थप्रवर्तकेषु प्राथम्याद् अतिप्रीतिविषयत्वेन पुनरपि भगवन्तमादिनाथमेव पद्यद्वयेन नाथति—**दिशत्विति** । 'विरतिलाभानन्तरं पार्श्वसर्पन्नमि-विनमिकृपाणोत्सङ्गदृश्याङ्गलक्ष्मीः, त्रिजगत् अपगतापत् कर्तुम्, आत्तान्यरूपद्वय इव भगवान् नाभिसूनुः, वः सम्पदं दिशतु' इत्यन्वयः । **विरतिलाभानन्तरं** विरतिः सम्यग्ज्ञानपूर्विका सर्व-सावद्यनिवृत्तिः, तस्या लाभः प्राप्तिः, तदनन्तरम्, प्रव्रज्याग्रहणात् पश्चादित्यर्थः । **नमि-विनमिकृपाणोत्सङ्गदृश्याङ्गलक्ष्मीः** प्रवासात् प्रत्यावृत्य, पार्श्वयोः–भगवतः पक्षयोः, सर्पतोः–सेवार्थं भ्रमतोः, नमि-विनम्योः–निजपौत्रयोः, कृपाणौ खड्गौ, तयोरुत्सङ्गे मध्ये, दृश्ये प्रतिबिम्बात्मना दर्शनीये अङ्गलक्ष्म्यौ शरीरावयव-तत्समवेतश्रियौ यस्य सः । अत एव **आत्तान्यरूपद्वय इव** आत्तं गृहीतम्, अन्यदपि रूपद्वयं येन स इवेत्युत्प्रेक्षा । किं कर्तुम् ? **त्रिजगत्** त्रयाणां जगतां समाहारम्, न त्वेकं द्विकं वा जगत्, **अपगताऽऽपत्** अपहारसम्भावनया स्वयमपसृतापत्, **कर्तुं** सम्पादयितुम् । एकदैकेन शरीरेणैकस्माज्जगतोऽप-सारिताप्यापद् अन्यजगद् आश्रित्य स्थातुं शक्नोति, शरीरत्रयेण तु युगपदेव जगत्त्रयाद् अपसारयितुं शक्येतेत्यपसारणावश्य-म्भावेन स्वयमेवापसृतेति 'अपगतापत्' इत्यनेन ध्वनितम् । अस्माकमनेकैरपि शरीरैरसाध्य एकैकजगदापदपगमः कथमेकैकेनापि तस्य शरीरेण साध्य इत्याह—**भगवान्** भगो माहात्म्यमैश्वर्यं चास्त्यस्मिन्नसौ । **नाभिसूनुः** श्रीनाभिनृपनन्दनः । **सम्पदं** लौकिकालौकिकसमृद्धिम्, सम्यग् पदं वस्तु ज्ञानादिरूपम्, स्थानं मोक्षरूपं वा, 'स्वम्पदम्' इति पाठे स्वम् आत्मीयं पदं स्थानं मोक्षरूपम् । **वः** युष्मभ्यम् । **दिशतु** ददातु ।

अत्रेमे योगशास्त्रप्रथमप्रकाशवृत्तिगताः श्लोकाः—

"जज्ञेऽथावधिना स्वामी स्वःसुखान्युत्तरोत्तरम् । अनुत्तरस्वर्गसुखं भुक्तपूर्वं स्वयं च यत् ॥ १९ ॥
भूयोऽप्यचिन्तयदिदं विगलन्मोहबन्धनः । धिगेष विषयाक्रान्तो वेत्ति नात्महितं जनः ॥ २० ॥
अहो संसारकल्पेऽस्मिन् जीवाः कुर्वन्ति कर्मभिः । अरघट्टघटीन्यायेनैहिरेयाहिरां क्रियाम् ॥ २१ ॥
इत्यासीन्मनसा यावद् विभुर्भवपराङ्मुखः । तावल्लोकान्तिका देवा एयुः सारस्वतादयः ॥ २२ ॥
बद्धैरञ्जलिभिर्मूर्ध्नि कृतान्यमुकुटा इव । प्रणम्य ते व्यज्ञपयन् स्वामिंस्तीर्थं प्रवर्तय ॥ २३ ॥
गतेषु तेषु भगवानुद्यानान्नन्दनाभिधात् । व्यावृत्य गत्वा नगरीमाजुहावावनीपतीन् ॥ २४ ॥
राज्येऽभ्यषिञ्चद् भरतं ज्येष्ठपुत्रं ततो विभुः । बाहुबल्यादिपुत्राणां विभज्य विषयान् ददौ ॥ २५ ॥
सांवत्सरिकदानेन ततोऽतर्पीत् तथा भुवम् । देहीति दीनवाक्यश्च कश्चिदासीद् यथा नहि ॥ २६ ॥
अथासनप्रकम्पेन सर्वेऽप्यभ्येत्य वासवाः । अभिषेकं प्रभोश्चक्रुर्गिरेरिव पयोमुचः ॥ २७ ॥
माल्याङ्गरागैर्देवेशान्यस्तैर्वासितविष्टपैः । स्वयशोभिरिवाशोभि परितः परमेश्वरः ॥ २८ ॥
विचित्रैरर्चितो वस्त्रै रत्नकूटैश्च भूषणैः । विभुर्बभासे सन्ध्याभ्रधिष्ण्यैरिव मरुत्पथः ॥ २९ ॥
दिवि दुन्दुभिनादं च कारयामास वासवः । जगतो ददानन्दमसम्मान्तमिवात्मनि ॥ ३० ॥
सुरासुरनरोद्वाह्यामारोहच्छिबिकां विभुः । ऊर्ध्वलोकगतेर्मार्गं जगतो दर्शयन्निव ॥ ३१ ॥

**ध्वानेनामृतवर्षिणा श्रवणयोरायोजनं भ्राम्यता, भिन्दाना युगपद् विभिन्नविषयं मोहं हृदि प्राणिनाम् ।**
**आद्ये धर्मकथाविधौ जिनपतेराद्यस्य वाणी नृणां, वृन्दैरुद्यदपूर्वविस्मयरसैराकर्णिता पातु वः ॥ ४ ॥**

[ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्—मोहमत्र** ज्ञानं संशयविपर्ययरूपम् । **विभिन्नविषयम्** अनेकार्थसम्बन्धिनम् । क? **हृदि** मनसि, मनोगतमित्यर्थः । केषाम्? **प्राणिनाम्** देवनरतिरश्चाम् । **भिन्दाना** विदारयन्ती । कथम्? **युगपद्** एककालम् । का? **वाणी** भारती । क? **आद्ये धर्मकथाविधौ** प्रथमे धर्मकथने समवसरणस्थितस्योत्पन्न-केवलस्य ॥ ४ ॥

---

एवं सदेवैर्देवेशैश्चक्रे निष्क्रमणोत्सवः । यं पश्यद्भिर्निजदृशां नैर्निमेष्यं कृतार्थितम् ॥ ३२ ॥
गत्वा सिद्धार्थकोद्याने मुमोच परमेश्वरः । कुसुमाभरणादीनि कषायानिव सर्वतः ॥ ३३ ॥
चतुर्भिर्मुष्टिभिः केशानुद्दधार जगद्गुरुः । जिघृक्षुः पञ्चमीं मुष्टिं वासवेनेति याचितः ॥ ३४ ॥
देवांसयोः स्वर्णरुचोर्वीचातीतातिशोभिता । केशवल्लर्यसावास्तामिति तां स्वाम्यधारयत् ॥ ३५ ॥
प्रतीच्छतश्च सौधर्माधिपतेः सिचयाञ्चले । स्वामिकेशा दधुर्दत्तवर्णान्तरगुणश्रियम् ॥ ३६ ॥
क्षीरोदधौ सुधर्मेशः केशान् क्षिप्त्वाऽभ्युपेत्य च । रङ्गाचार्य इवारक्षत् तुमुलं मुष्टिसंज्ञया ॥ ३७ ॥
सर्वं सावद्यं प्रत्याख्यामीति चारित्रमुच्चकैः । मोक्षाध्वनो रथमिवाध्यारुरोह जगत्पतिः ॥ ३८ ॥
सर्वतः सर्वजन्तूनां मनोद्रव्याणि दर्शयत् । जज्ञे ज्ञानं प्रभोस्तुर्यं मनःपर्ययसंज्ञकम् ॥ ३९ ॥
राज्ञां सहस्राश्चत्वारोऽनुयान्तस्तं निजं प्रभुम् । व्रतमाददिरे भक्त्या कुलीनानां क्रमो ह्यसौ ॥ ४० ॥
ततः सर्वेष्वपीन्द्रेषु गतेषु स्वं स्वमालयम् । व्यहरत् तैर्वृतः स्वामी यूथनाथ इव द्वीपैः ॥ ४१ ॥
अथ कच्छ-महाकच्छपुत्रावाज्ञागतौ क्वचित् । ईयतुर्नमि-विनमी स्वामिनं प्रतिमास्थितम् ॥ ४६ ॥
प्रणम्य तौ विज्ञपयांबभूवतुरिति प्रभुम् । आवयोर्नापरः स्वामी स्वामिन्! राज्यप्रदो भव ॥ ४७ ॥
न किञ्चिदूचे भगवांस्तदा तौ सेवकावपि । निर्ममा न हि लिप्यन्ते कस्याप्यैहिकचिन्तया ॥ ४८ ॥
तौ कृष्टासी सिषेवाते स्वामिनं पारिपार्श्विकौ । अहर्निशं मेरुगिरिं सूर्याचन्द्रमसाविव ॥ ४९ ॥ इति ॥

अत्र 'इव'शब्दवाच्या रूपद्वयादानरूपक्रियोत्प्रेक्षालङ्कारः, 'नमि-विनमि'पदयोः 'उत्सङ्ग-दृश्याङ्ग'पदयोश्छेकानुप्रासश्चेत्यनयोः संसृष्टिः ॥

"बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः" इत्यमरः ॥

इदं मालिनी नाम वृत्तम्, तल्लक्षणं तु "नौ म्यौ यो मालिनी" [ छन्दोऽनुशासनम् ], न-न-म-य-याः, जैरिति वर्तते-जैः-अष्टभिश्चेद् यतिः, इति तदर्थः ॥ ३ ॥

**परागाभिधा विवृतिः—ध्वानेनेति**–'श्रवणयोरमृतवर्षिणा, आयोजनं भ्राम्यता, ध्वानेन, प्राणिनां हृदि विभिन्नविषयं मोहं युगपद् भिन्दाना, उद्यदपूर्वविस्मयरसैः, नृणां वृन्दैः, आकर्णिता, आद्ये धर्मकथाविधौ, आद्यस्य जिनपतेः, वाणी वः पातु' इत्यन्वयः । **आद्यस्य** तीर्थप्रवर्तकेषु प्रथमस्य । **जिनपतेः** जिनेन्द्रस्य, भगवतो वृषभदेवस्येत्यर्थः । **वाणी** भारती । **वः** युष्मान् । **पातु** धर्मसम्पदुत्सेधनेन तापत्रयाद् रक्षतु । कदातनी सा वाणी? इत्याह–**आद्ये** सर्वप्रथमे, **धर्मकथाविधौ** धर्मोपदेशनकार्ये, केवलज्ञानावाप्तौ अस्मिंश्चावसर्पिणीकाले प्रथमतो दीयमानायां धर्मदेशनायामिति यावत्, तात्कालिकीति सप्तम्यर्थः । सा कथम्भूता? **श्रवणयोः** कर्णयोः, **अमृतवर्षिणा** पीयूषवर्षणशीलेन, न तु कादाचित्कामृतवर्षकेण, **आयोजनं** योजनं क्रोशचतुष्टयमभिव्याप्य, अथवा श्रवणयोः आयोजनं सम्बन्धपर्यन्तम्, **भ्राम्यता** *वीचितरङ्ग*न्यायेन प्रसरता, **ध्वानेन** प्रतिशब्देन, अथवा ध्वनीनां युगपदखिलदिग्गामिनां समूहो ध्वानं तेन, समवसरणावसरे भगवदास्यनिष्कासितस्तारस्यैकस्यापि शब्दस्य युगपदखिलदिग्गामिप्रतिशब्दपरम्पराप्रसवित्वात्, **प्राणिनां** सुर-नर-तिरश्चाम्, न तु कस्यचिदेव, हृदि **भिन्नविषयं** देहेन्द्रिय-दारा-ऽपत्यादिविषयकम्, **मोहम्** अहङ्कार-ममकाररूपमज्ञानम्, **युगपद्** समकालमेव, **भिन्दाना**

**अव्याज्जगन्ति पुरुषोत्तमनाभिसूतेर्देवस्य वक्त्रकमलोदरमावसन्त्याः ।**
**धौतेव दन्तकिरणप्रकरेण मूर्तिर्देव्या गिरामधिपतेः शरदिन्दुगौरी ॥ ५ ॥ [ वसन्ततिलका ]**

---

**टिप्पनकम्**—पञ्चमश्लोकव्याख्या क्रियते-**अव्याद्** रक्षतु। का? **मूर्तिः** तनुः। कस्याः? **गिरामधिपतेर्देव्याः** सरस्वत्याः । कीदृशी? **शरदिन्दुगौरी** शरच्चन्द्रधवला । उत्प्रेक्षते कविः—**धौतेव** प्रक्षालितेव । केन? **दन्तकिरणप्रकरेण** दशनानां [ दशनांशूनां ] सुसंघातेन। किं कुर्वन्त्याः? **आवसन्त्याः** तिष्ठन्त्याः । किं तत्? **वक्त्रकमलोदरं** मुखकमलमध्ये इत्यर्थः, कस्य? **देवस्य**। किमभिधानस्य? **पुरुषोत्तमनाभिसूतेः** पुरुषोत्तमश्चासौ नाभिसूतिश्च नाभेयश्च स तथोक्तस्तस्य, ऋषभस्येत्यर्थः, लोकभाषया पुरुषोत्तमः—विष्णुः, तस्य नाभिः—नाभिपद्मं तात्स्थ्यात्, तस्मिन् सूतिः—उत्पत्तिर्यस्य स तथोक्तस्तस्य, ब्रह्मण इत्यर्थः । कानि रक्षतु? **जगन्ति** जगत्त्रयस्थितप्राणिनः ॥ ५ ॥

---

सद्य एवोत्सादयन्ती, न तु भेत्स्यन्ती । नन्वेकदा भगवदुच्चरितया कयाचिदेकया भाषया भिन्नभिन्नभाषाऽभिज्ञानां देवादीनामर्थबोधासम्भवान्मोहोत्सादयौगपद्यानुपपत्तिरिति चेत्? न-भगवतः पुण्यातिरेकादेकयाऽप्यर्धमागधीरूपया भाषया जलदमुक्तजलवदाश्रयानुगुण्येन विविधभाषात्मना परिणमनात्, तदुक्तम्-“देवा दैवीं नरा नारीं शबराश्चापि शाबरीम् । तिर्यञ्चोऽपि तैरश्चीं मेनिरे भगवद्गिरम्” ॥ १ ॥ इति । पुनः कथंभूताम्? **उद्यदपूर्वविस्मयरसैः** उद्यन्-तद्वेलायामुद्वेलन्, अपूर्वः-अनास्वादितपूर्वः, विस्मयः-श्रवणयोः सुधारसोत्सेकजन्यं सद्यश्चेतश्चकासजन्यं वा आश्चर्यमेव, रसो येषु तैः, यद्वा उद्यन्तौ अपूर्वविस्मय-रसौ विस्मयः-मोहरूपान्तःशत्रूत्सादनजन्यदर्पः, रसः-शान्तिरूपश्च, येषु तैः, **नृणां** मनुष्याणाम्, **वृन्दैः** समूहैः, न तु वृन्देन, **आकर्णिता** श्रुता, देवानां क्षेत्रान्तरतोऽपि पुरा निरुक्तरसास्वादसम्भवात्, तिरश्चामतिमन्दप्रतिभतया सद्य एव तदसम्भवाच्च ‘नृणाम्’ इत्येवोक्तम् ।

‘ध्वानेन’ इत्यादौ दन्तस्थानोच्चार्यवर्णसंघातात् श्रुत्यनुप्रासोऽलङ्कारः ।

“योजनं तु चतुष्कोश्यां स्याद् योग-परमात्मनोः” इत्यादि । “विस्मयोऽद्भुत-गर्वयोः” इति चानेकार्थसङ्ग्रहः, “शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-ध्वनाः” इत्यमरः ।

शार्दूलविक्रीडितवृत्तम्; तल्लक्षणं तु “अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं छैः” [ छन्दोऽनुशासनम् ] इति, तदर्थश्च-‘म-स-ज-स-त-त-गाः, छैरिति द्वादशभिर्यतिः’ इति ॥ ४ ॥

**परागाभिधा विवृतिः**—एतावताऽप्यपरितुष्य भगवन्नाभिनन्दनवदनारविन्दनिवासिनीं भगवतीं सरस्वतीमाराधयति—**अव्यादि**ति । ‘पुरुषोत्तमनाभिसूतेर्देवस्य वक्त्रकमलोदरमावसन्त्या गिरामधिपतेर्देव्याः, दन्तकिरणप्रकरेण धौतेव, शरदिन्दुगौरी मूर्तिः, जगन्ति, अव्याद्’ इत्यन्वयः । **पुरुषोत्तमनाभिसूतेः** पुरुषेषूत्तमः श्लाघ्यस्तीर्थङ्करोत्पादकत्वादिति पुरुषोत्तमः, स चासौ नाभिः-नाभिरेव नाभिः, नाभिनामा नृपतिः, नाभिशब्दस्य नृपतावपि प्रसिद्धेः, तस्मात् सूतिः--उत्पत्तिर्यस्य स तथा, तस्य, यद्वा पुरुषोत्तमश्चासौ नाभिसूतिः-नाभिनन्दन इति पुरुषोत्तमनाभिसूतिस्तस्य, अथवा पुरुषोत्तमेषु-उत्तमपुरुषमध्येऽपि, नाभिः--प्रधाना, कल्याणककलितेत्यर्थः, सूतिः-उत्पत्तिर्यस्य तस्य, तीर्थङ्करस्येत्यर्थः, तदुद्भवोत्सवकल्याणके त्रिभुवनव्यापिन उद्योतस्य षट्पञ्चाशतो दिक्कुमारीणां चतुष्षष्टेरिन्द्राणां च सपरिवाराणामागमनस्य सुमेरुशिखरेऽभिषेकस्य, तदन्यस्य च माङ्गलिककर्मणः श्रवणात् । **देवस्य** भगवत ऋषभदेवस्य । **वक्त्रकमलोदरं** वक्त्रं कमलमिव मन्दहासात्मकविकासाश्रयत्वाद् राजतनयोचितताम्बूलैलालवङ्गपरिमलाश्रयत्वात् तीर्थङ्करनामकर्ममहिम्ना कमलामोदसोदरामोदमेदुरवदनानिलकलितत्वाद् वर्तुलत्वाच्च, तस्योदरं-मध्यम्, तत्रैव वागात्मनाऽभिव्यञ्जनात्, **आवसन्त्याः** वागात्मना निवसन्त्याः, **गिरामधिपतेः** वागधिष्ठात्र्याः, **देव्याः** भगवत्याः सरस्वत्याः, **शरदिन्दुगौरी** शरदि-आश्विन कार्तिकयोरतीव विमलेऽम्बरतले विभ्राजमानो य इन्दुः-चन्द्रः, तद्वद् गौरी-निर्मला, विशुद्धेत्यर्थः, कथमित्याह—**दन्तकिरणप्रकरेण** भगवद्वदननिर्गमनसमयोदञ्चत्तदीयदन्तमरीचिनिचयेन, **धौतेव** क्षालितेवेत्युत्प्रेक्षा । **जगन्ति** जगत्त्रयम्, न तु किञ्चिदेव जगत्, **अव्यात्** पायात् । पक्षे पुरुषोत्तमस्य-विष्णोः, नाभिः-तात्स्थ्यात् तद्व्यपदेशेन नाभिस्थितं पद्मम्, तत्र सूतिः-उत्पत्तिर्यस्य तस्य, देवस्य-ब्रह्मणो वक्त्रकमलं च, पितृस्नेहेन तदुत्सङ्गसङ्गिन्यास्तत्पुत्रीत्वेन प्रसिद्धायाः सरस्वत्या उदरं च, तस्याः पुत्रीत्वोचितचुम्बनावसरे समाहार इति वक्त्रकमलोदरम्, तद् यथा स्यात् तथा, आवसन्त्याः, गिरामधिपतेर्देव्याः-सरस्वत्याः, शरदिन्दुगौरी-शरच्चन्द्रवद् गौरवर्णा, कथमित्याह-दन्त-

**रक्षन्तु स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ, याति स्वाश्रयमर्जितांहसि सुरे निःश्वस्य संचारिताः ।**
**आजानुक्षितिमध्यमग्नवपुषश्चक्राभिघातव्यथा, मूर्च्छान्ते करुणाभराञ्चितपुटा वीरस्य वो दृष्टयः ॥ ६॥**

[ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्**—अधुनाऽऽसन्नतीर्थोपकारकत्वाद् भगवतो वर्धमानस्येष्टाभिमतदेवस्यैव पुनर्नमस्कारमाह-**रक्षन्त्वित्यादि । आर्जितांहसि** गृहीतपापे ॥ ६ ॥

---

किरणप्रकरेण धौतेव–चुम्बनाय विकसितास्योदञ्चद्दन्तमरीचिनिचयेन क्षालितेव, मूर्तिः–कर-चरणादिमती, शरीरमित्यर्थः, सर्वमन्यत् समानम् ।

अत्र वाच्या क्रियोत्प्रेक्षा श्लेषश्चेत्यनयोः संसृष्टिः ।

"श्रीपतिः पुरुषोत्तमः" इति, "स्त्रियां मूर्तिस्तनुस्तनूः" इति चामरः, "प्राण्यङ्गे क्षत्रिये नाभिः प्रधाने नृपतावपि" इति शाश्वतः ।

वसन्ततिलकावृत्तम्, तल्लक्षणं तु "तभौ जौ गौ वसन्ततिलका" [ छन्दोऽनुशासनम् ] इति ॥ ५ ॥

**परागाभिधा विवृतिः**—अथ वर्तमानतीर्थप्रवर्तकत्वेन प्रत्यासन्नोपकारित्वान्महावीरदेवं दृष्टिद्वारोपश्लोकयति—**रक्षन्त्विति** । 'चक्राभिघातव्यथामूर्च्छान्ते करुणाभराञ्चितपुटाः, स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ स्वाश्रयं याति सुरे निःश्वस्य संचारिताः, आजानुक्षितिमध्यमग्नवपुषो वीरस्य दृष्टयः, वो रक्षन्तु' इत्यन्वयः । **चक्राभिघातव्यथामूर्च्छान्ते** चक्रेण सङ्गमाख्यसुराधमविक्षिप्तकालचक्राख्यशस्त्रविशेषेण, योऽभिघातः–प्रहारः, तेन या व्यथा वेदना, तया मूर्च्छा–संज्ञाशून्यता, तस्या अन्ते–अवसाने, पुनः संज्ञोदये सतीत्यर्थः । **करुणाभराञ्चितपुटाः** करुणायाः 'हन्त ! स्वगर्हिताचरणपरिणतिमयं कामप्यतिप्रतिकूलामुपभुञ्जीत' इति दुष्कर्मदुर्विपाकवितर्कितोदितदयायाः, भरेण–अतिरेकेण, अञ्चितानि–अश्रुनिष्यन्दार्द्रीभावरूपं वैशिष्ट्यमापादितानि, पुटानि–स्वाधिष्ठानपुटकानि यासां ताः, अत एव **स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ** स्खलितैः–फलच्युतैः, उपसर्गैः–उपद्रवैः, गलितः–भ्रष्टः, प्रौढप्रतिज्ञाविधिः–प्रौढा–प्रगल्भपूर्णा प्रतिज्ञा एव समाधिभञ्जनसंस्कार एव विधिर्व्यापारो यस्य तस्मिन्, अत एव हताशयतया **स्वाश्रयं** देवलोकरूपं स्वस्थानम्, **याति** प्रतिगच्छति, **सुरे** विक्षिप्तचक्रकदेवापसदे । **निःश्वस्य** तदनिष्टचिन्तोपचितशोकनिःश्वासं मुक्त्वा, **संचारिताः** व्यापारिताः, **आजानुक्षितिमध्यमग्नवपुषः** आजानु–ऊरुपर्यन्तम्, क्षितिमध्ये–भूगर्भे, मग्नं–चक्राभिघातभारेण अन्तर्निविष्टम्, वपुः–शरीरं यस्य तस्य, **वीरस्य** महावीरस्वामिनः, **दृष्टयः** चक्षूंषि कारुण्यरसभूयस्त्वविवक्षया विविधविषयाकारतदीयवृत्तिबहुत्वविवक्षया वा बहुवचनम्, **वः** युष्मान्, रक्षन्तु, अपकारिणं प्रत्यपि सञ्जायमानकरुणरसवृष्टीनामदसीयदृष्टीनां सेवकान् प्रति सुतरामार्द्रत्वमिति भावः ।

अत्र निबद्धकरुणात्मककार्योचितकारणविरुद्धचक्राभिघातसद्भावमुखेन तदुचितकारणाभावनिबन्धनाद् विभावना, निबद्धचक्राभिघातात्मककारणोचितकार्यविरुद्धकरुणात्मककार्यसद्भावमुखेन तदुचितकार्याभावनिबन्धनाद् विशेषोक्तिश्चेत्यनयोः संशयसंकरालङ्कारः ॥

इह योगशास्त्रवृत्तिः—

"अनुग्राममनुपुरं विहरन् प्रभुरन्यदा । दृढभूमिमनुप्राप बहुम्लेच्छकुलाकुलम् ॥ १ ॥
पेढालग्रामं निकषा पेढालाराममन्तरा । कृताष्टमतपःकर्मा पोलासं चैत्यमाविशत् ॥ २ ॥
जन्तूपरोधरहितमधिष्ठाय शिलातलम् । आजानुलम्बितभुजो दुरावनतविग्रहः ॥ ३ ॥
स्थिरीकृतान्तःकरणो निर्निमेषविलोचनः । तस्थौ तत्रैकरात्रिक्या महाप्रतिमया विभुः ॥ ४ ॥
[ तथा स्थितं भगवन्तमवधिज्ञानेन ज्ञात्वा नत्वा चाह सौधर्मेन्द्रः– ]
भो भोः सर्वेऽपि सौधर्मवासिनस्त्रिदशोत्तमाः ! । शृणुत श्रीमहावीरस्वामिनो महिमाद्भुतम् ॥ १३ ॥
दधानः पञ्चसमितीर्गुप्तित्रयपवित्रितः । क्रोध-मान-माया-लोभाऽनभिभूतो निराश्रयः ॥ १४ ॥
द्रव्ये क्षेत्रे च काले च भावे चाप्रतिबद्धधीः । रुक्षैकपुद्गलन्यस्ततयनो ध्यानमास्थितः ॥ १५ ॥

प्रबन्धानामनध्यायः सा वाग् जयति शुद्धया ।
यया प्रतिपदेवेन्दुः कविः क्षीणोऽपि जीवति ॥ ७ ॥ [ पथ्या ]

---

**टिप्पनकम्**—वाच उत्कृष्ट[ ता ]माह—सा वाग् वाणी, जयति उत्कृष्टा वर्तते । यया वाचा, कविः, कीदृशः? **क्षीणोऽपि** जीर्णोऽपि, **जीवति** उच्छ्वसिति प्राप्तप्रसिद्धिर्लोके भवति, **जीवति** जीव इव बृहस्पतिरिवाचरति, अयिलोपे रूपम्, बृहस्पतीयतीत्यर्थः । कयेव कः? **प्रतिपदेव** शुक्लपक्षप्रथमतिथ्येव, **इन्दुः**, यथा चन्द्रः प्रतिपदा **क्षीणोऽपि** क्षयप्राप्तोऽपि जीवति । किम्भूतया वाचा प्रतिपदा च? **शुद्धया** निर्दोषया शुभ्रया च । कीदृशी वाक् प्रतिपच्च? **अनध्यायः** अनध्ययनमनध्ययनहेतुत्वाद् अपठनं तथाविधार्थालङ्काराद्यभावेनोद्वेगहेतुत्वात् । केषाम्? **प्रबन्धानां** शास्त्राणाम्, प्रतिपद्प्यनध्यायः शास्त्राणामध्ययनस्य निषेधाच्छास्त्रे ॥ ७ ॥

---

अमरैरसुरैर्यक्षै रक्षोभिरुरगैर्नरैः । त्रैलोक्येनापि शक्येत ध्यानाच्चालयितुं नहि ॥ १६ ॥
इत्याकर्ण्य वचः शाक्रं शक्रसामानिकः सुरः । ललाटपट्टघटितभ्रुकुटीभङ्गभीषणः ॥ १७ ॥
कम्पमानाधरः कोपाल्लोहितायितलोचनः । अभव्यो गाढमिथ्यात्वसङ्गः सङ्गमकोऽवदत् ॥ १८ ॥
मर्त्यः श्रमणमात्रोऽयं यदेव देव ! वर्ण्यते । स्वच्छन्दं सदसद्वादे प्रभुत्वं तत्र कारणम् ॥ १९ ॥
एषोऽहं चालयिष्यामि तं ध्यानादित्युदीर्य सः । करेण भूमिमाहत्योदस्थादास्थानमण्डपात् ॥ २० ॥
अर्हन्तः परसाहाय्यात् तपः कुर्वन्त्यखण्डितम् । मा ज्ञासीदिति दुर्बुद्धिः शक्रेण स उपेक्षितः ॥ २१ ॥
विकटोरःस्थलाघातपुञ्जितग्रहमण्डलः । स पापस्तत्र गतवान् यत्रासीत् परमेश्वरः ॥ २२ ॥
वज्रसारमनस्कोऽयं बहुधाऽपि कदर्थितः । न क्षोभ्यते कथमहं भग्नागूर्यामि तां सभाम् ॥ ७८ ॥
तदस्य प्राणनाशेन ध्यानं नश्यति नान्यथा । चिन्तयित्वेति चक्रे स कालचक्रं सुराधमः ॥ ७९ ॥
अह्नाय तदयोभारसहस्रघटितं ततः । उद्धार सुरः शैलं कैलासमिव रावणः ॥ ८० ॥
पृथिवीं सम्पुटीकर्तुं कृतं मन्ये पुटान्तरम् । उत्पत्य कालचक्रं स प्रचिक्षेपोपरि प्रभोः ॥ ८१ ॥
ज्वालाजालैरुच्छलद्भिर्दिशः सर्वाः करालयन् । उत्पपात जगद्भर्तर्यौर्वानल इवार्णवे ॥ ८२ ॥
कुलक्षितिधरक्षोदक्षमस्यास्य प्रभावतः । ममज्जाजानु भगवानन्तर्वसुमतीतलम् ॥ ८३ ॥
एवम्भूतोऽपि भगवानशोचदिदमस्य यत् । तितारयिषो विश्वं वयं संसारकारणम् ॥ ८४ ॥
कर्मणैवंविधेनाऽयं क्व वराको व्रजिष्यति ? । न शक्यते तारयितुमस्माभिरपि तारकैः ॥ १२१ ॥
एवं भगवतश्चिन्तां तन्वतस्तत्र गच्छति । दृशावभूतां कृपयोद्बाष्पे मन्थरतारके ॥ १२२ ॥

"चक्रं प्रहरणे गणे" इत्यनेकार्थसङ्ग्रहः, "कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम्" इति, "अथातिशयो भरः" इति चामरः ॥ ६ ॥

**परागाभिधा विवृतिः**—अथ निखिलनिगमाऽऽगमगुम्फिनीं वाचमभिष्टौति—**प्रबन्धानामनध्याय** इति । 'प्रबन्धानामनध्यायः सा वाग् जयति, शुद्धया यया [ वाचा ] प्रतिपदा इन्दुरिव क्षीणोऽपि कविर्जीवति' इत्यन्वयः । **प्रबन्धानां** प्रकृष्टानामर्थगतातीतत्वा-ऽप्रसिद्धत्वप्रयुक्तानां प्रतिभासप्रतिबन्धानाम्, अतीता-ऽनागतादीनामतीन्द्रियाणामपि बन्ध्यासुतादीनामप्रसिद्धानामपि च शब्दतः प्रतिभासात्, अथवा प्रबन्धानां—प्रकृष्टानामपि बन्धानां वर्णनात्मकरचनानाम्, अनध्यायः—अविषयः, विशिष्टकाव्यरचनयाऽपि वर्णनाऽगोचरगुणेत्यर्थः, यद्वा प्रकृष्टानां—पद्म-हारादिमनोहराकृतीनाम्, बन्धानां लिपिसन्निवेशविशेषाणाम्, **अनध्यायः** अनधि—न विद्यते अधि अधिको यस्मादसौ निरतिशय इत्यर्थः, आयः—लाभास्पदम्, प्रतिपत्पक्षे तु **प्रबन्धानां** शास्त्राणाम्, **अनध्यायः** अनध्यायतिथिः, तत्तिथावध्ययनप्रतिषेधात्, तदुक्तं निर्णयामृते "प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी । दिनं दूषयते सर्वं सुरा गव्यघटं यथा" ॥ १ ॥ इति, तिथितत्त्वे व्यासेनापि—"सा च यौधिष्ठिरी सेना गाङ्गेयशरताडिता । प्रतिपत्पाठशीलानां विद्येव तनुतां गता" ॥ २ ॥ इति, "प्रतिपत्पाठशीलस्य विद्येव तनुतां गता" । इति च हनूमता लङ्कातः प्रत्यागत्य रामं प्रति प्रत्यपादि लङ्केशनिगृहीतायाः सीताया दैवदुर्विलसितम् । **सा** वक्ष्यमाणयत्पदबोध्यत्वेन

**वन्द्यास्ते कवयः काव्यपरमार्थविशारदाः ।**
विचारयन्ति ये दोषान् गुणांश्च गतमत्सराः ॥ ८ ॥ [ पथ्या ]
**वार्योऽनार्यः स निर्दोषे यः काव्याध्वनि सर्पताम् ।**
अग्रगामितया कुर्वन् विघ्नमायाति सर्पताम् ॥ ९ ॥ [ पथ्या ]

---

**टिप्पनकम्**—अथ कविवर्णनं दुर्जननिन्दां चाह—वन्द्या इति, सुगमम् ॥ ८ ॥

**टिप्पनकम्**—स अनार्यः दुर्जनः, वार्यः निवारणीयः, य आयाति प्राप्नोति। काम्? **सर्पताम्** अहिताम्, किम्? **कुर्वन्** विदधानः । कम्? **विघ्नम्** अन्तरायं दोषोत्पादनलक्षणम् । कया? **अग्रगामितया** पुरोगन्तृत्वेन । केषाम्? **सर्पतां** प्रवर्तमानानाम् । क? **काव्याध्वनि** काव्यमार्गे । किंभूते? **निर्दोषे** छन्दोऽलङ्कारादिदोषरहिते, सर्पोऽपि यदा मार्गे चोरादिदोषशून्ये गच्छतामग्रगामित्वेन विघ्नं करोति तदा वार्योऽनार्यः—क्षुद्रः ॥ ९ ॥

---

वक्त्रभिप्रेता वाग् **जयति** सर्वोत्कर्षेण वर्तते । सा का? इत्याह—**शुद्धया** च्युतसंस्कारत्वादिदोषशून्यया, **यया** वाचा करणभूतया, **प्रतिपदा** लोकाभिभावकधिया, **क्षीणोऽपि** विहीनोऽपि, यद्वा क्षीणोऽपि—क्षीणविभवोऽपि, **कविः** कवयिता, **जीवति** क्वचन राजधान्यां जीविकापन्नो भवति, 'प्रतिपदा' इत्यस्योत्तरत्राप्यन्वयात्, यद्वा क्षीणोऽपि—कुष्ठादिरोगगलिताङ्गोऽपि कविः, जीवति—भगवदाराधककाव्यं प्रणीय तत्पुण्यपुष्टवपुषा प्राणान् धारयति, यथा लोके सूर्यशतकं प्रणीय कविर्मयूरः। अथवा जीवति—जीव इव बृहस्पतीरिवाचरति, लोके गुरुत्वमुपैतीत्यर्थः, यद्वा क्षीणोऽपि—दैत्यगुरुतया प्रतिष्ठाहीनोऽपि, कविः—शुक्रः, जीवति—वाग्वैभवेन जीव इव बृहस्पतिरिव आचरति प्रतितिष्ठति । कया क इव? इत्याह—**शुद्धया** शुक्लया, **प्रतिपदा** प्रतिपद्यते परिच्छिनत्ति मासं यया तया तिथ्या, यद्वा प्रतिपद्यते पक्षस्याद्यत्वेन निरूप्यते या तया प्रतिपदा, क्षीणोऽपि—कृष्णप्रतिपदमारभ्य क्षीणकलोऽपि, **इन्दुरिव** चन्द्र इव, यथा अमायामेकराशिद्वादशांशान्तःपातिसूर्यरश्मिभिस्तिरोधानात् क्षीणकलः पुनः शुक्लप्रतिपदा, जीवति—शनैः शनैः पूर्णकलो भवति तथेत्यर्थः, द्वादशांशानतिक्रम्य कदाचन शुक्लप्रतिपद्यपि चन्द्रोदयात्, द्वितीयायां तदुदयोऽपि तन्नियतपूर्वत्वाच्च तस्याः कारणत्वं सुवचमिति बोध्यम् । अत्रोपमालङ्कारः ।

"प्रतिपत् संविदि तिथौ" इति, "कविः काव्यस्य कर्तरि । विचक्षणे दैत्यगुरौ स्यात्" इति चानेकार्थसंग्रहः, "जीवौ जन्तु-बृहस्पती" इति शाश्वतः ।

पथ्यावृत्तम्, तल्लक्षणं तु "तद्युजोर्जः" [ छन्दोऽनुशासनम् ], तदर्थश्च–तद् 'अनुष्टुभि नाद्यात् स्नौ तुर्याद् यो वक्त्रम्' इत्युक्तं वक्त्रं युजोः पादयोस्तुर्यादक्षरात् परो जगणश्चेद् भवति तदा पथ्येति ॥ ७ ॥

**परागाभिधा विवृतिः**—ननु न कवयो जीवितुमलम्, एकस्य काव्ये द्वेषवशादन्येन दोषोद्भावनादित्यत आह—**वन्द्यास्ते** इति । 'काव्यपरमार्थविशारदास्ते कवयो वन्द्याः, गतमत्सरा ये दोषान् गुणांश्च विचारयन्ति' इत्यन्वयः । यतः **कवयः** स्वयमपि कवनकर्माणः, अतः **काव्यपरमार्थविशारदाः** काव्यस्य—परप्रणीतस्य रसात्मकवाक्यस्य, परमः—वाच्यार्थापेक्षयोत्तमः, अर्थः–रसादिरूपो व्यङ्ग्यार्थः, तत्र विशारदाः—तदास्वादनकुशलाः, *गुणी गुणं वेत्ति* इति न्यायात् । ते **वन्द्याः** स्तुत्याः, ये **गतमत्सराः** अन्यशुभद्वेषशून्याः सन्तः, **दोषान्** झटिति रसास्वादव्याघातकांश्च्युतसंस्कारत्वादिरूपान् पददोषान्, समाप्तपुनरात्तत्वादिरूपान् वाक्यदोषान्, अश्लीलत्वादिरूपान् अर्थदोषान्, विभावा-ऽनुभावाभिव्यक्तिकाठिन्यादिरूपांश्च रसदोषान्, न केवलं दोषान् अपि तु **गुणांश्च** रसोत्कर्षकान् माधुर्यादिरूपान् गुणानपि **विचारयन्ति** परकाव्येषु समालोचयन्ति, *मक्षिकाव्रण*न्यायेन परकाव्येषु केवलदोषान्वेषणमन्यशुभद्वेषदुर्विलसितमात्रमतः "गुण-दोषौ बुधो गृह्णन्निन्दु-क्ष्वेडाविवेश्वरः । शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति" ॥ इति न्यायेन रसास्वादैकप्रणयिभिर्गुणानेव पुरस्कृत्य स्वसहृदयत्वमुद्योतनीयमित्यर्थः ।

"मत्सरोऽन्यशुभद्वेषः" इत्यमरः ॥ ८ ॥

**परागाभिधा विवृतिः**—यो मृषादोषमुद्घोषयन् लोके रसास्वादमवरुणद्धि स एव दुर्जनत्वेन परीक्ष्य प्रेक्षावतोन्मत्तवदुपेक्षणीयः, न तु तद्वचसा किमपि काव्यमित्याह—**वार्योऽनार्य** इति । 'यो निर्दोषे काव्याध्वनि सर्पतामग्रगामितया विघ्नं

शेषे सेवाविशेषं ये न जानन्ति द्विजिह्वताम् ।
यान्तो हीनकुलाः किं ते न लज्जन्ते? मनीषिणाम् ॥ १० ॥ [ पथ्या ]

**टिप्पनकम्**—शे तालव्यशकारे, षे मूर्धन्यषकारे, **से** दन्त्यसकारे, **वा** समुच्चये, **विशेषं** भेदम्, **ये** नराः, **न जानन्ति** न बुध्यन्ते, **ते किं न लज्जन्ते** लज्जितव्यमेव तैर्भवति। केषाम्? **मनीषिणां** विदुषाम्। किं कुर्वन्तः? **यान्तः** गच्छन्तः। काम्? **द्विजिह्वतां** दुर्जनतामग्रे पृष्ठतो गुणदोषग्राहित्वात्। कीदृशाः? **हीनकुलाः** नीचगोत्राः, इत्येकोऽर्थः। अपरश्च—**शेषे** नागराजे, **सेवाविशेषं** विशिष्टाराधनम्, ये न जानन्ति, अहीनाम् इनः-स्वामी, नागराजः, तस्य कुलं गोत्रं येषां ते तथोक्ताः [अहीनकुलाः] नागराजकुलजाताः, ते किं **न लज्जन्ते**? लज्जन्त एव मनीषिणाम्, किं कुर्वन्त? **यान्तः**, काम्? **द्विजिह्वतां** सर्पताम्, अवश्यमेव ये नागराजकुले जातास्ते नागराजसेवां जानन्ति। यद्वा ही विस्मये, ते नकुलाः किं न **लज्जन्ते**? लज्जन्त एव, केषाम्? **मनीषिणां** बुद्धिमताम्, किं कुर्वन्तः? **यान्तः**, काम्? **द्विजिह्वतां** सर्पताम्, वयं सर्पा इति भणन्तः ॥ १० ॥

कुर्वन् सर्पतामायाति सोऽनार्यो वार्यः' इत्यन्वयः। यो **निर्दोषे** निरुक्तदोषशून्येऽपि, **काव्याध्वनि** काव्यरूपे परमपदप्रस्थानसरणमार्गे, **सर्पतां** गच्छताम्, काव्यार्थरसमास्वादयतां सहृदयानामित्यर्थः, **विघ्नं** मृषादोषोद्भावनरूपं रसास्वादोपद्रवम्, **कुर्वन्** विदधानः, **सर्पतां** सर्पत्वम्, मार्गगमनविघातकतया सर्पसाम्यमित्यर्थः, **आयाति** प्राप्नोति, सः, **अनार्यः** निरुक्तलक्षणेन दुर्जनः, **वार्यः** बिभीषया दूरतः परिहर्तव्यः, उपेक्षणीयो वा। यथा चौरभयादिरूपदोषरहितेऽपि पथि स्वपुरस्तादुपसृत्य बिभीषा-ऽपशकुनाभ्यां गमनमवरुन्धानमपि भुजङ्गमवधूय प्रगल्भः पथिकः प्रतिष्ठते, तथैव निरुक्तदुर्जनं वर्जयित्वा काव्यार्थो रसनीय एव, न तु जातु निरसनीय इति भावः।

अत्र 'वार्योऽनार्यः' इत्यत्र छेकानुप्रासः, 'सर्पताम्' इत्यत्र छेकानुप्रास-रूपकसङ्करश्च बोध्यः।

"अयनं सरणिर्मार्गोऽध्वा पन्था निगमः सृतिः" इत्यभिधानचिन्तामणिः ॥ ९ ॥

**परागाभिधा विवृतिः**—निरुक्तदौर्जन्यमतीव दुष्कुलीनताममुष्य पुष्यद् उद्वेललज्जोदधौ मज्जनाय मतिमज्जनाग्रे प्रभवतीत्याह—**शेषे सेवाविशेषमि**ति। 'ये शेषे सेवाविशेषं न जानन्ति ते द्विजिह्वतां यान्तो हीनकुला मनीषिणां किं न लज्जन्ते?' इत्यन्वयः। ये **शेषे** निरुक्तदुर्जनादन्यस्मिन्, सज्जने इत्यर्थः, **सेवाविशेषं** विशिष्टसेवाविधिम्, न जानन्ति, प्रत्युत ते **द्विजिह्वतां** द्वे-समक्षे गुणोच्चारणात् परोक्षे दोषोच्चारणाच्च तमेकमेव प्रति द्विविधे, जिह्वे यस्य तत्ताम्, **यान्तः** प्राप्नुवन्तः, अत एव **हीनकुलाः** नीचकुलाः, **मनीषिणां** विवेकिनाम्, 'मध्ये' इति शेषः। **किं न लज्जन्ते?** लज्जन्त एवेति काकाऽऽक्षिप्तोऽर्थः, इति प्रकृतानुसारिणी व्याख्या। अनुरणनात्मिका व्याख्या तु-ये **द्विजिह्वतां** भुजङ्गलक्षणभूतां जिह्वाद्वयवत्ताम्, **यान्तः** धारयन्तः, **अहीनकुलाः** अहीनां-भुजङ्गानाम्, इनः-श्रेष्ठः, भुजङ्गराजः, तत्कुलोत्पन्नाः, **शेषे** तदाख्यभुजङ्गराजे, **सेवाविशेषं** विशिष्टसेवाप्रकारम्, न जानन्ति ते **मनीषिणाम्** उचितानुचितविवेकिनां मध्ये, **किं न लज्जन्ते?** लज्जन्त एवेत्यर्थः, 'पितरि शुश्रूषितव्यम्' इत्याद्यनुशासनसिद्धपित्रादिभक्तेरनतिक्रमणीयतया तदनभिज्ञताया लज्जावहत्वात्। अथवा **ही**-शब्दस्य विस्मयार्थकतया **नकुलाः** भुजङ्गघातिनो बिलेशया जन्तुभेदाः, **द्विजिह्वतां** भुजङ्गतारूपां स्वदुर्बलजीवाश्रितजातिम्, यान्ति 'वयं सर्पाः' इति स्वस्मिन्नारोपयन्तीति विस्मयः, लोकानां स्वभावत उच्चाभिलाषित्वात् तस्मात् तथाऽऽचरन्तस्ते **मनीषिणां** लोकाभिलाषकमाभिज्ञानाम्, मध्ये **किं न लज्जन्ते?** लज्जन्त एवेत्यर्थः। यद्वा **शे** तालव्यशकारे, **षे** मूर्धन्यषकारे, **से** दन्त्यसकारे, **वा** समुच्चये, **विशेषं** तालुस्थान-मूर्धस्थान-दन्तस्थानोच्चार्यमाणत्वादिरूपं ये न जानन्ति, यद्वा "शश्च सीम्नि निगद्यते" इत्येकाक्षरकोशात् शं-सीमानं मर्यादाम्, इष्यति-गच्छति प्राप्नोतीत्यर्थः, न त्वतिक्रामतीति शेषः, समर्याद इत्यर्थः, तस्मिन्, **से** "सः कोपः" इत्येकाक्षरकोशात् कोपे, **वा** एव, विशेषः, न तु निर्मर्यादे तस्यानर्थहेतुत्वात्, तं ये न जानन्ति, यद्वा "शयने शः समाख्यातः" इत्येकाक्षरकोशात् **शे** शयने, शयनसमय इत्यर्थः, **षे** श्रेष्ठे पित्रादौ "षः कीर्तितो बुधैः श्रेष्ठे" इत्येकाक्षरकोशात्, सेवाविशेषं ये न जानन्ति, यद्वा **शे** शकारे "मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः। सोऽयमनूढो भ्राता राज्ञः श्यालः शकार इत्युक्तः" इति साहित्यदर्पणोक्ते विनैवोद्वाहं राज्ञोपभोग्यायाः स्त्रिया भ्रातरि, **षे** श्रेष्ठे च, **सेवाविशेषं** सेवाप्रकारभेदम्, ये न जानन्ति किन्तूभयत्रैकमेव सेवाप्रकारमित्यर्थः, सर्वमन्यत् समानम्। अत्र श्लेषालङ्कारः स्फुटः ॥ १० ॥

स्वादुतां मधुना नीताः पशूनामपि मानसम् ।
मदयन्ति न यद्वाचः किं तेऽपि कवयो भुवि ? ॥ ११ ॥ [ पथ्या ]

काव्यं तदपि किं वाच्यमवाञ्चि न करोति यत् ।
श्रुतमात्रममित्राणां वक्त्राणि च शिरांसि च ॥ १२ ॥ [ पथ्या ]

---

**टिप्पनकम्**—किं तेऽपि **कवयः** कवितारः, न कवय इत्यर्थः। कस्याम्? **भुवि** जगति । **यद्वाचः** येषां गिरः, **न मदयन्ति** न हर्षयन्ति । किं तत्? **मानसम्**। केषाम्? **पशूनां** मूर्खाणाम्, अथाऽऽस्तां विदुषाम् । किंभूताः? **नीताः** प्रापिताः । काम्? **स्वादुतां** मधुरताम् । केन? **मधुना** माधुर्येण, इत्येकोऽर्थः । अपरश्च–किं तेऽपि **कवयः**? कं—जलम्, तस्य वयः—पक्षिणो हंसादयः, कस्य ब्रह्मणो वा, वयः—हंसा वाहनत्वात्, एतच्चोपलक्षणं कोकिलादि-पक्षिणाम्, न कवय इत्यर्थः। **यद्वाचः** यद्गिरः, **भुवि** पृथिव्याम्, **पशूनां** तिरश्चाम्, अथाऽऽस्तां मनुष्याणाम्, **मानसं न मदयन्ति** न मत्तं कुर्वन्ति । किंभूता यद्वाचः? **नीताः** प्रापिताः, काम्? **स्वादुतां** माधुर्यम् । केन? **मधुना** चैत्रेण तत्र पुष्परसपानादिना स्वरमाधुर्यप्राप्तेः, अथवा **पिकवयः** किं कोकिलपक्षिणस्ते? **भुवि** पृथिव्याम्, नैवेत्यर्थः ॥११॥

**टिप्पनकम्**—तदपि किं काव्यं **वाच्यं** भणनीयम्?, न काव्यं वाच्यमित्यर्थः, यन्न करोति, किम्भूतं सत्? **श्रुतमात्रम्** आकर्णितमात्रम्, आस्तामर्थादिनाऽवधारितम्, कानि? **वक्त्राणि** मुखानि, **शिरांसि च** मस्तकानि च, चकारौ परस्परापेक्षया समुच्चयार्थौ, केषाम्? **अमित्राणां** दुर्जनानामित्यर्थः, किंभूतानि च करोति? **अवाञ्चि** वचन-रहितानि वक्त्राणि, शिरांसि चाधोमुखानि, गुणयुक्तत्वेन दोषरहितत्वेन च ॥ १२ ॥

---

**परागाभिधा विवृतिः**—न केवलं कवनमात्रेण कवित्वं किन्तु चमत्कृतिकृति कमनीये कवने सति तदित्याह—**स्वादुतामि**त्यादि । "मधुना स्वादुतां नीताः यद्वाचः पशूनामपि मानसं न मदयन्ति, किं तेऽपि भुवि कवयः? किं ते भुवि पिकवयः?" इत्यन्वयः । **मधुना** क्षीरेण पुष्परसेन द्राक्षासवादिना वा, तत्कृतकण्ठसुस्वरत्वादिनेत्यर्थः, **स्वादुतां** मिष्टताम्, कर्णपेयपीयूषभावमित्यर्थः, यद्वा **मधुना** मधुरेण, भावप्रधाननिर्देशाद् माधुर्येण काव्यगुणविशेषेण, **स्वादुतां** मिष्टताम्–सहृदय-हृदयाऽऽस्वाद्यताम्, यद्वा सचेतश्चेतश्चमत्कृतिकरणेन मनोज्ञताम्, **नीताः** प्रापिताः, **यद्वाचः** येषां कवितॄणां सुभाषितानि, पशूनामपि पशुसदृशानामपि, मूर्खाणामित्यर्थः, आस्तां विदुषाम्, **मानसं** मनः, **न मदयन्ति** न हर्षयन्ति, न रञ्जयन्तीत्यर्थः, **भुवि** जगति किं तेऽपि **कवयः** काव्यकर्तारः?, नेत्यर्थः । पक्षे **मधुना** चैत्रमासेन, **स्वादुतां** मञ्जुलमञ्जरीपुञ्ज-कुसुमरसा-दिना मिष्टभावम्, **नीताः** प्रापिताः, **यद्वाचः** येषां वाचः–कलानि कूजितानि, **पशूनामपि** देवानामपि मृगादीनामपि वा, आस्तामितरेषाम्, **मानसं** मनः, **न मदयन्ति** न रञ्जयन्ति, किं ते **पिकवयः**? कोकिलपक्षिणः?, नेत्यर्थः ।

"पशुर्मृगादिदेवाऽजे नाऽव्ययं पशुदर्शने" "स्वादु मिष्ट-मनोज्ञयोः इति मेदिनी, मधुश्चैत्रर्तुदैत्येषु जीवाशोक-मधूकयोः । मधु क्षीरे जले मद्ये क्षौद्रे पुष्परसेऽपि च" इत्यनेकार्थसंग्रहः । अत्र श्लेषालङ्कारः ॥ ११ ॥

**परागाभिधा विवृतिः**—तस्मात् तद्विरचितस्य काव्यस्य काव्यत्वमेव नेत्याह—**काव्यं तदपि किं वाच्य-मिति** । 'यत् श्रुतमात्रम्, अमित्राणां वक्त्राणि च शिरांसि च अवाञ्चि न करोति तदपि किं काव्यं वाच्यम्?' इत्यन्वयः । यत् काव्यम्, **श्रुतमात्रं** श्रवणमात्रेण, **अमित्राणां** स्वप्रणेतुर्विद्वेषिणां प्रतिस्पर्धालूनामिति यावत्, **वक्त्राणि** उच्यन्ते यैस्तानि मुखानि, **अवाञ्चि** अविद्यमाना वाक् आक्षेपवाक्यं येषु तानि, दूषणानुपलब्ध्या स्वविषये मूकानीत्यर्थः, **न करोति** न भावयति । एवं तेषां **शिरांसि च** मस्तकानि च, **अवाञ्चि** अवाञ्चन्ति—अधोगच्छन्ति यानि तानि, अद्भुतगुणोपलम्भोद्भूत-लज्जया अधोमुखानि, अधोऽवनतानीति यावत्, न करोति तदपि किं **काव्यं वाच्यम्**? काव्यत्वेन व्यपदेश्यम्? नेत्यर्थः ।

अत्र वक्त्र-शिरसामवाक्करणकर्मत्वाभावरूपैकधर्माभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः ।

"मूकोऽवाक्" इति, "अधोमुखस्त्ववाङ्" इति चाभिधानचिन्तामणिः ॥ १२ ॥

उत्पतन्त्यजवद् व्योम्नि केचित् प्राप्तपदत्रयाः ।
विशन्त्यन्ये प्रबन्धेऽपि लब्धे बलिरिव क्षितिम् ॥ १३ ॥ [ पथ्या ]
कषाश्मनेव श्यामेन मुखेनाधोमुखेक्षणः ।
काव्यहेम्नो गुणान् वक्ति कलाद इव दुर्जनः ॥ १४ ॥ [ भविपुला ]

---

**टिप्पनकम्**—कविविशेषमाह-**उत्पतन्ति** उद्गच्छन्ति, उदयन्त इत्यर्थः, **केचित्** कवयः । क्व ? **व्योम्नि** आकाशमपि बुद्ध्या व्याप्नुवन्ति, किम्भूताः सन्तः ? **प्राप्तपदत्रयाः** उत्पाद-व्यय ध्रौव्यलक्षणं पदत्रयं प्राप्ताः, अथवा सुबन्त-तिङन्तपदत्रयं प्राप्ताः । अन्ये तु विशन्ति, काम् ? **क्षितिं** क्षयं बुद्धिरहिततां यान्ति । कस्मिन् सत्यपि ? **प्रबन्धेऽपि** शास्त्रेऽपि । किम्भूते ? **लब्धे** प्राप्ते । क इवोत्पतन्ति ? क इव विशन्ति ? **अजवद्** विष्णुवत्, यथा विष्णुराकाशे उत्पतितः, किम्भूतः ? **प्राप्तपदत्रयः** लब्धाऽधऊर्ध्वतिर्यक्क्रमत्रितयः । **बलिरिव** यथा बलिः **प्रबन्धे** प्रकृष्टबन्धने प्राप्ते, **क्षितिं भूमिम्**, प्रविष्टः, विभक्तिविपरिणामेनैकवचनं योजनीयम् ॥ १३ ॥

**टिप्पनकम्**—दुर्जनस्वरूपमाह—**वक्ति** ब्रूते, कः ? **दुर्जनः**, कान् ? **गुणान्** श्लेषादीन्, कस्य ? **काव्यस्य**, क इव कस्य ? **कलाद इव** सुवर्णकार इव, **हेम्नः** सुवर्णस्य, यथा वक्ति, **गुणान्** विषाद्यपनयादीन्, केन ? **मुखेन** वक्त्रेण, किम्भूतेन ? **श्यामेन** कृष्णेन, काव्यस्यानेकगुणदर्शनेन श्यामता । कीदृशो दुर्जनः ? **अधोमुखेक्षणः** अवाग्लोचनः, केनेव ? **कषाश्मनेव** कषवर्तकप्रस्तारेणेव मुखेन, तेनापि किम्भूतेन ? **श्यामेन** कृष्णेन, कलादोऽप्यधोमुखेक्षणः सुवर्णदत्तलोचनत्वात् ॥ १४ ॥

---

**परागाभिधा विवृतिः**—अथ क्षुद्रकवेरुच्छृङ्खलतामुपहसन् गम्भीरकवेरतिनम्रतां श्लाघते कविः—**उत्पतन्त्यजवदिति** । 'प्राप्तपदत्रयाः केचिद् अजवद् व्योम्नि उत्पतन्ति, अन्ये प्रबन्धे लब्धेऽपि बलिरिव क्षितिं विशन्ति' इत्यन्वयः । **प्राप्तपदत्रयाः** प्राप्तम्-श्रवणेन्द्रियेण गृहीतम्, पदत्रयं विभक्त्यन्तशब्दत्रयमात्रं यैस्तथाभूता अपि, अल्पश्रुता अपीत्यर्थः । **केचित्** केचन कवयः । **व्योम्नि** आकाशे, **उत्पतन्ति** बहुश्रुतंमन्याः सन्त उच्छलन्ति । क इव ? **अजवद्** विष्णुरिव, स यथा बलेः सकाशात् प्राप्तम्–लब्धम्, पदत्रयम्–वामनरूपेणावतीर्य स्वपादत्रयमितं लोकत्रयम्, येन तथा भूत्वा व्योम्नि उत्पतितवान् आसीत् । **अन्ये** निरुक्तोद्धताल्पज्ञकविव्यतिरिक्ताः कवयः, **प्रबन्धे** सम्पूर्णे शास्त्रे, **लब्धेऽपि** श्रुतेऽपि, **क्षितिं** पृथिवीमेव **विशन्ति** निविशन्ते, नम्रतमास्तिष्ठन्ति न तूत्पतन्तीत्यर्थः । क इव ? **बलिरिव** बलिनामा नृपतिरिव, स यथा **प्रबन्धे** परस्वत्वापादनरूपे स्वभूमिनियन्त्रणे, लब्धे प्राप्ते सति, **क्षितिं** पातालभूमिम्, विशति स्म तथा । बलिनाम्नो नृपतेरदभ्रवदान्यतादर्पमसहिष्णुर्विष्णुर्वामनरूपेणावतीर्य स्वपादत्रयमितवसुमतीमर्थयित्वा तेन दातुमूरीकृतां तां सपदि द्राघीयसीमाकृतिमाधाय, एकेन पादेन मर्त्यलोकम्, द्वितीयेनाऽऽकाशलोकम्, तृतीयेन स्वर्लोकं प्रमाय तत्र स्वत्वमापाद्य वियत्युत्पपात, बलिरप्यनुतप्य परस्वत्वापन्नमदो लोकत्रयमुत्सृज्य पाताललोकमशिश्रियदिति पौराणिकी वार्ता । अथ स्वसम्प्रदायोचितसरण्या व्याख्यायते—**प्राप्तपदत्रयाः** प्राप्तम्–तीर्थङ्करादधिगतम्, पदत्रयम्–'उत्पद्यते, विनश्यति, ध्रुवति च' इत्युत्पत्ति-व्यय-ध्रौव्यलक्षणा त्रिपदी यैस्ते स्याद्वादिन इत्यर्थः, **केचित्** गौतमगणधरादयः केचन कवयः, न तु सर्वे, **व्योम्नि** लोकालोकरूप आकाशे, **उत्पतन्ति** विकसितोत्प्रेक्षापक्षानाश्रित्य उड्डीयन्ते, गौतमगणधरादयस्तीर्थङ्करसकाशादुक्तत्रिपदीमधिगम्योपचितप्रेक्षाप्रणीतसकलश्रुतमयद्वादशाङ्ग्यामतिसूक्ष्ममपि निखिलभावसङ्कुलभुक्तरूपमाकाशं करतलामलकवन्निरूपयन्तीत्यर्थः । क इव ? **अजवद्** न जायत इत्यजः, मुक्तात्मा, स यथा प्राप्ताव्यवहारराशिपद-व्यवहारराशिपदमुक्तावस्थापदत्रयः केवलज्ञानेनोक्तरूपमाकाशं व्याप्नोति । **अन्ये** त्रिपदीज्ञानशून्या अपरे कवयः, **प्रबन्धे** एकान्तवादात्मके शास्त्रे, **लब्धेऽपि** अधिगतेऽपि, **क्षितिं** क्षयम्, व्यापकबुद्धिवैकल्यमित्यर्थः, **विशन्ति** प्रविशन्ति, आश्रयन्तीत्यर्थः । क इव ? **बलिरिव** बलिः–नैवेद्यादिकं पूजोपहारद्रव्यम्, स यथा प्रबन्धे समुद्गकादिरूपे प्रकृष्टबन्धे लब्धे सति पर्युषितत्वादिना विनाशं प्राप्नोति तथा ।

अत्रोपमाऽलङ्कारः । "व्योम पुष्करमम्बरम्" इत्यमरः, "अजश्छागे हरे विष्णौ" इत्यनेकार्थसङ्ग्रहः ॥ १३ ॥

**परागाभिधा विवृतिः**—अथ दुरात्मनां काव्यगुणकीर्तनचेष्टामभिनयति—**कषाश्मनेवेति** । 'कलाद इव अधोमुखेक्षणो दुर्जनः कषाश्मनेव श्यामेन मुखेन काव्यहेम्नो गुणान् वक्ति' इत्यन्वयः । **दुर्जनः** खलः, **अधोमुखेक्षणः** अधोमुखम्

अखण्डदण्डकारण्यभाजः प्रचुरवर्णकात् ।
व्याघ्रादिव भयाघ्रातो गद्याद् व्यावर्तते जनः ॥ १५ ॥ [ पथ्या ]

---

**टिप्पनकम्**—ईदृशं गद्यं न कार्यमिति दर्शयितुमाह–**गद्यात्** छन्दोरहितवचनात्, **व्यावर्तते** निवर्तते, **जनः** लोकः, न स्वीकरोतीत्यर्थः, कीदृशः सन्? **भयाघ्रातः** भीग्रस्तः। कस्मादिव? **व्याघ्रादिव** पुण्डरीकादिव। कीदृशाद् गद्यात्? कीदृशाच्च व्याघ्रात्? **अखण्डदण्डकारण्यभाजः** अखण्डाः–परिपूर्णाः, ये दण्डकाः–बह्वक्षरबहुसमासवचनानि, त एव अरण्यम् अतिगम्भीरार्थत्वात्, तद् भजते यद् गद्यं तत् तथोक्तं तस्मात्, तद्युक्तादित्यर्थः। तथा **प्रचुरवर्णकात्** प्रचुराः–बहुतराः, वर्णकाः–वर्णनानि, यस्मिन् तत् तथोक्तं तस्मात्, बहुवर्णकं हि गद्यमुद्वेजनीयं भवति, तथा अखण्डदण्डकं च। व्याघ्रादपि कीदृशात्? अखण्डं निरन्तरं यद् दण्डकारण्यम्–अतिप्रचुरो मानुषरहितो देशः, तद्भाजः–तत्सेविनः, तथा **प्रचुरवर्णकात्** अनेकवर्णात् ॥ १५ ॥

---

ईक्षणं नयनं यस्य, अधः– अधःस्थितम्, मुखेक्षणम्–मुख-नयनं यस्य वा तादृशः सन्, काव्ये दोषश्चेद् मुखमुच्चैः कृत्वा प्रमोदोत्फुल्लनयनमभितो घूर्णयंस्तद्दोषप्रवणः स्यात्, अस्ति तु तदनभिप्रेतो गुण एवेति तदुपलम्भावनतमुखनयन इत्यर्थः। **कषाश्मनेव** कनकपरीक्षणाधारपाषाणखण्डेनेव, **श्यामेन** केवलगुणोपलम्भमलिनेन मुखेन, **काव्यहेम्नः** काव्यमेव प्रचुरपुण्योपादेयतया हेम–सुवर्णम्, तस्य **गुणान्** माधुर्यादीन्, **वक्ति** दुर्जनत्वेऽपि सज्जनसङ्गाधिवेशनमहात्म्येन वर्णयति, अथवा वचेरत्र ज्ञापनसामान्यपरतया निजावनतमुखमालिन्येन ज्ञापयति, अनुमापयतीत्यर्थः। क इव? **कलाद इव** कलाम्–परकीयसुवर्णस्यांशम्, आदत्ते–गृह्णातीति कलादः स्वर्णकारः, स इव, स यथा **कषाश्मना** कषपाषाणेन, तत्र रेखाङ्कनेन परीक्षणे सतीत्यर्थः, **अधोमुखेक्षणः** गुणकथनक्षणे परीक्षितपूर्वत्वनिरूपणाय स्वकरतले भूतले वा स्थितं कनकमवलोकितुमधःकृतमुखनयनः, **श्यामेन** ध्मानकालोत्थितधूममलिनेन मुखेन, यद्वा 'श्यामेन' इति 'कषाश्मना' इत्यत्र विशेषणतया योजनीयं कषपाषाणस्य कृष्णवर्णत्वात्। **हेम्नः** कनकस्य, **गुणान्** विषापनयनादीन्, **वक्ति** कथयति।

अत्र दुर्जन-स्वर्णकारयोरुपमानोपमेयभावादुपमालङ्कारः ॥ १४ ॥

**परागाभिधा विवृतिः**—अथातिदुरवगाहगद्यकाव्यमवद्यमित्याह—**अखण्डेति**। 'अखण्डदण्डकारण्यभाजः प्रचुरवर्णकाद् गद्याद् व्याघ्रादिव भयाघ्रातो जनो व्यावर्तते' इत्यन्वयः। **अखण्डदण्डकारण्यभाजः** अखण्डाः–समग्राः, ये दण्डकाः–दण्ड इव प्रतिकृतिर्दण्डकः, ते दण्डाकारा अतिदीर्घबहुतरपदघटितसमासबहुला आलापकाः, त एवातिदुरवगाहतयाऽरण्यम्, तद् भजते–तदाकारं धत्त इति तद्भाक् तस्मात्। न केवलं समासबहुलाद्, अपि त्वर्थबहुलादपीत्याह—**प्रचुरवर्णकात्** प्रचुरा वर्णा वर्णनानि यस्मिंस्तस्मात्। **गद्यात्** छन्दोऽनियन्त्रितकाव्यात्। **भयाघ्रातः** तत्पारप्राप्तिप्रतिबन्धभयग्रस्तः सन्, **जनः** लोकः, **व्यावर्तते** निवर्तते, न तु प्रवर्तते। कस्मादिव? **व्याघ्रादिव**। कीदृशाद् व्याघ्रात्? **अखण्डदण्डकारण्यभाजः** अखण्डम्–अवान्तरखण्डरहितम्, निरन्तरमित्यर्थः, यद् दण्डकारण्यम्–अटवीविशेषः, तद्भाजः–तद्वासिनः, **प्रचुरवर्णकात्** प्रचुराः–पीतादिप्रचुरप्रकाराः, वर्णाः–रूपाणि यस्य तस्मात्, चित्रवर्णादित्यर्थः। गद्यकाव्यम् 'मुक्तकम्, वृत्तगन्धि, चूर्णकम्, उत्कलिकाप्रायम्' इति चतुर्विधम्, तत्र सर्वथा समासशून्यं गद्यं मुक्तकम्, अंशतश्छन्दोबद्धं तु तत् वृत्तगन्धि, द्वित्रमात्रपदघटितसमासात्मकं च तच्चूर्णकम्, बहुतरपदघटितदीर्घतरसमासमयं च तद् उत्कलिकाप्रायमुच्यते, उच्चारणवेलायामुच्चावचतरङ्गसदृशत्वात्, तच्चातिदुरवगाहतया लोकोपादेयतामतिवर्तते, तस्माद् वैदर्भीमेव रीतिमनुसृत्य गद्यकाव्यं रचनीयमिति भावः।

अत्र श्लेषमहिम्ना गद्य-व्याघ्रयोरुपमानोपमेयभावात् श्लेषानुप्राणितोपमालङ्कारः ॥ १५ ॥

वर्णयुक्तिं दधानाऽपि स्निग्धाञ्जनमनोहराम् ।
नातिश्लेषघना श्लाघां कृतिर्लिपिरिवाश्नुते ॥ १६ ॥ [ पथ्या ]

अश्रान्तगद्यसन्ताना श्रोतॄणां निर्विदे कथा ।
जहाति पद्यप्रचुरा चम्पूरपि कथारसम् ॥ १७ ॥ [ भविपुला ]

---

**टिप्पनकम्**—ईदृशी च कृतिर्न कार्येति दर्शयति—**नाश्नुते** न प्राप्नोति । काऽसौ ? **कृतिः** काव्यरचना । केव ? **लिपिरिव** लिपिर्यथा । कां च नाश्नुते ? **श्लाघां** प्रशंसाम् । किम्भूता कृतिः ? लिपिश्च ? **अतिश्लेषघना** अति–अतिशयेन, श्लेषेण-द्व्यर्थप्रतिपादकवचनेन, घना–व्याप्ता, निरन्तरेत्यर्थः, लिपिः, **अतिश्लेषघना** इति–वर्णान्योऽन्यश्लेषेण घना–निरन्तरा । कीदृश्यपि द्वयी ? **वर्णयुक्तिं दधानाऽपि** वर्णकयोगं दधाना-बिभ्राणाऽपि, वर्णयुक्ताऽपीत्यर्थः, लिपिश्च वर्णयुक्तिम्–अक्षरयोगं दधानाऽपि, वर्णयुक्ताऽपीत्यर्थः, किम्भूतां वर्णयुक्तिम् ? **स्निग्धाञ्जनमनोहरां** स्निग्धाम्–अरूक्षां माधुर्यादियुक्ताम्, जनमनोहराम्–लोकचित्तरञ्जिकाम्, अन्यत्र स्निग्धं यद् अञ्जनं तेन मनोहराम्–रमणीयामतिकृष्णत्वात् ॥ १६ ॥

**टिप्पनकम्**— ईदृशी कथा न कार्येति दर्शयति–**निर्विदे** या विरागार्था भवति । का ? **कथा**, केषाम् ? **श्रोतॄणां** श्रावकाणाम् । कीदृशी ? **अश्रान्तगद्यसन्ताना** निरन्तरगद्यप्रवाहा । तथा **जहाति** त्यजति । कम् ? **कथारसं** कथाया रसः–शृङ्गारादिः, तम् । काऽसौ ? **चम्पूरपि** गद्यपद्यमयी कथा । कीदृशी ? **पद्यप्रचुरा** निरन्तरपद्या, तस्मादीदृश्यपि न कार्या ॥ १७ ॥

---

**परागाभिधा विवृतिः**—अथ श्लेषबहुलाऽपि रचना न रोचकतामञ्चतीत्याह—**वर्णयुक्तिमि**ति । 'स्निग्धाञ्जनमनोहरां वर्णयुक्तिं दधानाऽपि अतिश्लेषघना कृतिः, लिपिरिव श्लाघां नाश्नुते' इत्यन्वयः । **स्निग्धां** व्यञ्जकासम्बन्धेन सरसाम्, न तु रूक्षाम्, अत एव **जनमनोहरां** सहृदयजनमनोरञ्जिनीम्, **वर्णयुक्तिं** पद-वाक्यात्मना वर्णयोजनाम्, **दधानाऽपि** धारयन्त्यपि, **अतिश्लेषघना** बहुतरश्लेषालङ्कारसङ्कीर्णा, **कृतिः** काव्यरचना, **श्लाघां** पर्यवसितार्थप्रतिपित्सुजनकर्तृकां प्रशंसाम्, **नाश्नुते** न प्राप्नोति । केव ? **लिपिरिव** पत्रादावक्षरविन्यास इव, सा यथा स्निग्धम्–सान्द्रम्, अथवा आर्द्रम्, न तु शुष्कम्, यद् अञ्जनम्–मषी, तेन मनोहराम्–दर्शकमनोविनोदिनीम्, **वर्णयुक्तिम्** अक्षरसन्निवेशं दधानाऽपि, **अतिश्लेषघना** अतिश्लेषेण–अक्षराणामतिसङ्करेण, अविभक्तात्मना सन्निवेशेनेत्यर्थः, घना–व्याप्ता, न श्लाघामश्नुते तथा, यद्वा 'नातिश्लेषघना, इत्यत्र 'न' इति न पृथक् पदमपि तु 'अतिश्लेषघना' पदेन समस्तम्, एवं च अल्पश्लेषा कृतिर्लिपिरिव श्लाघामश्नुत इतीत्थं भावमुखेन व्याख्येयम् ।

अत्रापि श्लेषानुप्राणितोपमालङ्कारः । "घनः सान्द्रे दृढे दार्ढ्ये, विस्तारे मुद्गरेऽम्बुदे । संघे मुस्ते" इत्यनेकार्थसङ्ग्रहः ॥ १६ ॥

**परागाभिधा विवृतिः**—अथ 'गद्याद् व्यावर्तते जनः' इत्यनुपदोक्तमेवार्थं हेतूपन्यासमुखेन कविः पुष्णाति—**अश्रान्तगद्यसन्ताने**ति । 'अश्रान्तगद्यसन्ताना कथा श्रोतॄणां निर्विदे [ कल्पते ], पद्यप्रचुरा चम्पूरपि कथारसं जहाति' इत्यन्वयः । **अश्रान्तगद्यसन्ताना** अश्रान्तः–अविश्रान्तः, गद्यसन्तानः–गद्यधारा यस्यां सा, गौडीं रीतिमनुसृत्य निबद्धेत्यर्थः । **कथा** गद्यकाव्यम्, श्रोतॄणां **निर्विदे** विरागाय कल्पते, विश्रामधामार्थानुसन्धानव्यग्रतया रसास्वादासिद्धेः रसैकलोलुपानां तत्रानुरागायोगात् । एवं **पद्यप्रचुरा** श्लोकबहुला, **चम्पूरपि** चमत्कृत्य पुनाति रसामृतधारया सहृदयजनहृदयमित्यर्थकचम्पूनाम्नी गद्यपद्यमयी कथाऽपि "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इत्यभियुक्तोक्तेः । **कथारसं** कथाभिव्यङ्ग्यं रसं शृङ्गारादिकम् । **जहाति** नाभिव्यनक्ति, पद्यैरर्थप्रतिपत्तेरायाससाध्यतया गद्यांशैरनायाससरसास्वादशीलानां ततस्तदास्वादायोगात् । यद्वा विशिष्टकथा चम्पूरपि अश्रान्तगद्यसन्ताना पद्यप्रचुरा च सती यतः कथारसं जहाति, अतो रसैकलिप्सूनां श्रोतॄणां निर्विदे भवति किमुत ? अन्या सामान्यकथेत्येवं व्याख्येयमिदं पद्यम् ।

आद्यव्याख्यापक्षे समुच्चयालङ्कारः, अन्त्यव्याख्यापक्षेऽर्थापत्त्यलङ्कारोऽत्र बोध्यः ॥ १७ ॥

सत्कथारसवन्ध्येषु निबन्धेषु नियोजिताः ।
नीचेष्विव भवन्त्यर्थाः प्रायो वैरस्यहेतवः ॥ १८ ॥ [ पथ्या ]
नमो जगन्नमस्याय मुनीन्द्रायेन्द्रभूतये ।
यः प्राप्य त्रिपदीं वाचा विश्वं विष्णुरिवानशे ॥ १९ ॥ [ पथ्या ]

---

**टिप्पनकम्**—तथा यत्र कुत्रापि शास्त्रेऽर्था न योजनीया इति दर्शयति—**भवन्ति** जायन्ते । **अर्थाः** अभिधेयाः । कीदृशा भवन्ति ? **वैरस्यहेतवः** विगतशृङ्गारादिरसकारणभूताः । कथम् ? **प्रायः** बाहुल्येन । किम्भूताः सन्तः ? **नियोजिताः** संघटिताः । केषु ? **निबन्धेषु** शास्त्रेषु । कीदृशेषु ? **सत्कथारसवन्ध्येषु** सन्तः–शोभनाः, ये कथारसाः–शृङ्गारादयः, तैः वन्ध्येषु–शून्येषु । केष्विव ? **नीचेष्विव** यथा नीचेषु–हीनेषु, **नियोजिताः** समर्पिताः-**अर्थाः** धनानि, **प्रायो** भवन्ति, कीदृशाः ? **हेतवः**, कस्य ? **वैरस्य** विरोधस्य । किम्भूतेषु नीचेषु ? **सत्कथारसवन्ध्येषु** सताम्–सत्पुरुषाणाम्, कथा–वार्ता, तस्या रसः–आदरः, तेन वन्ध्येषु–रहितेषु नीचत्वादेव ॥ १८ ॥

**टिप्पनकम्**—अथ गौतमगणधरस्य नमस्कारमाह–त्रिपदी पूर्ववद् व्याख्येया ॥ १९ ॥

---

**परागाभिधा विवृतिः**—अथोक्तरूपा कथा स्वरूपतस्तथा भवतु, तदार्थास्तु अविश्रान्तरूपेणाप्यधिगताः श्रोतृणामनुरञ्जनाय कल्पेरन्नित्यत आह–**सत्कथारसवन्ध्येष्विति** । 'नीचेष्विव सत्कथारसवन्ध्येषु निबन्धेषु नियोजिता अर्थाः प्रायो वैरस्यहेतवो भवन्ति' इत्यन्वयः । **सत्कथारसवन्ध्येषु** सन्तः–आस्वादश्लाघ्याः, ये कथारसाः–शृङ्गारादयः, तद्वन्ध्येषु-तदप्रसविषु, तदनभिव्यञ्जकेष्वित्यर्थः । **निबन्धेषु** काव्येषु । **नियोजिताः** निबद्धाः । **अर्थाः** शब्दार्थौ अपि, **प्रायः** बाहुल्येन । **वैरस्यहेतवः** विगतो रसो रागो यस्यासौ विरसः, तस्य भावो वैरस्यम्, अरुचिरित्यर्थः, तस्य हेतवः–प्रयोजकाः, **भवन्ति** जायन्ते, रसपिपासूनां रोचकतामतिक्रामन्ति, अधिगतानामपि तेषामपर्यवसिततया रसानुपयोगित्वात् । अतथाविधानां तु केषाञ्चन श्रोतॄणां कथञ्चन रोचकाः स्युरपीत्यतः **'प्रायः'** इत्युक्तम् । केष्विव ? **नीचेष्विव** पामरेष्विव, यथा **सत्कथारसवन्ध्येषु** सताम्–उत्तमपुरुषाणाम्, या कथा–गुणकीर्तनम्, तत्र रसः–अनुरागः, तेन वन्ध्येषु–शून्येषु पामरेषु, **नियोजिताः** व्यथार्थं निक्षिप्ताः, **अर्थाः** धनानि, तेषां सदसत्प्रदानविवेचनशून्यत्वात् प्रायेण **वैरस्य** सत्स्वामिशात्रवस्य, **हेतवो** भवन्ति, तथा स्वामिनोऽपि पामरत्वे तु न तथेति **"प्रायः'** इति पदमुपयुज्यतेऽत्रापि पक्षे ।

अत्रापि श्लेषानुप्राणितोपमालङ्कारः ।

"नीचः पामर-खर्वयोः" इति, "रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे देहधातौ, तिक्तादौ पामरेऽपि च" ॥ इति चानेकार्थसङ्ग्रहः ॥ १८ ॥

**परागाभिधा विवृतिः**—अथ कविविशेषस्तुतौ प्रस्तुतायामशेषसाम्प्रदायिककविस्वामिनं श्रीगौतमस्वामिनं नमस्यति—**नम** इति । अत्रान्वयः स्पष्टः । **मुनीन्द्राय** मुनीश्वराय । **जगन्नमस्याय** जगद्वन्द्याय । **इन्द्रभूतये** इन्द्रभूतिसंज्ञकाय 'गौतम' इति संज्ञान्तरप्रसिद्धाय, तस्मै **नमः** नमस्कारोऽस्तु, उत्तरार्धगतयच्छब्देनाकाङ्क्षितत्वात् पूर्वार्धे तत्पदाध्याहारः । यः **त्रिपदीम्** 'उत्पद्यते वा विगच्छति वा ध्रुवति वा' इत्येवंरूपं पदत्रयम्, **प्राप्य** श्रीमहावीरस्वामिसकाशादधिगम्य, **वाचा** स्वोपज्ञद्वादशाङ्गीरूपवाण्या, **विश्वं** निखिलं जगत्, **आनशे** व्याप्तवान्, निरूपितवानित्यर्थः, द्वादशाङ्ग्यां निखिलजगन्निरूपणात् । क इव ? **विष्णुरिव** कृष्ण इव, स यथा **वाचा** वराभ्यर्थनावाक्येन, **त्रिपदीं** स्वपादत्रयप्रमितभूमिम्, **प्राप्य** बलिनृपतेः संकाशाल्लब्ध्वा, **विश्वं** मानवा-ऽऽकाश-देवलोकरूपम्, **आनशे** स्वत्वेन व्याप्तवान् आसीत् तथा, यद्वा **विष्णुरिव** विष्णुकुमारमुनिरिव, स यथा **वाचा** स्ववचनेन, **त्रिपदीं** पादत्रयप्रमितभूमिम्, **प्राप्य** निजानुजमहापद्मनृपमन्त्रिनमुचिसकाशादधिगम्य, **विश्वं** लक्षयोजनमितजम्बूद्वीपपूर्वापरपर्यन्तरूपं जगत्, **आनशे** व्याप्तवान्, आसीत् तथा ।

हस्तिनापुरे पुरे पद्मोत्तरो नाम वसुधाधीशः, तस्य ज्वालादेवी महिषी, द्वौ च नन्दनौ, तत्राऽऽद्यः केसरिस्वप्नसूचितो विष्णुकुमारः, अपरश्च चतुर्दशमहास्वप्नसूचितो महापद्मः, महीनाथेन महापद्मो युवराजपदवीं नीतः, तदानीमुज्जयिन्यां श्रीवर्मा नृपतिः, नमुचिश्चास्य सचिवः, अन्येद्युरिह मुनिसुव्रततीर्थङ्करकरदीक्षितान् सुव्रताचार्यानुद्यानमायातानाकर्ण्य सचिवादिपरिवृते

प्रस्तावनादिपुरुषौ रघु-कौरववंशयोः ।
वन्दे वाल्मीकिकानीनौ सूर्याचन्द्रमसाविव ॥ २० ॥ [ नविपुला ]

---

**टिप्पनकम्**—प्रथमकवित्वाल्लोके वाल्मीकि-व्यासयोर्नमस्कारमाह-**वन्दे** स्तुवे, कौ ? **वाल्मीकि-कानीनौ** । किम्भूतौ ? **प्रस्तावनादिपुरुषौ** प्रस्तावनायाम्-वर्णनायाम्, आदिपुरुषौ-प्रथमनरौ । कयोर्वर्णनायाम् ? **रघु-कौरववंशयोः** रघुवंश-कौरववंशवर्णनं ताभ्यामेव प्रथमं कृतमित्यर्थः । काविव वन्दे ? **सूर्या-चन्द्रमसाविव** रवि-चन्द्राविव, तावपि **प्रस्तावनादिपुरुषौ** प्रस्तावनाऽऽरम्भप्रवृत्तिः, तस्यामादिपुरुषौ, कयोः ? **रघु-कौरववंशयोः** रघु-कौरववंशौ ताभ्यां वृत्तावित्यर्थः ॥ २० ॥

---

नृपे वन्दितुं तत्र याते वितण्डां वितन्वानो मिथ्यामतिर्नमुचिर्लघुमुनिना पराजितः, अथ नमुचिनिशाचरो निशि तं हन्तुं तत्रै गतवान्, शासनसूर्या स्तम्भितः प्रातर्जनैस्तथा दृष्टे लज्जयाऽपि पराजितः पलाय्य हस्तिनापुरे महापद्मयुवराजसाचिव्यमाचचार, दुर्दमारिमर्दनप्रसादितमहापद्माद् वरमासाद्य न्यासीचकार च । अथैकदा त एवाचार्या हस्तिनापुरमायाताः, तदभ्यर्णे पद्मोत्तरनृप-विष्णुकुमारौ प्रव्रज्यां प्रतिपन्नौ गुरुणा सह विहृतौ च, तत्राद्यो ययौ शिवम्, अपरोऽनल्पलब्धीनामब्धिरजनि, महापद्मश्च चक्री राज्यधुरां दधार । दैवयोगादेकदा त एव सुव्रताचार्या ग्रामानुग्रामं विहरमाणा हस्तिनापुरं चतुर्मासीकृते समायाताः, विष्णुकुमार-मुनिश्च मेरुं गतः, अवसरमासाद्य सचिवाधमेन नमुचिना महापद्मनृपसकाशाद् वरं याचितम्, यदुत–मया महायज्ञो विधेयोऽस्ति, तत्समाप्तिं यावदशेषो राजाधिकारो मह्यं वितरणीय इति, चक्रिणा प्रतिपन्नम्, तदनु कैतवमाकलय्याचार्या देशत्यागमादिष्टाः, नितरामनुनीतेनापि नमुचिना नामुञ्चि नीचादेशवृत्तिः, आचार्यैर्मुनिद्वारा मेरोराहूतेन विष्णुकुमारमुनिना नम्रगिरा बोधितोऽपि नामुञ्चन्नमुचिराग्रहम् प्रान्ते नृपाग्रजत्वमुपवर्ण्य कैतवान्निवासाय पादत्रयमितभूमिदानमुक्तवांश्च, विष्णुकुमारमुनिस्तु लक्ष-योजनमितदेहं विकुर्व्य नमुचिं मह्यां निपात्य पादमेकं पूर्वस्मिन् पादमेकमपरस्मिन् जम्बूद्वीपस्य पर्यन्ते न्यस्य विश्वं भये निचिक्षेप, तदनु तदनुकम्पया देहं संचुकोच च, चक्रिणा सचिवाधमो निर्वासितः, मुनीन्द्रश्च कर्माणि क्षपयित्वा मुक्तिमन्दिरं विवेश, लोकैश्च विष्णुकुमारमुनिवरस्य 'त्रिविक्रम' इति नामान्तरं निर्मितमिति संक्षिप्तमितिवृत्तम् ॥ १९ ॥

**परागाभिधा विवृतिः**—अथ स्वसम्प्रदायबाह्यावपि वाल्मीकि-व्यासौ लोके प्रथमकवित्वादभिष्टौति—**प्रस्तावे**ति । अत्राप्यन्वयः सुगमः । **रघु-कौरववंशयोः** रघुः–सूर्यवंश्यो दिलीपजन्मा नृपतिविशेषः, कौरवः– कुरुनाम्नश्चन्द्रवंश्यस्य नृपतेरपत्यं धृतराष्ट्रादिः, तद्वंशयोः–तत्पित्रपत्यादिपरम्परयोः, **प्रस्तावनादिपुरुषौ** प्रस्तावनायाम्–रामायण–महाभारताभ्यां वर्णनायाम्, आदिपुरुषौ– आदिकवी । **वाल्मीकि-कानीनौ** वाल्मीको नाम कीटपटलसंघटितो मृत्तिकाराशिः, तस्य मुनिरूपेणापत्यं वाल्मीकिः, रामायणप्रणेता महार्षिरित्यर्थः, कानीनः–कन्याया अपरिणीताया अपत्यं कानीनः, महाभारतप्रणेता व्यास इत्यर्थः, तौ **वन्दे** स्तौमि । काविव ? तद्वंशयोः प्रस्तावनादिपुरुषौ **सूर्या-चन्द्रमसाविव** तयोरपि तद्वंशयोः प्रस्तावना–प्रारम्भस्तत्रादिपुरुषत्वात्, सूर्यतो रघुवंशस्य चन्द्रतः कुरुवंशस्य च प्रारम्भात् । 'सूर्या' इत्यत्र "वेदसह०" [ ३. २. ७९. ] इति दीर्घत्वम् ।

ब्राह्मणवंश्योऽपि वाल्मीकिर्वने निलीय लुण्टाकवृत्त्या जीवन्नासीत्, स कदाचन गच्छतः सप्तर्षीन् प्रत्यपि स्ववृत्तिमुपदर्शयन्नमीभिरतिभर्त्सनमुखेन तेन पथा स्वप्रत्यागमनपर्यन्तमेकाग्रमनसैकेनैवासनेन रामेति मन्त्रं जपितुमादिष्टो यथाक्रमं जपितुमशक्नुवन् मरेति व्युत्क्रमेण जपितुमारेभे, ततः कतिपयकालोत्तरं कीटनिचयसंचितमृत्कणैस्तदुपरि कुशकण्टकोपचितो वल्मीको बभूव । अथ तपसि समाप्यमाने कुतश्चित् प्रत्यागतैः सप्तर्षिभिर्वल्मीकमपास्योद्धृतोऽसौ वाल्मीकिनाम्ना प्रसिद्धः, सिद्धश्चादिकविरभूदिति पौराणिकं वृत्तम् ।

कुतश्चिदागच्छन् भगवान् पराशरः कामपि नदीं तारयितुमाशयेन धीवरेण कार्यान्तरव्यापृतेन तत्र नियुक्तां कन्यकां तारुण्यपूर्णामवेक्ष्योदीर्णमदनो मत्स्यगन्धामपि मञ्जुलगन्धां कुरूपामपि सुरूपां सम्पाद्य तदानीं दिनमपि नीहारधारासम्पातैः रजनिप्रायं विधाय चोपबुभुजे, ततश्च भगवान् व्यासो बभूवेति पौराणिकी वार्ता ।

अत्र श्लेषानुप्राणितोपमालङ्कारः । "कानीनः कन्यकासुते कर्णे व्यासे" इत्यनेकार्थसङ्ग्रहः ॥ २० ॥

सत्यं बृहत्कथाम्भोधेर्बिन्दुमादाय संस्कृताः ।
तेनेतरकथाः कन्थाः प्रतिभान्ति तदग्रतः ॥ २१ ॥ [ पथ्या ]

जितं प्रवरसेनेन रामेणेव महात्मना ।
तरत्युपरि यत्कीर्तिः सेतुर्वाङ्मयवारिधेः ॥ २२ ॥ [ पथ्या ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ २१ ॥

**टिप्पनकम्**—**जितं** जयः प्राप्तः कविमध्ये । केन ? **प्रवरसेनेन** कविना । कीदृशेन ? **महात्मना** बृहत्तरेण । **यत्कीर्तिः** यस्य यशः । कोऽसौ ? **सेतुः** सेतुबन्धशास्त्रं कीर्तिहेतुत्वात् कीर्तिः । किम् ? **तरति** प्लवते । क्व ? **उपरि** उपरिष्टात् । कस्य ? **वाङ्मयवारिधेः** निःशेषशास्त्रवृन्दमहोदधेः, सकलशास्त्राणामुपरि वर्तत इत्यर्थः । केनेव ? **रामेणेव** यथा रामेण–दशरथात्मजेन जयः प्राप्तो लोकमध्ये । तेनापि कथम्भूतेन ? **प्रवरसेनेन**, तथा **महात्मना** पूज्येन विष्णोरवतारात् । यत्कीर्तिः **सेतुबन्धः** गिरिकृतः, **तरति** प्लवते, न निमज्जते । क्व तरति ? **उपरि**, कस्य ? **वारिधेः** लवणसमुद्रस्य ॥ २२ ॥

---

**परागाभिधा विवृतिः**—अथ गुणाढ्यकविग्रथितां बृहत्कथां प्रशंसति—**सत्यमि**ति । 'इतरकथा बृहत्कथाम्भोधेर्बिन्दुमादाय सत्यं संस्कृताः, तेन तदग्रत इतरकथाः कन्थाः प्रतिभान्ति' इत्यन्वयः । **इतरकथाः** इतरकविनिबद्धाः कथाः । **बृहत्कथाम्भोधेः** बृहत्कथा नाम पैशाचवाचोक्तकविनिबद्धोऽतिविस्तृतकथाविशेषः, सैवानेककथानकरूपरत्नाकरत्वात् बृहत्त्वाच्चाम्भोधिः समुद्रस्तस्मात् । **बिन्दुं** कथालेशम् । **आदाय** उद्धृत्य । **सत्यम्** अवश्यमेव । **संस्कृताः** संस्कारमापाद्य संस्कृतप्राकृतगद्यपद्यात्मना प्रणीताः । **तेन** तस्माद्धेतोः । **तदग्रतः** तस्याः– बृहत्कथायाः, अग्रतः–पुरस्तात् । इतरकथाः **कन्थाः** जीर्णविविधवसनखण्डमयाः प्रावरणविशेषाः । **प्रतिभान्ति** अन्यदीयखण्डात्मकत्वेन तत्सादृश्यात् तदभेदेन प्रतीयन्ते ।

अत्र रूपकालङ्कारः । "कन्था पुरे प्रावरणे" इत्यनेकार्थसङ्ग्रहः ॥ २१ ॥

**परागाभिधा विवृतिः**—अथ श्रीप्रवरसेनकविं श्रीरामचन्द्रोपमाचमत्कारेणोपवर्णयति–**जितमि**ति । 'रामेणेव महात्मना [ तेन ] प्रवरसेनेन जितम्, यत्कीर्तिः सेतुर्वाङ्मयवारिधेरुपरि तरति' इत्यन्वयः । अत्रोत्तरार्द्धोपात्तयच्छब्दानुरोधेन पूर्वार्धे 'तेन' इत्यध्याहृत्य योजनीयम् । **महात्मना** कविताकौशलशालिना । तेन **प्रवरसेनेन** प्रवरसेननाम्ना सेतुबन्धाख्यकथाकृता कविना । **जितम्** अतिक्रमनीयकाव्यरचनया कविजगति महोत्कर्षः प्रापि । कुतः ? **यत्कीर्तिः** यत्प्रणीता कीर्तिः–कीर्तिहेतुत्वेनोपचारात् कीर्तिरूपः, **सेतुः** नामैकदेशे नामोपचारात् सेतुबन्धनाम्नी कथा । **वाङ्मयवारिधेः** वाचो विकारा वाङ्मयानि शास्त्राणि, तान्येव विविधार्थरत्नाकरत्वाद् वारिधिः–जलधिः, तस्य **उपरि** उत्कृष्टकोटौ, **तरति** प्लवते, प्रसिद्ध्यतीत्यर्थः । केव ? **रामेणेव** यथा महात्मना, **प्रवरसेनेन** प्रवरा–पराक्रमवती, सेना–हनूमत्प्रमुखा यस्य तेन रामेण—दशरथात्मजेन श्रीरामचन्द्रेण, **जितं** योद्धृजनेषूत्कर्षः प्राप्तः, यद्वा **जितं** रावणादिबलमभिभूतम् । कथम् ? **यत्कीर्तिः** यदीयकीर्तिहेतुः, **सेतुः** लङ्कागमनाय तन्मार्गस्थसागरोपरि कपिप्रणीतः सेतुबन्धः, **वारिधेः** समुद्रस्य **उपरि** ऊर्ध्वभागे, **तरति** प्लवते, बौद्धात्मनाऽद्यत्वेऽपि विद्यमानत्वाद् वर्तमाननिर्देशः ।

अत्रापि श्लेषानुप्राणितोपमालङ्कारः ॥ २२ ॥

प्रसन्नगम्भीरपथा रथाङ्गमिथुनाश्रया ।
पुण्या पुनाति गङ्गेव गां तरङ्गवती कथा ॥ २३ ॥ [ भविपुला ]

प्राकृतेषु प्रबन्धेषु रसनिष्यन्दिभिः पदैः ।
राजन्ते जीवदेवस्य वाचः पल्लविता इव ॥ २४ ॥ [ पथ्या ]

म्लायन्ति सकलाः कालिदासेनासन्नवर्तिना ।
गिरः कवीनां दीपेन मालतीकलिका इव ॥ २५ ॥ [ मविपुला ]

---

**टिप्पनकम्—पुनाति** पवित्रयति । का ? **कथा** । किमभिधाना ? **तरङ्गवती** । काम् ? **गां पृथिवीम्** । **केव ? गङ्गेव** सुरनदीव । किम्भूता तरङ्गवती गङ्गा च ? **प्रसन्नगम्भीरपथा** प्रसादवद्गम्भीरार्थवचनमार्गा, निर्मलालब्ध-मध्यप्रवाहा, तथा **रथाङ्गमिथुनाश्रया** चक्रवाकयुगलाश्रिता, चक्रवाकयुगलं हि तत्र वर्ण्यते, गङ्गा च चक्रवाक-युगलानामाधारभूता, तत्र तानि सुखमाहारादिकं लभन्त इति, तथा **पुण्या** पवित्रा, पुण्यकारणं च, गङ्गा कीदृशी ? **तरङ्गवती** कल्लोलयुक्ता ॥ २३ ॥

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ २४ ॥

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ २५ ॥

---

**परागाभिधा विवृतिः**—अथ श्रीपादलिप्तसूरिविरचितां तरङ्गवतीनाम्नीं कथामरतरङ्गिणीश्लिष्यमाणविशेषणैर्वर्णयति—**प्रसन्नगम्भीरपथे**ति । 'गङ्गेव प्रसन्नगम्भीरपथा रथाङ्गमिथुनाश्रया पुण्या तरङ्गवती कथा गां पुनाति' इत्यन्वयः । **प्रसन्न-गम्भीरपथा** प्रसन्नः–श्रवणमात्रेणार्थप्रत्यायकत्वरूपप्रसादगुणान्वितः, गम्भीरः–अर्थगाम्भीर्यान्वितश्च, पन्थाः–पदविन्यास-सरणिर्यस्यामसौ । **रथाङ्गमिथुनाश्रया** रथाङ्गौ–चक्रवाकाख्यपक्षिप्रभेददम्पती, तयोर्मिथुनम्–द्वन्द्वम्, तदेव आश्रयः–वर्णन-मुख्यविषयताश्रयो यस्या असौ । **पुण्या** पवित्रा, विशुद्धेत्यर्थः । **तरङ्गवती** तन्नाम्नी, **कथा** गद्यकाव्यभेदः । **गां** तत्काव्यमनु-शीलयतां वाचम् । **पुनाति** विशदव्युत्पत्तिद्वारा विशोधयति । केव ? **गङ्गेव ?** 'गङ्गा' इत्याख्यया विख्याता स्वर्णदीव, सा यथा **प्रसन्न-गम्भीरपथा** प्रसन्नाः–निर्मलाः, गम्भीराः–निम्नाः, अशक्यतलस्पर्शा इत्यर्थः, पन्थानः–स्वर्गलोक-मर्त्यलोक-पाताल-लोकात्मानः प्रवाहमार्गा यस्या असौ, **रथाङ्गमिथुनाश्रया** रथाङ्गमिथुनम्–चक्रवाकयुगलम्, आश्रयः–तत्तीरविहारपुरस्सर-सदङ्कुरितबिसलताकवलनप्रीत्याश्रयो यस्यामसौ, **पुण्या** पुण्यजननी, **तरङ्गवती** प्रवाहवती, **गां** स्वर्गं पृथिवीं च, **पुनाति** पवित्रयति, तथा ।

अत्रापि श्लेषानुप्राणितोपमालङ्कारः । "रथाङ्गं न द्वयोश्चक्रे ना चक्राङ्गविहङ्गमे" इति च मेदिनी ॥ २३ ॥

**परागाभिधा विवृतिः**—अथ जीवदेवकविप्रणीतप्राकृतप्रबन्धप्रविष्टा वाचः प्रशंसति—**प्राकृतेष्वि**ति । 'प्राकृतेषु प्रबन्धेषु रसनिष्यन्दिभिः पदैर्जीवदेवस्य वाचः पल्लविता इव राजन्ते' इत्यन्वयः । **प्राकृतेषु** प्राकृतभाषया विरचितेषु । **प्रब-न्धेषु** ग्रन्थेषु । **जीवदेवस्य वाचः** जीवदेवसूरिनिवेशिता वाचः । **रसनिष्यन्दिभिः** सुगमार्थकतया संस्कृतानभिज्ञहृद-येऽपि शृङ्गारादिरसवर्षिभिः । **पदैः** विभक्त्यन्तशब्दैः । **पल्लविता इव** निरुक्तपदरूपनूतनदलसमुल्लसिता इव । **राजन्ते** शोभन्त इत्युत्प्रेक्षा । अत्र पदानां पल्लवरूपेण वाच्योत्प्रेक्षा, पल्लवस्य स्तबकाविनाभावित्वात् स्तबकरूपेण वाच्योत्प्रेक्षा, स्तबकस्य च शाखोपशाखाऽव्यभिचारित्वात् प्रत्येकप्राकृतप्रबन्धानां तदीयप्रकाराणां च शाखोपशाखारूपेणोत्प्रेक्षा, शाखोपशाखानां च पाद-पाविनाभावितया प्राकृतप्रबन्धमालायाः पादपरूपेणोत्प्रेक्षा च प्रतीयत इत्यूहनीयम् । अत्रोत्प्रेक्षालङ्कारः ॥ २४ ॥

**परागाभिधा विवृतिः**—अथ कविकलापोद्भासुरकलाशालिनं कालिदासकविमुपश्लोकयति—**म्लायन्तीति** । 'आसन्न-वर्तिना दीपेन मालतीकलिका इव [आसन्नवर्तिना] कालिदासेन कवीनां सकला गिरो म्लायन्ति' इत्यन्वयः । अन्यदा विकसन्तु नाम, किन्तु **आसन्नवर्तिना** निकटवर्तिना, स्मृतिपथमवतरतेत्यर्थः, **कालिदासेन** तन्नाम्ना कविवरेण, **कवीनां** तदन्य-निखिलकवीनाम्, न तु कस्यचिदेव कवेः, **सकलाः** निखिलाः, न तु काश्चिदेव, यद्वा **सकलाः** काव्यकलाविशिष्टा अपि,

केवलोऽपि स्फुरन् बाणः करोति विमदान् कवीन् ।
किं पुनः क्लृप्तसन्धानपुलिन्दकृतसन्निधिः ॥ २६ ॥ [ पथ्या ]

---

**टिप्पनकम्—करोति** विदधाति। कः? **बाणः** बाणनामा कविः। कान्? **कवीन्** काव्यकर्तृन्। किम्भूतान्? **विमदान्** विगतदर्पान्। किं कुर्वन्? **स्फुरन्** द्योतमानः। किम्भूतः? **केवलोऽपि** असहायोऽपि, एकाक्यपीत्यर्थः। **किं पुनः** किमुच्यते पुनः? विशेषेण विमदान् करोति। किम्भूतः? **क्लृप्तसन्धानपुलिन्दकृतसन्निधिः** क्लृप्तसन्धानः-कृतकादम्बरीसमाप्तिः, यः पुलिन्दः-पुलिन्दाख्यः सुतः, तेन कृतं सन्निधानं यस्य स तथोक्तः, स्वपुत्रकवियुक्त इत्यर्थः। अन्यत्र **केवलोऽपि** नरादिरहितोऽपि, **बाणः** शरः, करोति, **कवीन्** कम्-जलम्, तत्र वयः-पक्षिणो हंसादयः, तान् पक्षिणः, किम्भूतान्? **विमदान्** हर्षरहितान्, विषादवत इत्यर्थः, किं कुर्वन्? **स्फुरन्** देदीप्यमानः, किं पुनर्न करोति? कथम्भूतः? **क्लृप्तसन्धानपुलिन्दकृतसन्निधिः** क्लृप्तं-कृतं सन्धानं-धनुष्यारोपणं येन स तथोक्तः, स चासौ पुलिन्दश्च शबरश्च तेन कृतः सन्निधिः-सन्निधानं यस्य स तथोक्तः, आरोपितचापनाहलविहितसामीप्यः ॥ २६ ॥

---

**गिरः** वाचः, **म्लायन्ति** म्लानिमाप्नुवन्ति, लोके मन्दतरा भवन्तीत्यर्थः। केन का इव? **आसन्नवर्तिना** समीपवर्तिना, **दीपेन मालतीकलिका इव** मालत्याः-तन्नाम्नः कुसुमविशेषस्य, कलिकाः-कोरकाः, ता इव। विक्रमादित्यसदसि नवरत्नान्यतमतया प्रसिद्धकालिदासादन्य एव भोजराजकालिकः कालिदास इतिहासस्वारस्येन सिद्ध्यति, एकस्यैव तदुभयकालिकत्वासम्भवात्, तथा च तिलकमञ्जरीप्रणेतुर्धनपालकवेरपि भोजराजकालिकतया 'आसन्नवर्तिना' इति पदं 'भोजराजसदसि मया सहोपवेशिना, इत्यर्थकमूहनीयमिति केचित्, अपरे तु बाणकवेः प्राग्वर्णनाद् विक्रमकालिक एवायं कालिदास इति वदन्ति।

अत्रोपमालङ्कारः। "कलिका कोरकः पुमान्" इत्यमरः ॥ २५ ॥

**परागाभिधा विवृतिः—**अथ ससुतं कमनीयकवनकलायुतं श्रीबाणकविमुपवर्णयति—**केवलोऽपीति**। 'बाणः केवलोऽपि स्फुरन् कवीन् विमदान् करोति, क्लृप्तसन्धानपुलिन्दकृतसन्निधिः पुनः [ विमदान् करोति ] किम् [ वक्तव्यम्? ]' इत्यन्वयः। **बाणः** तन्नामा कादम्बरीप्रमुखोत्तमकाव्यप्रणेता कविः। **केवलोऽपि** एकाक्यपि, अनन्यसाहाय्योऽपीत्यर्थः। **स्फुरन्** किञ्चिच्चेष्टमानः। **कवीन्** स्वेतरकवीन्। **विमदान्** कवित्वाभिमानशून्यान्। **करोति** सम्पादयति। तर्हि **क्लृप्तसन्धानपुलिन्दकृतसन्निधिः** क्लृप्तम्-विहितम्, सन्धानम्-स्वपितृचरणप्रणीतकादम्बरीग्रन्थस्य पूर्वार्धमात्रस्य स्वप्रणीतेन तत्परिशिष्टोत्तरार्धेन संयोजनम्, येन तेन पुलिन्देन-तन्नाम्ना स्वतनयेन, कृतसन्निधिः-कृतसाहाय्यः सन्, **पुनः** अतिशयेन तथा करोतीति किं वक्तव्यम्-न वक्तव्यम्, अर्थापत्त्यैव तद्बोधसिद्धेः, यद्वा किमो वितर्कार्थकतया 'तत्कृतसाहाय्यस्तु विशेषेण तथा करोति' इति वितर्क इत्यर्थः। श्लिष्टपदैरनुरणितोऽर्थस्तु **बाणः**-शरः, **केवलोऽपि** धनुष्यारोपितोऽपि, **कवीन्** कस्य-जलस्य, वीन्-पक्षिणो हंसादीन्, **विमदान्** स्वावलोकनमात्रोपचितभयभग्नहर्षान्, करोति, तर्हि **क्लृप्तसन्धानपुलिन्दकृतसन्निधिः** क्लृप्तम्-कृतम्, सन्धानम्-समाकृष्य धनुर्ज्यायामारोपणम्, येन तेन पुलिन्देन-म्लेच्छजातीयेन, कृतः सन्निधिः-स्वहस्ते सम्यग् निधानं-धारणं यस्य सः, धनुष्यारोप्य विक्षेप्तुं भिल्लहस्तावलम्बितस्त्वित्यर्थः, **पुनः** विशेषेण तथा करोतीति न वक्तव्यमर्थापत्त्यैव तद्बोधसिद्धेरित्येवं रूपः।

अत्र श्लेषालङ्कारः। "के शीर्षेऽप्सु सुखे" इति, "मदो रेतस्यहङ्कारे मद्ये हर्षेभदानयोः" इति चानेकार्थसङ्ग्रहः; "नगौको-वाजि-विकिर-वि-विष्किर-पतत्त्रयः" इति, "किरात-शबर-पुलिन्दा म्लेच्छजातयः" इति चामरः, "पुनरप्रथमे मतम्। अधिकारे च भेदे च तथा पक्षान्तरेऽपि च" इति, 'किं कुत्सायां वितर्के च निषेध-प्रश्नयोरपि" इति च मेदिनी ॥ २६ ॥

कादम्बरीसहोदर्या सुधया वैबुधे हृदि ।
हर्षाख्यायिकया ख्यातिं बाणोऽब्धिरिव लब्धवान् ॥ २७ ॥ [ पथ्या ]

माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।
स्मरन्ति भारवेरेव कवयः कपयो यथा ॥ २८ ॥ [ पथ्या ]

---

**टिप्पनकम्**—पुनरपि बाणकविं वर्णयितुमाह—**लब्धवान्** प्राप्तवान् । कः ? **बाणः** । काम् ? **ख्यातिं** प्रसिद्धिम् । कया ? **हर्षाख्यायिकया** उच्छ्वासनिबद्धा कथैवाख्यायिका, हर्षस्य राज्ञ आख्यायिका, तया, **सुधया** अमृतेनेवाऽऽह्लादकत्वात् । क ? **हृदि** मनसि । किम्भूते ? **वैबुधे** विशिष्टा बुधाः–पण्डिता विबुधाः, तेषामिदं वैबुधं तत्र । किम्भूतया ? **कादम्बरीसहोदर्या** कादम्बरीकथाभगिन्या, एकजनकत्वात् । क इव कया ? **अब्धिरिव** समुद्र इव, **सुधया** अमृतेन । किम्भूतया ? **हर्षाख्यायिकया** हृष्टिकथिकया । क ? हृदि । किम्भूते ? **वैबुधे** देवसत्के । तयाऽपि किम्भूतया ? **कादम्बरीसहोदर्या** सुराभगिन्या, द्वयोः समुद्रे उत्पन्नत्वात् ॥ २७ ॥

**टिप्पनकम्**—**नोत्सहन्ते** नोद्यमं कुर्वन्ति । क ? **पदक्रमे** सुबन्ततिङन्तपदन्यासे, काव्यकरणे इत्यर्थः । **कवयः** कवितारः । कीदृशाः सन्तः ? **विघ्नितोत्साहाः** भग्नोद्यमाः । केन ? **माघेन** काव्येन, कविनाऽतिगम्भीरार्थपदरचितमहाकाव्यत्वात् । तर्हि किं कुर्वन्ति ? **स्मरन्ति** ध्यायन्ति । कस्य ? **भारवेरेव**, माघतुल्य इत्यर्थः । क इव नोत्सहन्ते स्मरन्ति च ? **कपयो यथा** । वानरा नोत्सहन्ते क ? **पदक्रमे** पदन्यासे । किम्भूताः सन्तः ? **विघ्नितोत्साहाः** भग्नोद्यमाः, केन ? **माघेन** माघमासेन, अतिशीतेन । केवलं **स्मरन्ति** ध्यायन्ति । काः ? **भाः** रश्मीन् । कस्य ? **रवेः** आदित्यस्य, कदा रवेः रश्मयः प्रकटीभविष्यन्तीति ॥ २८ ॥

---

**परागाभिधा विवृतिः**—तावतैवासन्तुष्य भूयोऽपि तमेव कविमभिष्टौति—**कादम्बरीसहोदर्ये**ति । 'बाणः कादम्बरीसहोदर्या सुधया हर्षाख्यायिकया वैबुधे हृदि अब्धिरिव ख्यातिं लब्धवान्' इत्यन्वयः । **बाणः** अनुपदवर्णितः कविवरेण्यः । **कादम्बरीसहोदर्या** कादम्बर्याः–तन्नाम्न्याः स्वप्रणीतकथायाः, सहोदर्या–भगिन्या, कादम्बरी-हर्षाख्यायिकयोः कथयोर्बाणकविरूपैकजनकजातत्वेन स्त्रीत्वेन च परस्परभगिनीत्वोपचारात् । **सुधया** अमृतवदास्वाद्यरसया । **हर्षाख्यायिकया** हर्षस्य–हर्षनाम्नो नृपतेः, आख्यायिकया–उपलब्धार्थया कथया । **वैबुधे** विशिष्टबुधसम्बन्धिनि, सहृदयसम्बन्धिनीत्यर्थः । **हृदि** हृदये । **ख्यातिम्** अमन्दरसस्यन्दकत्वेन प्रसिद्धिम् । **लब्धवान्** प्राप्तवान् । क इव ? **अब्धिरिव** आपो जलानि धीयन्ते यस्मिन्नसावब्धिः समुद्रः, स इव, स यथा **कादम्बरीसहोदर्या** कुत्सितमम्बरं नीलवर्णत्वादिति कदम्बरम्, तदस्यास्तीति कदम्बरो बलरामः, तस्येयं कादम्बरी मदिरा, तस्याः सहोदर्या–भगिन्या, सुधा-मदिरयोः समुद्ररूपैकजनकजातत्वेन मिथो भगिनीत्वात्, **हर्षाख्यायिकया** सुखाभिव्यञ्जिकया, आस्वादसमय एव सुखोदयात् । **सुधया** उन्मथ्य समुद्रादुद्धृतेनाऽमृतेन । **वैबुधे** देवसम्बन्धिनि, **हृदि** हृदये, **ख्यातिं** सुधारसास्वादसुखप्रयोजकत्वेन प्रसिद्धिम्, लब्धवान् तथा ।

अत्र श्लेषानुप्राणितोपमालङ्कारः । "सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा । गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्रुता" ॥ इति, "पीयूषममृतं सुधा" इति, "समुद्रोऽब्धिरकूपारः" इति चामरः ॥ २७ ॥

**परागाभिधा विवृतिः**—माघकविना समं भारविकविं कपिश्लिष्टविशेषणसाम्यविच्छित्त्या स्तौति—**माघेने**ति । 'यथा कपयः [ तथा ] माघेन विघ्नितोत्साहाः कवयः पदक्रमे नोत्सहन्ते, [ किन्तु ] भारवेरेव स्मरन्ति' इत्यन्वयः । **माघेन** माघनाम्ना प्रसिद्धिमासादितवता शिशुपालवधं प्रणीतवता कविवरेण । **विघ्नितोत्साहाः** तदीयकाव्याद् उत्तमस्य तत्समस्य वा स्वकीयकाव्यस्याऽसम्भावनया भग्नकाव्यप्रणयनाध्यवसायाः । **कवयः** काव्यकाराः । **पदक्रमे** पदानाम्–विभक्त्यन्तशब्दानाम्, क्रमे–पौर्वापर्येणानुक्रमणे, काव्यरचनायामित्यर्थः । **नोत्सहन्ते** न प्रवर्तन्ते, प्रत्युतापकीर्तिभिया कौतुकेन किञ्चिद् विरच्यापि ततो निवर्तन्ते । किन्तु **भारवेरेव** भारविनामानं कविमेव । **स्मरन्ति** शिशुपालवधतुल्यमदसीयकिरातार्जुनीयमहाकाव्यमवलोक्य माघकवितुल्यत्वेन ध्यायन्ति, कर्मणः शेषत्वविवक्षयाऽत्र षष्ठी बोध्या । क इव ? **कपयो यथा** वानरा इव, ते यथा **माघेन** माघमासेन, कार्यकारणयोस्तादात्म्यात् तज्जन्यशीतेनेत्यर्थः, **विघ्नितोत्साहाः** निरस्तसंचारोद्यमाः, **पदक्रमे** पादक्षेपे, क्वचि-

निरोद्धुं पार्यते केन समरादित्यजन्मनः ।
प्रशमस्य वशीभूतं समरादित्यजन्मनः ॥ २९ ॥ [ पथ्या ]
स्पष्टभावरसा चित्रैः पदन्यासैः प्रनर्तिता ।
नाटकेषु नटस्त्रीव भारती भवभूतिना ॥ ३० ॥ [ पथ्या ]

---

**टिप्पनकम्**—निरोद्धुं केन **पार्यते**? शक्यते, न केनापीत्यर्थः। किं तत्? **मनः** चित्तम्। किं कुर्वन्? **त्यजत्** मुञ्चत्। किं तत्? **समरादि** सङ्ग्राम-मृगया-द्यूत-परस्त्रीगमनप्रभृति दुष्टवस्तु। कथम्भूतम्? **वशीभूतम्** आयत्तम्। कस्य? **प्रशमस्य** उपशमस्य, क्षान्तेरित्यर्थः। किम्भूतस्य प्रशमस्य? **समरादित्यजन्मनः** समरादित्याद्–हरिभद्रसूरिकृतचरमकथायाः सकाशात्, जन्म–उत्पत्तिर्यस्य स तथोक्तस्तस्य ॥ २९ ॥

**टिप्पनकम्**—**प्रनर्तिता** प्रकर्षेण नर्तनं कारिता, विस्फारितेत्यर्थः। का? **भारती** वाणी। केन? **भवभूतिना** कविना। केषु? **नाटकेषु** वीरचरित्रोत्तररामचरित्रादिषु। कथम्भूता? **स्पष्टभावरसा** व्यक्तशोकादिभावशृङ्गारादिरसा। कैः प्रनर्तिता? **पदन्यासैः** सुबन्ततिङन्तपदरचनाभिः। किम्भूतैः? **चित्रैः** नानारूपैः समासादिभेदेन। केव? **नटस्त्रीव** भरतभार्येव, यथा नटी नटेन प्रनर्त्यते। कैः? **पदन्यासैः** पादनिक्षेपैः। कीदृशैः? **चित्रैः** जनाश्चर्यकारिभिः, अनेकप्रकारैर्वा। कीदृशी? **स्पष्टभावरसा** स्पष्टभावाः–व्यक्तस्वरूपाः, रसाः–शृङ्गारादयो यस्याः सा तथोक्ता, भावरसा च अभिप्रायाग्रहो नर्तने यस्याः सा तथोक्ता, यद्वा पूर्ववद् व्याख्या ॥ ३० ॥

---

दपि संचार इत्यर्थः, नोत्सहन्ते, प्रत्युत शीतसङ्कुचिताङ्गा निलीय क्वचिदवतिष्ठन्ते, किन्तु **रवेः** सूर्यस्य, **भाः** प्रभाः, आतपानित्यर्थः, **स्मरन्ति** ध्यायन्ति, शीतापनयनाय प्रतीक्षन्त इत्यर्थः।

अत्रापि श्लेषानुप्राणितोपमालङ्कारः॥ "उत्साहोऽध्यवसायः स्यात्" इत्यमरः, "उत्साहस्तूद्यमे सूत्रे" इति शब्दार्णवः ॥२८॥

**परागाभिधा विवृतिः**—अथ समरादित्यसंज्ञकप्रशमरसनिधानकथानकप्रशंसामुखेन तत्प्रणेतारं सूरिनेतारं श्रीहरिभद्रसूरिमुपश्लोकयति–**निरोद्धुमिति**। 'समरादित्यजन्मनः प्रशमस्य वशीभूतम्, [ अत एव ] समरादि त्यजत्, मनः, निरोद्धुं केन पार्यते'?, इत्यन्वयः। **समरादित्यजन्मनः** समरादित्यात्–तन्नाम्नः कथानकात्, जन्म–अभिव्यक्तिर्यस्य तस्य, **प्रशमस्य** प्रपञ्चोपरमस्य, **वशीभूतं** वशं गतम्, तत्कथानकश्रवणसमनन्तरोन्मीलदुपशमरसास्वादानन्दलहरीनिमग्नमिति समुदितार्थः। अत एव **समरादि** सङ्ग्रामादिकम्, अत्रत्यमादिपदं मृगया-द्यूतादिसङ्ग्राहकम्, **त्यजत्** विजिगीषादिविरहाद् वर्जयत्, **मनः** निरुक्तकथानकश्रोतॄणां हृदयम्। **निरोद्धुं** निरुक्तरसास्वादाद् व्यावर्तयितुम्। **केन** बलीयसाऽपि पुंसा, **पार्यते** शक्यते, न केनापीत्यर्थः, 'क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्' इति न्यायात्।

अत्र शब्दस्वरूपाभेदेऽर्थतात्पर्यभेदाल्लाटानुप्रासालङ्कार-श्लेषालङ्कारयोरेकाश्रयानुप्रवेशात् सङ्करः।

"अस्त्रियां समराऽनीक-रणाः कलह-विग्रहौ" इत्यमरः ॥ २९ ॥

**परागाभिधा विवृतिः**—अथ भवभूतिकविविभूतिमुपवर्णयति—**स्पष्टभाव-रसेति**। 'भवभूतिना चित्रैः पदन्यासैः नाटकेषु प्रनर्तिता [ सती ] भारती नटस्त्रीव स्पष्टभावरसा [ स्फुरति ], इत्यन्वयः। **भवभूतिना** तन्नामप्रसिद्धकविना। **चित्रैः** गुणा-ऽलङ्कार-रीतिविचित्रैः। **पदन्यासैः** पदानाम्–विभक्त्यन्तशब्दानाम्, न्यासैः–रचनाभिः। **नाटकेषु** उत्तररामचरितादिषु ख्यातवृत्तकदृश्यकाव्येषु, तद्रूपरङ्गमध्य इत्यर्थः। **प्रनर्तिता** प्रकर्षेण नर्तिता–स्वार्थाभिनयं कारितेव सतीति प्रतीयमानोत्प्रेक्षा। **स्पष्टभावरसा** स्पष्टः–अभिव्यक्तः, भावः–अभिप्रायः, यद्वा विभावादिभिरपरिपुष्यमाणतया रसरूपतामप्राप्तो रत्यादिः स्थायिभावः, देवादिविषया रतिर्वा, रसश्च–शृङ्गारादिर्यया तादृशी स्फुरति। केव? **नटस्त्रीव** नटीव, सा यथा **भवभूतिना** भवत्यस्मादिति भवः शिवः, तस्येव भूतिः–ऐश्वर्यं नटनोत्कटपाटवरूपं यस्य तेन, नृत्यकलाकुशलेन नटेनेत्यर्थः, **चित्रैः** दर्शकजनाश्चर्यकरैः, तत्कलाकुशलमात्रप्रत्येयविचित्रविधैर्वा, **पदन्यासैः** चरणविक्षेपैः, **नाटकेषु** अभिनयकर्मसु, **प्रनर्तिताः** प्रकृष्टरीत्या नर्तनं कारिता सती, **स्पष्टभावरसा** स्पष्टः–अभिनयेनाभिव्यक्तः, भावः–पदवाक्याभिप्रायः, भ्रूविक्षेपादिरूपो व्यभिचारिभावो वा, रसः–शृङ्गारादिश्च, यया तादृशी स्फुरति, तथा।

दृष्ट्वा वाक्पतिराजस्य शक्तिं गौडवधोद्धुराम् ।
बुद्धिः साध्वसरुद्धेव वाचं न प्रतिपद्यते ॥ ३१ ॥ [ पथ्या ]
भद्रकीर्तेर्भ्रमत्याशाः कीर्तिस्तारागणाध्वना ।
प्रभा ताराधिपस्येव श्वेताम्बरशिरोमणेः ॥ ३२ ॥ [ पथ्या ]

---

**टिप्पनकम्—बुद्धिः** मतिः, **न प्रतिपद्यते** न गृह्णाति–न स्वीकरोति, काम् ? **वाचं** वचनम्, काव्यकरणे न प्रवर्तते । कथम्भूतेव ? **साध्वसरुद्धेव** भयनिषिद्धेव । किं कृत्वा ? **दृष्ट्वा** अवलोक्य । काम् ? **शक्तिं** सामर्थ्यम् । कस्य ? **वाक्पतिराजस्य** बृहस्पतिराजस्य । किम्भूताम् ? **गौडवधोद्धुरां** गौडवधो नाम–अतिशायिगाथाकोशकाव्यशास्त्रम्, तत्र उद्धुराम्–उद्भटाम् । अन्यत्र **वाक्पतिराजस्य** जयवर्मराजस्य, **शक्तिं** प्रहरणविशेषम्, दृष्ट्वा, किम्भूताम् ? **गौडवधोद्धुरां** गौडानाम्–गौडनृपानाम्, यो वधः–घातः, तत्र उद्धुराम्–उद्भटाम्, बुद्धिः साध्वसरुद्धेव वाचं न प्रतिपद्यते, भयेन मुखाद् वचनं न निःसरतीत्यर्थः ॥ ३१ ॥

**टिप्पनकम्—भद्रकीर्तेः** बप्पभट्टाचार्यस्य । **भ्रमति** पर्यटति । का ? **कीर्तिः** । काः ? **आशाः** दिशः । केन ? **तारागणाध्वना** तारागणाभिधानकाव्यमार्गेण । किम्भूतस्य भद्रकीर्तेः ? **श्वेताम्बरशिरोमणेः** श्वेतपटमुनिनायकस्य, कस्येव का भ्रमति ? **प्रभा** कान्तिः, यथा **ताराधिपस्य** चन्द्रस्य भ्रमति । काः ? **दिशः** । केन ? **तारागणाध्वना** आकाशेन । ताराधिपस्य किम्भूतस्य ? **श्वेताम्बरशिरोमणेः** श्वेतश्चासौ अम्बरशिरोमणिश्च आकाशमूर्धरत्नं च स तथोक्तस्तस्य, आकाशभूषणस्येत्यर्थः ॥ ३२ ॥

---

अत्रापि श्लेषानुप्राणितोपमालङ्कारः । "भवः सत्ताऽऽप्ति-जन्मसु । रुद्रे श्रेयसि संसारे", "भूतिस्तु भस्मनि । मासपाकविशेषे च सम्पदुत्पादयोरपि" इति चानेकार्थसङ्ग्रहः ॥ ३० ॥

**परागाभिधा विवृतिः**—अथ गौडवधकाव्यरामणीयकोन्मीलनमुखेन तत्प्रणेतारं वाक्पतिराजनामानं कविमुपश्लोकयति—**दृष्ट्वे**ति । 'वाक्पतिराजस्य गौडवधोद्धुरां शक्तिं दृष्ट्वा साध्वसरुद्धेव बुद्धिर्वाचं न प्रतिपद्यते' इत्यन्वयः । **वाक्पतिराजस्य** तदन्वर्थनाम्नो गौडवधकाव्यं प्रणीतवतः कवेः । **गौडवधोद्धुरां** गौडवधे–गौडवधकाव्यप्रणयने, उद्धुराम्–उद्–उत्कृष्टा धूः–भारो यस्या ताम्, द्रढीयसीम् । **शक्तिं** प्रतिभाख्याम् । **दृष्ट्वा** अनुभूय । **बुद्धिः** कविजनानां शेमुषी प्रतिभा । **साध्वसरुद्धेव** साधवोऽस्यन्ते निरस्यन्ते समीहितसिद्धेरपि येन तत् साध्वसम्–भयम्, तेन, अपकीर्तिभयेनेत्यर्थः, रुद्धा–कुण्ठिता, **इवे**त्युत्प्रेक्षा । **वाचं** काव्यभावानुभाविनीं भारतीम् । **न प्रतिपद्यते** न प्राप्नोति, न स्फूर्तिपथमवतारयितुं पारयतीत्यर्थः । यद्वा **वाक्पतिराजस्य** अनुपदोक्तकाव्योपाख्यातस्य यशोवर्मराजस्य । **गौडवधोद्धुरां** गौडवधे–गौडदेशीयनृपवधक्रियायाम्, उद्धुराम्–प्रागल्भ्यपूर्णाम्, **शक्तिम्** अस्त्रविशेषं सामर्थ्यं वा । **दृष्ट्वा** निरीक्ष्य । **बुद्धिः** तद्दर्शकानां मतिः । **साध्वसरुद्धेव** भयरुद्धेव । **वाचं** तद्वर्णनपरां वाणीम् । **न प्रतिपद्यते** न आप्नोति मुखान्निर्गमयितुमित्यर्थः ।

अत्रोत्प्रेक्षालङ्कारः, समृद्धिवर्णनादुदात्तालङ्कारश्च ।
"शक्तिरायुधभेदे स्यादुत्साहादौ बले श्रियाम्" इति, "आशङ्का साध्वसं दरः" इति चानेकार्थसङ्ग्रहः ॥ ३१ ॥

**परागाभिधा विवृतिः**—श्रीबप्पभट्टाचार्यवर्यमुपवर्णयति—**भद्रकीर्ते**रिति । 'श्वेताम्बरशिरोमणेस्ताराधिपस्य भद्रकीर्तेः प्रभाः कीर्तिस्ताराधिपस्य प्रभा इव तारागणाध्वना आशा भ्रमति' इत्यन्वयः । **श्वेताम्बरशिरोमणेः** श्वेतम्–शुभ्रम्, अम्बरम्–वस्त्रम्, येषां ते श्वेताम्बराः, जैनमुनिविशेषाः, तेषां शिरोमणेः–शिरोमुकुटस्य, श्रेष्ठस्येत्यर्थः । **ताराधिपस्य** ताराणाम्–एकदेशन्यायेन तारकाणाम्, संसारसागरादुत्तारकाणां मुनिजनानामित्यर्थः । यद्वा ताराणाम्–स्वदर्शने व्याप्रियमाणानां भक्तजननमनकनीनिकानाम्, यद्वा ताराणाम्–निर्मलमौक्तिकानाम्, उपचाराद् निर्मलमौक्तिकवन्निर्मलतावतां श्वेताम्बरधारित्वेन साधुशिरोमणित्वेन च विशदधवलवसनाऽऽचरणादीनाम्, अथवा ताराणाम्–उच्चतमदेशनाध्वनीनाम्, अधिपस्य स्वामिनः । **भद्रकीर्तेः** अन्वर्थतदपरनामकस्य श्रीबप्पभट्टाचार्यस्य । **प्रभा** प्रकृष्टा भा–द्युतिर्यस्याः सा, 'ताराधिपस्य' इत्यस्य 'प्रभा' इत्यस्य च पूर्वत्राप्यन्वय ऊहनीयः । **कीर्तिः** कवित्वकीर्तिः । **तारागणाध्वना** तारागणः–तन्नामकस्तत्प्रणीतकाव्यग्रन्थः, तद्रूपेण अध्वना–

समाधिगुणशालिन्यः प्रसन्नपरिपक्त्रिमाः ।
यायावरकवेर्वाचो मुनीनामिव वृत्तयः ॥ ३३ ॥ [ पथ्या ]

सूरिर्महेन्द्र एवैको वैबुधाराधितक्रमः ।
यस्यामर्त्योचितप्रौढिकविविस्मयकृद्वचः ॥ ३४ ॥ [ पथ्या ]

---

**टिप्पनकम्**—**वाचो** वर्तन्ते । कस्य ? **यायावरकवेः** राजशेखरस्य । **समाधिगुणशालिन्यः** समाधिलक्षणो यो गुणः–शब्दालङ्कारविशेषः, तेन शालिन्यः–श्लाघावत्यः । **प्रसन्नपरिपक्त्रिमा** प्रसादपरिणताः । का इव केषाम् ? **वृत्तय इव** व्यापारा इव, **मुनीनां** यतीनाम्, **समाधिगुणशालिन्यः** समाधानगुणश्लाघावत्यः, यद्वा समाधिश्च गुणाश्च क्षाम्त्यादयस्तैः शोभावत्यस्तथा, **प्रसन्नपरिपक्त्रिमाः** निर्मलाः स्वर्गापवर्गफलपाकनिर्वृत्ताः ॥ ३३ ॥

**टिप्पनकम्**—महेन्द्र एव, एकः अद्वितीयः । **सूरिः** आचार्यः वर्तते । **वैबुधाराधितक्रमः** विविधविद्वद्वृन्दसेवितपादः । **यस्य** महेन्द्रसूरेः । **वचः** वचनमस्ति । कीदृशम् ? **अमर्त्योचितप्रौढिकविविस्मयकृत्** अमर्त्योचितप्रौढयः–देवयोग्यप्रौढताः, ये कवयः–कवितारः, तेषां विस्मयकृत्–आश्चर्यकारि । अन्यत्र **महेन्द्र एव** देवराज एव, एकः **सूरिः** विद्वान् । कीदृशः ? **वैबुधाराधितक्रमः** देवसमूहसेवितचरणः, यस्य महेन्द्रस्य, वचः, **अमर्त्योचितप्रौढिकविविस्मयकृत्** अमर्त्यः–देवः, उचितप्रौढिश्च–योग्यप्रौढिमा च, यः कविः–बृहस्पतिः, तस्य विस्मयकृत्–आश्चर्यकारि ॥ ३४ ॥

---

मार्गेण, तद्ग्रन्थद्वारेत्यर्थः । **आशाः** सर्वदिशः । **भ्रमति** व्याप्नोति, प्रसरतीत्यर्थः । कस्य केव ? **श्वेताम्बरशिरोमणेः** श्वेतम्–निर्मलम्, यद् अम्बरम्–आकाशम्, तस्य शिरोमणेः–शिरोभूषणस्य, **भद्रकीर्तेः** सुन्दरकीर्तेः, **ताराधिपस्य** चन्द्रस्य । **प्रभा इव** प्रकृष्टा भा इव, चन्द्रिकेवेत्यर्थः, सा यथा **तारागणाध्वना** तारागणस्य मार्गेण, आकाशमार्गेणेति यावत्, **आशाः** सर्वदिशः, **भ्रमति** व्याप्नोति तथा ।

इहापि श्लेषानुप्राणितोपमालङ्कारः । "अम्बरं व्योम-वस्त्रयोः । कार्पासे सुरभिद्रव्ये" इति, "तारो निर्मलमौक्तिके । मुक्ताशुद्धावुच्चनादे नक्षत्र-नेत्रमध्ययोः" इति, "भद्रं तु मङ्गले । मुस्तक-श्रेष्ठयोः साधौ काञ्चने करणान्तरे" ॥ इति, "अध्वा काल-वर्त्मनोः" इति चानेकार्थसङ्ग्रहः ॥ ३२ ॥

**परागाभिधा विवृतिः**—यायावरनामानं श्रीराजशेखरकविं स्तौति—**समाधिगुणशालिन्य** इति । 'यायावरकवेर्वाचो मुनीनां वृत्तय इव समाधिगुणशालिन्यः प्रसन्नपरिपक्त्रिमाः [ विलसन्ति ]' इत्यन्वयः । **यायावरकवेः** यायावरनाम्नः काव्यकारस्य । **वाचः** काव्यभावमापन्ना वाण्यः । **समाधिगुणशालिन्यः** समाधिः–आरोहणावरोहणक्रमः, स चासौ गुणः–प्राचीनाभिप्रेतो माधुर्यादिगुणत्रयातिरिक्तो गुणः, यद्वा समाधिः–"समाधिः सुकरं कार्यं कारणान्तरयोगतः" इति काव्यप्रकाशकृल्लक्षितोऽलङ्कारविशेषः, स चासौ गुणः–शोभाधायको धर्मः, तेन शालन्ते–शोभन्ते तच्छीला यास्ताः । **प्रसन्नपरिपक्त्रिमाः** प्रसन्नाः–प्रसादगुणान्विताः, परिपक्त्रिमाः–परिपाकेन निर्वृत्ताः, सुविवेकाग्निपरिपक्वा इत्यर्थः, सुविविच्य निबद्धा इति यावत्, विलसन्ति । का इव ? **मुनीनां** संयमिनाम्, **वृत्तयः** अन्तःकरणवृत्तयः, **इव** ता यथा **समाधिगुणशालिन्यः** "तदेवार्थनिर्भासं स्वरूपशून्यमिव समाधिः" इति पतञ्जलिप्रभृतिपरिभाषितः स्वरूपमपि विलाप्येव ध्येयार्थमात्राकारेण प्रतिभासपर्यवसितं ध्यानमेव समाधिः, योगस्यान्तरङ्गमङ्गम्, तद्रूपेण गुणेन–मुक्तिप्रयोजकोत्कर्षेण, यद्वा निरुक्तसमाधिना, गुणैः–क्षमादिभिश्च शालन्ते–शोभन्त इत्येवंशीला इति तथा, **प्रसन्नपरिपक्त्रिमाः** प्रसन्नाः–रागादिमलापनयनान्निर्मलाः, सन्तोषात्मानो वा, परिपक्त्रिमाः–परिपक्वाः, न तु व्युत्थायिन्यः, तथा ।

अत्रापि श्लेषानुप्राणितोपमालङ्कारः । "समाधिः स्यात् समर्थने । चित्तैकाग्र्य-नियमयोर्मौने" इति, "प्रसादोऽनुग्रह-स्वास्थ्य-प्रसत्तिषु । काव्यगुणे" इति चानेकार्थसङ्ग्रहः ॥ ३३ ॥

**परागाभिधा विवृतिः**—अथ स्वधर्मगुरुं स्वबन्धुशोभनमुनिदीक्षागुरुं च श्रीमहेन्द्रसूरिवरं कविवरं प्रशंसति—**सूरिर्महेन्द्र** इति । 'वैबुधाराधितक्रमः [ सः ] महेन्द्र एवैकः सूरिः [ अस्ति ], यस्य वचोऽमर्त्योचितप्रौढिकविविस्मयकृत्

स मदान्धकविध्वंसी रुद्रः कैर्नाभिनन्द्यते ? ।
सुश्लिष्टललिता यस्य कथा त्रैलोक्यसुन्दरी ॥ ३५ ॥ [ पथ्या ]

---

**टिप्पनकम्**—स **रुद्रः** रुद्राभिधानः कविः । **कैर्नाभिनन्द्यते ?** सर्वैरपि प्रशस्यते । कीदृशः ? **मदान्धकविध्वंसी** मदान्धाः–दर्पान्धाः, ये कवयस्तान् ध्वंसयते–तिरस्करोति पराभवतीति स तथोक्तः । यस्य कथा वर्तते, किमाख्या ? **त्रैलोक्यसुन्दरी** । किम्भूता ? **सुश्लिष्टललिता** पुष्टश्लेषघना लालित्यघना च । अन्यत्र **रुद्रः** हरः । **कैर्नाभिनन्द्यते ?** सर्वैरपि प्रशस्यते । कीदृशः ? **समदान्धकविध्वंसी** समदः–मदसहितः, अन्धकः–अन्धकासुरः, तस्य विध्वंसी–विघाती । यस्य **सुश्लिष्टललिता** आलिङ्गनवती गौरी । किम्भूता ? **त्रैलोक्यसुन्दरी** त्रैलोक्ये–त्रिभुवनमध्ये, सुन्दरी–सौन्दर्ययुक्ता ॥ ३५ ॥

---

[ वर्तते ]' इत्यन्वयः । उत्तरार्धनिवेशियच्छब्दानुरोधेन पूर्वार्धे तच्छब्दोऽध्याहृत्य योजनीयः, तथा च **वैबुधाराधितक्रमः** विविधा विशिष्टा वा बुधाः–विद्वांसो विबुधाः, तेषां समूहो वैबुधम्, तेन अथवा वै–निश्चयेन, बुधैः–विद्वद्भिः, आराधितौ–सेवितौ क्रमौ चरणौ यस्य सः, विद्वद्वृन्दवन्दितपादारविन्द इत्यर्थः । सः–यच्छब्दबोध्यत्वेन कवितात्पर्यविषयः । **महेन्द्र एव** महेन्द्रसंज्ञक एव, **एकः** अद्वितीयः, **सूरिः** विद्वान्, आचार्य इति यावत्, अस्तीति शेषः । **यस्य** कविवर्यस्य । **वचः** काव्यभावापन्ना वाक् । **अमर्त्योचितप्रौढिकविविस्मयकृत्** अमर्त्याः–देवाः, तदुचिता–तदभ्यस्ता तद्योग्या वा, प्रौढिः–काव्यप्रणयनप्रगल्भता येषां तेषामपि कवीनाम्, विस्मयकृत्–आश्चर्यजनकम् । यद्वा '**अमर्त्योचितप्रौढि**' '**कविविस्मयकृत्**' इति पृथक् पदम्, तथा च आ समन्तात्, मर्त्यैः–मनुजैः, उचिता–परिचिता, प्रौढिः–रचनानैपुण्यम्, यस्मिंस्तत्, अत एव कविविस्मयकृत्, इति प्रासङ्गिकोऽर्थः । श्लेषानुप्राणितोऽर्थस्तु—**वैबुधाराधितक्रमः** विबुधानां–देवानां समूहो वैबुधम्, तेन आराधितक्रमः–सेवितचरणः सुराधिपतित्वात्, स **महेन्द्र एव** महान् इन्द्र एव, **एकः** अद्वितीयः, **सूरिः** विद्वान् अस्ति, यस्य **वचः** विविधवैदग्ध्यमयी वाक्, **अमर्त्योचितप्रौढिकविविस्मयकृत्** अमर्त्यैः–देवरूपः, अत एव उचितप्रौढिः–अभ्यस्तप्रगल्भताकश्च, यः कविः–वाचस्पत्येन कवनकुशलस्तदाचार्यो बृहस्पतिः, तद्विस्मयकृत्–स्वशिष्येऽपि स्वसमधिकवाग्वैदग्ध्योपलब्ध्या तस्याप्याश्चर्यजनकम्, अथवा मर्त्यैः–मानवैः, उचिता–अभ्यस्ता, इति मर्त्योचिता, न मर्त्योचिता अमर्त्योचिता तादृशी, अथवा अमर्त्योचिता–देवयोग्या, प्रौढिर्यस्य तस्य कवेः–दैत्यगुरोरपि, विस्मयकृत्–आश्चर्यजनकम्, पदपार्थक्ये तु **अमर्त्योचितप्रौढि** देवपरिचितप्रौढताकम्, **कविविस्मयकृत्** कवेः कवनकर्मणः, बृहस्पतेः शुक्रस्य वा, आश्चर्यजनकं च ।

अत्रातिशयोक्तिश्लेषालङ्कारयोः संसृष्टिः । "धीमान् सूरिः कृती कविः" इति, "सन् सुधीः कोविदो बुधः" इति चामरः, "क्रमः कल्पाऽङ्घ्रि–शक्तिषु । परिपाट्याम्" इति, "कविः काव्यस्य कर्तरि । विचक्षणे दैत्यगुरौ स्यात्" इति चानेकार्थसङ्ग्रहः ॥३४॥

**परागाभिधा विवृतिः**—अथ त्रैलोक्यसुन्दरीसंज्ञककथां ग्रथितवन्तं श्रीमन्तं रुद्रकविं रुद्रश्लिष्टविशेषणैरुपश्लोकयति—

**स मदान्धकवी**ति । 'यस्य सुश्लिष्टललिता त्रैलोक्यसुन्दरी कथा [ अस्ति ], मदान्धकविध्वंसी स रुद्रः कैर्नाभिनन्द्यते ?' इत्यन्वयः । **मदान्धकविध्वंसी** मदेन स्वकवित्वाभिमानेन अन्धाः–अन्यदीयकाव्योत्कर्षदृष्टिशून्याः, ये कवयस्तान् ध्वंसयति–तदीयमदान्धतां निरस्यति तच्छीलो यः, 'शिखी ध्वस्तः' इत्यत्रेवात्रापि विशेष्यांशबाधितया ध्वंसनक्रियाया [ मदान्धत्वलक्षण]-विशेषणांशमात्रपर्यवसानात् । **रुद्रः** रुद्रनामा कविः, **कैः** गुणप्रणयिभिः । **न अभिनन्द्यते** श्लाघ्यते, सर्वैरेवेत्यर्थः । कुतः ? **यस्य** कविवरेण्यस्य । **सुश्लिष्टललिता** सुश्लिष्टा–सुन्दरश्लेषालङ्कारालङ्कृता, अत एव ललिता–लोकेप्सिता च, अथवा सुश्लिष्टैः–सुन्दरश्लेषाञ्चितैः पदैः, ललिता । **त्रैलोक्यसुन्दरी** तत्संज्ञिका, **कथा** काव्यविशेषः, अस्तीति शेषः । श्लेषानुरणितोऽर्थस्तु—**समदान्धकविध्वंसी** मदेन–बलावलेपेन, सहितः समदः, यः, अन्धकः–अन्धकनामा दैत्यः, तं विध्वंसयति–विनाशयति, तच्छीलो यः सः, **रुद्रः** शङ्करः । कैः बलाबलविवेचकैः । **न अभिनन्द्यते** बलवत्तरत्वेन प्रशस्यते, सर्वैरेवेत्यर्थः । कुतः ? **यस्य** यन्निरूपितदाम्पत्यवती, **सुश्लिष्टललिता** अर्धाङ्गभावेन सम्यगालिङ्गिता, कुतः ? यतो ललिता–अभीप्सिता, यद्वा यतस्तेन सुश्लिष्टा, अतो ललिता–तदीप्सितत्वेन लोकैः प्रतीयमाना, अनीप्सितत्वे सुश्लेषानुपपत्तेः, यद्वा सुश्लिष्टम्–सम्यगन्वितम्, ललितम्–हावविशेषः, यस्यां सा, **त्रैलोक्यसुन्दरी** त्रैलोक्ये-त्रिभुवने, सुन्दरी–निरतिशयसौन्दर्यशालिनी स्त्री, अस्ति–शक्तिरूपेण तिष्ठति, अतस्तादृशशक्तिशालितया तस्य तद्योग्यत्वमिति भावः ॥

अत्र सभङ्गाभङ्गश्लेषालङ्कारः॥"ललितमीप्सिते" इत्यमरवृत्तिः,"स्त्रीणां विलास–बिव्वोकविभ्रमा ललितं तथा" इत्यमरः॥३५॥

सन्तु कर्दमराजस्य कथं हृद्या न सूक्तयः ।
कविस्त्रैलोक्यसुन्दर्या यस्य प्रज्ञानिधिः पिता ॥ ३६ ॥ [ पथ्या ]

केचिद् वचसि वाच्येऽन्ये केऽप्यशून्ये कथारसे ।
केचिद् गुणे प्रसादादौ धन्याः सर्वत्र केचन ॥ ३७ ॥

अस्त्याश्चर्यनिधानमर्बुद इति ख्यातो गिरिः खेचरैः कृच्छ्राङ्घितदिग्विलङ्घिशिखरग्रामोऽग्रिमः क्ष्माभृताम् ।
मैनाकेन महार्णवे हरतनौ सत्या प्रवेशे कृते येनैकेन हिमाचलः शिखरिणां पुत्रीति लक्ष्योऽभवत् ॥३८॥
[ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ३६ ॥

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ३७ ॥

**टिप्पनकम्—श्रीभोजदेवराजवंशवर्णनपूर्वकभोजदेववर्णनार्थमर्बुदगिरिवर्णनमाह—अस्तीत्यादि** । खेचराः-विद्याधरादयः । ग्रामः-समूहः । **सत्या** गौर्या ॥ ३८ ॥

---

**परागाभिधा विवृतिः**—अथ कर्दमराजकविमनुपदोपवर्णितरुद्रकवितनयतया स्तौति—**सन्तु कर्दमराजस्येति** । '[तस्य] कर्दमराजस्य सूक्तयः कथं न हृद्याः सन्तु, यस्य प्रज्ञानिधिः त्रैलोक्यसुन्दर्याः कविः पिता [आसीत्]' इत्यन्वयः । अत्रोत्तरार्धनिवेशितयत्पदोत्थिताऽऽकाङ्क्षया पूर्वार्धे तत्पदमध्याहार्यम्, एवं च तस्य **कर्दमराजस्य** तन्नाम्नः श्रीमद्रुद्रकविजन्मनः कवेः **सूक्तयः** गुणालङ्कारादिचमत्कृता वाचः, **हृद्याः** सद्योरसामृतस्यन्दितया सहृदयहृदयाह्लादिकाः, **कथं न सन्तु ?** सन्त्येवेत्यर्थः । कुतः ? **प्रज्ञानिधिः** प्रज्ञायाः-नवनवानल्पकल्पनात्मिकायाः, आन्तररत्नरूपप्रतिभाया इत्यर्थः, निधिः-सङ्ग्रहास्पदम्, अत एव **त्रैलोक्यसुन्दर्याः** अनुपदोपश्लोकितायास्तन्नाम्न्याः कथायाः, **कविः** विरचयिता, **यस्य** कवेः, **पिता** जनकः, आसीदिति शेषः । एवं च "आत्मा वै जायते पुत्रः" इति श्रुतिसिद्धरुद्रकवितादात्म्यस्य तस्य कवेरपि सहृदयरोचकोक्तिकत्वमुचितमेवेति भावः । अस्यां व्याख्यायां पूर्वार्धविवक्षितार्थं प्रति उत्तरार्धवाक्यार्थस्य हेतुतया काव्यलिङ्गालङ्कारः । श्लेषबलानुरणितोऽर्थस्तु-कर्दमानाम्-पङ्कानाम्, ताद्धर्म्येण तदुपलक्षितानां नदीनाम्, राजा-पतिः समुद्रः, तस्य तद्वर्णनपराः सूक्तयः, **हृद्याः** श्रोतॄणां हृदयप्रियाः, **कथं न सन्तु** सन्त्येवेत्यर्थः, समृद्धवस्तुवर्णनस्य सर्वप्रियत्वात् । **प्रज्ञानिधिः** प्राज्ञप्रवरः, **त्रैलोक्यसुन्दर्याः** पार्वत्याः, **पिता** हिमालय-एव, **यस्य** समुद्रस्य, **कविः** अभिज्ञः, पश्चिमोत्तरभागयोः पूर्वपश्चिमपार्श्वाभ्यामवगाह्य समुद्रे साक्षी अस्ति । एवं च तत्समृद्धेर्न कविप्रौढोक्तिसिद्धत्वम्, अपि तु ससाक्षिकतया स्वतः सिद्धत्वमेवेति तद्वर्णनस्य हृद्यत्वमुपपद्यते । "कविर्वाल्मीकि-काव्ययोः । सूरौ काव्यकरे पुंसि" इति मेदिनी ॥ ३६ ॥

**परागाभिधा विवृतिः**—अथ प्रकृतकथोपोद्घातमुपक्षेप्तुकामः कविः काञ्चिदेकां कलामाकलय्य तत्कलाविकलान् प्रति नाहङ्करणीयम्, विरलस्यैव सकलकलाकत्वेनाहङ्कर्तुरपि कतिपयकलावैकल्यसम्भवादिति ध्वनयन् कविजनविनयाधानसम्भारमुपसंहरति—**केचिद् वचसी**ति । 'केचिद् वचसि धन्याः, अन्ये वाच्ये धन्याः, केऽप्यशून्ये कथारसे धन्याः, केचित् प्रसादादौ गुणे धन्याः, केचन सर्वत्र धन्याः' इत्यन्वयः । **केचित्** कतिचित् कवयः, **वचसि** अवधारणन्यायाद् वचस्येव अलङ्काररीतिविशेषपुरस्कारेण शब्दात्मककाव्यशरीरांशसन्निवेशनकलायामेवेत्यर्थः, **धन्याः** कुशलाः, न त्वनुपदमुच्यमानायामन्यकलायामित्यर्थः । **अन्ये** अपरे कवयः, **वाच्ये** अलङ्कारविशेषपुरस्कारेण वाच्य एव, अर्थात्मकशरीरांशयोजनात्मककलायामेवेत्यर्थः, धन्याः । **केऽपि** केचन कवयः, **अशून्ये** अविकले, **कथारसे** स्वनिबध्यमानकथायामभिव्यङ्ग्यतया शृङ्गारादिरसनिवेशन एव, शब्दार्थयुगलात्मककाव्यशरीरे रसात्मकजीवनाधानकलायामेवेत्यर्थः, **धन्याः** निपुणाः । **केचित्** कतिपये, **प्रसादादौ गुणे** प्रसादमाधुर्यौजोरूपगुण एव, रसरूपकाव्यात्मनि तत्तद्रसोचितगुणाधानकलायामेवेत्यर्थः, **धन्याः** विचक्षणाः । **केचन** केचिदेव तु, विरला एवेत्यर्थः, **सर्वत्र** अनुपदोक्तसकलकलासु, **धन्याः** विदग्धाः, न तु सर्वे इत्यर्थः ।

अत्रालङ्काररीतिकलयोरनुल्लेखात् कवेर्न्यूनत्वं नोद्भावनीयम्, तयोः शब्दार्थगतत्वेन मद्व्याख्यानदिशा शब्दार्थविन्यासकलायामेवान्तर्भावात् । अत्र परिसंख्यालङ्कारः ॥ ३७ ॥

**परागाभिधा विवृतिः**—अथाधिकृतकथाप्रणयनप्रीणनीयश्रीमद्भोजराजवर्णनाङ्गतया तद्वंशं प्रशंसितुकामः कविः

वासिष्ठैः स कृतस्मयो वरशतैरस्त्यग्निकुण्डोद्भवो भूपालः परमार इत्यभिधया ख्यातो महीमण्डले ।
अद्याप्युद्गतहर्षगद्गदगिरो गायन्ति यस्यार्बुदे विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः ॥ ३९ ॥
[ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्**—**वासिष्ठैरित्यादि** । **कृतस्मयः** विहितगर्वः । **विश्वामित्रजयोर्जितस्य** विश्वामित्रर्षिपराभवविस्फुरितस्य ॥ ३९ ॥

---

काश्मीरकुङ्कुमन्यायेन भावानामुद्भवक्षेत्रानुगुणतया तदुद्भवाधारमर्बुदगिरिमद्भुतगुणैरादौ विशिनष्टि—**अस्ती**ति । 'आश्चर्यनिधानम्, खेचरैः कृच्छ्राल्लङ्घितदिग्विलङ्घिशिखरग्रामः, [ अत एव ] क्ष्माभृतामग्रिमः, अर्बुद इति ख्यातः [ सः ] गिरिः, अस्ति, मैनाकेन महार्णवे सत्या हरतनौ प्रवेशे कृते [ सति ] हिमाचलः, येन एकेन शिखरिणां [ मध्ये ] पुत्रीति लक्ष्योऽभवत्' इत्यन्वयः । **आश्चर्यनिधानम्** आश्चर्याणाम्–विस्मयजनकावलोकनकर्मणां विविधमणिगणौषधिप्रभृतिवस्तूनाम्, निधिः–संचयास्पदम् । **खेचरैः** गगनविहारिभिर्विद्याधरकिन्नरादिभिः, **कृच्छ्रात्** प्रयासात्, **लङ्घितदिग्विलङ्घिशिखरग्रामः** लङ्घितः–गगनविहारायातिक्रान्तः, दिग्विलङ्घी–परमोच्चतया पश्चिमदिगवच्छिन्नाकाशमण्डलोर्ध्ववर्ती, 'दिग्विलम्बि' इति पाठेऽपि तद्दिगवच्छिन्नाकाशमण्डलोर्ध्वावलम्बी, शिखरग्रामः–शृङ्गसन्दोहो यस्य सः । अत एव **क्ष्माभृतां** पर्वतानाम्, **अग्रिमः** अग्रगण्यः । **अर्बुद इति ख्यातः** तन्नाम्ना संस्कृतवाङ्मये विश्रुतः, 'आबु' इति तदपभ्रंशनाम्ना च लोके विश्रुतः । सः–उत्तरदलघटकयत्पदबोध्यत्वेन तात्पर्यविषयः, **गिरिः** पर्वतः, **अस्ति** अद्यापि विद्यते । स कः? **मैनाकेन** मेनकाया हिमाचलपत्न्या अपत्यं पुमानिति मैनाकस्तेन, तन्नाम्ना हिमालयसूतेन, **महार्णवे** महासमुद्रे, **प्रवेशे** पर्वतपक्षच्छेदनोद्यतेन्द्रभयाद् अन्तस्तिरोधाने कृते सति, **सत्या** प्राग्भवे स्वपित्रा दक्षेणारब्धमखमहोत्सवे भर्तुः शिवस्य निमन्त्रणाभावभावितेनापमानेन स्वयमेवाग्नौ शरीरत्यागरूपं सतीकार्यं कृतवत्या पार्वत्याऽपि, पर्वतापत्यतया पर्वतविद्रोहीन्द्रभयाद् **हरतनौ** शिवशरीरे, **प्रवेशे** शिवशक्तिरूपतया तिरोधाने कृते सति, **हिमाचलः** हिमालयः, **एकेन** एकमात्रेण, **येन** अर्बुदेन पितृप्रीतिप्रत्याख्यातेन्द्रभयेन, **शिखरिणां** पर्वतानां मध्ये, स्वसमाज इत्यर्थः, **पुत्रीति** पुत्रवानयमित्येवम्, **लक्ष्यः** लोकैर्दृश्यः "लक्षिण् दर्शनाङ्कयोः" इति धातुपाठात्, पुत्रवत्त्वेन लोकप्रत्यक्षगोचर इत्यर्थः; **अभवत्** तदानीमासीत् । मैनाक-पार्वत्योस्तदपत्ययोस्तदानीमुक्तरीत्या निलीनयोरर्बुदेनैवैकपुत्रेण पितृभक्तेन तस्य पुत्रवत्त्वं लोकैरवलोक्यमानमासीदिति भावः ।

पुरा पक्षवद्भिरद्रिभिरभित उड्डीयमानैः पक्षानुपसंहृत्य क्वचिदवितर्कितमापतद्भिश्च जगतश्चूर्णनमवलोक्य मघवता स्वकुलिशेन तत्पक्षकर्तनकर्मण्यारभ्यमाणे तद्भयान्मैनाको महोदधौ पार्वती च शिवशरीरे तिरोदधे, परमर्बुदस्तु स्वपितृस्नेहाद् यथास्थानमेव तस्थाविति पौराणिकी वार्ता ।

अत्र क्ष्माभृदग्रिमत्वं प्रति हेतुविधयाऽऽश्चर्यनिधानत्वादीनां निबन्धनात् काव्यलिङ्गालङ्कारः, छेकानुप्रासश्चेति बोध्यम् ।
"महीध्रे शिखरि-क्ष्माभृदहार्यधरपर्वताः" इति, "कूटोऽस्त्री शिखरं शृङ्गम्" इति चामरः ॥ ३८ ॥

**परागाभिधा विवृतिः**—अथोक्ताचलोपचितश्रीभोजराजवंशमदसीयबीजभूतभूपालं च विक्रमोत्कर्षवर्णनमुखेनोपन्यस्यति—**वासिष्ठैरि**ति । 'अग्निकुण्डोद्भवः, वासिष्ठैः वरशतैः कृतस्मयः, परमार इत्यभिधया महीमण्डले ख्यातः [ सः ] भूपालः, अर्बुदे अस्ति स्म, विश्वामित्रजयोर्जितस्य यस्य भुजयोः विस्फूर्जितम् उद्गतहर्षगद्गदगिरो गुर्जरा अद्यापि अर्बुदे गायन्ति, इत्यन्वयः । **अग्निकुण्डोद्भवः** अग्निकुण्डे–वसिष्ठाहिताग्निकुण्डे, उद्भवः–तत्प्रक्षिप्ताहुतिभ्य आविर्भावो यस्य सः । तेनैव हेतुना तद्वंशस्याप्यग्निकुण्डापदेश्यत्वमिति बोध्यम् । अत एव **वासिष्ठैः** वसिष्ठमुनेरागतैः **वरशतैः** शतसंख्योपलक्षितवरैः, **कृतस्मयः** जनितमदः । अत एव **परमार इत्यभिधया** परान् शत्रून् मारयतीत्यर्थक'परमार'नाम्ना **महीमण्डले** भूवलये, न तु क्वचिद् भूभाग एव, **ख्यातः** प्रसिद्धः, **सः** अनुपदवक्ष्यमाणयत्पदप्रतिपाद्यत्वेन तात्पर्यविषयः, **भूपालः** क्षितिपतिः, **अर्बुदे** तन्नाम्नि निरुक्तपर्वते, **अस्ति स्म** आसीद्, बभूवेत्यर्थः । **विश्वामित्रजयोर्जितस्य** विश्वामित्रस्य–तन्नाम्नो गाधिराजात्मजस्य क्षत्रियर्षेः, जयः–पराजयः, तेन ऊर्जितस्य उद्वेलितबलस्य, **यस्य** वर्ण्यमानभूपतेः, **भुजयोः** बाह्वोः, **विस्फूर्जितं** विक्रान्तिगाथाम्, **उद्गतहर्षगद्गदगिरः** उद्गतेन–तद्विक्रमश्रवणोदितेन, हर्षेण–आनन्देन, गद्गदा अव्यक्ता गिरो वाण्यो येषां तादृशाः,

तस्मिन्नभूद् रिपुकलत्रकपोलपत्रवल्लीवितानपरशुः परमारवंशे ।
श्रीवैरिसिंह इति दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुरर्णवकूलभित्तिः ॥ ४० ॥ [ वसन्ततिलका ]

तत्राभूद् वसतिः श्रियामपरया श्रीहर्ष इत्याख्यया विख्यातश्चतुरम्बुराशिरसनादाम्नः प्रशास्ता भुवः ।
भूपः खर्वितवैरिगर्वगरिमा श्रीसीयकः सायकाः पञ्चेषोरिव यस्य पौरुषगुणाः केषां न लग्ना हृदि ॥४१॥
[ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ४० ॥ ४१ ॥

---

**गुर्जराः** गुर्जरदेशीयाः, **अर्बुदे** तत्संज्ञकगिरौ, **अद्यापि** अधुनाऽपि, प्रकृतकविकालेऽपीत्यर्थः, **गायन्ति** सस्वरमुदीरयन्ति । एतेनार्बुदगिरेर्गुर्जरान्तर्वर्तित्वमभिव्यज्यते ।

अर्बुदाचले निवसतो वसिष्ठऋषेर्नन्दिनीनाम्न्यां धेनौ विश्वामित्रेणापहृतायामतीव क्रुध्यन् वशिष्ठः स्वाहिताग्निकुण्डे समन्त्राहुतिभिर्धूमराजनामकमेकं वीरमुद्भावयामास स्ववैरस्तमभिवर्धयामास च । स चोत्पद्य सद्य एव विश्वामित्रसैन्यं संहृत्य नन्दिनीमानिनाय, अत्यन्तसन्तुष्टवसिष्ठकृतपरमारेत्यन्वर्थनाम्ना प्रसिद्धिमवाप चेति संक्षिप्तमैतिह्यम् ।

अत्र वृत्त्यनुप्रासः काव्यलिङ्गं चालङ्कारः । "दर्पोऽभिमानो ममता मानश्चित्तोन्नतिः स्मयः" इत्यभिधानचिन्तामणिः ॥३९॥

**परागाभिधा विवृतिः**—अथ परमारवंशसारभूतमरिकरिनिकरकेसरितयाऽर्थवदाख्याविख्यातविक्रमं श्रीवैरिसिंहसंज्ञकमवनिपतिं स्तौति—**तस्मिन्नभूदि**ति । 'तस्मिन् परमारवंशे दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुरर्णवकूलभित्तिः, रिपुकलत्रकपोलपत्रवल्लीवितानपरशुः, श्रीवैरिसिंह इति [नृपतिः] अभूत्' इत्यन्वयः । **तस्मिन्** अनुपदोपश्लोकिते, **परमारवंशे** परमारसंज्ञकनृपतिकुले, **दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुरर्णवकूलभित्तिः** दुर्धराणां-दुरतिक्रमाणाम्, सैन्यदन्तिनां-सैनिकहस्तिनाम्, दन्ताग्रैः-दन्ताग्रभागैः, भिन्नाः-विघट्टिताः, चतुर्णाम्-चतुर्दिग्वर्तिनाम्, अर्णवानाम्-समुद्राणाम्, कूलभित्तयः-तटकुड्यानि तटसीमान इति यावत्, येन सः, विजितसर्वदिक इत्यर्थः । अत एव **रिपुकलत्रकपोलपत्रवल्लीवितानपरशुः** रिपूणाम्-तत्तद्दिगवस्थितशत्रूणाम्, कलत्राणि-पत्न्यः, तासां कपोले-गण्डस्थले, उपलक्षणत्वात् स्तनमण्डले च, पत्रवल्ली-देशभेदभिन्नकस्तूरिकादिद्रवचित्रितपत्राङ्कितलता, तस्या वितानः-विस्तारः, तत्र परशुः-कुठाररूपः, रिपून् निहत्य तदङ्गनासु वैधव्यापादनेन तदुच्छेदकत्वात् । **श्रीवैरिसिंह इति** वैरिषु-वैरिरूपद्विपेषु, सिंहः-केसरीति वैरिसिंहः, श्रिया सहितो वैरिसिंह इति श्रीवैरिसिंह इत्याख्यः, नृपोपाख्यानोपक्रमान्नृपः, **अभूत्** अजनि ।

अत्र रूपकमतिशयोक्तिश्चालङ्कारः । "कलत्रं श्रोणि-भार्ययोः" इति रभसः, "वल्ली स्यादजमोदायां लतायां कुसुमान्तरे" इति हैमः, "द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः" इति, "कूलं रोधश्च तीरं च" इति, "भित्तिः स्त्री कुड्यम्" इति चामरः । वसन्ततिलकावृत्तम्, लक्षणं तु प्रागुक्तमेव ॥ ४० ॥

**परागाभिधा विवृतिः**—अथोक्तवंशे श्रीवैरिसिंहात्मजन्मानं श्रीसीयकनामानं नृपतिमभिष्टौति—**तत्राभूदि**ति । 'तत्र श्रियां वसतिः, चतुरम्बुराशिरसनादाम्नः भुवः प्रशास्ता, खर्वितवैरिगर्वगरिमा, अपरया श्रीहर्ष इत्याख्यया विख्यातः, श्रीसीयकः[सः] भूपः अभूत्, पञ्चेषोरिव यस्य पौरुषगुणाः सायकाः केषां हृदि न लग्नाः ?' इत्यन्वयः । **श्रियां** विविधसम्पदाम्, **वसतिः** आश्रयः । **चतुरम्बुराशिरसनादाम्नः** चत्वारः-प्राच्यादिचतुर्दिगवस्थायितया चतुःसंख्यकाः, अम्बुराशयः सागरा एव, रसनादाम-काञ्चीगुणो यस्यास्तस्याः, **भुवः** पृथिव्याः, अखण्डमहीमण्डलस्येत्यर्थः, **प्रशास्ता** प्रकर्षेण शासकः । **खर्वितवैरिगर्वगरिमा** खर्वितः-मन्दतामितः, वैरिणां-शत्रूणाम्, गर्वगरिमा-अभिमानभूयस्त्वं येन सः, खर्वितपदस्थाने चर्वितपदपाठे चर्वितः-भक्षितः, विध्वंसित इत्यर्थः, गर्वगरिमा येन सः । **अपरया** द्वितीयया, **श्रीहर्ष इत्याख्यया** श्रीहर्ष इति सार्थकसंज्ञया, **विख्यातः** प्रसिद्धः । **भूपः** नृपः, **अभूत्** बभूव, भूप इत्यस्य स्थाने सूनुरिति पाठे श्रीवैरिसिंहस्य सुत इति तदर्थो बोध्यः । **पञ्चेषोरिव** पञ्च—"उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा । सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः" ॥

तस्योदग्रयशाः समस्तसुभटग्रामाग्रगामी सुतः सिंहो दुर्धरशत्रुसिन्धुरततेः श्रीसिन्धुराजोऽभवत् ।
एकाधिज्यधनुर्जिताब्धिवलयावच्छिन्नभूर्यस्य स श्रीमद्वाक्पतिराजदेवनृपतिर्वीराग्रणीरग्रजः ॥ ४२ ॥

आकीर्णाङ्घ्रितलः सरोजकलशच्छत्रादिभिर्लाञ्छनै-
स्तस्याजायत मांसलायतभुजः श्रीभोज इत्यात्मजः ।
प्रीत्या योग्य इति प्रतापवसतिः ख्यातेन मुञ्जाख्यया
यः स्वे वाक्पतिराजभूमिपतिना राज्येऽभिषिक्तः स्वयम् ॥४३॥ [ शार्दूलविक्रीडिते ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ४२ ॥ ४३ ॥

---

इत्युक्ताः पञ्चसंख्यकाः, इषवः—बाणा यस्य तस्य, कामस्येव, यस्य **पौरुषगुणाः** पराक्रमगुणकाः, **सायकाः** बाणाः, **केषां** विद्विषां, कामदेवपक्षे केषां पुंसाम्, **हृदि** वक्षसि, पक्षे मनसि, न लग्ना, अपि तु सर्वेषामित्यर्थः ।

अत्र छेकानुप्रास उपमा चालङ्कारः । "रसना काञ्ची-जिह्वयोः" इति विश्वप्रकाशः, "नपुंसि दाम सन्दानम्" इत्यमरः, "पौरुषं पुरुषस्य स्याद् भावे कर्मणि तेजसि" इति विश्वः, "शरे खड्गे च सायकः" इत्यमरः ॥ ४१ ॥

**परागाभिधा विवृति**—अथ श्रीभोजराजपितरं श्रीसिन्धुराजमुपश्लोकयति—**तस्योदग्रयशा** इति । 'उदग्रयशाः, समस्तसुभटग्रामाग्रगामी, दुर्धरशत्रुसिन्धुरततेः सिंहः, [सः] श्रीसिन्धुराजः, तस्य सुतः अभवत्, एकाधिज्यधनुर्जिताब्धिवलयावच्छिन्नभूः, स श्रीमद्वाक्पतिराजदेवनृपतिः, यस्य अग्रजः, अभवत्' इत्यन्वयः । **उदग्रयशाः** उदग्रम्—उन्नतं, उत्कृष्टमित्यर्थः, यशः—निखिलदिग्विस्तीर्णा प्रशस्तिर्यस्यासौ 'एकदिग्व्यापिनी कीर्तिः सर्वदिग्व्यापकं यशः' इति यशसः परिभाषणम् । **समस्तसुभटग्रामाग्रगामी** समस्ताः—सकला ये सुभटाः—सुष्ठु भटा योद्धारः, तेषां ग्रामः—समूहः, तत्र अग्रगामी—अग्रेसरः । **दुर्धरशत्रुसिन्धुरततेः** दुर्धराणां—दुर्धर्षाणाम्, शत्रुसिन्धुराणां—रिपुगजानाम्, ततेः—समूहस्य, **सिंहः**—सिंहरूपस्तद्वत् विदारकत्वात्, शक्रसिन्धुरेति पाठे दुर्धराणां शक्रसिन्धुराणाम्—इन्द्रगजानामैरावतादीनाम्, ततेरिति व्याख्येयम् । सः—उत्तरार्धनिविष्टयत्पदार्थत्वेन कवितात्पर्यविषयः । **श्रीसिन्धुराजः** सिन्धुषु—सागरेषु, राजा—महानिति सिन्धुराजः, शौर्यौदार्यादिगुणमहोदधिरित्यर्थः, श्रिया सहितः सिन्धुराजः श्रीसिन्धुराजेत्यन्वर्थसंज्ञ इति तथा । **तस्य** सीयकनृपतेः, **सुतः** पुत्रः, **अभवत्** अभूत् । **एकाधिज्यधनुर्जिताब्धिवलयावच्छिन्नभूः** एकेन निष्प्रतिद्वन्द्विना, अधिज्येन—ज्याम् मौर्वीम् अधिरूढेन, आकृष्टेनेत्यर्थः, धनुषा, जिता—स्वायत्तीकृता, अब्धिवलयावच्छिन्ना समुद्रसन्दोहसीमिता, भूः-पृथिवी येन सः, सार्वभौमत्वमापन्न इत्यर्थः । **वीराग्रणीः** शूरशिरोमणिः । **सः** प्रसिद्धः । **श्रीमद्वाक्पतिराजदेवनृपतिः** श्रीमान् वाक्पतिराजदेवनामा भूपतिः, **यस्य** श्रीसिन्धुराजस्य, **अग्रजः** पूर्वजन्मा, **अभवत्** आसीत् ।

श्रीवाक्पतिराजदेवः श्रीसीयकनृपतेर्नौरसः सुत आसीत्, अपि तु तेनासुतेन मुञ्जक्षेत्रे केनचिद् विक्षिप्तोऽसौ शैशवेऽपि भाग्याभिव्यञ्जकमञ्जुलाकृतितया स्वसुतस्नेहेनानीय शृङ्गारसुन्दरीराज्ञ्यै समर्पितस्तया लालना-पालनाभ्यामाप्यायित इति कृत्रिमसुत इति कृत्वा जातपूर्वायापि तस्मै राज्यमदत्त्वा पश्चात् पद्मराज्ञ्या प्रसूतायापि श्रीसिन्धुराजायैवौरसपुत्राय नृपतिरसौ राज्यं दत्तवानासीत्, श्रीसिन्धुराजेन तूपभुज्यान्ते तस्मै समर्पितमिति तदानीन्तनमेवादसीयवीर्यमेतत्पद्येन भावितमिति बोध्यम् ।

अत्र छेकानुप्रासो रूपकमतिशयोक्तिश्चालङ्कारः । "उच्च-प्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे" इत्यमरः, "भटः स्यात् पुंसि वीरे च, विशेषे पामरस्य च" इति मेदिनी, "स्तम्बेरमद्विरद-सिन्धुर-नाग-दन्तिनः" इत्यभिधानचिन्तामणिः ॥ ४२ ॥

**परागाभिधा विवृतिः**—अथ कविकालिकराज्याधिपतया प्रकृतकथालतिकाऽऽलवालरूपतया च श्रीभोजराजमतिमञ्जुपद्यसप्तकाम्बुजस्रजा सभाजयति—**आकीर्णाङ्घ्रितलः** इति । 'सरोजकलशच्छत्रादिभिः लाञ्छनैः आकीर्णाङ्घ्रितलः, मांसलायतभुजः, प्रतापवसतिः, श्रीभोज इति तस्यात्मजः, अजायत, यः मुञ्जाख्यया ख्यातेन वाक्पतिराजभूपतिना स्वयं योग्य इति स्वे

**देव्या विभ्रमसद्म पद्मवसतेः कर्णावतंसं क्षितेः सौभाग्यप्रतिपक्षमिन्दुमहसः सर्गाद्भुतं वेधसः ।**
**धत्ते योऽवधिभूतमीक्षणहृतां नेत्रामृतं योषितां रूपन्यक्कृतकाममद्भुतमणिस्तम्भाभिरामं वपुः ॥ ४४ ॥**

[ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ४४ ॥

---

राज्ये प्रीत्या अभिषिक्तः' इत्यन्वयः । **सरोज-कलश-च्छत्रादिभिः** कमल-कलशा-ऽऽतपत्राकाररेखात्मकैः, **लाञ्छनैः** भाग्यचिह्नैः, **आकीर्णाङ्घ्रितलः** पूर्णपादपृष्ठः, सामुद्रिकशास्त्रे तादृशरेखानां राज्ययोगाभिव्यञ्जकत्वाभिधानात् । तदुक्तम्-"छत्रं तामरसं धनू रथवरो दम्भोलि-कूर्मा-ऽङ्कुशा वापी-स्वस्तिक-तोरणानि च सरः पञ्चाननः पादपः । चक्रं शङ्ख-गजौ समुद्र-कलशौ प्रासाद-मत्स्या यवा यूपस्तूपकमण्डलून्यवनिभृत् सच्चामरो दर्पणः" ॥ १ ॥ इति, "उक्षा पताका कमलाभिषेकः सुदाम केकी धनपुण्यभाजाम्" इति च । **मांसलायतभुजः** मांसलौ—स्थूलौ बलवन्तावित्यर्थः, आयतौ—दीर्घौ च, भुजौ—बाहू यस्य सः, बाहुबलशालीत्यर्थः । **प्रतापवसतिः** प्रतापस्य—शक्तिदण्डजन्यक्षात्रतेजसः, वसतिः—आश्रयः । **श्रीभोज इति** श्रीभोजनाम-विश्रुतः । **तस्य** श्रीसिन्धुराजस्य नृपतेः, **आत्मजः** सुतः, **अजायत** अभूत् । **यः** पञ्चाशत्तमपद्यघटकतत्पदबोध्यत्वेन कवि-तात्पर्यविषयः, भोजराजः, **मुञ्जाख्यया** मुञ्जाख्यतृणविशेषक्षेत्रोपलब्धतया मुञ्जनाम्ना, **ख्यातेन** प्रसिद्धिमापन्नेन **वाक्पति-राजभूपतिना** वाक्पतिराजदेवनाम्ना नृपतिना, **स्वयम्** आत्मनैव न तु भोजपित्रा श्रीसिन्धुराजेन, **योग्य इति** राज्यधुरा-धारणनिपुणोऽयमिति प्रतीत्य, **स्वे राज्ये** स्वाधिष्ठितराज्यासने, **प्रीत्या** वात्सल्येन, **अभिषिक्तः** अभिषेकविधिना स्थापितः ।

श्रीभोजराजे पञ्चमाब्दवयस्के सति श्रीसिन्धुराजो निजमरणमचिरभावि विभाव्य श्रीमुञ्जस्य भुजयो राज्यभारमुत्सङ्गे च श्रीभोजकुमारं निक्षिप्य तद्योग्यतानिष्पत्तौ पश्चाद् भोजाय राज्यमर्पयितुमाज्ञप्तवानासीदिति तदादेशमनुसृत्य तेन तस्मै सदर्पितमित्यैतिह्यम् ।

मुञ्जाख्यया ख्यातेनेत्यत्र छेकानुप्रासः, पतिराज-भूमिपतिनेत्यत्र पुनरुक्तवदाभासश्चालङ्कारः । "कलशस्तु त्रिषु द्वयोः" इति, "चिह्नं लक्ष्म च लाञ्छनम्" इति, "बलवान् मांसलोंऽसलः" इति चामरः ॥ ४३ ॥

**परागाभिधा विवृति**—श्रीभोजराजवपुरुपवर्णयति—**देव्या** इति । 'यः पद्मवसतेः देव्याः विभ्रमसद्म, क्षितेः कर्णा-वतंसम्, इन्दुमहसः सौभाग्यप्रतिपक्षम्, वेधसः सर्गाद्भुतम्, ईक्षणहृताम् अवधिभूतम्, ईक्षणहृतां योषितां नेत्रामृतम्, रूपन्यक्कृतकामम्, अद्भुतमणिस्तम्भाभिरामम्, वपुः धत्ते' इत्यन्वयः । **यः** भोजराजः, **पद्मवसतेः** पद्मं-कमलम्, वसतिः—वासस्थानं यस्यास्तस्याः, **देव्या** लक्ष्मीदेव्याः, **विभ्रमसद्म** विलासास्पदम्, रामणीयकादिगुणातिरेकेण लक्ष्म्याः प्रणयास्पद-त्वात् । **क्षितेः** महीमहिलायाः, **कर्णावतंसं** कर्णालङ्करणम्, तद्वदुद्भासकत्वात्, अन्यालङ्करणस्य त्वधस्तनाङ्गावभासकतया न तद्रूपत्वमुक्तम् । **इन्दुमहसः** चन्द्रकान्तेः, चन्द्रिकाया इत्यर्थः, **सौभाग्यप्रतिपक्षं** सौन्दर्यप्रतिद्वन्द्वि, तदधिकाह्लादकत्वात् । **वेधसः** विश्वसृजः, **सर्गाद्भुतं** सर्गे-सृष्टिकलायाम्, अद्भुतं—आश्चर्यजनकम्, अलौकिकसंस्थानशालित्वात् । **ईक्षणहृताम्** ईक्ष्यते दृश्यते यैस्तानि ईक्षणानि लोकलोचनानि, तानि हरन्ति अपहरन्तीति ईक्षणहृतस्तेषाम्, नयनाकर्षकपदार्थानाम्, **अवधि-भूतं** नयनाकर्षताया निरतिशयोत्कर्षस्थानम्, नयनाकर्षणक्रियायामद्वितीयत्वात् । 'ईक्षणहृताम्' इत्यस्य 'योषिताम्' इत्यनेनान्व-यात् **ईक्षणहृतां** नयनाकर्षिणीनाम्, **योषितां** नारीणाम्, **नेत्रामृतं** नयनपेयपीयूषम्, तद्वन्नयनास्वाद्यत्वात् । **रूपन्यक्कृत-कामं** रूपेण-सौन्दर्येण, न्यक्कृतः—तिरस्कृतः, कामः—कन्दर्पो येन तत्, तदधिकसौन्दर्यास्पदत्वात् । **अद्भुतमणिस्तम्भाभि-रामम्** अद्भुतः—अपूर्वो यः, मणिस्तम्भः—मणिमयः स्तम्भः स्थूणा, तद्वदभिरामं—मनोहरम्, उज्ज्वलद्युतिदिव्यदृढिमास्पदत्वात्, एतावद्विशेषणविशिष्टं **वपुः** शरीरं **धत्ते** धारयति ।

अत्र पादत्रये रूपकम्, तुरीयपादे 'रूपन्यक्कृतकामम्' इत्यत्र व्यतिरेकः, 'अद्भुतमणिस्तम्भाभिरामम्' इत्यत्रोपमा चालङ्कारः । "स्त्रीणां विलास-बिब्बोक-विभ्रमा ललितं तथा" इति, "हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः" इति, "स्रष्टा प्रजापतिर्वेधा विधाता" इति, "स्त्री योषिदबला" इति, "स्तम्भौ स्थूणा-जडीभावौ" इति चामरः, "सद्म स्यान्मन्दिरे नीरे" इति, "लोचनं नयनं नेत्र-मीक्षणं चक्षुरक्षिणी" इति च मेदिनी ॥ ४४ ॥

आयाता शरदित्युदीर्य मुदितैर्दारैः पुरो दर्शिता लीलोद्यानभवा नवा सुमनसः सप्तच्छदक्ष्मारुहाम् ।
यत्सैन्यागमशङ्किनामसुहृदामाकृष्टगन्धा इव श्वासैः खेदनिरायतैर्विदधिरे सद्यः शिरोवेदनाम् ॥ ४५ ॥
श्रुत्वा यं सहसाऽऽगतं निजपुरात् त्रासेन निर्गच्छतां शत्रूणामवरोधनैर्जललवप्रस्यन्दतिम्यत्पुटाः ।
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि क्रीडाद्रौ च मुहुर्मुहुर्विवलितग्रीवैर्विमुक्ता दृशः ॥४६॥
[ शार्दूलविक्रीडिते ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ४५ ॥ ४६ ॥

---

**परागाभिधा विवृतिः**—श्रीभोजबिभीष्यमाणैः रिपुभिरनुभूयमानां शारदीं दुर्दशां दर्शयति—**आयातेति** । 'शरद् आयाता इत्युदीर्य मुदितैः दारैः पुरो दर्शिताः, सप्तच्छदक्ष्मारुहां लीलोद्यानभवाः नवाः सुमनसः, यत्सैन्यागमशङ्किनाम् असुहृदाम्, खेदनिरायतैः श्वासैः, आकृष्टगन्धा इव सद्यः शिरोवेदनां विदधिरे' इत्यन्वयः । **शरद्** आश्विन-कार्तिकमासद्वयात्मक ऋतुविशेषः, **आयाता** अवतीर्णा, सप्तच्छदकलिकोद्गमात्, **इति** इत्येवं वाक्यम्, **उदीर्य** उक्त्वा, **मुदितैः** तत्कुसुमावलोकनहृष्टैः, **दारैः** रिपुकलत्रैः, **पुरः** अग्रे, अभिमुखवर्तिषु सप्तच्छदशाखाधिष्ठितस्तबकेष्वित्यर्थः, **दर्शिताः** केलिकाननविहरणवेलायां दृष्टिपथमवतारिताः, **लीलोद्यानभवाः** प्रमदवनविकसिताः, **नवाः** नवीनाः, न तु प्राचीनाः, तत्र गन्धमान्द्यात्, **सप्तच्छदक्ष्मारुहां** सप्त सप्त छदाः—पत्राणि प्रतिपत्रं येष्वित्यन्वर्थसंज्ञकानां क्ष्मारुहां—वृक्षाणाम्, **सुमनसः** कुसुमानि, **यत्सैन्यागमशङ्किनां** यस्य—भोजराजस्य सैन्यागमं—सैनिकागमं संशयानाम्, **असुहृदां** श्रीभोजराजरिपूणाम्, **खेदनिरायतैः** उक्तशङ्कोदग्रदातङ्कोपचितैः, **श्वासैः** नासिक्यसमीरणैः, **आकृष्टगन्धा इव** आकृष्टः—गृहीतः, गन्धः—आमोदो येभ्यस्तथाभूता इव, घ्रातृतदुपनीतगन्धा इवेत्युत्प्रेक्षा, **सद्यः** तत्क्षणे, **शिरोवेदनां** शिरोव्यथाम्, **विदधिरे** जनयामासुः ।

खललनाभिः सह केलिकाननविहरणपराणां श्रीभोजराजवैरिणामानन्दायोन्मीलत्सप्तपर्णकुसुमावलोकनया स्वसहचरीसूचितः शरदागमः, प्रत्युत संग्रामार्हसमयसमागमधिया श्रीभोजराजसैन्यागमनत्राससमुदीरितश्वाससमारुतोपनीततत्कुसुमसौरभं जिघ्रतां तेषां शिरोवेदनोदयादत्र विषमालङ्कारः ।

"भार्या जायाऽथ पुम्भूम्नि दाराः" इति, "सप्तपर्णो विशालत्वक् शारदो विषमच्छदः" इति, "पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्, स्यादेतदेव प्रमदवनमन्तःपुरोचितम्" इति, "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्" इति, "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इति चामरः ॥ ४५ ॥

**परागाभिधा विवृतिः**—श्रीमद्भोजराजसमागमोदन्तश्रवणानन्तरमदसीयसपत्ननृपतिपत्नीनां निजशयना-ऽऽसन-स्नानादिस्थानेषु ममतामुपवर्णयति—**श्रुत्वा यमिति** । 'सहसाऽऽगतं यं श्रुत्वा त्रासेन निजपुराद् निर्गच्छतां शत्रूणाम्, अवरोधनैः मुहुर्मुहुर्विवलितग्रीवैः [सद्भिः], जललवप्रस्यन्दतिम्यत्पुटाः, दृशः, शुभ्रे सद्मनि, पल्लविनि उपवने, नवाम्भोरुहि वाप्यां, क्रीडाद्रौ च विमुक्ताः' इत्यन्वयः । **सहसा** शीघ्रम्, पूर्वमसूचयित्वैवेत्यर्थः, **आगतं** योद्धुमायातम्, **यं** भोजराजम्, **श्रुत्वा** कर्णाकर्णिकयाऽऽकर्ण्यैव, न तु युद्ध्वा, **त्रासेन** तद्भयेन, **निजपुरात्** स्वनगरात्, स्वराजधानीत इत्यर्थः, **निर्गच्छतां** बहिर्निःसरताम्, पलायमानानामित्यर्थः, **शत्रूणां** प्रकृतराजरिपूणाम्, **अवरोधनैः** अन्तःपुराङ्गनाजनैः स्वस्वामिभिः सार्कं पलायमानैः, **मुहुर्मुहुः** पौनःपुन्येन, **विवलितग्रीवैः** तत्तत्स्थानावेक्षणाय व्यापृतकन्धरैः सद्भिः, **जललवप्रस्यन्दतिम्यत्पुटाः** जललवानां—सकलसुखसम्पद्बन्धुरमन्तःपुरमुत्सृज्यारण्यवासादिशोकाश्रुबिन्दूनाम्, प्रस्यन्देन—प्रस्रवणेन, तिम्यन्तौ—आर्द्रीभवन्तौ, पुटौ—पुटकाकाराक्षिगोलकौ यासां ताः, **दृशः** दृष्टयः, **शुभ्रे** सुधालेपधौततया मणिमयतया वा भासुरे, **सद्मनि** राजमन्दिरे, शयनाऽऽसनस्थानोपरीत्यर्थः, **पल्लविनि** अभिनवदलसन्दोहसान्द्रे विस्तीर्णे वा, **उपवने** अन्तःपुरकृत्रिमकेलिकानने, नीचैस्तनविहारस्थानोपरीत्यर्थः, **नवाम्भोरुहि** नवोन्मीलितकमलशालिन्याम्, **वाप्यां** दीर्घिकायाम्, स्नानादिस्थानोपरीत्यर्थः, **क्रीडाद्रौ** केलिशैले, उच्चैस्तनविहारस्थानोपरीत्यर्थः, **विमुक्ताः** अहो क्व पुनरीदृशानि सुखसाधनानि स्युरिति विचिन्त्य तन्ममतावशाद् भूयोभूयस्तत्तत्स्थानदिदृक्षया विक्षिप्ताः ।

**प्रासादेषु त्रुटितशिखरश्वभ्रलब्धप्रवेशैः प्रातः प्रातस्तुहिनसलिलैः शार्वरैः स्नापितानि ।**
**धन्याः शून्ये यदरिनगरे स्थाणुलिङ्गानि शाखा हस्तस्रस्तैः कुसुमनिकरैः पादपाः पूजयन्ति ॥ ४७ ॥**

[ मन्दाक्रान्ता ]

[ यस्य दोष्णि स्फुरद्धेतौ प्रतीये विबुधैर्ध्रुवम् ।
बौद्धतर्के इवार्थानां राज्ञां नाशो निरन्वयः ॥ १ ॥ [ पथ्या ]
लतावनपरिक्षिप्ते निन्ये यदरिभिर्निशा ।
विन्ध्याद्रेस्तल्परुचिरे न वेश्मनि नवेऽश्मनि ॥ २ ॥ [ नविपुला ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ४७ ॥

**टिप्पनकम्**— [ यस्येत्यादि ]। **प्रतीये** प्रतीतः । कः ? **नाशः** विघातः । केषाम् ? **राज्ञाम्** अरिनृपाणाम् । किम्भूतः ? **निरन्वयः** अपगतवंशः । कैः प्रतीये ? **विबुधैः** देवैः । कस्मिन् सति ? **दोष्णि** बाहौ । कीदृशे ? **स्फुरद्धेतौ** देदीप्यमानप्रहरणे । कस्य ? **यस्य** भोजराजस्य । कस्मिन्निव केषाम् ? **बौद्धतर्के इवार्थानां** यथा बौद्धप्रमाणशास्त्रे नाशः, **विबुधैः** विशिष्टपण्डितैः, **प्रतीये** प्रतीतः, **अर्थानां** घटादीनाम्, कीदृशः ? **निरन्वयः** अनुगमरहितः, नष्टस्यापि द्रव्यस्योत्तरक्षणानुसरणमस्तीत्यर्थः । किम्भूते **बौद्धतर्के** ? **स्फुरद्धेतौ** देदीप्यमानस्वभावादिलिङ्गे, कथं प्रतीये ? **ध्रुवं** निश्चितम् ॥ १ ॥

**टिप्पनकम्**—लतेत्यादि । **यदरिभिः** यस्य–भोजनृपस्य अरिभिः–शत्रुभिः । **निशा** रात्रिः । **निन्ये** नीता । कस्मिन् ? **अश्मनि** दृषदि, **न वेश्मनि** न गृहे । कस्याश्मनि ? **विन्ध्याद्रेः**, भयेन विन्ध्यगिरिमधिरूढा अरय इत्यर्थः । कीदृशे अश्मनि वेश्मनि च ? **तल्पं**–शयनीयम्, **तद्वद्रुचिरे**–सुकुमारपृथुत्वादिगुणे रम्ये, तल्पेन रुचिरे दीप्ते । तथा **नवे** नूतने, तथा **लतावनपरिक्षिप्ते** अशोकचम्पकलतावनवेष्टिते वेश्मनि, वल्लीवनगहनच्छन्नेऽश्मनि, अदृश्य इत्यर्थः ॥ २ ॥

---

शुभ्रसद्मादिषु स्थानेषु रविलोचनरूपैकधर्माभिसम्बन्धादत्र तुल्ययोगिताऽलङ्कारः । "स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम्" इति, "वापी तु दीर्घिका" इति, "दृग्दृष्टी" इति, "आरामः स्यादुपवनम्" इति चामरः ॥ ४६ ॥

**परागाभिधा विवृतिः**—तदरिभूतेषु नृपेषु सामात्यभृत्येषु पलायितेष्वरण्यतामापाद्यमानायामदसीयराजधान्यां देवताया अपि दुर्दशां दर्शयति—**प्रासादेष्विति** । 'शून्ये यदरिनगरे प्रासादेषु त्रुटितशिखरश्वभ्रलब्धप्रवेशैः शार्वरैः तुहिनसलिलैः प्रातः प्रातः स्नापितानि स्थाणुलिङ्गानि धन्याः पादपाः शाखाहस्तस्रस्तैः कुसुमनिकरैः पूजयन्ति' इत्यन्वयः । **शून्ये** विजने, **यदरिनगरे** यस्य–श्रीभोजराजस्य, अरेः–शत्रोः, नगरे–राजधान्याम्, **प्रासादेषु**–देवालयेषु, **त्रुटितशिखरश्वभ्रलब्धप्रवेशैः** त्रुटितानां–श्रीभोजराजसैन्याभिघातभग्नानाम्, शिखराणां–शृङ्गानाम्, ऊर्ध्वभागानामित्यर्थः, श्वभ्रेषु–छिद्रेषु, लब्धः–प्राप्तः, प्रवेशो यैस्तादृशैः, तद्द्वारा शिवलिङ्गोपरिविगलितैरित्यर्थः, **शार्वरैः** शर्वरी–रात्रिः, तद्भवैः, **तुहिनसलिलैः** हिमोदकैः, **स्नापितानि** कृताभिषेकाणि, **स्थाणुलिङ्गानि** शिवलिङ्गानि, **शाखाहस्तस्रस्तैः** शाखारूपेभ्यो हस्तेभ्यः, स्रस्तैः–स्खलितैः, **कुसुमनिकरैः** पुष्पपुञ्जैः, **धन्याः** मानवोचिताचारचतुरतया धन्यवादार्हाः, **पादपाः** तरवः, **पूजयन्ति** अर्चन्ति, तदधिष्ठितविहङ्गरवस्तवेनेति तूह्यम् ।

अत्राप्रकृतपादपकर्तृकार्चनव्यवहारे प्रकृतपुरुषकर्तृकार्चनव्यवहारतादात्म्यारोपात् समासोक्तिः, शाखायां हस्ततादात्म्यारोपाद् रूपकं चालङ्कारः । "प्रासादो देव-भूभुजाम्" इति, "रन्ध्रं श्वभ्रं वपा शुषिः" इति, "अथ शर्वरी । निशा निशीथिनी रात्रिः" इति, "स्थाणू रुद्र उमापतिः" इति चामरः । इदं मन्दाक्रान्तावृत्तम्, तल्लक्षणं तु "मो भ्नौ तौ गौ च घैर्मन्दाक्रान्ता" [ मभनततगगाः घैरिति चतुर्भिर्यतिः ] इति छन्दोऽनुशासनाभिहितमवगन्तव्यमिति ॥ ४७ ॥

अत्र **"यस्य दोष्णि०"** इत्यादयश्चत्वारः श्लोका मुद्रितग्रन्थादौ न दृश्यन्ते, किन्त्वग्रे मेघवाहनवर्णनावसरेऽतो नास्माभिरिह व्याख्याताः, टिप्पनिकाकारेण तु भोजवर्णनपरत्वेनेहैव व्याख्याताः ॥

अन्तर्दग्धागुरुशुचावाप यस्य जगत्पतेः ।
नारीणां संहतिश्चारुवेषाकारागृहे रतिम् ॥ ३ ॥ [ नविपुला ]
दृष्ट्वा वैरस्य वैरस्यमुज्झितास्त्रो रिपुव्रजः ।
यस्मिन् विश्वस्य विश्वस्य कुलस्य कुशलं व्यधात् ॥ ४ ॥] [ पथ्या ]

येषां सैन्यभराहितोरगपतिश्रान्ति प्रयातां बहिर्जायन्ते स्थगिता हिमांशुमहसः श्वेतातपत्रैर्दिशः ।
आभान्ति प्रभवो नृणामितरवत् तेऽप्यागताः सेवया यस्यानेकजनाकुले निजवपुर्मात्राः सभामण्डपे ॥४८॥
[ शार्दूलविक्रीडिते ]

---

**टिप्पनकम्**—अन्तरित्यादि । **यस्य** भोजराजस्य । किम्भूतस्य ? **जगत्पतेः** भुवनरक्षकस्य । **नारीणां संहतिः** स्त्रीवृन्दम्, **आप** लेभे । काम् ? **रतिं** प्रीतिमासक्तिं वा । क ? **गृहे** वेश्मनि । कीदृशी ? **चारुवेषाकारा** चारू-रम्यौ, वेषाऽऽकारौ-नेपथ्याऽऽकृती यस्याः सा तथोक्ता, चारुवेषो वा आकारो यस्याः सा तथोक्ता । कीदृशे गृहे ? **अन्तर्दग्धागुरुशुचौ** अन्तः-मध्ये, दग्धं यद् अगुरु-कृष्णागुरुकाष्ठम्, तेन शुचि-पवित्रम्, सुगन्धीत्यर्थः । अन्यत्र यस्य जगत्पतेररीणां संहतिः, **नावाप** न प्राप्तवती, काम् ? **रतिं** सुखम्, क ? **कारागृहे** गुप्तौ, कीदृशी ? **चारुवेषा** रम्यनेपथ्या, पुनः किम्भूता ? **दग्धा** संतप्ता, क ? **अन्तः** मध्ये, चित्त इत्यर्थः, केन ? **गुरुशुचा** बृहच्छोकेन ॥ ३ ॥

**टिप्पनकम्**— [ **दृष्ट्वेत्यादि** ] । **रिपुव्रजः** अरिसमूहः, **व्यधात्** कृतवान्, किम् ? **कुशलं** कल्याणम्, कस्य ? **कुलस्य** वंशस्य, किम्भूतस्य ? **विश्वस्य** सर्वस्य, किं कृत्वा ? **विश्वस्य** विश्वासं कृत्वा, कस्मिन् ? **यस्मिन्** भोजदेवे, कथम्भूतो रिपुव्रजः ? **उज्झितास्त्रः** त्यक्तायुधः, किं कृत्वा ? **दृष्ट्वा** अवलोक्य, किम् ? **वैरस्यं** विरसताम्, कस्य ? **वैरस्य** विरोधस्य ॥ ४ ॥

**टिप्पनकम्**—येषामित्यादि । **सैन्यभराहितोरगपतिश्रान्ति** सेनासम्भारकृतनागराजखेदं यथा भवति तथा, **प्रयातां** गच्छताम्, क ? **बहिः** बहिःप्रदेशम्, **मात्रा**-परिग्रहः परिवारो वा ॥ ४८ ॥

---

**परागाभिधा विवृतिः**—स्वपराजितैरवनिपतिभिः श्रीभोजराजस्य वरिवस्यामुपवर्णयति—**येषामिति** । 'सैन्यभराहितोरगपतिश्रान्ति बहिः प्रयातां येषां श्वेतातपत्रैः स्थगिताः दिशः हिमांशुमहसः जायन्ते, तेऽपि सेवया निजवपुर्मात्राः आगताः अनेकजनाकुले यस्य सभामण्डपे नृणां प्रभवोऽपि इतरवत् आभान्ति' इत्यन्वयः । **सैन्यभराहितोरगपतिश्रान्ति** सैन्यानां-श्रीमद्भोजादिनृपसैनिकानाम्, भरेण-भारेण, आहिता-जनिता, उरगपतेः-भुजगपतेः, भुवं बिभ्रतः शेषस्येति यावत्, श्रान्तिः श्रमो यस्मिंस्तद् यथा स्यात् तथा, **बहिः** स्वराजधान्या अन्यत्र, **प्रयातां** प्रयाणमाचरताम्, **येषां** श्रीमद्भोजराजारिनृपाणाम्, **श्वेतातपत्रैः** मणिमयदण्डोद्दीप्यमानधवलच्छत्रैः, **स्थगिता** आवृताः, **दिशः** सकलदिशः, **हिमांशुमहसः** हिमांशोः-चन्द्रस्य, महः-तेजो यासु ता इव चन्द्रिकोदञ्चिता इवेति लुप्तोत्प्रेक्षा, **जायन्ते** सम्पद्यन्ते, **ते** तथाविधा अपि, श्रीभोजराजेन जिताः सन्तः, **सेवया** श्रीभोजराजसेवार्थम्, सेवायाः फलविधयैव हेतुत्वेन हेतौ तृतीयोपपत्तिः, **निजवपुर्मात्राः** निजं वपुः-शरीरमेव, मात्रा-उपकरणं येषां ते, सेवकभावेन संन्यस्ताखिलराजोपकरणाः, तेन विजित्य गृहीताखिलराजोपकरणा वेत्यर्थः, **आगताः** सेवकरूपेणोपस्थिताः सन्तः, **अनेकजनाकुले** सचिवादिजनसन्दोहसङ्कुले, **यस्य** श्रीभोजराजस्य, **सभामण्डपे** सभानिकेतने, **नृणां** लोकानाम्, **प्रभवोऽपि** अधिपतयोऽपि, विशिष्टव्यक्तयोऽपीत्यर्थः, **इतरवत्** सामान्यव्यक्तिवत्, **आभान्ति** प्रतिभान्ति ।

अत्रोक्तादिशोत्प्रेक्षा, इवशब्दाध्याहारे तु अतिशयोक्तिरलङ्कारः । "उरगः पन्नगो भोगी" इति, "छत्रं त्वातपत्रम्" इति, "मण्डपोऽस्त्री जनाश्रयः" इति चामरः ॥ ४८ ॥

**न स्वप्नेऽपि समाश्रिता रिपुजनं म्लानिं गता नोन्नतौ लग्ना साधुगुणद्विषां शुचितया कर्णे न दुष्टात्मनाम् ।**
**निर्दोषा इसनेन दिक्षु गमितेत्यात्मीयवार्तामिव व्याकर्तुं व्रजति स्म यस्य तरसा कीर्तिः सुरेन्द्रालयम् ॥४९॥**
[ शार्दूलविक्रीडितम् ]

**निःशेषवाङ्मयविदोऽपि जिनागमोक्ताः श्रोतुं कथाः समुपजातकुतूहलस्य ।**
**तस्यावदातचरितस्य विनोदहेतो राज्ञः स्फुटाद्भुतरसा रचिता कथेयम् ॥ ५० ॥** [ वसन्ततिलका ]

**आसीद् द्विजन्माऽखिलमध्यदेशप्रकाशसांकाश्यनिवेशजन्मा ।**
**अलब्ध देवर्षिरिति प्रसिद्धिं यो दानवर्षित्वविभूषितोऽपि ॥ ५१ ॥** [ उपजातिः ]

---

**टिप्पनकम्—तरसा** शीघ्रम् ॥ ४९ ॥ ५० ॥

**टिप्पनकम्—अलब्धेत्यादि** । [ अलब्ध ] यो लब्धवान् प्राप्तवान्, काम्? प्रसिद्धिं–प्रख्याम्, कथम्? **देवर्षिरिति** देवमुनिरिति, स कथम्? **दानवर्षित्वविभूषितोऽपि** दानवमुनित्वशोभितोऽपि, [ अपिशब्दः ] विरोधसूचकः, परिहारः पुनः, **देवर्षिरिति** नाम दानवर्षित्वं वितरणवर्षित्वम्, तेन विभूषितः, दीनानाथादिदातेत्यर्थः ॥५१॥

---

**परागाभिधा विवृतिः**—श्रीभोजराजस्य कमनीयकीर्तिप्रसारं प्राह—**न स्वप्नेऽपीति** । 'स्वप्ने अपि रिपुजनं न समाश्रिता, उन्नतौ म्लानिं न गता, शुचितया साधुगुणद्विषां दुष्टात्मनां कर्णे न लग्ना, यस्य कीर्तिः, 'अहं निर्दोषा [ अपि ] अनेन दिक्षु गमिता, इति आत्मीयवार्तां व्याकर्तुमिव तरसा सुरेन्द्रालयं व्रजति स्म' इत्यन्वयः । **स्वप्नेऽपि** स्वप्नावस्थायामपि, तादृग्व्यासङ्गदशायामपीत्यर्थः, किमुत अवधानदशायाम्, **रिपुजनं** श्रीभोजराजारिजनम्, **न समाश्रिता** न जातु आश्रयत्वेन प्राप्ताऽस्मि, तेन भोजराजारेरकीर्तिमत्त्वमुक्तं भवति । किञ्च **उन्नतौ** स्वप्रसिद्धौ, **म्लानिम्** अतेजस्वितान्, शिथिलतामित्यर्थः, **न गता** नाश्रिताऽस्मि, अपि तु तीव्रतामेव श्रीभोजराजकीर्तेस्तीव्रतयैव परितः प्रसिद्धेः । अपि च **शुचितया** नैसर्गिकपवित्रतया, **साधुगुणद्विषां** साधूनां–सज्जनानाम्, ये गुणाः, साधवः–समीचीना वा ये गुणाः, तद्द्वेषिणाम्, **दुष्टात्मनां** दुर्जनानाम्, **कर्णे** श्रोत्रविवरे, **न लग्ना** न प्रविष्टाऽस्ति, सज्जनैरेव तद्गुणप्रणयिभिस्तत्कीर्तिश्रवणात् । **यस्य** श्रीभोजराजस्य, कीर्तिः, **निर्दोषा** इत्थं निरपराधाऽपि, **अहं** कीर्तिः, **अनेन** श्रीभोजराजेन, **दिक्षु** दिग्दिगन्तरालेषु, **गमिता** केनचिदपराधेनेव परितो भ्रमिता; पर्यटनं कारितेत्यर्थः । **इति** ईदृशीम्, **आत्मीयवार्ताम्** स्ववृत्तम्, **व्याकर्तुमिव** कथयितुमिव, **सुरेन्द्रालयं** सुराधीशनिकेतनम्, स्वर्लोकमित्यर्थः, **तरसा** क्षिप्रम्, **व्रजति स्म** जगाम, आस्वर्लोकं प्रससारेत्यर्थः ।

अत्रोत्प्रेक्षा-दीपकयोः संसृष्टिः । "शुचिर्ग्रीष्माऽग्नि-शृङ्गारेष्वाषाढे शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु" ॥ इति मेदिनी, "वार्ता वार्तिङ्गणे वृत्तौ वार्ता कृष्यादुदन्तयोः" इति विश्वः ॥ ४९ ॥

**परागाभिधा विवृतिः**—अथैवमुपाख्यायमानश्रीभोजराजप्रसादनमेव प्रकृतप्रबन्धप्रयोजनं प्रतिजानीते—**निःशेषवाङ्मयेति** । 'निःशेषवाङ्मयविदः अपि जिनागमोक्ताः कथाः श्रोतुं समुपजातकुतूहलस्य, तस्य राज्ञः विनोदहेतोः, स्फुटाद्भुतरसा इयं कथा रचिता' इत्यन्वयः । **निःशेषवाङ्मयविदोऽपि** जिनागमातिरिक्ताशेषशास्त्रज्ञस्यापि, **जिनागमोक्ताः** जिनप्रोक्तागमनिबद्धाः, **कथाः** उपाख्यानानि, **श्रोतुं** सप्रणयमाकर्णयितुम्, **समुपजातकुतूहलस्य** समुद्भूतौत्सुक्यस्य, **अवदातचरितस्य** पवित्रचरित्रस्य, **राज्ञः** भूपतेः, **तस्य** श्रीभोजराजस्य, **विनोदहेतोः** प्रमोदहेतोः, **स्फुटाद्भुतरसा** स्फुटाः–अभिव्यक्ताः, अद्भुताः–अनासादितपूर्वत्वेन आश्चर्यजनकाः, रसाः–शृङ्गारादयो यासामसौ, **इयं** कविहृदयस्थतया प्रत्यक्षा, **कथा** तिलकमञ्जरीसंज्ञकगद्यकाव्यम्, **रचिता** प्रणीता, मयेति शेषः ।

कथागतस्फुटाद्भुतरसत्वस्य तद्विनोदहेतुत्वादत्र काव्यलिङ्गालङ्कारः । "अवदातः सिते पीते शुद्धे" इत्यमरः ॥ ५० ॥

**परागाभिधा विवृतिः**—अथात्मनः कथायामतिश्रद्धेयतामाधातुकामः कविः स्ववंशविशुद्धिमुद्भावयन्नादौ निजपितामहगतमाध्यात्मिकमहः उपन्यस्यति—**आसीदिति** । 'अखिलमध्यदेशप्रकाशसाङ्काश्यनिवेशजन्मा [सः] द्विजन्मा आसीत्, यः दानवर्षित्वविभूषितोऽपि देवर्षिरिति प्रसिद्धिम् अलब्ध' इत्यन्वयः । **अखिलमध्यदेशप्रकाशसांकाश्यनिवेशजन्मा**

शास्त्रेष्वधीती कुशलः क्रियासु बन्धे च बोधे च गिरां प्रकृष्टः जि. गांधीनगर, पिन-3820
तस्यात्मजन्मा समभून्महात्मा देवः स्वयम्भूरिव सर्वदेवः ॥ ५२ ॥ [ उपजातिः ]

---

**टिप्पनकम्—शास्त्रेष्वित्यादि । आत्मजन्मा पुत्रः, ब्रह्माऽपि आत्मना जन्म यस्य स तथोक्तः, उभयोः सर्व-विशेषणानि योज्यानि ॥ ५२ ॥**

---

अखिलः–अखण्डो यः, मध्यदेशः–हिमाचल-विन्ध्याचलान्तरालभूतः, "हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः" ॥ इति परिभाषितो देशविशेषः, तत्र प्रकाशः–सर्वविधसमृद्धिप्रसिद्धिशाली, साङ्काश्यनिवेशः–सङ्काशेन निर्वृत्तं साङ्काश्यम्, तच्चासौ निवेशो नगरम्, तत्र जन्म–प्रादुर्भावो यस्यासौ, सः–उत्तरार्धगतयत्पदप्रतिपाद्यत्वेन कवेरभिप्रेतः, **द्विजन्मा** विप्रः, आसीत्, **यः** विप्रः, **दानवर्षित्वविभूषितोऽपि** दानवेषु–दैत्येषु, ऋषित्वेन–मुनित्वेन, विभूषितोऽपि-अलङ्कृतोऽपि, दैत्येषु मुनिरपीत्यर्थः, **देवर्षिरिति** देवेषु ऋषिरिति–मुनिरिति, **प्रसिद्धिं** प्रख्यातिम्, **अलब्ध** प्राप्तवानिति विरोधः, पर्यवासने तु दानं–देयम्, सत्पात्रदेयजनेषु वर्षति–विमुञ्चतीति दानवर्षी, तत्त्वेनालङ्कृतोऽपि देवर्षिरिति नाम्ना प्रसिद्धिं लब्धवानित्यर्थेन तत्परिहारादत्र विरोधाभासालङ्कारः ।

"असुरा दैत्य-दैतेय-दनुजेन्द्रारि-दानवाः" इत्यमरः, "निवेशः सैन्यविन्यासे न्यासे द्रङ्ग-विवाहयोः" इत्यनेकार्थसङ्ग्रहः, तत्र द्रङ्गपदं नगररूपार्थकम् ॥ इदमुपजातिवृत्तम्, प्रथम-चतुर्थपादयोरिन्द्रवज्रा, द्वितीय-तृतीयपादयोरुपेन्द्रवज्रा, एतयोः सङ्करेणोपजातिः, यदुक्तं छन्दोऽनुशासने–"तौ जगाविन्द्रवज्रा" "जतजा गावुपेन्द्रवज्रा" "एतयोः परयोश्च सङ्कर उपजातिश्चतुर्दशधा" [ एतयोः–इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करः–अन्योऽन्यपादमीलनमुपजातिः ] इति ॥ ५१ ॥

**परागाभिधा विवृतिः**—अथ निजपितरमुपश्लोकयति—**शास्त्रेष्विति** । 'शास्त्रेषु अधीती, क्रियासु कुशलः, गिरां बन्धे बोधे च प्रकृष्टः, महात्मा, सर्वदेवः तस्य आत्मजन्मा समभूत् स्वयम्भूः देवः इव' इत्यन्वयः । **शास्त्रेषु** अशेषवाङ्मयेषु, न तु क्वचिदेकत्रैव शास्त्रे, **अधीती** अधीतं येनासौ, समनुशीलितसकलशास्त्र इत्यर्थः । **क्रियासु** धार्मिक-व्यावहारिककृत्यकलापे, न तु क्वचिदेव क्रियायाम्, **कुशलः** निपुणः, **गिरां** वाचाम्, **बन्धे** कमनीयकाव्यात्मना विरचने, अथ च **गिरां** श्रौतस्मार्तरूपाणां भारतीनां **बोधे** अर्थमीमांसने, **प्रकृष्टः** सर्वोत्कृष्टः, **महात्मा** आध्यात्मिकसम्पदा महनीयात्मा, **सर्वदेवः** सर्वदेवनामा, **तस्य** देवर्षिनाम्नो विप्रस्य, **आत्मजन्मा** सुतः, **समभूत्** सम्यग् बभूव, क इव ? **स्वयम्भूरिव** स्वयमेव भवति न तु कर्मविपाकेनेति स्वयम्भूः, ब्रह्मेत्यर्थः, तादृशदेव इव, ब्रह्माऽपि **शास्त्रेष्वधीती** शास्त्रेषु–वेदेषु, अधीती 'इंक् स्मरणे" इति वचनाद् अधीतं–स्मृतं येनासौ, प्रथमतः स्मृतसकलवेद इत्यर्थः, **क्रियासु** जगद्रचनासु, **कुशलः** निपुणः, **गिरां** वाणीनाम्, **बन्धे** रचनायाम्, **बोधे** ज्ञाने च, **प्रकृष्टः** प्रधानः, विविधग्रन्थरचनाशक्तियुक्तः, विविधग्रन्थबोधयुक्तश्चेत्यर्थः, यद्वा **गिरां** वेदरूपवाणीनाम्, **बन्धे** मुखरूपस्थानस्थापने, **प्रकृष्टः** प्रधानः, चतुर्भिर्मुखैश्चतुर्णां वेदानां धारणे निपुण इत्यर्थः । यद्वा **गिरां** निजतनयायाः–सरस्वत्याः, मानार्थत्वाद् बहुवचनम्, **बन्धे** पुत्रीस्नेहेनाऽऽलिङ्गनादौ हस्तादिना बन्धे परिवेष्टने, **बोधे** तन्मनोभावविज्ञाने, **प्रकृष्टः** निपुणः, **आत्मजन्मा** आत्मना–स्वयम्, जन्म यस्य सः, तदुक्तम्–"हिरण्यवर्णमभवदत्राण्डमुदकेशयम् । तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूर्लोकविश्रुतः" ॥ इति, अत एव ब्रह्मा प्रथमसृष्टास्वप्सु स्वयमुप्ते स्वशक्तिभूते बीजेऽरुणार्कमण्डलायमानहैमाण्डरूपतामापद्यमाने लिङ्गशरीरावच्छिन्नजीवतत्त्वमनुप्रविश्य सृष्ट्यादौ स्वयमेवोद्भवतीति तस्य हिरण्यगर्भत्वं स्वयम्भूत्वं च मन्वादिनोदीरितमुपपद्यते । **महात्मा** आध्यात्मिकसम्पदा महनीयात्मा, **सर्वदेवः** सर्वेषां प्राणिनां देवः तन्मतानुसारिभिस्तथाभ्युपगमात् ।

अत्र पूर्णोपमालङ्कारः, तृतीयपादेऽन्त्यानुप्रासः, द्वितीयपादे छेकानुप्रासः, एषां परस्परनैरपेक्ष्यात् संसृष्टिः । "हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः" इत्यमरः ॥ ५२ ॥

तज्जन्मा जनकाङ्घ्रिपङ्कजरजःसेवाप्तविद्यालवो
विप्रः श्रीधनपाल इत्यविशदामेतामबध्नात् कथाम् ।
अक्षुण्णोऽपि विविक्तसूक्तिरचने यः सर्वविद्याब्धिना
श्रीमुञ्जेन सरस्वतीति सदसि क्षोणीभृता व्याहृतः ॥ ५३ ॥ [ शार्दूलविक्रीडितम् ]

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ] ॥ ५३ ॥

**परागाभिधा विवृतिः**– अथाधिकृतकथाकर्तृत्वेन कविरात्मानं परिचाययति—**तज्जन्मे**ति । 'तज्जन्मा जनकाङ्घ्रिपङ्कजरजःसेवाप्तविद्यालवः, श्रीधनपाल इति [ सः ] विप्रः, अविशदाम् एतां कथाम्, अबध्नात्, यः विविक्तसूक्तिरचने अक्षुण्णोऽपि सर्वविद्याब्धिना श्रीमुञ्जेन क्षोणिभृता सदसि सरस्वती इति व्याहृतः' इत्यन्वयः । **तज्जन्मा** तस्माद्–अनुपदोपश्लोकितात् सर्वदेवविप्रात्, जन्म–उत्पत्तिर्यस्य सः, सर्वदेवात्मज इत्यर्थः । **जनकाङ्घ्रिपङ्कजरजःसेवाप्तविद्यालवः** जनकस्य–स्वपितृदेवस्य, अङ्घ्रिपङ्कजरजसां–चरणारविन्दरेणूनाम्, सेवया–सेवाप्रसादेन, आप्तः–लब्धः, विद्यालवः–विद्यालेशो येनासौ, एतेनात्मनः पितृदेवत्वं लवपदस्वारस्येन निरभिमानत्वं च ध्वनितम् । **श्रीधनपाल इति** श्रीधनपालेत्याख्यया विख्यातः, सः–उत्तरार्धगतयत्पदप्रतिपाद्यत्वेन कवेरभिप्रेतः, **विप्रः**–ब्राह्मणः, **एतां**–तिलकमञ्जरीनाम्नीम्, **अविशदां** न विद्यते विशदा कापि कथा यदपेक्षया ताम्, सर्वोत्कृष्टविशुद्धिशालिनीमित्यर्थः, **कथाम्** आख्यायिकाम्, **अबध्नात्**–व्यरचयत्, कथाप्रणयनोत्तरमेव पद्यात्मकपीठिकाप्रणयनेनात्र भूतकालनिर्देशः, यद्वा नैनामसौ कविरपूर्णामरचयत्, अपि तु पूर्वमप्येकदा विरच्य श्रीभोजराजायोपहृतवान् आसीत् । परन्त्वसौ तदनवधानवशाद् अनश्यदिति तां स्मारं स्मारं पुनर्विरचयामासेति पूर्वरचनामाश्रित्य भूतकालनिर्देशः । **यः** धनपालः, **विविक्तसूक्तिरचने** विविक्तसूक्तीनां–विशुद्धमधुरगिराम्, यद्वा अर्थांशे समालोचितरुचिरवचसाम्, रचने–विगुम्फने, **अक्षुण्णोऽपि** अभ्यासशून्योऽपि, अप्रगल्भोऽपीत्यर्थः, **सर्वविद्याब्धिना** निखिलविद्यासागरेण, अथ च–**क्षोणिभृता** अवनिपतिना, सरस्वती-श्रियोः सहकेलिनिलयेनेत्यर्थः, **श्रीमुञ्जराजेन** तन्नाम्ना राज्ये स्वयमभिषिक्तवता भोजपितृव्येन, **सदसि** सभायाम्, **सरस्वतीति** पुमाकृतिमती शारदैवायमिति, **व्याहृतः** समुद्घोषितः ।

अत्रातिशयोक्तिरलङ्कारः । "विशदः पाण्डुरे व्यक्ते" इति हैमः, "विविक्तौ पूत-विजनौ" इत्यमरः ॥ ५३ ॥

---

अस्ति रम्यतानिरस्तसमस्तसुरलोका [ अ ], स्वपदापहारशङ्कितशतक्रतुप्रार्थितेन शततमक्रतुवाञ्छाविच्छेदार्थमिव पार्थिवानामिक्ष्वाकूणामुत्पादिता प्रजापतिना [आ], वृत्तोज्ज्वलवर्णशालिनी कर्णिकेवाम्भोरुहस्य मध्यभागमलङ्कृत्य स्थिता भारतवर्षस्य [ इ ], तुषारधवलभित्तिना विशालवप्रेण परिगता प्राकारेण [ ई ],

---

**टिप्पनकम्**—अस्तीत्यादिर्नगरीवर्णकः [अ] । शतक्रतुः-इन्द्रः [आ] । **वृत्तोज्ज्वलवर्णशालिनी** निर्मलशीला ये वर्णाः-ब्राह्मणादयः, तैः शालिनी-शोभायमाना पुरी, **कर्णिका** च-बीजकोषश्च, **वृत्ता**-वर्तुला, धवलवर्णशालिनी च [ इ ] । **वप्रः**-तटः [ ई ] ।

---

**परागाभिधा विवृतिः**—अथ मङ्गलादिकमाचर्य प्रकृतकथामुपन्यस्यति—**अस्ती**ति । 'उत्तरकोशलेषु 'अयोध्या' इति यथार्थाभिधाना नगरी अस्ति' इति दूरेणान्वयः, **उत्तरकोशलेषु** कोशलदेशोत्तरखण्डमध्ये, कोशलशब्दस्य देशविशेषवाचित्वाद् बहुवचनेन निर्देशः, **अयोध्या इति** 'अयोध्या' इतिनाम्नी, **यथार्थाभिधाना** अर्थम्-अवयवार्थम्, अनतिक्रम्य वर्तेत इति यथार्थम्, यथार्थम् अभिधानं-नाम यस्याः सा, अवयवार्थश्च 'योद्धुं शक्या योध्या, न योध्या अयोध्या' इति, विपुलरक्षणसाधनसंकलिततया रिपुभिरनाक्रमणीयेति भावः, **नगरी** "पुण्यक्रियादिनिपुणैश्चातुर्वर्ण्यजनैर्युता । अनेकजातिसम्बद्धा नैकशिल्पिसमाकुला । सर्वदैवतसम्बद्धा नगरीत्यभिधीयते" इतिलक्षणलक्षिता पुरी, **अस्ति** विद्यते, कविकालेऽपि विद्यमानत्वात् । तामेव नगरीं विशिनष्टि—**रम्यतानिरस्तसमस्तसुरलोका** रम्यतया-स्वसौन्दर्येण, निरस्तः-तिरस्कृतः, समस्तः-सकलः, सुरलोकः-सुरपुरी यया सा । अत्रातिशयोक्तिरलङ्कारः । [अ] । पुनः कीदृगसौ नगरी ? **स्वपदापहारशङ्कितशतक्रतुप्रार्थितेन** स्वपदस्य-स्वाराज्यपदस्य, इन्द्रपदस्येत्यर्थः, अपहारे-शततममश्वमेधं कृत्वा इक्ष्वाकुभिस्तत्पदात् प्रच्यावने, शङ्कितः-शङ्काकुलो यः, शतक्रतुः-इन्द्रः, तेन प्रार्थितेन-अभ्यर्थितेन, **प्रजापतिना** ब्रह्मणा, **उत्पादितेव** स्वर्गादुत्कृष्टतया सृष्टेवेत्युत्प्रेक्षा, किमर्थं प्रार्थितेन ? **इक्ष्वाकूणाम्** इक्ष्वाकुवंशजानाम्, **पार्थिवानां** नृपाणाम्, **शततमक्रतुवाञ्छाविच्छेदार्थमिव** एकोनशतमश्वमेधाननुष्ठाय या शततमक्रतोः-शततमाश्वमेधस्य वाञ्छा-चिकीर्षा समजनि, तस्या विच्छेदार्थं-निवृत्त्यर्थम् । "अश्वमेधशतादिन्द्रो जायते" इति श्रुत्वा इन्द्रपदस्य क्रतुशतसाध्यतया इक्ष्वाकुभिरेकोनशताश्वमेधेष्वनुष्ठितेषु अवशिष्टेन शततमाश्वमेधेन स्वपदप्रच्युतिमाशङ्क्य मर्त्यलोक एव स्वर्गोत्कृष्टनगरीं कारयित्वा तदीयतद्वाञ्छानिवृत्तिमिन्द्रः प्रार्थितवानासीदिति प्रार्थनाफलतया तद्वाञ्छाविच्छेदोत्प्रेक्षा, यद्वा किमर्थमुत्पादिता ? इत्याकाङ्क्षया शततमक्रतुवाञ्छाविच्छेदार्थत्वमुत्पादनक्रियायामन्वेतीति तत्फलोत्प्रेक्षेति बोध्यम् । [आ] । पुनः कीदृगसौ नगरी ? **वृत्तोज्ज्वलवर्णशालिनी** वृत्तेन-"गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः । प्रवर्तनं च हितानां तत् सर्वं वृत्तमुच्यते" ॥ इति वृत्तपदपरिभाषितार्थेन चारित्रेण, उज्ज्वलैः-देदीप्यमानैः, वर्णैः-ब्राह्मणादिभिः, शालते-शोभते तच्छीला या तादृशी, अत्रातिशयोक्तिरलङ्कारः, अत एव **भारतवर्षस्य** भारतक्षेत्रस्य, **मध्यभागं** केन्द्रस्थानम्, **अलङ्कृत्य** स्वेन विभूष्य, **स्थिता,** कस्य मध्यभागमलङ्कृत्य कीदृशी केव ? **अम्भोरुहस्य** कमलस्य, मध्यभागमलङ्कृत्य, **वृत्तोज्ज्वलवर्णशालिनी कर्णिकेव** वृत्ता-वर्तुलाकारा, उज्ज्वला-विकसिता, वर्णशालिनी पीतात्मकरूपशालिनी, यद्वा उज्ज्वलं-सुवर्णम्, तद्वर्णशालिनी स्फीतपीतरूपशालिनी उज्ज्वलपीतरूपशालिनी वा, या कर्णिका-कमलबीजकोषः, सा इवेत्यर्थः । अत्र श्लेषानुप्राणितोपमालङ्कारः, भारतवर्षस्याम्भोरुहेण समं बिम्बानुबिम्बभावान्निर्देशनालङ्कारश्च । "वृत्तं वृत्तौ दृढे मृते । चरित्रे वर्तुले छन्दस्यतीताधीतयोर्वृत्ते" इति, "उज्ज्वलस्तु विकासिनि । शृङ्गारे विशदे दीप्ते" इति चानेकार्थसङ्ग्रहः, "उज्ज्वलः स्वर्णम्" इति शब्दस्तोममहानिधिः, "वर्णो गुणाक्षरयशःशुक्लादिब्राह्मणादिषु । वर्णः स्तुतौ कथायां च वर्णः स्याद् भेद-रूपयोः" इति शाश्वतः ॥ [ इ ] । पुनः कीदृगसौ नगरी ? **प्राकारेण** सालेन, कोट्टेनेत्यर्थः, **परिगता** वेष्टिता, "प्राकारो वरणः सालः" इत्यमरः, कीदृशेन तेन ? **तुषारधवलभित्तिना** तुषार इव-हिममिव कर्पूरमिव वा, धवला-शुभ्रा, भित्तिः-कुड्यं यस्य तादृशेन, पुनः कीदृशेन तेन ? **विशालवप्रेण** विशालः-बृहत्तरः, वप्रः-प्राकाराधारभूता परिखोद्धृतमृच्चयोच्चभूमिर्यस्य तादृशेन, "चयो वप्रोऽस्य पीठभूः" इत्यभिधानचिन्तामणिः, [ ई ] ।

**विपुलसोपानसुगमावतारवापीशतसमाकुला [ उ ], मनोरथानामपि दुर्विलङ्घेन प्लवमानकरिमकरकुम्भीरभीषणोर्मिणा जलप्रतिबिम्बितप्राकारच्छलेन जलराशिशङ्कया मैनाकमन्वेष्टुमन्तःप्रविष्टहिमवतेव महता खातवलयेन वेष्टिता [ऊ], पवनपटुचलितधवलध्वजकलापैर्जामदग्न्यमार्गणाहतकौञ्चाद्रिच्छिद्रैरिवोद्भ्रान्तराजहंसैराशानिर्गममार्गायमाणैश्चतुर्भिरत्युच्चैर्गोपुरैरुपेता [ ऋ ], प्रांशुशिखराग्रज्वलत्कनककलशैः सुधापङ्कधवलप्राकारवलयितैरमरमन्दिरमण्डलैर्मण्डलितभोगमध्यप्रवेशितोन्मणिफणासहस्रं शेषाहिमुपहसद्भिरुद्भासितचत्वरा [ ॠ ],**

---

**टिप्पणकम्**—[ नेह व्याख्यातम् ]।

---

**परागाभिधा विवृतिः**—पुनः कीदृगसौ नगरी ? **विपुलसोपानसुगमावतारवापीशतसमाकुला** विपुलैः–विशालैः, असंकीर्णैरित्यर्थः, सोपानैः–निःश्रेणिकाभिः, सुगमः–सुकरः, अवतारः–अधोगमनं यासु तासाम्, वापीनां–जलाशयविशेषाणाम्, शतैः समाकुला–व्याप्ता, "शतेन धनुर्भिः पुष्करणी, त्रिभिर्दीर्घिका, चतुर्भिर्द्रोणः, पञ्चभिस्तडागः, द्रोणाद् दशगुणा वापी" इति शब्दस्तोममहानिधौ परिभाषितत्वात्, [उ]। पुनः कीदृगसौ नगरी ? **महता** विस्तृतेन, **खातवलयेन** परिखामण्डलेन, **वेष्टिता** परिवृता, कीदृशेन तेन ? **मनोरथानामपि** संकल्पानामपि, **दुर्विलङ्घेन** दुरतिक्रमेण, यदुल्लङ्घयितुमोजस्विनामपि संकल्पमात्रमपि न सम्भवति तादृशेनेत्यर्थः, पुनः कीदृशेन तेन ? **प्लवमानकरि-मकर-कुम्भीर-भीषणोर्मिणा** प्लवमानैः–उच्छलद्भिः, करिभिः–जलहस्तिभिः, मकरैः–स्वना-विदितैर्जलजन्तुविशेषैः, कुम्भीरैः–जलशूकरैश्च, भीषणाः भयानकाः, ऊर्मयः–तरङ्गा यस्मिन् तेन, पुनः कीदृशेन ? **अन्तःप्रविष्टहिमवतेव** अन्तःप्रविष्टः–मध्ये प्रविष्टः, हिमवान्–हिमाचलो यत्र तादृशेनेवेत्युत्प्रेक्षा, केन रूपेण तत्र तत्प्रवेशः ? **जलप्रतिबिम्बितप्राकारच्छलेन** जले–अधस्तनपरिखोदके, प्रतिबिम्बितः–नैर्मल्यात् प्रतिफलितो यः, प्राकारः–तदुपरितनः, तच्छलेन–तद्व्याजेन, किमर्थमसौ तत्र प्रविष्टः ? **जलराशिशङ्कया** विशालताऽगाधताभ्यां तत्र समुद्रशङ्कया, **मैनाकं** तन्नामकं समुद्रमग्नमात्मजम्, **अन्वेष्टुं** गवेषयितुम् [ऊ]। पुनः कीदृगसौ नगरी ? **गोपुरैः** पुरद्वारैः, **उपेता** युक्ता, "पुरद्वारं तु गोपुरम्" इत्यमरः, कीदृशैस्तैः ? **पवनपटुचलितधवलध्वजकलापैः** पवनैः–बाह्यवायुभिः, पटु यथा स्यात् तथा चलितः–कम्पितः, धवलध्वजानां–श्वेतपताकानाम्, कलापः–समूहो येषु तादृशैः, पुनः कीदृशैरिव तैः ? **जामदग्न्यमार्गणाहतकौञ्चाद्रिच्छिद्रैरिव** जामदग्न्यस्य–जमदग्नेरपत्यस्य परशुरामस्य, मार्गणैः–बाणैः, आहतस्य छिन्नस्य, कौञ्चाद्रेः–कौञ्चपर्वतस्य, छिद्रैरिव–विवररूपैरिवेत्युत्प्रेक्षा, "कुञ्चतीति कुचः, प्रज्ञाद्यणि कौचः, कौञ्चोऽपि" इत्यभिधानचिन्तामणिवृत्त्या तस्योभयाभिधानप्रसिद्धिः, अत एव **उद्भ्रान्तराजहंसैः** उत्–ऊर्ध्वम्, भ्रान्ताः–पवनोद्धूयमानधवलपताकासु भ्रमगोचरतां गताः, राजहंसाः–रक्तचरणचञ्चुचणाः श्वेतवर्णा हंसविशेषा येषु तादृशैः, कौञ्चाद्रिविवरे तु उद्भ्रान्ताः–उपरिभ्रमणं कृतवन्तः, राजहंसा येष्वित्यर्थो बोध्यः, पुनः कीदृशैस्तैः ? **आशानिर्गममार्गायमाणैः** आशानां–पूर्वादीनां चतसृणां दिशाम्, निर्गमः–निष्क्रमणम्, तन्मार्गायमाणैः–तन्मार्गवद् आचरणकारकैः, एतेन चतुर्दिग्वर्तित्वं विशालत्वं च तेषां सूचितम्, पुनः कीदृशैस्तैः ? **अत्युच्चैः** अतिशयेनोन्नतैः, कतिभिस्तैः ? **चतुर्भिः** पूर्व-पश्चिमोत्तर-दक्षिणैः। अत्रातिशयोक्तिरुत्प्रेक्षया संसृज्यते [ऋ]। पुनः कीदृगसौ नगरी ? **अमरमन्दिरमण्डलैः** देवमन्दिरवृन्दैः, **उद्भासितचत्वरा** उद्भासितानि–स्वधवलिमातिशयेन उज्ज्वलानि, चत्वराणि अङ्गणानि यस्यास्तादृशी, कीदृशैस्तैः ? **प्रांशुशिखराग्रज्वलत्कनककलशैः** प्रांशूनाम्–उच्चानाम्, शिखराणां–शृङ्गाणाम्, अग्रेषु–मौलिषु, ज्वलन्तः–उद्भासमानाः, कनककलशाः सुवर्णकुम्भा येषु तादृशैः, पुनः कीदृशैस्तैः ? **सुधापङ्कधवलप्राकारवलयितैः** सुधायाः–भस्मसात्कृतशुक्तिकादिचूर्णाख्यद्रव्यस्य, पङ्केन–द्रवेण, धवलैः–शुभ्रैः, प्राकारैः, वलयितैः–वेष्टितैः, अत एव **मण्डलितभोगमध्यप्रवेशितोन्मणिफणासहस्रं** मण्डलितस्य–वलयितस्य, भोगस्य–शरीरस्य, मध्ये, प्रवेशितं–निवेशितम्, उन्मणि–उद् ऊर्ध्वं मणिर्यस्य तादृशं फणासहस्रं यस्य तथाभूतम्, **शेषाहिं** शेषनागम्, **उपहसद्भिरिव** शोभातिशयेन तिरस्कुर्वद्भिरिवेत्युत्प्रेक्षा, अत्र वलयितशेषस्थानीयं धवलप्राकारवलयितममरमन्दिरवृन्दम्, फणास्थानीयानि च शिखराणि, मणिस्थानीयाश्च कनककलशा बोध्याः, अत्र काव्यलिङ्गालङ्कारोऽतिशयोक्त्या संसृज्यते, [ॠ]।

त्वरापतज्जलविसरसारणीसिक्तसान्द्रबालद्रुमतलनिषादिना परिश्रान्तपथिकलोकेन प्रतिदिवसमाकर्ण्यमानमधुरतारघटीयन्त्रचीत्कारैः परित्यक्तसकलव्यापारेण पौरवनितामुखार्पितदृशा सविक्रियं प्रजल्पता पठता गायता च भुजङ्गसमाजेन क्षणमप्यमुच्यमानमनोभवभवभवानीभवनैः प्रतिदिवसमधिकाधिकोन्मीलन्नीलकान्तिभिः स्वसन्ततिप्रभवपार्थिवप्रीतये दिनकरेणेवाकृष्य संचार्यमाणसकलशर्वरीतिमिरैरमरकाननानुकारिभिरारामैः श्यामायमानपरिसरा [ ऌ ], गिरिशिखरततिनिभशातकुम्भप्रासादमालाध्यासितोभयविभागैः स्फुटविभाव्यमानमरकतेन्द्रनीलवज्रवैडूर्यराशिभिश्चामीकराचलतटीव चण्डांशुरथचक्रमार्गैः पृथुलायतैर्विपणिपथैः प्रसाधिता [ ॡ ],

---

**टिप्पनकम्—परिसरः**-पर्यन्तः [ ऌ ]। **प्रसाधिता** मण्डिता [ ॡ ]।

---

**परागाभिधा विवृतिः**—पुनः कीदृगसौ नगरी? **आरामैः** उपवनैः, क्रीडाकाननैरित्यर्थः, **श्यामायमानपरिसरा** श्यामायमानः-श्यामीभवन्, परिसरः-स्वप्रान्तप्रदेशो यस्यास्तादृशी, "पर्यन्तभूः परिसरः" इत्यमरः, कीदृशैरारामैः? **त्वरापतज्जलविसरसारणीसिक्तसान्द्रबालद्रुमैः** त्वरया-वेगेन, न तु विलम्बेन, पतन्-स्यन्दमानः, जलानाम्, विसरः-संघातो यत्र तया, सारण्या-प्रणाल्या, सिक्ताः, सान्द्राः-निबिडाः, बालद्रुमाः- लघुपादपा येषु तैः, पुनः कीदृशैः? **द्रुमतलनिषादिना** वृक्षाधश्छायोपवेशिना, **परिश्रान्तपथिकलोकेन** परिश्रान्तेन-मार्गगमनक्लान्तेन, पथिकलोकेन-प्रवासिजनेन, **प्रतिदिवसं** प्रतिदिनम्, **आकर्ण्यमानमधुरतारघटीयन्त्रचीत्कारैः** आकर्ण्यमानाः-श्रूयमाणाः, मधुराः-श्रोत्रपेयाः, ताराः-उच्चाः, घटीयन्त्रस्य-अरघट्टसंज्ञकस्य जलोद्धारणयन्त्रस्य, चीत्कारा येषु तादृशैः, पुनः कीदृशैः? **क्षणमपि** निमेषमात्रमपि, **अमुच्यमानमनोभवभवभवानीभवनैः** अमुच्यमानः-अपरित्यज्यमानः, मनोभवः-कामदेवः, विलास इत्यर्थः, येषु तादृशानि, भवस्य-शिवस्य, भवान्याः-पार्वत्याश्च, भवनानि-मन्दिराणि यत्र तथाविधैः, शिवसामीप्येऽपि मदनोद्दीपकैरित्यर्थः, यद्वा मनोभवस्य-कामस्य, भवस्य-शिवस्य, भवान्याः-पार्वत्याश्च, मनोभव एव भवः, जगत्कारणत्वात्, तस्य भवानी-पत्नी, रतिरित्यर्थः, तस्या वा, भवनममुच्यमानं यत्र तथाविधैः, केनामुच्यमानमनोभवभवानीभवनैः? **भुजङ्गसमाजेन** लम्पटपटलेन, कीदृशेन तेन? **परित्यक्तसकलव्यापारेण** परित्यक्तः-सर्वतोभावेन वर्जितः, सकलव्यापारः-विलासातिरिक्तं निखिलकार्यं येन तादृशेन, पुनः कीदृशेन? **पौरवनितामुखार्पितदृशा** पौरवनितानाम्-अयोध्यानगरीवास्तव्यनारीणाम्, मुखेषु, अर्पिता- निपातिता, दृग्-दृष्टिर्येन तादृशेन, किं कुर्वता च तेन? **सविक्रियं** विविधा क्रिया विक्रिया भ्रूभङ्गादिरूपा, तत्सहितं यथा स्यात्तथा, **प्रजल्पता** किमपि किमप्यालपता, **पठता** शिवस्तोत्रादिपाठं कुर्वता, **गायता च** शिवादिगुणगानं कुर्वता च, पुनः कीदृशैरारामैः? **प्रतिदिवसं** प्रतिदिनम्, **अधिकाधिकोन्मीलन्नीलकान्तिभिः** अधिकाधिकम्-अधिकादधिकम, निरतिशयमित्यर्थः, उन्मीलन्ती-उद्भासमाना, नीला-कृष्णा, कान्तिः-द्युतिर्येषु तादृशैः, अत एव कीदृशैरिव? **दिनकरेण** सूर्येण, **आकृष्य** स्ववंशजराजस्वामिकभूमण्डलादपहृत्य, **संचार्यमाणसकलशर्वरीतिमिरैरिव** संचार्यमाणं-प्रवेश्यमानम्, सकलं-समग्रम्, शर्वरीतिमिरं-रात्र्यन्धकारो येषु तथाविधैरिवेत्युत्प्रेक्षा, किमर्थमाकृष्य तत्र तत्संचारः? **स्वसन्ततिप्रभवपार्थिवप्रीतये** स्वस्य-सूर्यस्य, सन्ततिः-अपत्यपरम्परा, वंश इत्यर्थः, प्रभवः- उत्पत्त्यधिकरणं येषां तेषाम्, स्ववंशजानामित्यर्थः, पार्थिवानां-राज्ञाम्, इक्ष्वाकुप्रभृतीनाम्, प्रीतये-प्रसादाय, वर्ण्यमानाऽयोध्या नगरीनृपाणामिक्ष्वाकुवंशतया, इक्ष्वाकुवंशस्य च सूर्यवंशतया सूर्येण जगदुपचितान्धकारराशिरुपसंहृत्य तत्रत्यारामेषूपक्षिप्त इति तद्बहिर्देशेषु सन्ततप्रकाशेनायोध्याधिपतीनामप्रतिमः प्रसाद इति बोध्यम्, पुनः कीदृशैस्तैः? **अमरकाननानुकारिभिः** देवोद्याननन्दनवनसमानैः [ ऌ ]। पुनः कीदृगसौ नगरी? **विपणिपथैः** पण्यवीथिकामार्गैः, हट्टमार्गैरित्यर्थः, **प्रसाधिता** अलङ्कृता, कीदृशैस्तैः? **गिरिशिखरततिनिभशातकुम्भप्रासादमालाध्यासितोभयविभागैः** गिरिशिखराणां-पर्वतशृङ्गाणाम्, ततिः-पङ्क्तिः, तन्निभानां-तत्सदृशानाम्, शातकुम्भप्रासादानां-सुवर्णमयमन्दिराणाम्, मालाभिः-श्रेणिभिः, अध्यासितः-व्याप्तः, उभयभागः-दक्षिणवामपार्श्वभागौ येषां तादृशैः, पुनः कीदृशैस्तैः? **स्फुटविभाव्यमानमरकतेन्द्रनीलवज्रवैडूर्यराशिभिः** स्फुटं-विस्पष्टं यथा स्यात्तथा, विभाव्यमानः-

धृतोद्धुरप्राकारपरिवेषैरभ्रङ्कषप्रतोलिभिरुत्तुङ्गमकरतोरणावनद्धहरितवन्दनमालैर्दोलाविभूषिताङ्गणवेदिभिरश्रान्तकालागरुधूपधूमाश्लेषभयपलायमानदन्तवलभिकाभित्तिचित्रानिव विचित्रमयूखजालकमुचो माणिक्यजालकान् कलयद्भिरद्भुताकारैरनेकभूमिकाभ्राजिष्णुभिः सौधैः प्रवर्तिताविरतचन्द्रोदया [ ए ], प्रतिगृहं स्वच्छधवलायताभिर्दृष्टिभिरिव दिदृक्षारसेन वसुधया व्यापारिताभिः क्रीडासरसीभिः संवलिता [ ऐ ], मृदुपवनचलितमृद्विकालतावलयेषु वियति विलसतामसितागुरुधूपधूमयोनीनामासारवारिणेवोपसिच्यमानेष्वतिनीलसुरभिषु गृहोपवनेषु वनितासखैर्विलासिभिरनुभूयमानमधुपानोत्सवा [ ओ ],

---

**टिप्पनकम्**—[ नेह व्याख्यातम् ]। **मृद्विका**–द्राक्षा, **धूमयोनिः**–मेघः [ ओ ]।

---

परस्परपार्थक्येन प्रतीयमानः, मरकतानां–तन्नामकमणिविशेषाणाम्, इन्द्रनीलानां–"क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेन्नीलतां नयेत्" इत्युक्तलक्षणानां नीलमणीनाम्, वज्राणां–हीरकाणाम्, वैडूर्याणां–तन्नामकानां रत्नविशेषाणां च, राशिः–समूहो येषु तादृशैः, "वज्रं मुक्ता प्रवालं च गोमेदश्चेन्द्रनीलकः। वैडूर्यं पुष्परागश्च पाचिर्माणिक्यमेव च ॥ महारत्नानि चैतानि नव प्रोक्तानि सूरिभिः" इति रत्नतत्त्वज्ञैस्तेषां महारत्नत्वप्रतिपादनात्, पुनः कीदृशैस्तैः ? **पृथुलायतैः** विस्तारदैर्घ्यान्वितैः, कीदृशैः कैः केव तैरसौ प्रसाधिता ? **पृथुलायतैः, चण्डांशुरथचक्रमार्गैः** चण्डांशुः–सूर्यः, तस्य यद् रथचक्रं–रथाङ्गम्, तद्गमनमार्गैः, **चामीकराचलतटीव** चामीकरं–सुवर्णम्, तस्य अचलः–पर्वतः, सुमेरुरित्यर्थः, तस्य तटीव–तटप्रदेश इव, "चक्रं रथाङ्गम्" इत्यमरः [ ऌ ]। पुनः कीदृगसौ नगरी ? **सौधैः** सुधालेपोऽस्ति येषु तैः, सुधोपलिप्तैः प्रासादैः, चन्द्रवद् उद्भासमानैः, **प्रवर्तिताविरतचन्द्रोदया** प्रवर्तितः–सम्पादितः, प्रत्यायित इत्यर्थः, अविरतः–सन्ततः, अविच्छिन्न इत्यर्थः, चन्द्रोदयो यस्यां तादृशी, कीदृशैः सौधैः ? **धृतोद्धुरप्राकारपरिवेषैः** धृतः, उद्धुराणाम्–उन्नतानाम्, प्राकाराणां–दुर्गाणाम्, परिवेषः–मण्डलं यैस्तादृशैः, पुनः कीदृशैः ? **अभ्रङ्कषप्रतोलिभिः** अभ्रङ्कषाः–गगनचुम्बिनः, प्रतोलयः–प्रतीहारोपवेशनस्थानानि 'पोल' इति प्रसिद्धानि प्रवेशद्वारस्थानानि येषु तादृशैः, पुनः कीदृशैः ? **उत्तुङ्गमकरतोरणावनद्धहरितवन्दनमालैः** उत्तुङ्गाः–अत्यन्तोन्नताः, अत्यायता इत्यर्थः, मकराः–चित्रिता उत्कीर्णा वा जलजन्तुविशेषा येषु तादृशेषु, तोरणेषु–बहिर्द्वारेषु, अवनद्धा–लम्बिता, हरिता–हरितवर्णा, वन्दनमाला–आम्रदलादिनिर्मिता मङ्गलमाला येषु तादृशैः, "तोरणोर्ध्वे तु मङ्गल्यं दाम मङ्गलमालिका" इत्यभिधानचिन्तामणिः, पुनः कीदृशैः ? **दोलाविभूषिताङ्गणवेदिभिः** दोलाभिः–क्रीडोपकरणरूपैरान्दोलनयन्त्रैः, विभूषिता, अङ्गणस्य–प्रासादान्तःप्रदेशस्य, वेदयः–परिष्कृतचतुरस्रभूमयो येषु तादृशैः, पुनः कीदृशैः ? **माणिक्यजालकान्** माणिक्याख्यरत्नमयगवाक्षान्, **कलयद्भिः** धारयद्भिः, कीदृशानमून् ? **विचित्रमयूखजालकमुचः** विचित्रान्–नानावर्णकान्, मयूखजालकान्–किरणनिकरान्, मुञ्चन्ति–परितो विक्षिपन्ति ये तान्, कानिव ? **अश्रान्तकालागरुधूपधूमाश्लेषभयपलायमानदन्तवलभिकाभित्तिचित्रानिव** अश्रान्तः–अविच्छिन्नो यः, कालस्य–कृष्णस्य, अगरोः–तन्नामकद्रव्यस्य, धूपेन–अभिसन्तापेन, धूमः, तदाश्लेषभयेन–तत्सम्पर्कभयेन, हस्तिनां निसर्गतो नयनवेदनातिशयजनकधूपसम्पर्कासहिष्णुतया तदीयदन्तानामपि तत्सम्भवात् पलायमानानाम्, दन्तवलभिकानां–छदिराधारभूतानां हस्तिदन्तमयानां वक्रदारूणाम्, भित्तिचित्रानिव–भित्तिगतप्रतिबिम्बानिवेत्युत्प्रेक्षा, पुनः कीदृशैः ? **अद्भुताकारैः** अद्भुतः–द्राघिमादिना विस्मयावहः, आकारः–आकृतिः सन्निवेशो येषां तादृशैः, पुनः कीदृशैः ? **अनेकभूमिकाभ्राजिष्णुभिः** अनेकाभिः, भूमिकाभिः–अधोऽधःसन्निविष्टाट्टालिकाखण्डैः, भ्राजिष्णुभिः–उद्भासिभिः [ ए ]। पुनः कीदृगसौ नगरी ? **प्रतिगृहं** प्रत्येकप्रासादपार्श्वे, प्रत्यन्तःपुरमिति यावत्, **क्रीडासरसीभिः** जलकेलिकल्पितसरोवरैः, **संवलिता** समन्विता, कीदृशीभिस्ताभिः ? **स्वच्छधवलायताभिः** स्वच्छाः–कर्दमाद्यकलुषिताः, निर्मला इत्यर्थः, ताश्च ता धवलाः–शुभ्राः, ताश्च ता आयताः–दीर्घास्ताभिः, काभिरिव ? **वसुधया** अयोध्याधिष्ठितपृथिव्या देव्या, **दिदृक्षारसेन** निरुक्तनगरीनिरीक्षणोत्कण्ठाकुतूहलेन, **व्यापारिताभिः** उन्मीलिताभिः, **दृष्टिभिरिव** निजनयनैरिवेत्युत्प्रेक्षा [ऐ]। पुनः कीदृगसौ नगरी ? **वनितासखैः** स्वविलासिनीसहितैः, **विलासिभिः** विलासशीलैः पुरुषैः, **गृहोपवनेषु** अन्तःपुरकेलिकाननेषु, **अनुभूयमानमधुपानोत्सवा** अनुभूयमानः–आस्वाद्यमानः, मधुपानोत्सवः–मद्यपानसमेधमानसम्भोगरसो यस्यामसौ, कीदृशेषूपवनेषु ? **मृदुपवनचलितमृद्विकालतावलयेषु** मृदुपवनेन–मन्द-

मज्जत्कोशलविलासिनीनितम्बास्फालनस्फारिततरङ्गया गृहीतसरलमृणालयष्टिभिः पूर्वार्णववितीर्णैर्वृद्धकञ्चुकिभिरिव राजहंसैः क्षणमप्यमुक्तपार्श्वया कपिलकोपानलेन्धनीकृतसगरतनयस्वर्गवार्तामिव प्रष्टुं भागीरथीमुपस्थितया सरिता सरय्वाख्यया कृतपर्यन्तसख्या [ औ ], सततगृहव्यापारनिषण्णमानसाभिर्निसर्गतो गुरुवचनानुरागिणीभिरनुल्बणोज्ज्वलवेषाभिः स्वकुलाचारकौशलशालिनीभिः शालीनतया सुकुमारतया च कुचकुम्भयोरपि कदर्थ्यमानाभिरुद्धत्या मणिभूषणानामपि खिद्यमानाभिर्मुखरतया रतेष्वपि ताम्यन्तीभिर्वैयात्यपरिग्रहेण स्वप्नेऽप्यलङ्घयन्तीभिर्द्वारतोरणमङ्गीकृतसतीव्रताभिरप्यसतीव्रताभिरलसाभिर्नितम्बभारवहने तुच्छाभिरुदरे तरलाभिश्चक्षुषि कुटिलाभिर्भ्रुवोरतृप्ताभिरङ्गशोभायामुद्धताभिस्तारुण्ये कृतकुसङ्गाभिश्चरणयोर्न स्वभावे कोपेऽप्यदृष्टमुखविकाराभिर्व्यलीकेऽप्यनुज्झितविनयाभिः खेदेऽप्यखण्डितोचितप्रतिपत्तिभिः कलहेऽप्यनिष्ठुरभाषिणीभिः सकलपुरुषार्थसिद्धिभिरिव शरीरबद्धाभि-

---

**टिप्पनकम्**—**अनुल्बणः**-अनुद्भटः, **शालीनता**-कुलीनता सलज्जता च, **उद्धत्या** उद्धतत्वेन, **वैयात्यं**-धृष्टता, **असतीव्रताभिः** सह तीव्रतया वर्तन्ते यास्ताः सतीव्रताः, न तथा असतीव्रतास्ताभिः, तीक्ष्णत्वरहिताभिरिति विरोधपरिहारः, विरोधस्तु स्वयमेवोह्याः, **कृतकुसङ्गाभिः** विहितपृथ्वीसम्बन्धाभिः, चरणयोर्न **स्वभावे** प्रकृतौ कृतकुत्सित-

---

मारुतेन, चलितं-दोलितम्, मृद्विकालतावलयं-द्राक्षालतामण्डलं येषु तादृशेषु, अत्रोपवनेषु मदनत्वस्य मृद्विकालतायां विलासिनीत्वस्य वनस्पतिषु च विलासित्वस्य प्रतीत्या समासोक्तिरलङ्कारः सिद्ध्यति, पुनः कीदृशेषु तेषु? **अतिनीलसुरभिषु** नीलानि-नवनवपल्लवसङ्कुलतया श्यामलानि च तानि, सुरभीणि-सुगन्धीनीति नीलसुरभीणि, अतिशयितानि च नीलसुरभीणीति अतिनीलसुरभीणि तादृशेषु, कुतस्तेषां तादृशत्वम्? **वियति** गगनतले, **विलसतां** स्फुरताम्, **असितागुरुधूपधूमयोनीनां** असितस्य-कृष्णस्य, अगुरोः-तत्संज्ञकसुगन्धिद्रव्यस्य, धूपेन-अग्निसन्तपनेन ये धूमास्त एव योनयः-कारणानि येषां तेषाम्, तादृशधूमोद्भवमेघानामित्यर्थः, **आसारवारिणा** आसारः-धारासम्पातः, तद्वारिणा-तज्जलेन, **उपसिच्यमानेष्विव** उपसेचनादिवेति हेतूत्प्रेक्षा, तस्योपसेचनस्यातिनीलसुरभित्वहेतुतयोपन्यासात् काव्यलिङ्गालङ्कारश्चेत्यनयोः संकरः, [ ओ ]। पुनः कीदृगसौ नगरी? **सरय्वाख्यया** सरयूनाम्न्या, **सरिता** नद्या, **कृतपर्यन्तसख्या** कृतं पर्यन्ते, सख्यं-सख्युर्मित्रस्य कर्म, सम्मेलनमिति यावत्, यया तादृशी, कीदृश्या तया सरिता? **मज्जत्कोशलविलासिनीनितम्बास्फालनस्फारिततरङ्गया** मज्जन्तीनां-स्नातीनाम्, कोशलविलासिनीनां-कोशलदेशप्रसूतानां कामिनीनाम्, नितम्बास्फालनेन-कटिपश्चिमभागसंघट्टनेन, स्फारिताः-उद्वेलिताः, तरङ्गा यस्यां तादृश्या, पुनः कीदृश्या तया? **राजहंसैः** निरुक्तरूपैर्हंसविशेषैः, **क्षणमपि** किञ्चित्कालमपि, **अमुक्तपार्श्वया** अमुक्तम्-अत्यक्तम्, पार्श्वं-समीपं यस्यास्तादृश्या, कीदृशै राजहंसैः? **गृहीतसरलमृणालयष्टिभिः** गृहीता-भोक्तुमुद्धृता, सरला-ऋज्वी, मृणालयष्टिः-बिसलतारूपकमलाधारदण्डो यैस्तादृशैः, पुनः कीदृशैः? **पूर्वार्णववितीर्णैः** पूर्वार्णवेन-पूर्वसागररूपेण सरित्पतिना, वितीर्णैः-प्रेषितैः, तत आगतैरित्यर्थः, कीदृशैः कैरिव? **गृहीतसरलमृणालयष्टिभिः** हस्तावलम्बितसरलमृणालकोमलदण्डैः, **पूर्णार्णववितीर्णैः** पूर्णार्णवेन-तत्स्थानीयेन नायकेन, वितीर्णैः-नियुक्तैः, **वृद्धकञ्चुकिभिरिव** वृद्धैः-जराजीर्णेन्द्रियैः, कञ्चुकिभिरिव-नृपान्तःपुररक्षकैरिवेत्युत्प्रेक्षा, "अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते" ॥ इति नाट्यशास्त्रे परिभाषणात्, अत्र सरय्वां नायिकात्वस्य पूर्वार्णवे नायकत्वस्य च लिङ्गसाम्येन प्रतीत्या समासोक्तिरलङ्कारोऽपीति ध्येयम्, किमर्थम्? **कपिलकोपानलेन्धनीकृतसगरतनयस्वर्गवार्तां** कपिलस्य-तन्नामकऋषिविशेषस्य, कोपानलेन-क्रोधाग्निना, इन्धनीकृतानाम्-इन्धनवद् भस्मसात्कृतानाम्, सगरतनयानां-सगरनाम्नो नृपस्य पुत्राणाम्, स्वर्गवार्तां-तत्कृतस्वर्गप्रापणवृत्तान्तम्, **प्रष्टुमिव** जिज्ञासितुमिव, राज्ञा सगरेण सादरमारब्धेऽश्वमेधे शक्रेणावरुध्य पाताले तपस्यतः कपिलमुनेराश्रमेऽश्वोऽबन्धि, पश्चादश्वमन्विष्यद्भिः सगरतनयैरवनिं खनित्वा तदाश्रममुपेतवद्भिस्तेनैव निजाश्वनियन्त्रणं प्रतीत्यानेकशो भर्त्सितोऽसौ मुनिर्निजक्रोधानलज्वालाभिः सर्वान् भस्मसाच्चकार, ततस्तद्वंशजेन भगीरथेनोग्रतपसा गङ्गामवतार्य तया सर्वानुद्धारयामासेति पौराणिकी वार्ता [ औ ]। पुनः कीदृगसौ नगरी? **वधूभिः** अचिरपरिणताभिरङ्गनाभिः, **अलङ्कृता**, कीदृशीभिस्ताभिः? **सततगृहव्यापारनिषण्णमानसाभिः** सततम्-

**रलङ्कृता वधूभिः [ अं ], इतराभिरपि त्रिभुवनपताकायमानाभिः कुबेरपुरपुण्याङ्गनाभिरिव कृतपुण्यजनोचिताभिः पादशोभयाऽपि न्यक्कृतपद्माभिरूरुश्रियाऽपि लघूकृतरम्भास्तम्भाभिर्गौर्याऽपि च्छायया**

---

सम्बन्धाभिः [अं]। **इतराभिरपि त्रिभुवनपताकायमानाभिः** यदि इतराः–सामान्याः, कथं त्रिभुवनपताकायमाना

---

अनवरतम्, गृहव्यापारेषु–गृहकर्मसु, न त्वभिसरणादिव्यापारेषु, निमग्नं–नियन्त्रितम्, मानसं यासां तादृशीभिः, पुनः कीदृशीभिः? **निसर्गतः** स्वभावतः, न तूपदेशतः, **गुरुवचनानुरागिणीभिः** गुरूणां–मन्त्रादीनाम्, यद्वा गुरुषु–श्रेष्ठेषु आगमादिरूपेष्विति यावत्, वचनेषु अनुरागिणीभिः–श्रद्धालुभिः, पुनः कीदृशीभिः? **अनुल्बणोज्ज्वलवेषाभिः** अनुल्बणः–अनुत्कटः, न तु वाराङ्गनावद् आडम्बरान्वितः, उज्ज्वलः–स्फीतश्च, वेषः–वसनाभरणादिकल्पितसौन्दर्यं यासां ताभिः, पुनः कीदृशीभिः? **स्वकुलाचारकौशलशालिनीभिः** निजनिजकुलोचिताचारनिपुणताशालिनीभिः, पुनः कीदृशीभिः? **कुचकुम्भयोः** कुचौ–स्तनौ, कुम्भाविव पृथुत्वादिति कुचकुम्भौ, तयोः, **उच्छ्वस्याऽपि** उच्छ्वलाऽपि, किमुत बाह्यवस्तुभारेण?, **कदर्थ्यमानाभिः** पीड्यमानाभिः, केन हेतुना? **शालीनतया** कुलाङ्गनोचितलज्जाशीलतया, अचञ्चलेन तिरोहितयोरपि तयोरुन्नतयोर्झटिति झटिति बहिरुत्क्रमणेन लज्जोदयादित्यर्थः, पुनः केन हेतुना? **सुकुमारतया च** परमकोमलतया च, तयोरतिपीनतया तासां तद्भरभङ्गुरत्वादित्यर्थः, पुनः कीदृशीभिः? **मणिभूषणानां** स्वपरिहितमणिमयाभरणानाम्, **मुखरतयाऽपि** अन्योऽन्यसंघर्षणादिजन्यझणत्कारेणापि, किमुत कलहकोलाहलैः?, **खिद्यमानाभिः** व्यथ्यमानाभिः, शान्तिप्रियाभिरित्यर्थः, पुनः कथम्भूताभिः? **रतेष्वपि** प्रियसम्भोगेष्वपि, किमुत क्लेशमयकर्मसु?, **ताम्यन्तीभिः** अरुचिमुपदर्शयन्तीभिः, केन कारणेन? **वैयात्यपरिग्रहेण** वैयात्यं–धृष्टता, तद्ग्रहणेन, पत्या प्रार्थ्यमानत्वेऽपि धृष्टताधारणेनेत्यर्थः, एतेन तासां मानिनीत्वं ध्वनितम्। पुनः कीदृशीभिः? **स्वप्नेऽपि** स्वप्नावस्थायामपि, किमुत जाग्रदवस्थायाम्, **द्वारतोरणम्** अन्तःपुरबहिर्द्वारोर्ध्वदेशम्, **अलङ्घयन्तीभिः** उल्लङ्घ्य बहिरगच्छन्तीभिः, स्वप्नावस्थेनापि मनसा अन्तःपुरबहिर्देशमनुभवन्तीभिरित्यर्थः, एतेन परमपावित्र्यं सूचितम्, एष्वपि शब्दघटितवाक्येष्वर्थापत्तिरलङ्कारः, पुनः कीदृशीभिः? **अङ्गीकृतसतीव्रताभिरपि** अङ्गीकृतम्, सतीव्रतं–पातिव्रत्यं याभिस्तादृशीभिरपि, **असतीव्रताभिरिति** विरोधः, तत्परिहारे तु तीव्रतया–तीक्ष्णतया उग्रतयेति यावत्, सहिताः सतीव्रताः, न सतीव्रता असतीव्रतास्ताभिरित्यर्थो बोध्यः, अत्र विरोधाभासोऽलङ्कारः, पुनः कीदृशीभिः? **नितम्बभारवहने** नितम्बस्य–कटिपश्चिमभागस्य, भारवहने–पृथुतया तद्भारवहने, **अलसाभिः** आलस्यान्विताभिः, पृथुनितम्बाभिरित्यर्थः, पुनः कीदृशीभिः? **उदरे** उदरप्रदेशावच्छेदेनैव, **तुच्छाभिः** लघीयसीभिः, अतिकृशोदराभिरित्यर्थः, न तु गुणेषु तुच्छाभिः, पुनः कीदृशीभिः? **चक्षुषि** नेत्रावच्छेदेनैव, **तरलाभिः** चञ्चलाभिः, न तु चित्तवृत्तौ, पुनः कीदृशीभिः? **भ्रुवोः** नयनोर्ध्वदेशस्थरोमराजिरूपभ्रूद्वयावच्छेदेनैव, **कुटिलाभिः** वक्राभिः, न तु हृदये, पुनः कीदृशीभिः? **अङ्गशोभायां** शरीरसौन्दर्यविषय एव, **अतृप्ताभिः** तृप्तिरहिताभिः, न त्वन्यविषये, पुनः कीदृशीभिः? **तारुण्ये** यौवनावच्छेदेनैव, **उद्धताभिः** उच्छृङ्खलाभिः, न तु स्वभावे, पुनः कीदृशीभिः? **चरणयोः** पादयोरेव, **कृतकुसङ्गाभिः** कृतः कुसङ्गः–भूमिसम्पर्को याभिस्तादृशीभिः, न तु स्वभावे कृतकुत्सितसङ्गाभिः, अत्र सर्वत्र परिसङ्ख्यालङ्कारोल्लेखालङ्कारसङ्करः, पुनः कीदृशीभिः? **कोपेऽपि** क्रोधावस्थायामपि, **अदृष्टमुखविकाराभिः** अदृष्टः–पार्श्ववर्तिभिरपि अप्रतीतः, मुखविकारः–मुखवक्रत्वादिकं यासा तादृशीभिः, पुनः कीदृशीभिः? **व्यलीकेऽपि** अप्रिये कृतेऽपि, **अनुज्झितविनयाभिः** तत्कारणं प्रति अत्यक्तनम्रताभिः, पुनः कीदृशीभिः? **खेदेऽपि** क्लेशेऽपि, **अखण्डितोचितप्रतिपत्तिभिः** अखण्डिता–अत्यक्ता, उचितप्रतिपत्तिः–गुरुजनोचितसत्क्रिया याभिस्तादृशीभिः, पुनः कीदृशीभिः? **कलहेऽपि** कलहकालेऽपि, **अनिष्ठुरभाषिणीभिः** कठोरवाक्यानुच्चारयित्रीभिः, सदैव मधुरभाषिणीभिरित्यर्थः, अत्र सर्वत्र कारणानुगुणकार्यानुदयेन विशेषोक्तिरलङ्कारः, पुनः कीदृशीभिः? **शरीरबद्धाभिः** मूर्तिमतीभिः, **सकलपुरुषार्थसिद्धिभिरिव** धर्मा-ऽर्थ-काम-मोक्षाख्यपुरुषार्थचतुष्टयनिष्पत्तिभिरिवेत्युत्प्रेक्षा, पुनः कीदृशीभिः? **कुलप्रसूताभिः** सत्कुलोत्पन्नाभिः [ अं ]।

पुनः कीदृगसौ नगरी? **इतराभिरपि** पामराभिरपि, **त्रिभुवनपताकायमानाभिः** त्रिभुवनोत्कृष्टाभिरिति विरोधः, परिहारे तु **इतराभिरपि** अन्याभिरपि, सत्कुलप्रसूतातिरिक्ताभिरपीत्यर्थः, **त्रिभुवनपताकायमानाभिः** त्रिभुवनपताकावदाचरन्तीभिः, त्रिभुवनोत्कृष्टच्छविच्छटाभिरिति व्याख्येयम्, "इतरः पामरेऽन्यस्मिन्" इति नानार्थसङ्ग्रहः, **विलासिनीभिः**

सौभाग्यहेतोरुपासिताभिरिन्दुनाऽपि प्रतिदिनं प्रतिपन्नकलान्तरेण प्रार्थ्यमानमुखकमलकान्तिभिर्मकरध्वजेनापि दर्शिताधिना लब्धहृदयप्रवेशमहोत्सवाभिरप्रयुक्तयोगाभिरेकावयवप्रकटाननमरुतामपि गतिं स्तम्भयन्तीभिरव्यापारितमन्त्राभिः सकृदाह्वानेन नरेन्द्राणामपि सर्वस्वमाकर्षयन्तीभिरसदोषधीपरि-

---

इति विरोधः, तत्परिहारे तु **इतराभिः** अन्याभिः, **कृतपुण्यजनोचिताभिः** एकत्र कृतं पुण्यं शुभकर्म यैस्ते तथोक्ताः, ते च ते जनाश्च कृतपुण्यजनाः, तेषाम् उचिताः–योग्याः, अन्यत्र पुण्यजनाः–यक्षाः, कृतं पुण्यजनानाम् उचितम्–अनुरूपम्, यकाभिस्तास्तथोक्ताः, ताभिः, **न्यक्कृतपद्माभिः** पद्मं-कमलम्, पद्मा लक्ष्मीः, **लघूकृतरम्भास्तम्भाभिः** तिरस्कृतकदलीस्तम्भाभिः, अपनीतरम्भाप्सरोदर्पाभिश्च, गौर्याऽपि सुवर्णवर्णया भवान्याऽपि, **प्रतिपन्नकलान्तरेण** अभ्युपगतव्याजेन, अन्यत्र अवाप्तान्यान्यषोडशभागेन, दर्शिताधिना आधिः–मानसी पीडा, मरुतामपि देवानामपि,

---

वारवधूभिः करणभूताभिः, **वितीर्णत्रिभुवनविजिगीषुकुसुमसायकसाहायका** वितीर्णं–दत्तम्, सम्पादितमिति यावत्, त्रिभुवनविजिगीषोः–त्रिलोकीविजयेच्छोः, कुसुमसायकस्य–पुष्पबाणस्य, कामदेवस्येत्यर्थः, साहायकं–साहाय्यं यया तादृशीभिः, पुनः कीदृशीभिर्विलासिनीभिः ? **कुबेरपुरपुण्याङ्गनाभिरिव** कुबेरस्य–यक्षराजस्य, पुरम्–अलकापुरी, तस्या पुण्याङ्गनाः–पवित्रस्त्रियः, यक्षस्त्रियो वा, ताभिरिव, '**कुबेरपुरपण्याङ्गनाभिरिव**' इति पाठे तु अलकापुरीनिवासिवारवधूभिरिवेत्यर्थः, **कृतपुण्यजनोचिताभिः** कृतं पुण्यं यैस्ते कृतपुण्याः, श्रीमन्त इत्यर्थः, तादृशजनयोग्याभिः, पक्षे कृतं पुण्यजनानां यक्षाणाम्, उचितं–स्त्रीजनयोग्यं परिचर्यादिकार्यं याभिस्तथाभूताभिः, "अथ पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च" इति मेदिनी, पुनः कीदृशीभिः ? **पादशोभयाऽपि** चरणचारुतयाऽपि, किमुत मुखादिशोभया, यद्वा पादश्चतुर्थांशः, तन्मितयाऽपि शोभया, आस्तां पूर्णया, **न्यक्कृतपद्माभिः** न्यक्कृतं पद्मं–कमलम्, पद्मा लक्ष्मीर्याभिस्तादृशीभिः, पुनः कीदृशीभिः ? **ऊरुश्रियाऽपि** सक्थिशोभयाऽपि, **लघूकृतरम्भास्तम्भाभिः** लघूकृतः–न्यूनतां नीतः, रम्भास्तम्भः कदलीस्तम्भः, रम्भायाः–अप्सरोविशेषस्य, स्तम्भः–गर्वो वा याभिस्तादृशीभिः, पुनः कीदृशीभिः ? **गौर्या** शुभ्रपीतात्मिकया, **छाययाऽपि** कान्त्याऽपि, **सौभाग्यहेतोः** समीचीनाश्रयजन्योत्कर्षकामनया, **उपासिताभिः** सेविताभिः, यद्वा "शङ्खेन्दुकुन्दधवला ततो गौरी तु सा मता" इत्यन्वर्थनाम्न्या **गौर्याऽपि** पार्वत्याऽपि, **छायया** स्वकान्तिद्वारा, **सौभाग्यहेतोः** स्वोत्कर्षहेतोः, तत्सौन्दर्यहेतोर्वा, **उपासिताभिः** आश्रिताभिः, निरतिशयसौन्दर्यवर्णाभिरित्यर्थः, पुनः कीदृशीभिः ? **प्रतिदिनं** प्रतिप्रतिपदादितिथि, **प्रतिपन्नकलान्तरेण** प्रतिपन्नं–प्राप्तम्, कलान्तरम्–उत्तरोत्तराधिककला येन तादृशेनापि, उत्तरोत्तरकलाढ्येनापीत्यर्थः, **इन्दुना** चन्द्रेण, **प्रार्थ्यमानमुखकमलकान्तिभिः** प्रार्थ्यमाना प्रकर्षेण याच्यमाना, अत्यन्तमभिलष्यमाणेत्यर्थः, मुखकमलकान्तिर्यासां तादृशीभिः, तन्मुखकान्तेश्चन्द्रकलातोऽप्यधिककमनीयत्वादिति भावः, यद्वा **प्रतिपन्नकलान्तरेण** प्रतिपन्नं-स्वीकृतं, कलान्तरं-मूलधनस्य अपरा कला कलान्तरम्, यल्लोके 'ब्याज' इति कथ्यते, "वृद्धिः कलान्तरम्" इति हैमः, येन तादृशेन, यथा कश्चिद् धनेच्छुः कस्यचिद् धनिनः सकाशात् कलान्तरस्वीकारेण धनं प्रार्थयते तथा कान्तिरूपधनेच्छुश्चन्द्रो धनिकस्थानापन्नविलासिनीनामग्रे कलान्तरस्वीकारेण धनस्थानीयमुखकान्तिं प्रार्थयते, प्रचुरमुखकमलकान्तिभिरित्यर्थः, पुनः कीदृशीभिः ? **दर्शिताधिना** दर्शितः–बोधितः, आधिः–मानसी व्यथा शिवकोपानलकवलितकलेवरकत्वप्रयुक्ता येन तादृशेन, **मकरध्वजेनापि** कामदेवेनापि, **लब्धहृदयप्रवेशमहोत्सवाभिः** लब्धः–प्राप्तः, हृदयप्रवेशमहोत्सवः–सरसहृदयप्रवेशरूपो महोत्सवो यासां तादृशीभिः, शम्भुना दग्धकलेवरमपि कामदेवं स्वहृदयरूपशृङ्गारसुधारसशालिहृदे निमज्जय्य या जीवयामासुस्तादृशीभिरिति तु परमार्थः, पुनः कीदृशीभिः ? **अप्रयुक्तयोगाभिरपि** अप्रयुक्तः–नानुष्ठितः, योगः-"योगश्चित्तवृत्तिनिरोधः" इति पतञ्जलिपरिभाषितो बाह्यविषयेभ्यश्चित्तवृत्तिनिरोधरूपो याभिस्तादृशीभिरपि, योगमार्गानभिज्ञाभिरपीत्यर्थः,

**एकावयवप्रकटाननमरुताम्** एकावयवे–नासापुटरूपे एकस्मिन्नवयवे, प्रकटाः–संघातरूपेणाविर्भूता ये, आननमरुतः–मुद्रितमुखवायवः, तेषाम्, **गतिं** बहिर्गमनम्, **स्तम्भयन्तीभिः** कुम्भकप्राणायामेन निरुन्धन्तीभिरिति विरोधः, परिहारे तु अप्रयुक्तो योगः–पाणिग्रहणसम्बन्धो याभिस्तादृशीभिः, एकावयवे-मुखकमलादिरूप एकस्मिन्नपि अङ्गे, किमुत सर्वाङ्गेषु, प्रकटम्–उन्मीलितलोचनान्वितम्, आननं–मुखमण्डलं येषां ते एकावयवप्रकटाननाः, ते च ते मरुतः–देवास्तेषाम्, स्वमुखारविन्दावलोकनव्यासक्तमनसां देवानामिति यावत्, **गतिं** तद्दर्शनव्याघातकमन्यत्र गमनम्, **स्तम्भयन्तीभिः** निरुन्धन्तीभिः, प्रत्युत

महाभिरीषत्कटाक्षपातेनाचलानपि द्रावयन्तीभिः सुरतशिल्पप्रगल्भतावष्टम्भेन रूपमपि निरुपयोगमवगच्छन्तीभिस्तारुण्यमपि तृणलघु गणयन्तीभिर्विलासानपि हास्यकोटौ कलयन्तीभिराभरणसम्भारमपि भारमवधारयन्तीभिः प्रसाधनाडम्बरमपि विडम्बनापक्षे स्थापयन्तीभिरुपचारमप्याचारबुद्ध्या प्रपञ्चयन्तीभिः कैश्चिदधरैरिव शतशः खण्डितैरप्यखण्डितरागैरनिशमुपयुज्यमानवदननिःश्वासपरिमलाभिरपरैस्तु चषकैरिव कदाचिदाननप्रणयितामानीय प्रणुन्नैरप्रसन्नै रणन्मधुकरध्वनिना मन्दं मन्दं रणरणा-

---

एकत्र **अचलान्** गिरीन्, अन्यत्र अचञ्चलानपि नरान्, अधरैरिव खण्डितैरप्यखण्डितरागैः, ये किल खण्डिताः खण्डित एव तेषां रागो भवति, विरोधपरिहारे तु **खण्डितैः** दशननखादिविदारितैः, रागः—रक्तत्वं प्रेम च, **प्रणुन्नैः** क्षिप्तैः, **अप्रसन्नैः** मदिराशून्यैः प्रसादरहितैश्च, नवसुरतेषु या बद्धरागास्ता नीचरतेष्वपि सक्ता भवन्ति, कामशास्त्रभणितेषु

---

स्वाभिमुखमाकर्षन्तीभिरित्यर्थः, परमसुन्दरीभिरिति तु परमार्थः। पुनः कीदृशीभिः? **अव्यापारितमन्त्राभिरपि** अव्यापारितः—अप्रयुक्तः, मन्त्रः—विषापहारादिमन्त्रो याभिस्तादृशीभिरपि, **सकृद्** एकवारम्, **आह्वानेन** जल्पनेन, **नरेन्द्राणामपि** मन्त्रप्रयोगेण सर्पादिविषनारणपटूनां वैद्यानामपि, **सर्वस्वं** विषवारणलभ्यं सकलधनम्, **आकर्षयन्तीभिः** आकृष्य स्वाधीनं कुर्वतीभिः, मन्त्रप्रयोगमन्तरेण मान्त्रिकलभ्यं धनं न लब्धुं पार्यत इति विरोधः, परिहारे तु **अव्यापारितमन्त्राभिः** अव्यापारितः अप्रयुक्तः, मन्त्रः—वशीकरणमन्त्रो याभिस्तादृशीभिः, **सकृद्** एकवारमपि, **आह्वानेन** स्वागतकरणेन, **नरेन्द्राणां** नृपाणाम्, न तु कस्यचिदेव नृपस्य, **सर्वस्वम्** निःशेषधनसम्पत्तिम्, **आकर्षयन्तीभिः** आकृष्य स्वायत्तीकुर्वतीभिः, अनायासमेव नरेन्द्रानपि वशीकुर्वतीभिरित्यर्थः, पुनः कीदृशीभिः? **असदोषधीपरिग्रहाभिरपि** अविद्यमानः, सदोषधीपरिग्रहः सतीनाम् उत्तमानाम्, उच्चाटनोपयोगिनीनाम्, ओषधीनाम् परिग्रहः- ग्रहणं यासां तादृशीभिरपि, **ईषत्कटाक्षपातेन** कुटिलाक्षिस्पन्दलवेन, **अचलानपि** पर्वतानपि, किमुत जङ्गमान्? पक्षे स्थिरहृदयानपि, **द्रावयन्तीभिः** संचालयन्तीभिरिति विरोधः, परिहारे तु दोषेण सहिता सदोषा, न सदोषा असदोषा, अदुष्टेत्यर्थः, तादृशी धीः—बुद्धिर्यासां तादृशीभिरित्यर्थः, पुनः कीदृशीभिः? **सुरतशिल्पप्रगल्भतावष्टम्भेन** सुरतशिल्पे—मैथुनकलायाम्, या प्रगल्भता—प्रौढता, तस्या अवष्टम्भेन—आलम्बनेन, **रूपमपि** निजरूपमपि, निरुपयोगं निरर्थकम्, **अवगच्छन्तीभिः** मन्यमानाभिः, तेनैव हेतुना **तारुण्यमपि** नवयौवनसम्पदमपि, **तृणलघु** तृणमिव तुच्छम्, गणयन्तीभिः, विलासानपि **हास्यकोटौ** हास्यकक्षायाम्, **कलयन्तीभिः** स्थापयन्तीभिः, हास्यरूपतयाऽवगच्छन्तीभिरित्यर्थः, **आभरणसम्भारमपि** अलङ्करणगणमपि, **भारं** केवलभारभूतम्, **अवधारयन्तीभिः** निश्चिन्वतीभिः, **प्रसाधनाडम्बरमपि** वेशविन्यासाडम्बरमपि, **विडम्बनापक्षे** उपहासपक्षे, स्थापयन्तीभिः, **उपचारमपि** स्वश्रेष्ठजनवरिवस्यामपि, **आचारबुद्ध्या** लोकाचारदृष्ट्या, **प्रपञ्चयन्तीभिः** अनुतिष्ठन्तीभिः। पुनः कीदृशीभिः? **कैश्चित्** कतिभिश्चित्, स्थिरप्रीतिकैः कामिविशेषैः, **अधरैरिव** निम्नोष्ठैरिव, **शतशः** शतवारम्, **खण्डितैरपि** खण्डिताभ्यर्थनैरपि, अवहेलितैरपीति यावत्, **अखण्डितरागैः** अव्याहतप्रीतिकैः, ये खण्डितास्तेषां खण्डित एव रागो भवतीति विरोधस्य स्थिरप्रीतिकत्वेन परिहारः, पक्षे शतधादशनदलितैरपि, अविहतरक्तताकैः, **अनिशम्** अविरतम्, **उपयुज्यमानवदननिःश्वासपरिमलाभिः** उपयुज्यमानः—समीपे सम्बध्यमानः, घ्राणद्वारा सार्थकतामापाद्यमान इत्यर्थः, वदननिःश्वासपरिमलः—लवङ्गैलासंवलितताम्बूलचर्वणजनितमुखमारुतसौरभं यासां तादृशीभिः, **अपरैस्तु**. अन्यैस्तु, चलच्चित्तवृत्तिकैरित्यर्थः, **कामिभिः** सम्भोगाभिलाषिभिः पुरुषैः, **अशून्यमन्दिरद्वाराभिः** अशून्यं—क्षणमप्यवर्जितम्, प्रतिक्षणमधिष्ठितमित्यर्थः, मन्दिरद्वारं—रतिमन्दिरप्रवेशस्थानम्, न तु सविधं यासां तादृशीभिः, कैरिव कीदृशैस्तैः **चषकैरिव** मद्यपानभाजनैरिव, "चषकोऽस्त्री पानपात्रम्" इत्यमरः, **कदाचिद्** बहिरवलोकनादिकाले, **आननप्रणयिताम्** आननेन-लोललोचनेन चाटुवचोऽञ्चितेन शशिसदृशेन मुखेन, न तु सम्भोगेन, प्रणयिताम्-अनुरागिभावम्, **आनीय** प्रापय्य, **प्रणुन्नैः** संभोगाय प्रेरितैः, सम्भोगादानेनावहेलितैर्वा, अत एव **अप्रसन्नैः** सम्भोगसन्तोषविकलैः, अत एव **रणन्मधुकरध्वनिना** रणन्तः-गुञ्जन्तो ये मधुकरास्तेषाम्, ध्वनिना—तन्नादसमाननादेन, **मन्दं मन्दं** कामिनीकोपभिया शनैः शनैः, न तूच्चैरुच्चैः, **रणरणायमानैः**

यमानैः कामिभिरशून्यद्वाराभिर्नवसुरतेषु बद्धरागाभिरपि नीचरतेष्वसक्ताभिर्लक्ष्मीमनोवृत्तिभिरिव पुरुषोत्तमगुणहार्याभिर्न पुनरेकान्ततोऽर्थानुरागिणीभिः संसारेऽपि सारताबुद्धिनिबन्धनभूताभिः कुलक्रमागतवैशिकलाकलापवैचक्षण्याभिः साक्षादिव कामसूत्रविद्याभिर्विलासिनीभिर्वितीर्णत्रिभुवनजिगीषुकुसुमसायकसाहायका [ अः ], अकलिताढ्यानाढ्यविवेकैरगृहीतपण्डितापण्डितविभक्तिभिरनवबुद्धसाध्वसाधुविशेषैरनवधारितधार्मिकाधार्मिकपरिच्छित्तिभिः [क], सर्वैरप्युदारविशेषैः सर्वैरपि छेकोक्तिकोविदैः सर्वैरपि परोपकारप्रवणैः सर्वैरपि सन्मार्गवर्तिभिः [ ख ], ज्ञातनिःशेषपुराणेतिहाससारैर्दृष्ट-

---

नवसङ्ख्यरतेषु नीचरतस्य पठितत्वादिति विरोधः, परिहारे नूतनसुरतेषु, **पुरुषोत्तमगुणहार्याभिः** एकत्र पुरुषोत्तमः–विष्णुः, अन्यत्र पुरुषोत्तमाः–नरप्रधानाः, वैशिकाः–वेश्यासत्काः, [ अः ] । **पुराणं**–धर्मशास्त्रम्,

---

सम्भोगाभ्यर्थनागर्भं गुञ्जद्भिः, चषकपक्षे तु **कदाचिद्** मद्यपानावसरे, **आननप्रणयिताम्** आनने–मद्यपानोद्यते मुखे, प्रणयितां–स्वानुरागिभावम्, **आनीय** जनयित्वा, **प्रणुन्नैः** पीतमदिराकत्वात् पानकारिणा क्षितौ निक्षिप्तैः, अत एव च **अप्रसन्नैः** प्रसन्ना–मदिरा, तद्रहितैः, "प्रसन्ना स्त्री सुरायां स्यात्, स्वच्छ-सन्तुष्टयोस्त्रिषु" । इति मेदिनी, **रणन्मधुकरध्वनिना** रणन्तः–मञ्जु गुञ्जन्तो ये मधुकराः–शेषमद्यलेशास्वादनायायाता भ्रमराः, तेषां ध्वनिना–नादेन, **मन्दं मन्दं** शनैः शनैः **रणरणायमानैः** प्रतिनिनादं वितन्वानैः, अत्र श्लेषानुप्राणितोपमालङ्कारो बोध्यः । पुनः कीदृशीभिर्विलासिनीभिः ? **नवसु** कामशास्त्रविहितेषु नवविधेषु, **रतेषु** मैथुनेषु, **बद्धरागाभिरपि** सानुरागाभिरपि, **नीचरतेषु** नीचजनमैथुनेषु, नीचेषु–निन्दितेषु वा, मैथुनेषु, **असक्ताभिः** रागरहिताभिरिति विरोधः, नवविधसुरतमध्ये नीचसुरतस्यापि पठितत्वात्, परिहारे तु नवेषु–नवीनेषु, सुरतेषु–मैथुनेषु, अनुरक्ताभिः, नीचमैथुनमनाचरन्तीभिरित्यर्थो बोध्यः । पुनः कीदृशीभिः ? **लक्ष्मीमनोवृत्तिभिरिव** लक्ष्म्याः–तन्नाम्न्या विष्णुभार्यायाः, मनोवृत्तिभिरिव–चित्तवृत्तिभिरिव, **पुरुषोत्तमगुणहार्याभिः** पुरुषोत्तमगुणवशीकार्याभिः, पक्षे पुरुषोत्तमस्य–विष्णोः, गुणैः, हार्याभिः–आकर्षणीयाभिः, **न पुनरेकान्ततोऽर्थानुरागिणीभिः** न खलु नियमेन धनलुब्धाभिः, अपि तु गुणलुब्धाभिरपीत्यर्थः । पुनः कीदृशीभिः ? **संसारेऽपि** यः संसारस्तत्त्वदर्शिभिरसारतयाऽवधारितस्तस्मिन्नपि, तद्विशेष्यिकाया अपीत्यर्थः, **सारताबुद्धेः** 'संसारः सारः' इत्याकारायाः सारताप्रकारकबुद्धेः, **निबन्धनभूताभिः** हेतुभूताभिः, असारेऽपि संसारे सारतां प्रत्याययन्तीभिः । पुनः कीदृशीभिः ? **कुलक्रमागतवैशिककलाकलापवैचक्षण्याभिः**, वेश्यायां भवः–वैशिकः, स चासौ कलाकलापः–नृत्यगायनादिकलासमूहः, तत्र कुलक्रमागतं–कुलपरम्परयोपनतम्, वैचक्षण्यं–नैपुण्यं यासां तादृशीभिः । पुनः कीदृशीभिः ? साक्षात् कामसूत्रस्य–कामशास्त्रस्य, विद्याभिरिवेत्युत्प्रेक्षा [अः] । पुनः कीदृगसौ नगरी ? **निवासिलोकैः** तद्वास्तव्यजनैः, **सङ्कुला** व्याप्ता । कीदृशैर्निवासिलोकैः ? **अकलिताढ्यानाढ्यविवेकैः** अकलितः–अप्रतीतः, आढ्यानाढ्यविवेकः–धनिकाऽधनिकविभागो येषां तादृशैः, प्रशंसाप्रकरणात् सर्वैरपि धनिकैरित्यर्थः । पुनः **अगृहीतपण्डितापण्डितविभक्तिभिः** अगृहीता–अज्ञाता, पण्डितापण्डितविभक्तिः–विद्वन्मूर्खविभागो येषां तादृशैः, सर्वैरपि पण्डितैरेवेत्यर्थः । पुनः **अनवबुद्धसाध्वसाधुविशेषैः** अज्ञातसज्जनत्व-दुर्जनत्वप्रयुक्तभेदैः, सर्वैरपि साधुभिरेवेति भावः । पुनः **अनवधारितधार्मिकाधार्मिकपरिच्छित्तिभिः** अनवधारिता–अवधारयितुमपारिता, धार्मिकाधार्मिकपरिच्छित्तिः–इयन्तो धार्मिका इयन्तश्चाधार्मिका इतीयत्ता येषां तादृशैः, सर्वैरपि धार्मिकैरेवेत्यर्थः [ क ] । पुनः कीदृशैः ? सर्वैरपि **उदारविशेषैः** असाधारणोदारैः, वदान्यैरित्यर्थः, न तु साधारणोदारैः । पुनः सर्वैरपि **छेकोक्तिकोविदैः** छेकः–विदग्धः, तेषामुक्तिषु–विविधवैदग्ध्यपूर्णोक्तिषु, कोविदैः–पण्डितैः, अभिज्ञैरित्यर्थः । पुनः सर्वैरपि **परोपकारप्रवणैः** परोपकारतत्परैः । पुनः सर्वैरपि **सन्मार्गवर्तिभिः** सत्पथगामिभिः [ ख ] । पुनः कीदृशैः ? **ज्ञातनिःशेषपुराणेतिहाससारैः** ज्ञातः–पाठश्रवणाभ्यामवधृतः, निःशेषः–कृत्स्नः, पुराणानाम्–"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । भूम्यादेश्चैव संस्थानं पुराणं पञ्चलक्षणम्" ॥ १ ॥ इति पञ्चलक्षणीलक्षितानां व्यासादिप्रणीतप्रबन्धानां धर्मशास्त्राणां वा, इतिहासानां–महाभारतादी पुरावृत्तानाम्, सारः–तत्त्वार्थो यैस्तादृशैः । पुनः **दृष्टसकलकाव्यनाटकप्रबन्धैः** दृष्टाः–अधीताः, सकलाः–समग्र

सकलकाव्यनाटकप्रबन्धैः परिचितनिखिलाख्यायिकाख्यानकव्याख्यानैः [ ग ], प्रमाणविद्भिरप्यप्रमाणविद्यैरधीतनीतिभिरप्यकुटिलैरभ्यस्तनाट्यशास्त्रैरप्यदर्शितभ्रूनेत्रविकारैः कामसूत्रपारगैरप्यविदितवैशिकैः सर्वभाषाविचक्षणैरप्यशिक्षितलाटोक्तिभिः सात्त्विकैरपि राजसभावाप्तख्यातिभिरोजस्विभिरपि प्रसन्नैः [ घ ], पूर्वाभिभाषिभिरुत्तरालापनिपुणैः सकलरसभावाभिज्ञैरविषादिभिर्न्यायदर्शनानुरागिभिररौद्रैः

---

**इतिहासं**–पुरावृत्तम् [ ग ] । ये प्रमाणवेदिनस्ते कथं प्रमाणविद्यारहिताः? विरोधपरिहारे **अप्रमाणविद्यैः** बहुविद्यैः । **कुटिलं**–चाणक्यम् । **वैशिकं**–माया वेश्याकर्म च । **लाटाः**–लाटदेशजनाः, लाटः–चाटु च । ये सात्त्विकास्ते रजोभवभावप्राप्तख्यातयः कथम्? विरोधपरिहारे नृपसभाप्राप्तप्रसिद्धिः । ओजः–शब्दालङ्कारः, प्रसादोऽपि, एतौ च भिन्नाविति विरोधः, परिहारे तु **ओजस्विभिः** तेजस्विभिर्बलवद्भिर्वा, **प्रसन्नैः** प्रसत्तियुक्तैः [ घ ] । ये पूर्वाभिभाषिणस्ते उत्तराभिभाषणपराः कथमिति विरोधः, परिहारस्तु उत्तरवचननिपुणैः । ये विषं नादन्ति ते कथं सकलरसभावज्ञातार इति विरोधः, परिहारस्तु **अविषादिभिः** विषादरहितैः । ये नैयायिकदर्शनरागिणो भवन्ति ते रुद्रदेवताः कथमरौद्रा इति विरोधः, परिहारस्तु **अरौद्रैः** अभयानकैः । ये नर्मशीलाः–चत्तरीप्रियाः, ते

---

काव्यनाटकप्रबन्धाः–श्रव्यदृश्यकाव्यग्रन्था यैस्तादृशैः । पुनः **परिचितनिखिलाख्यायिकाख्यानकव्याख्यानैः** परिचितं–कृताभ्यासम्, आख्यायिकानाम्–अनुभूतार्थकानां वासवदत्तादिकथानाम्, आख्यानकानाम्–अमृतमन्थनसमुद्रबन्धनाद्युपाख्यानानाम्, व्याख्यानं कीर्तनं यैस्तादृशैः [ ग ] । पुनः कीदृशैः? **प्रमाणविद्भिरपि** प्रमाणानि–प्रत्यक्षादीन्यैतिह्यान्तानि, विदन्ति–अशेषविशेषपुरस्कारेण जानन्ति ये तादृशैरपि, **अप्रमाणविद्यैः** प्रमाणज्ञानशून्यैरिति विरोधः, अप्रमाणा–अपरिमाणा, असंख्येयेत्यर्थः, विद्या येषां तादृशैरित्यर्थेन तत्परिहारः । पुनः **अधीतनीतिभिरपि** पठितनीतिकैरपि, **अकुटिलैः** चाणक्यभिन्नैरिति विरोधः, चाणक्यादिप्रणीतनीतिशास्त्रमधीतवद्भिरपि, **अकुटिलैः** तदध्ययनोचितकपटवृत्तिवर्जितैरित्यर्थेन तत्परिहारः । पुनः **अभ्यस्तनाट्यशास्त्रैरपि**–अभ्यस्तम्–अनुशीलितम्, नाट्यशास्त्रम्–अक्षिभ्रुवादिविक्षेपविद्या यैस्तादृशैरपि, **अदर्शितनेत्रभ्रूविकारैः** अदर्शितो भ्रूनेत्रयोर्विकारः–विविधः कारः क्रिया विक्षेपादिलक्षणा यैस्तादृशैरिति विरोधः, अदर्शितस्तयोर्विकारः वैरूप्यं कोपजन्यकौटिल्यादिरूपं यैस्तादृशैरित्यर्थेन तत्परिहारः । पुनः **कामसूत्रपारगैरपि** कामसूत्रेषु–सूत्रात्मना प्रणीतेषु कामशास्त्रेषु, पारगैरपि–पारङ्गतैरपि, परमाभिज्ञैरपीत्यर्थः, **अविदितवैशिकैः** अविदितम्–अपरिचितम्, वैशिकं–वेश्यासमूहो वेश्याकर्म वा यैस्तादृशैः, स्वधर्मपत्नीमात्ररतैरित्यर्थः, इति विरोधः, तदुद्धारे तु अपरिचितमायैरिति व्याख्येयम् । पुनः **सर्वभाषाविचक्षणैरपि** अखिलभाषाभिज्ञैरपि, **अशिक्षितलाटोक्तिभिः** अनभिज्ञातलाटदेशीयभाषैरिति विरोधः, तदुद्धारे तु लाटः–बाल्यं "लट बाल्ये" इति धातोर्घञा निष्पादितत्वात्, तदवस्थायामुक्तिर्लाटोक्तिः, मधुरोक्तिरित्यर्थः, सा अशिक्षिता यैस्तादृशैः स्वाभाविकमधुरोक्तिभिरिति यावदित्येवं व्याख्येयम् । पुनः **सात्त्विकैरपि** सत्त्वगुणप्रधानैरपि, **राजसभावाप्तख्यातिभिः** राजसभावेन–रजोगुणोचितचेष्टया, आप्ता–प्राप्ता, ख्यातिः–प्रसिद्धिर्यैस्तादृशैरिति विरोधः, राजसभया–नृपपर्षदा, अवाप्ता–प्राप्ता, ख्यातिः–स्ववैदग्ध्यनिबन्धना विख्यातिर्यैस्तादृशैरित्यर्थेन तत्परिहारः । पुनः **ओजस्विभिरपि प्रसन्नैः** प्रसादयुक्तैः, ओजः प्रसादश्च शब्दालङ्कारः, एतौ मिथोविभिन्नाविति विरोधः, तत्परिहारे **ओजस्विभिरपि** तेजस्विभिरपि बलशालिभिरपि वा, **प्रसन्नैः** प्रशान्तैः, न तूद्धतैः, विकारहेतुसत्त्वेऽपि तद्वर्जितैरित्यर्थः, [ घ ] । पुनः कीदृशैः? **पूर्वाभिभाषिभिः** पूर्वपक्षवक्तृभिरपि, **उत्तरालापनिपुणैः** उत्तरपक्षप्रतिपादनकुशलैरिति विरोधः, पूर्वोत्तरपदस्य पूर्वोत्तरकालिकवृत्तान्तपरत्वेन तु तत्परिहारः । पुनः **सकलरसभावाभिज्ञैः** माधुर्याद्यखिलरसस्वभावास्वादिभिरपि, सकलवस्तूनां रसस्वभावास्वादिभिरपि वा, **अविषादिभिः** विषं न अदन्तीत्येवंशीलैः, विषसमवेतरसानास्वादकैरिति विरोधः, विषीदन्ति तच्छीला इति विषादिनः, अथवा विषादोऽस्ति येषां ते विषादिनः, न विषादिनः–अविषादिनः, तैः, सततमेव हर्षान्वितैरित्यर्थेन, सकला ये रसाः–शृङ्गारादयः, भावाः–रसरूपतानापन्नभगवद्विषयकरत्यादिरूपाश्च, तज्ज्ञैरित्यर्थेन च विरोधपरिहारः । पुनः **न्यायदर्शनानुरागिभिः** गौतमप्रणीतन्यायदर्शनस्नेहिभिरपि, **अरौद्रैः** रुद्रदेवताकभिन्नैरिति विरोधः, नैयायिकाना रुद्रदैवतप्रसिद्धेः, **न्यायदर्शनानुरागिभिः** नीत्यवलोकनरागान्वितैः, **अरौद्रैः** अभीषणैरित्यर्थेन तु विरोधपरिहारः । पुनः **परानु-**

परानुपहासिभिर्नर्मशीलैः सर्वस्य गुणग्राहिभिः सन्तुष्टैर्व्यसनेष्वपरित्यागिभिः सर्वदा संविभागपरैः परोपकारिभिरात्मलाभोद्यतैः [ ङ ], कतिपयकलापरिग्रहं ग्रहपतिमप्युपहसद्भिर्मित्रमण्डलपराङ्मुखमनूरुमपि निरस्यद्भिर्लक्ष्मीप्राप्तये गाढधृतभूभृत्पादं वासुदेवमपि विप्लावयद्भिः स्नेहशून्यमानसं जिनमप्यवजानद्भिर्निवासिलोकैः सङ्कुला [ च ], विरचितालकेव मखानलधूमकोटिभिः, स्पष्टिताञ्जनतिलकबिन्दुरिव बालोद्यानैः, आविष्कृतविलासहासेव दन्तवलभीभिः, आगृहीतदर्पणेव सरोभिः [छ], सङ्कृत-

---

कथं परेषामनुपहासिनः? अन्येषामुपहासिन एव भवन्तीति विरोधः, परिहारस्तु परान् उपहासिभिः उपहसद्भिरुपहासयद्भिर्वा । ये गुणग्राहकाः [ रज्जुग्राहकाः ] ते कथं सन्तुष्टाः? अन्यत्र **गुणग्राहिभिः** गुणभाषकैः । ये परिसमन्तात्, अत्यागिनः–अदातारः, ते संविभागपराः कथम्? अन्यत्र **अपरित्यागिभिः** अत्यजनशीलैः । ये परेषामुपकारकास्ते कथमात्मनो लाभे उद्यताः? **आत्मलाभः**–आत्मसंस्कारः, तत्रोद्यमपराः [ङ] । **ग्रहपतिमपि** चन्द्रमपि, **कला**–विज्ञानं षोडशभागश्च । **मित्रमण्डलम्**–आदित्यबिम्बं सुहृत्संघातं च, **अनूरुं** सूर्यसारथिम् । **भूभृत्पादं**–राजचरणं मन्दरप्रत्यन्तगिरिं च । **स्नेहः**–रागः [ च ] । **अञ्जनतिलकबिन्दवो** वृक्षाः, अन्यत्र विशेषकः [ छ ] ।

---

**पहासिभिः** परेषामुपहासाकर्तृभिरपि, **नर्मशीलैः** उपहासशीलैरिति विरोधः, उपहासशीलानां तदकर्तृत्वासम्भवात्, प्रतिशब्दमध्याहृत्य **परान्** अन्यान् प्रति उपहासिभिरित्यर्थेन तु तत्परिहारः । पुनः **सन्तुष्टैः** सर्वथा पूर्णकामैरपि, **सर्वस्य गुणग्राहिभिः** रज्ज्वपहारिभिः गुणसङ्ग्राहिभिर्वेति विरोधः, **गुणग्राहिभिः** गुणी गुणं वेत्तीति न्यायेन गुणाभिज्ञैः गुणोपवर्णयितृभिर्वा, इत्यर्थेन तु तत्परिहारः । पुनः **सर्वदा** सर्वकाले, **संविभागपरैः** सम्यग् विभागः–विभजनम्, विभज्य धनादानमित्यर्थः, तत्परैरपि-तदासक्तैरपि, **अपरित्यागिभिः** अप्रदानशीलैरिति विरोधः, **संविभागपरैः** अतिथिसंविभागपरैः सम्यक्प्रकारेण दायादैः सह दायग्रहणतत्परैर्वा, **अपरित्यागिभिः** विपदि निजबन्धुजनानुपेक्षिभिरित्यर्थेन तु तदुद्धारः । पुनः **आत्मलाभोद्यतैः** अम्भक्षन्यायेन स्वलाभमात्रतत्परैरपि, स्वार्थमात्रपरैरपीत्यर्थः, **परोपकारिभिः** परलाभकारिभिरिति विरोधः, **आत्मलाभोद्यतैः** विस्मृतग्रीवागतग्रैवेयकन्यायेन आत्मप्राप्तिप्रवणैः, आत्मसाक्षात्कारपरैः, अत एव **परोपकारिभिः** परोपकारव्रतिभिरित्यर्थेन तु तदुद्धारः [ङ] । पुनः कीदृशैः? **कतिपयकलापरिग्रहम्** अपूर्णकलम्, **ग्रहपतिमपि** चन्द्रमपि, **उपहसद्भिः** स्वपूर्णकलाभिस्तिरस्कुर्वद्भिः, कला–विज्ञानं षोडशभागश्च । पुनः **मित्रमण्डलपराङ्मुखं** सूर्यमण्डलविमुखम्, तदनभिमुखमित्यर्थः, **अनूरुमपि** ऊरुविहीनम् अरुणसंज्ञकं सूर्यसारथिमपि, **निरस्यद्भिः** तिरस्कुर्वद्भिः, किमुत सुहृन्मण्डलविमुखमन्यं पुरुषम्, सूर्यसारथिः सूर्याभिमुखीभूय सूर्याधिष्ठितरथं वाहयितुं न शक्नोतीति तदनुरोधेऽपि मित्रमण्डलवैमुख्येन हेतुना परिहासास्पदतामुपैति चेदन्यस्य मित्रमण्डलविमुखत्वे सुतरामुपहासास्पदत्वमिति भावः, स्वयं सदैव सुहृन्मण्डलानुरक्तैरित्यर्थः, "बिम्बोऽस्त्री मण्डलं त्रिषु" इत्यमरः, "मित्रं सुहृदि न द्वयोः, सूर्ये पुंसि" इति मेदिनी । पुनः **लक्ष्मीप्राप्तये** लक्ष्म्याः–तन्नाम्न्याः स्वप्रियायाः, प्राप्तये–लाभाय, **गाढधृतभूभृत्पादं** गाढं दृढं यथा स्यात्तथा धृतः–समुद्रमन्थनाय हस्तेनोद्धृतः भूभृत्पादः–मन्दराचलप्रत्यन्तपर्वतः, मन्दरगिरिनिकटक्षुद्रपर्वत इति यावत्, येन तादृशं **वासुदेवं** कृष्णमपि **विप्लावयद्भिः**, आक्षिपद्भिः, किमुत **लक्ष्मीप्राप्तये** धनलाभाय, **गाढधृतभूभृत्पादम्** अत्यन्ताश्रितनृपतिचरणं कमपि मानवम्, स्वयमापतितलक्ष्मीकैरित्यर्थः, "पादाः प्रत्यन्तपर्वताः" इत्यमरः । अत्र सर्वत्र श्लेषमूलकार्थापत्तिरलङ्कारः । पुनः **स्नेहशून्यमानसं** प्रीतिरहितहृदयम्, **जिनमपि** जिनेन्द्रमपि, **अवजानद्भिः** अवहेलयद्भिः, किमुत तादृशं सामान्यजनम्, भगवता जिनेन्द्रेण वीतरागतया प्रीतिः प्रत्यषेधीति प्रीतिपराङ्मुखतया सोऽपि तेषामक्षेपभाजनमिति का कथा तादृशस्य सामान्यपुरुषस्येति भावः, परस्परस्नेहसान्द्रहृदयैरित्यर्थः [च] । पुनः कीदृगसौ नगरी? **मखानलधूमकोटिभिः** यज्ञाग्निकुण्डोद्धूयमानधूमधाराभिः, **विरचितालकेव** विरचिता विन्यस्ता अलकाः कुटिलकेशा यस्यास्तादृशी नारीवेत्युत्प्रेक्षा । पुनः **बालोद्यानैः** अभिनवक्रीडाकाननैः, **स्पष्टिताञ्जनतिलकबिन्दुरिव** स्पष्टितः–स्फुटीकृतः, स्वश्यामलिमसम्पदा अभिव्यक्त इत्यर्थः, अञ्जनतिलकबिन्दुः–अञ्जनरचितभालबिन्दुर्यस्यास्तादृशी नारी वेत्युत्प्रेक्षा, पक्षेऽञ्जन–तिलक–बिन्दवः–तत्तत्संज्ञकवृक्षविशेषा यस्यां तादृशी । पुनः **दन्तवलभीभिः** हस्तिदन्तमयीभिर्वलभीभिः–छदिराधारभूतैः कुटिलदण्डैः, **आविष्कृतविलासहासेव** आविष्कृतः–अभिव्यक्तः, विलासः–हावविशेषभूतः, हासो यया तादृशी नारीवेत्युत्प्रेक्षा । पुनः **सरोभिः** दर्पणवत्स्वच्छसलिलाशयैः, **आगृ-**

युगेव सत्पुरुषव्यवहारैः, समकरध्वजराज्येव पुरन्ध्रिबिब्बोकैः, सब्रह्मलोकेव द्विजसमाजैः, ससमुद्रमथनेव जनसंघातकलकलेन [ ज ], विततप्रभावर्षिभिराभरणपाषाणखण्डैरिव पाखण्डैर्मुषितकल्मषा, जपानुरागिभिरुपवनैरिव श्रोत्रियजनैः सच्छाया, विचित्राकारवेदिभिरङ्गणैरिव नागरिकगणैरलङ्कृतगृहा, सवनराजिभिः सामस्वरैरिव क्रीडापर्वतकपरिसरैरानन्दितद्विजा [ झ ], विश्वकर्मसहस्रैरिव निर्मितप्रासादा, प्रजापतिसहस्रैरिवोत्पादितपौरा, लक्ष्मीसहस्रैरिव परिगृहीतगृहा, देवतासहस्रैरिवाधिष्ठितप्रदेशा

---

**विततप्रभावर्षिभिः** विस्तृततेजोवर्षकैः, अन्यत्र विस्तृतप्रतापमुनिभिः । एकत्र **जपानुरागिभिः** जपाकुसुमरक्तता-युक्तैः, अन्यत्र जपानुरक्तैः । एकत्र **विचित्राकारवेदिभिः** नानाकृतिचत्वरिकैः, अन्यत्र अनेकाकारज्ञातृभिः । एकत्र **सवनराजिभिः** यज्ञशोभिभिः, अन्यत्र वनपङ्क्तिसहितैः [ झ ] ।

---

**हीतदर्पणेव** स्वसौन्दर्यदिदृक्षया सदैव समन्तादधोधृतदर्पणेवेत्युत्प्रेक्षा, अत्र सर्वत्र नारीपदानुपादानेऽपि उत्प्रेक्षितविशेषणसाम्येन नारीप्रतीतिरिति उत्प्रेक्षासमासोक्तिसङ्करः, श्लिष्टविशेषणस्थले तु श्लेषालङ्कारोऽप्यवतरतीति त्रयाणां तेषां सङ्करो बोध्यः [ छ ] पुनः कीदृगसौ नगरी ? **सत्पुरुषव्यवहारैः** सद्भिः—सुन्दरैः, सत्यतामयैरित्यर्थः, पुरुषव्यवहारैः—पुरुषक्रियाभिः, सताम्—उत्तमानाम्, सत्यशीलानां धार्मिकाणामित्यर्थः, पुरुषाणां—जनानाम्, व्यवहारैः—सदाचरणैः, **सकृतयुगेव** कृतयुगेन—सत्ययुगेन, सहितेवेत्युत्प्रेक्षा । पुनः कीदृशी ? **पुरन्ध्रिबिब्बोकैः** पुरन्ध्रीणां—पुत्रादिकुटुम्बवतीनां स्त्रीणाम्, बिब्बोकैः—विलासैः, **समकरध्वजराज्येव** मकरध्वजस्य—कामदेवस्य, राज्यं—राज्ञो भावो राज्यम्, आधिपत्यमित्यर्थः, तेन सहितेवेत्युत्प्रेक्षा । पुनः **द्विजसमाजैः** ब्राह्मणसमूहैः, **सब्रह्मलोकेव** ब्रह्मलोकेन सहितेवेत्युत्प्रेक्षा । पुनः **जनसङ्घातकलकलेन** तन्नगरीनिवा-स्तव्यासङ्ख्यजनताकोलाहलेन, **ससमुद्रमथनेव** समुद्रमथनकालिककोलाहलाकुलेवेत्युत्प्रेक्षा [ज] । पुनः **आभरणपाषाणखण्डैरिव** आभरणानां—भूषणानाम्, भूषणप्रकृतिरूपा इत्यर्थः, ये पाषाणाः—प्रस्तरा मणिपदव्यवहार्याः, तेषां खण्डैरिव—शकलैरिव, **विततप्रभावर्षिभिः** विततः—विस्तृतः, प्रभावः—अनुभावो येषां तादृशैः, ऋषिभिः—मुनिजनैः, पक्षे वितता—विस्तृता, या प्रभा—द्युतिः, तद्वर्षिभिः—तद्वर्षणशीलैः, **पाखण्डैः** पाखण्डनकारिभिः, **मुषितकल्मषा** अपहृतपापा अपहृत-तमाश्च । पुनः कीदृशी ? **उपवनैरिव** क्रीडाकाननैरिव, **जयानुरागिभिः** विजयप्रणयिभिः, पक्षे जयासु—अग्निमन्थलतासु, अनुरागिभिः—अनुरागास्पदैः, **जपानुरागिभिरि**ति पाठे जपेषु—स्वाध्यायविशेषेषु पक्षे जपाभिः—उड्रपुष्पैः, अनुरागिभिः—रक्ततायुतैरिति व्याख्येयम्, "जया जयन्तीतिथिभित्पथ्योमातसखीषु च । अग्निमन्थे ना जयन्ते, विजये च युधिष्ठिरे" ॥ इति मेदिनी । पुनः **श्रोत्रियैः** वेदाध्येतृजनैः, अथवा "एकां शाखां सकलां वा षड्भिरङ्गैरधीत्य च षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥ १ ॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । वेदाभ्यासे भवेद्विप्रः श्रोत्रियस्त्रिभिरुच्यते ॥ २ ॥" इति परिभाषितैरतिधार्मिकजनैः, **सच्छाया** छायया—शोभया, पक्षे आतपाभावेन, सहिता, यद्वा सती—समीचीना, छाया—शोभा, पक्षे आतपाभावो यस्यां तादृशी, "छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः ।" इति मेदिनी । पुनः **अङ्गणैरिव** अङ्गन्ति परितोऽप्रतिहतं गच्छन्ति जना यस्मिन्निति अङ्गनं चत्वरस्थली, तैरिव, **विचित्राकारवेदिभिः** विचित्राः—विविधाः, ये आकाराः—अवयवसन्निवेशाः, तद्वेदिभिः—तज्ज्ञैभिः, पक्षे विचित्र आकारः— विन्यासः, रचनेत्यर्थः, यासां तादृश्यो वेदयः—वेदिकाः, अङ्गणमध्योपकल्पितोपवेशनस्थानानीत्यर्थः, येषु तादृशैः, **नागरिकगणैः** निरुक्तनगरीनिवासिगणैः, **अलङ्कृतगृहा** शोभितप्रासादा । पुनः **सामस्वरैरिव** सामाख्यस्वरविशिष्टमन्त्रैरिव, **सवनराजिभिः** साध्यसाधनभावसम्बन्धेन यज्ञशोभिभिः, सोमरसनिष्पीडनशोभिभिर्वा, पक्षे वनावलीसहितैः, "सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च" इति मेदिनी । **क्रीडापर्वतकपरिसरैः** क्रीडाया ये पर्वतकाः—ह्रस्वाः पर्वताः, तत्परिसरैः—तत्प्रान्तभूमिभिः, **आनन्दितद्विजा** आनन्दिताः—सुखमनुभाविताः, द्विजाः—पक्षिणः, पक्षे ब्राह्मणक्षत्रियवैश्याश्च यया तादृशी, "द्विजः स्याद् ब्राह्मण—क्षत्र—वैश्य—दन्ताण्डजेषु ना" इति मेदिनी [ झ ] । पुनः कीदृगसौ नगरी ? **विश्वकर्मसहस्रैरिव** बहुसहस्रसंख्यकैर्विश्वकर्मभिः—स्वर्लोकशिल्पिभिरिव, न तु मर्त्यलोकशिल्पिभिः, नाप्येकेन विश्वकर्मणा, **निर्मितप्रासादा**—विरचितराजमन्दिरा । पुनः **प्रजापतिसहस्रैरिव** ब्रह्मसह-

[ ञ ], महापार्थिववरूथिनीवानेकरथ्यासङ्कुला, राज्यनीतिरिव सत्त्रिप्रतिपाद्यमानवार्ताधिगतार्था, अर्हद्दर्शनस्थितिरिव नैगमव्यवहाराक्षिप्तलोका, रसातलविविक्षुरविरथचक्रभ्रान्तिरिव चीत्कारमुखरितमहाकूपारघट्टा, सर्वाश्चर्यनिधानमुत्तरकौशलेष्वयोध्येति यथार्थाभिधाना नगरी [ ट ]। या सितांशुकरसम्पर्कादपरिस्फुटस्फटिकदोलासु बद्धासनैर्विलासिमिथुनैरवगाह्यमानगगनान्तरा समन्तादन्तरिक्षसंचर-

---

एकत्र **अनेकरथ्यासङ्कुला** नानारथसमूहव्याप्ता, अन्यत्र बहुसेरिकायुक्ता । एकत्र **सत्त्रिप्रतिपाद्यमानवार्ताधिगतार्था** चरकथ्यमानप्रवृत्तिज्ञाताभिधेया, यद्वा सह तिसृभिर्विद्याभिर्वर्तते या सा सत्त्रिः, प्रतिपाद्यमाना–अभिधीयमाना, वार्ता–कृष्यादिकर्म, तया प्राप्तधना, अन्यत्र दानशालानायकसमर्प्यमाणकृष्यादिकर्मप्राप्तशाल्याद्यर्था, यद्वा दानत्राधिकृत[ सर्वदान्नदानक्षेत्राधिकृत ]दीयमानदुःखितनरप्राप्तधना । एकत्र **नैगमव्यवहाराक्षिप्तलोका** नैगमव्यवहाराभ्याम् आक्षिप्ता दत्तावधाना लोका जना यस्यां सा तथोक्ता, अन्यत्र वणिग्व्यवहारदत्तावधानजना । एकत्र **चीत्कारमुखरितमहाकूपारघट्टा** ध्वनिविशेषात्रधिरितबृहत्समुद्रजलावतरणस्थाना, अन्यत्र चीत्कारमुखरितबृहत्कूपकाष्ठघट्टादियन्त्रविशेषा । **यथार्था** योद्धुमशक्या [ ट ] ।

---

स्रैरिव, न त्वेकेन ब्रह्मणा, **उत्पादितपौरा** सृष्टनिरुक्तनगरीनिवासिजना । पुनः **लक्ष्मीसहस्रैरिव** न त्वेकया लक्ष्म्या, **परिगृहीतगृहा** परिगृहीताः–व्याप्ताः, गृहा यस्यां तादृशी । पुनः **देवतासहस्रैरिव** न तु कतिपयदेवताभिः, **अधिष्ठितप्रदेशा** आक्रान्तसकलस्थाना [ ञ ]। पुनः कीदृगसौ नगरी? **महापार्थिववरूथिनीव** महापार्थिवस्य–महाभूपतेः, वरूथिनी–सेना इव, **अनेकरथ्याकुला** अनेकाभिः, रथ्याभिः–प्रतोलीभिः, पक्षे अनेकैः, रथ्यैः–रथसमूहैः, आकुला–व्याप्ता । पुनः **राजनीतिरिव सत्त्रिप्रतिपाद्यमानवार्ताधिगतार्था** सत्रं–सदैवान्नदानक्षेत्रम्, तदस्ति यस्यासौ सत्री, तेन प्रतिपाद्यमानः–दीनजनेभ्यो वितीर्यमाणः, वार्तया–कृष्यादिकर्मणा, अधिगतः, अर्थः–तण्डुलादिरूपो यस्याम्, यद्वा सत्त्रिभिः–अन्नदानक्षेत्राधिकारिभिः, प्रतिपाद्यमानः–दरिद्रेभ्यो दीयमानः, वा निश्चयेन, ये आर्ताः–पुत्रवैकल्यादिपीडिताः, तेभ्यः, अधिगतः–तेषामभ्युदयाय तेभ्यः प्राप्तः, अर्थः–दानार्थधनं यस्याम्, यद्वा मानवानां मध्ये य आर्तास्ते मानवार्ताः, तदधिगतोऽर्थः सत्त्रिप्रतिपाद्यो यस्याम्, यद्वा सत्रं यज्ञस्तदस्ति येषां तैः सत्त्रिभिः–यजमानैः, प्रतिपाद्यमानः–ऋत्विगाचार्यादिभ्यो दक्षिणारूपेण दीयमानः, वार्ताधिगतार्थः–कृष्यादिद्वारोपार्जितार्थो गो-हिरण्यादिरूपो यस्यां तादृशी, राजनीतिपक्षे तु सत्री–कपटवेषधारी गूढचरः, तेन प्रतिपाद्यमाना–कथ्यमाना, या वार्ता–परराष्ट्रवृत्तान्तः, तया, अधिगतः–लब्धः, अर्थः–धान्यादिरूपं धनं यस्यां तादृशी । "सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे" इति मेदिनी, "वार्ता वार्तिङ्गणे वृत्तौ वार्ता कृष्याद्युदन्तयोः" इति, "वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये" इति च विश्वः । पुनः **अर्हद्दर्शनस्थितिरिव** जैनशासनव्यवस्थेव, **नैगमव्यवहाराक्षिप्तलोका** नैगमस्य–वणिजः, व्यवहारेण–आचरणेन सद्योमूल्यमनासाद्यापि वस्तुदानादिरूपेण, आक्षिप्ताः–आकृष्टाः, लोका यस्याम्, पक्षे नैगमनयेन व्यवहारनयेन च आक्षिप्ताः–अवहिताः लोका यस्यां तादृशी, "नैगमो नयपौरोपनिषद्वतिषु वाणिजे" इत्यनेकार्थसङ्ग्रहः । पुनः **रसातलविविक्षुरविरथचक्रभ्रान्तिरिव** रसा–पृथ्वी–तस्यास्तलं–पातालम्, विविक्षुः प्रवेष्टुमिच्छुः, यो रविः–सूर्यः, तदीयरथचक्रस्य, भ्रान्तिरिव–भ्रमणमिव, **चीत्कारमुखरितमहाकूपारघट्टा** चीत्कारेण–ध्वनिविशेषेण, मुखरिताः–ध्वनिताः, महाकूपानां गुरुगभीरकूपानाम्, अरघट्टाः–जलोद्धरणकाष्ठादियन्त्रा यस्यां तादृशी, पक्षे चीत्कारेण–भ्रमद्रथचक्रध्वनिविशेषेण, मुखरिताः–प्रतिशब्दिताः, महाकूपाराणां महासागराणाम्, घट्टाः–जलावतारप्रदेशा ययेत्यर्थः, "रसा विश्वम्भरा स्थिरा" इत्यमरः । अत्र सर्वत्र श्लेषानुप्राणितोपमालङ्कारः । पुनः **सर्वाश्चर्यनिधानं** सर्वेषामाश्चर्याणाम्–अद्भुतानां वस्तूनाम्, निधानं–निधिभूता, **उत्तरकोशलेषु** कोशलदेशोत्तरखण्डमध्ये, **अयोध्येति यथार्थाभिधाना** यथार्थं–केनापि योद्धुमशक्येत्यर्थानतिक्रामि अयोध्येत्यभिधानं नाम यस्यास्तादृशी नगरी, अस्तीति पूर्वोक्तक्रियापदेनान्वेति, "आख्याह्वे अभिधानं च नामधेयं च नाम च" इत्यमरः [ ट ] । **या** निरुक्तपूर्वा अयोध्या नगरी, **सितांशुकरसम्पर्काद्** सितांशोः–चन्द्रस्य, करसम्पर्कात्–किरणसंमिश्रणात्, **अपरिस्फुटस्फटिकदोलासु** अपरिस्फुटानां–भेदेनाप्रतिभासमानकिरणानाम्, स्फटिकानां दोलासु–तादृशस्फटिकमयेषु दोलनात्मकक्रीडायन्त्रेषु, **बद्धासनैः** कल्पितासनैः, **विलासिमिथुनैः** विलासी च–विलासशीलश्च,

**खेचरमिथुनस्य शुचिप्रदोषेषु शोभामधरीचकार विद्याधरलोकस्य [ ठ ], यस्याश्च गगनशिखोल्लेखिना प्राकारशिखरेण स्खलितवर्त्मा प्रस्तुतचाटुरिव प्रत्यग्रवन्दनमालाश्यामलामधिगोपुरं विलम्बयामास वासरमुखेषु रविरथाश्वपङ्क्तिमरुणः [ ड ], यस्यां च प्रियतमाभिसारप्रचलितानां पण्याङ्गनानामङ्गलावण्यसंवर्धिताभिराभरणरत्नांशुसन्ततिभिः स्तम्भिततिमिरोदया भवनदीर्घिकासरोजवननिद्राभिरन्वमीयन्त रजनीसमारम्भाः [ ढ ], या च दक्षिणानिलतरङ्गितानां प्रतिभवनमुच्छ्रितानामनङ्गध्वजानामङ्गुलीविभ्रमाभिरालोहितांशुकवैजयन्तीभिः कृतमकरध्वजप्लोषमहापातकस्य शूलपाणेर्दत्तावकाशामलकापुरीमिव तर्जयन्ती मधुसमये समलक्ष्यत [ ण ], यस्यां च मुदितगृहशिखण्डिकेकारवमुखरिताभिस्तरुणजलद-**

---

विलासिनी च विलासशीला च, तौ विलासिनौ, स्त्रीलिङ्गेन सहोक्तौ पुल्लिङ्गस्यैव शेषानुशासनात्, तयोर्मिथुनं-द्वन्द्वम्, तैः, स्त्रीपुंसैरित्यर्थः, **अवगाह्यमानगगनान्तरा** अवगाह्यमानं गगनान्तरम्-आकाशमध्यं यस्यां तादृशी, **शुचिप्रदोषेषु** शुक्लपक्षरजनीमुखेषु, समन्ताद्-अप्रतिहतम्, **अन्तरिक्षसञ्चरत्खेचरमिथुनस्य** अन्तरिक्षे-आकाशे, सञ्चरन्ति-विहरमाणानि, खेचराणाम्-आकाशविहारिणाम्, विद्याधराणामित्यर्थः, मिथुनानि-युगलानि यस्मिन् तादृशस्य, **विद्याधरलोकस्य** विद्यानां गगनतलविहाराद्युपयोगिविद्यानाम्, धराः-धारयितार इति विद्याधराः, सुकृतिनो मानवविशेषाः, तेषाम्, लोकस्य-वैताढ्यरूपप्रदेशस्य, **शोभां** छविच्छटाम्; **अधरीचकार** तिरश्चकार, अणिमादिसिद्ध्यायासं विनैव तद्वदव्याहतगगनतलसञ्चारसौभाग्यनिष्पत्तेरिति भावः, "किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः" इति, "शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डराः" इति, "नभोऽन्तरिक्षं गगनम्" इति, "लोकस्तु भुवने जने" इति चामरः, "करो वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः" इति मेदिनी, [ ठ ]। च पुनः, **यस्याः** प्रक्रान्तपूर्वाया अयोध्यानगर्याः, **अधिगोपुरं** गोपुरेषु-पुरद्वारेषु, **गगनशिखोल्लेखिना** गगनशिखा-गगनचरमोर्ध्वदेशः, तदुल्लेखिना-तदभिव्यापिना, तद्वदुन्नतेनेत्यर्थः, **प्राकारशिखरेण** प्राकारमौलिना, **स्खलितवर्त्मा** स्खलितं व्याहतं वर्त्म मार्गो यस्य तादृशः सन्, **अरुणः** सूर्यसारथिः, **प्रस्तुतचाटुरिव** प्रस्तुतम्-उपस्थापितम्, वक्तुमारब्धमित्यर्थः, चाटु मार्गाव्याघाताय प्राकारशिखरप्रार्थनात्मकं प्रियवाक्यं येन तादृश इव, तद्वक्तुमिवेति वक्ष्यमाणविलम्बहेतूत्प्रेक्षा, **प्रत्यग्रवन्दनमालाश्यामलां** प्रत्यग्राः-अभिनवाः, या वन्दनमालाः-निरुक्तप्राकारलम्बिततोरणस्रजः, ताभिः श्यामलां-हरितामिवेति प्रतीयमानोत्प्रेक्षा, **रविरथाश्वपङ्क्तिं** रविरथस्य-सूर्यरथस्य, तद्वाहिकामित्यर्थः, अश्वपङ्क्तिं-पङ्क्तिबद्धाश्वसमूहम्, **वासरमुखेषु** दिवसारम्भेषु, **विलम्बयामास** निरुक्तप्राकारप्रार्थनानुरोधेन स्थगयामास [ ड ]। च पुनः, **यस्यां** प्रकृतनगर्याम्, **प्रियतमाभिसारप्रचलितानां** प्रियतमाभिसाराय प्रियतमस्य-स्वप्रणयातिशयास्पदपुरुषस्य, तादृशपुरुषकर्मक इत्यर्थः, योऽभिसारः-तत्सङ्केतितस्थाने तदुपस्थानम्, तस्मै, प्रचलितानां-निजनिकेतननिष्क्रान्तानाम्, **पण्याङ्गनानां** कैतव्यमैथुनककामिनीनाम्, वेश्यानामित्यर्थः, **अङ्गलावण्यसंवर्धिताभिः** शरीरसौन्दर्यसमेधिताभिः, तदङ्गद्युतिदिग्धाभिरित्यर्थः, **आभरणरत्नांशुसन्ततिभिः** आभरणानां-हाराद्यलङ्काराणाम्, यानि रत्नानि, तदंशुसन्ततिभिः-तत्किरणगणैः, **स्तम्भिततिमिरोदया** स्तम्भितः-प्रतिबद्धः, तिमिरोदयः-अन्धकारोद्गमो येषु तादृशाः, **रजनीसमारम्भाः** रात्रिप्रारम्भाः, **भवनदीर्घिकासरोजवननिद्राभिः** भवनदीर्घिकासु-अन्तःपुरवापिकासु, यानि सरोजवनानि-कमलवनानि, तन्निद्राभिः-तत्सङ्कोचैः, **अन्वमीयन्त** एतत् सरोजवनं निशारम्भकालापन्नं सङ्कोचवत्त्वात्, इत्यनुमानप्रमाणेन प्रामीयन्त, न त्वन्धकारोद्गमेन, कमलसङ्कोचविकासाभ्यामेव तत्र दिनरात्रिविभाग इत्यर्थः [ ढ ]। च पुनः, **या** प्रकृतनगरी, **मधुसमये** वसन्तसमये चैत्रसमये वा, **अलकापुरीं** कुबेरपुरीम्, **तर्जयन्तीव** भर्त्सयन्तीव, **समलक्ष्यत** प्रतीयते स्म, प्रतिभाति स्मेत्यर्थः, कीदृशीममूं पुरीम्? **कृतमकरध्वजप्लोषमहापातकस्य** स्वनेत्रोद्भूताग्निना मदनदहनसञ्चितमहापापस्य **शूलपाणेः** शिवस्य, **दत्तावकाशां** दत्तस्थानाम्, महापातकिने स्थानदानस्यापि निषेधात्, किंद्वारा तर्जनम्? **दक्षिणानिलतरङ्गितानां** दक्षिणस्या दिशो योऽनिलो वायुस्तेन तरङ्गितानां-सञ्जाततरङ्गानाम्, तेनातिवेल्लमुद्वेल्लितानामित्यर्थः, **प्रतिभवनं** प्रतिप्रासादम्; **उच्छ्रितानाम्** उद्धूतानाम्, **अनङ्गध्वजानां** कामदेवध्वजानाम्, कामदेवार्चनोत्सवारोपितध्वजस्तम्भानामित्यर्थः, **अङ्गुलीविभ्रमाभिः** अङ्गुल्या विभ्रमो विशिष्टा भ्रान्तिर्यासु ताभिः, अङ्गुल्यनुकारिणीभिरित्यर्थः, **लोहितांशुकवैजयन्तीभिः** रक्तवस्त्रपताकाभिः, तद्द्वारेत्यर्थः [ ण ]। च पुनः, **यस्याम्** अयोध्यानगर्याम्, **सुकृतिनः** भाग्यवन्तो जनाः,

पङ्क्तिभिः परिवारितप्रान्तासु प्रासादशिखरमालासु प्रावृषि कृतस्थितयो ग्रीष्मकालपरिभुक्तानामुपवनोपरुद्धपर्यन्तभुवामधस्तनभूमिकानां नोदकण्ठन्त सुकृतिनः [ त ], यस्यां च जलधरसमयनिर्धौतरेणुपटलनिर्मलानामुदग्रसौधाग्रपद्मरागग्राव्णां प्रभाभिरनुरञ्जितः शरत्कालरजनीषु पौरजनीवदनपराजयलज्जया प्रतिपन्नकाषाय इव व्यराजत पार्वणो रजनिजानिः [ थ ], यस्यां च तुषारसम्पर्कपटुतरैस्तरुणीकुचोष्मभिरितस्ततस्ताड्यमाना हैमनीष्वपि क्षणदास्वमन्दीकृतचन्दनाङ्गरागगौरवमदत्ताङ्गारशकटिकासेवादरमप्लुष्टकेलिवापिकापङ्कजवनमवुः प्रभञ्जनाः [ द ], यस्यां च वीथीगृहाणां राजपथातिक्रमः, दोलाक्रीडासु दिगन्तरयात्रा, कुमुदखण्डानां राज्ञा सर्वस्वापहरणम्,

---

रजनिजानिः चन्द्रः [ थ ]। राजपथातिक्रमः नृपमार्गोल्लङ्घनम्, राज्ञा चन्द्रेण, सर्वस्वापहरणं सकलनिद्रा-

---

प्रावृषि वर्षर्तौ, मुदितगृहशिखण्डिकेकारवमुखरिताभिः मुदितानां–जलदध्वनिहृष्टानाम्, गृहशिखण्डिनां–विलासोत्सवाय गृहरक्षितमयूराणाम्, केकारवैः–केकात्मकशब्दैः, मुखरिताभिः–ध्वनिताभिः, तरुणजलदपङ्क्तिभिः तरुणानां–सलिलसम्भारोर्जितानाम्, जलदानाम्, पङ्क्तिभिः–श्रेणिभिः, परिवारितप्रान्तासु अवरुद्धासन्नप्रदेशासु, प्रासादशिखरमालासु राजभवनोर्ध्वभूमिकामण्डलेषु, कृतस्थितयः विहितावस्थानाः सन्तः, ग्रीष्मकालपरिभुक्तानां ग्रीष्मर्तूपभुक्तसुखानाम्, उपवनोपरुद्धपर्यन्तभुवां क्रीडावनाक्रान्तप्रान्तभूमीनाम्, अधस्तनभूमिकानां नीचैस्तनप्रासादखण्डानाम्, तेषु निवस्तुमित्यर्थः, नोदकण्ठन्त नैच्छन् [ त ]। च पुनः, यस्यां नगर्याम्, शरत्कालरजनीषु शरदृतुरात्रिषु, जलधरसमयनिर्धौतरेणुपटलनिर्मलानां जलधरसमयेन–वर्षाकालेन, निर्धौतैः–सलिलधारया प्रक्षालितैः, रेणुपटलैः–धूलीकलापैः, निर्मलानां–कलितचाकचक्यानाम्, उदग्रसौधाग्रपद्मरागग्राव्णाम् उदग्राणाम्–उन्नतानाम्, सौधानां–प्रासादानाम्, अग्रे–उपरि, ये पद्मरागग्रावाणः–तत्संज्ञकमणिमयपाषाणविशेषाः, तेषाम्, प्रभाभिः दीप्तिभिः, अनुरञ्जितः मिश्रितः, पार्वणः पूर्णिमाभवः, रजनीजानिः रजनी रात्रिर्जाया भार्यावदुल्लास्या यस्यासौ, चन्द्र इत्यर्थः, पौरजनीवदनपराजयलज्जया पौरजनीनां–नागरिकनारीणाम्, वदनैः–शरदिन्दुसमधिकसुन्दरमुखैः, यः पराजयः–तिरस्कारः, तल्लज्जया, प्रतिपन्नकाषाय इव धृतरक्तरूप इवेत्युत्प्रेक्षा, व्यराजत विशेषेणादीप्यत । "काषायोऽथ सुरभौ लोहितेऽन्यवत्" इति विश्वः [ थ ]। च पुनः, यस्यां निरुक्तनगर्याम्, हैमनीष्वपि हेमन्तकालिकीष्वपि, क्षणदासु रजनीषु, तुषारसम्पर्कपटुतरैः तुषारसम्पर्केण–हिमसम्पातेन, पटुतरैः–उत्कटतरैः, तरुणीकुचोष्मभिः युवतिस्तनोष्णगुणैः, "कूपोदकं वटच्छाया श्यामा स्त्री चेष्टकागृहम् । शीतकाले भवेदुष्णमुष्णकाले च शीतलम्" ॥ इत्यनुभवात्, इतस्ततः सर्वतः, ताड्यमानाः आहन्यमानाः, उष्णतामापाद्यमानाः, प्रभञ्जनाः महावाताः, अमन्दीकृतचन्दनाङ्गरागगौरवं चन्दनेन–रक्तचन्दनेन, योऽङ्गरागः–गण्डस्थलाद्यङ्गरञ्जनम्, तस्य यद् गौरवं–बाहुल्यम्, तदमन्दीकृतं–न मन्दीकृतं वायूपनीतोष्मसत्त्वेन न न्यूनीकृतम्, किमुत सर्वथा परित्यक्तं यत्र तद् यथा स्यात्तथा, एवम्—अदत्ताङ्गारशकटिकासेवादरम् अदत्तः–अकृतः, अङ्गारशकटिकायाः–अङ्गाराधान्याः, सेवायां–शीतोपचारभूतायाम्, आदरः–अनुरागो यत्र कर्मणि तद् यथा स्यात्तथा, एवम्–अप्लुष्टकेलिवापिकापङ्कजवनम् अप्लुष्टं–तुषारपातेनादग्धम्, वायूपनीततरुणीकुचोष्मणा प्रतिबन्धादिति भावः, केलिवापिकापङ्कजवनं यस्मिन् कर्मणि तद् यथा स्यात्तथेति सर्वमेतदनुपदवक्ष्यमाणक्रियाविशेषणपदम्, अवुः वान्ति स्म । "निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा" इति, प्रभञ्जनो महावातो झञ्झावातः सवृष्टिकः" इति, "अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि" इति चामरः [ द ]। च पुनः, यस्यां नगर्याम्, वीथीगृहाणाम् आपणगृहाणामेव राजमार्गोभयपार्श्ववर्तिनाम्, राजपथातिक्रमः राजमार्गलङ्घनम्, न तु तत्रत्यजनानां राजपथस्य–राजशासनपद्धतेः, अतिक्रमः–अवहेलनम्, "आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्" इति विश्वः, दोलाक्रीडासु दोलाधिकरणकदोलनात्मकक्रीडास्वेव, दिगन्तरयात्रा दोलनवशादेकस्या दिशोऽपरदिग्गमनम्, न तु राजदण्डवशादन्यदिङ्निष्काशनम्, पुनः राज्ञा चन्द्रमसा, कुमुदखण्डानां

**अनङ्गमार्गणानां मर्मघट्टनव्यसनम्, वैष्णवानां कृष्णवर्त्मनि प्रवेशः, सूर्योपलानां मित्रोदयेन ज्वलनम्, वैशेषिकमते द्रव्यस्य कूटस्थनित्यता [ ध ], यत्र च भोगस्पृहया दानप्रवृत्तयः, दुरितप्रशान्तये शान्तिकर्माणि, भयेन प्रणतयः, कार्यापेक्षयोपचारकरणानि, अतृप्त्या द्रविणोपार्जनानि, विनयाधानाय वृद्धोपास्तयः पुंसामासन् [ न ], तस्यां च भुवनत्रयाश्चर्यभूतायां नगर्यामवार्यभुजबलारातिकठिनकण्ठा-**

---

पगमः, न नृपेण धनापहारः कस्यापि क्रियते, कृष्णवर्त्म–विष्णुमार्गोऽग्निश्च, मित्रः–रविः, मित्रं–सखा, द्रव्यस्य पृथिव्यादेः, **कूटस्थनित्यता** सदास्थायित्वनित्यता, अन्यत्र द्रव्यस्य धनस्य, लोकानां व्ययः [ ध ]। **तस्यामित्या-दिना** राजवर्णकः [ प ]।

---

चन्द्रविकासिकमलभेदानाम्, चन्द्रविकासिकमलवनानां वा, **सर्वस्वापहरणं** सर्वः–सकलः, न तु कियानेव, यः स्वापः–निद्रा, सङ्कोच इति यावत्, तस्य हारः–हरणं निरासः, न तु **राज्ञा** नृपेण, तत्रत्यस्य कस्यापि दोषविशेषवशेन सर्वस्वस्य–अशेषधनस्य, अपहारः–स्वायत्तीकरणम्, "राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रिय-शक्रयोः" इति मेदिनी, "खण्डः वनान्तरे भेदे" इति विश्वः, "स्वोऽस्त्रियां धने" इत्यमरः, पुनः **अनङ्गमार्गणानां** कामदेवशराणामेव, **मर्मघट्टनव्यसनं** म्रियते-ऽनेनेति मर्म हृदयादिस्थानम्, तद्घट्टने–तद्भेदने, व्यसनम्–आसक्तिः, न तु तत्रत्यानामन्येषाम्, म्रियतेऽनेन प्रकाश्यमानेनेति मर्म रहस्यम्, तद्घट्टनव्यसनं-तत्प्रकटनव्यसनम्; विद्वेषवशेन कण्ठादिमर्मस्थलोच्छेदनव्यसनं वा, "मार्गणस्तु शरेऽर्थिनि" इति हैमः, **वैष्णवानां**–विष्णुर्देवता येषां तेषाम्, विष्णुभक्तानामेवेति यावत्, **कृष्णवर्त्मनि** विष्णूपदिष्टाचारपद्धतौ, न तु तत्रत्यानामन्येषाम्, **कृष्णवर्त्मनि** वह्नौ ग्लानिबाहुल्येन महापातकापनोदार्थं वा प्रवेशः कृष्णे–मलिने, अपवित्रे इति यावत्, वर्त्मनि–मार्गे आचारे वा प्रवेशः "कृष्णवर्त्मा विधुन्तुदे दुराचारे हुताशने च" इति मेदिनी, **सूर्योपलानां** सूर्य-कान्तमणीनामेव, **मित्रोदयेन** सूर्योदयेन, **ज्वलनं** दीप्तिः, स्फुलिङ्गोद्गमनमित्यर्थः, न तु तत्रत्यानामन्येषाम्, मित्रस्य–सख्युः, उदयेन–अभ्युदयेन, ऐश्वर्येणेत्यर्थः, अमर्षाग्निना प्रज्वलनम्, **द्रव्यस्य** परमाणुरूपस्य पृथिव्यादिद्रव्यस्य, **वैशेषिक-मते** कणादप्रणीतवैशेषिकदर्शननये, **कूटस्थनित्यता** कूटवत्–अयोधनवत्, तिष्ठति प्रलयकालेऽपीति कूटस्थः, ध्वंसा-प्रतियोगीत्यर्थः,, स चासौ नित्यः–प्रागभावाप्रतियोगीति कूटस्थनित्यः, तत्ता, न तु **द्रव्यस्य** तत्रत्यहिरण्यादिधनस्य, कूटः–राशिः, कोष इत्यर्थः तत्र तिष्ठतीति कूटस्थः, स चासौ नित्यः–अक्षयः, अव्यय इति यावत्, तत्ता, धर्मकार्येषु सन्ततमेव व्ययेन तत्ताया असम्भवात्, "द्रव्यं भव्ये धने क्ष्मादौ जतुद्रुम-विकारयोः । विनये भेषजे रीत्याम्" इति हैमः [ ध ]।

**च** पुनः, **यत्र** यस्यां नगर्याम्, **पुंसां** तत्रत्यपुरुषाणाम्, **भोगस्पृहया** स्वर्गसुखोपभोगकामनयैव, **दानप्रवृत्तयः** अन्नादि-दानप्रसक्तयः, न तु दरिद्रजनकर्तृकयाच्ञया, **दुरितप्रशान्तये** ग्रहवैगुण्यादिजनकातीतानागतदुरितोपशमनायैव, **शान्ति-कर्माणि** ग्रहादिशान्तिजनकानुष्ठानानि, न तु नृपकोपप्रशान्तये तच्छान्तिजनककर्माणि, तत्र प्रजासु नृपकोपस्यैवानुदयात्, **भयेन** राजभयेनैव, **प्रणतयः** नमस्कृतयः, न तु धनादिलाभोद्देशेन, **कार्यापेक्षया** "स्वकार्यं साधयेद्धीमान्" इति नीत्या स्वकार्यानुरोधेन, **उपचारकरणानि** आराधनाकरणानि, न तु धनलिप्सया, **अतृप्त्या** "श्रेयसि केन तृप्यते" इति नीत्या तृप्तिराहित्येनैव हेतुना, **द्रविणोपार्जनं** धनोपार्जनम्, न तु दारिद्र्येण, **विनयाधानाय** विनयस्थापनायैव, **वृद्धोपास्तयः** वृद्धसेवाः, न तु किञ्चिल्लोभेन, **आसन्** सन्ति स्म; 'पुसामासन्' इति स्थाने 'पुंसां नासन्' इति पाठे तु पुंसां दानप्रवृत्तयः **भोगस्पृहया** निरुक्तभोगेच्छया, नासन्, अपि तु सत्त्वशुद्धिद्वारा मोक्षस्पृहया, शान्तिकर्माणि दुरितशान्तये नासन्, अपि तु शान्तिसंरक्षणाय, दुरितस्य तत्राभावात्, भयेन प्रणतयो नासन्, अपि तु भक्त्या, उपचारकर्माणि स्वकार्यानुरोधेन नासन्, अपि तु प्रीत्यनुरोधेन, धनोपार्जनमतृप्त्या नासन्, अपि तु तृप्त्यैव, वृद्धोपास्तयो विनयोपदर्शनाय नासन्, अपि तु भक्त्यैवेति व्याख्येयम् [ न ]। **भुवनत्रयाश्चर्यभूतायां** भुवनानां–स्वर्गमर्त्यपातालानां त्रयमिति भुवनत्रयम्, तत्र आश्चर्यभूतायां–शोभाभिरद्भुतरूपायाम्, **तस्याम्** अनुपदोपवर्णितरामणीयकायाम्, **नगर्याम्** अयोध्याराजधान्याम्, **मेघवाहनो राजा** मेघवाहननामा भूपतिः, अस्तीति शेषः, स कीदृशः? **अवार्यभुजबलारातिकठिनकण्ठास्थिदलनदन्तुरकृपाण-**

स्थिदलनदन्तुरकृपाणधारः [ प ], अवतार इव साक्षादरुणसारथेरेकरथाक्रान्तचतुरब्धिसीमा, समस्तैकविष्टपाधिपतया तुल्यरेखया वासुकि-वासवयोरवस्थितः, यथाविधिव्यवस्थापितवर्णाश्रमधर्मो यथार्थः प्रजापतिः [ फ ], प्रतिपक्षाणामान्तराणामन्तराणां च विनेता, प्राप्तदैवपुरुषकारानुगुण्यः, षाड्गुण्यप्रयोगचतुरः, चतसृष्वपि विद्यासु लब्धप्रकर्षः [ ब ], मनुष्यलोक इव गुणैरुपरिस्थितोऽपि मध्यस्थः सर्व-

---

**टिप्पनकम्**—वर्णाश्रमाः–ब्राह्मणादिब्रह्मचर्यादयः [ फ ]। **आन्तराणां** निकटानाम् । षाड्गुण्यं–षड्गुणाः सन्ध्यादयः, चतुर्विद्या–आन्वीक्षिकीत्रयीवार्तादण्डनीतयः [ ब ]। एकत्र **मध्यस्थः** समचित्तः, अन्यत्र मध्यवर्ती,

---

**धारः** अवार्य–वारयितुं निवारयितुमशक्यम्, भुजबलं–बाहुविक्रमो येषां तादृशा ये अरातयः–रिपवः, तेषां कठिनानि–कठोराणि, यानि कण्ठास्थीनि–ग्रीवास्थीनि, तद्दलने–तत्खण्डने, दन्तुरा–संजातदन्ता, प्रौढेत्यर्थः, कृपाणस्य खड्गस्य धारा–अग्रिमांशो यस्य तादृशः । "अभिघाति-पराऽराति-प्रत्यर्थि-परिपन्थिनः" इत्यमरः [ प ] । पुनः कीदृगसौ राजा? **अरुणसारथेः** अरुणः–तत्संज्ञकः, सारथिर्यस्य तस्य, सूर्यस्येत्यर्थः, **साक्षादवतार इव** साक्षान्मानवीयं स्वरूपमिव, **एकरथाक्रान्तचतुरब्धिसीमा** एकेन–द्वितीयनृपतिरथरहितेन, रथेन, आक्रान्ताः–अभिव्याप्ताः, चतुरब्धिसीमानः–पूर्व-पश्चिम-दक्षिणोत्तरसमुद्ररूपाः सीमानो येन तादृशः, चक्रवर्तीत्यर्थः, सूर्योऽपि एकेन-अद्वितीयेन, रथेन, आक्रान्तान्तरिक्षसीमा । पुनः कीदृगसौ? **समस्तैकविष्टपाधिपतया** समस्तम्–अखण्डम्, यद् एकं विष्टपं–भुवनं मर्त्यभुवनमिति यावत्, तदधिपतया–तत्स्वामित्वरूपया, **वासुकि-वासवयोः** वसुना–स्वशिरोधृतरत्नेन, कायति शब्दयतीति वासुकिः, पातालरूपाखण्डलोकाधिपतिर्नागेन्द्र इत्यर्थः, वसूनि–दिव्यरत्नानि, सन्ति यस्येति वासवः, स्वर्गलोकाधिपतिरिन्द्र इत्यर्थः, तयोः, **तुल्यरेखया** तदुभयसाधारणधर्मरूपचिह्नेन उपलक्षितः सन्, **अवस्थितः** स्थितः, "विष्टपं भुवनं जगत्" इति, "वासवो वृत्रहा वृषा" इति चामरः । पुनः कीदृगसौ? **यथाविधिव्यवस्थापितवर्णाश्रमधर्मः** यथाविधि–यथाक्रमम्, व्यवस्थापिताः–स्वराजधान्यां विशेषेण अवस्थापिताः, वर्णानां–ब्राह्मणादीनाम्, आश्रमाः–गृहाः, धर्माः–साङ्गशास्त्राध्ययनादयो येन तादृशः, अत एव **यथार्थः** सत्यः, **प्रजापतिः** पाति रक्षतीति पतिः, प्रजानां पतिः प्रजापतिः, प्रजापालकः, पक्षे **प्रजापतिः** ब्रह्मा, तत्पक्षे व्यवस्थापिताः–सृष्टिसमय एव विभक्ताः, वर्णाः–ब्राह्मणादयः, आश्रमाः–ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासाः, तेषां धर्माश्च येन स इति व्याख्येयम् । "कल्पे विधिक्रमौ" इत्यमरः, "प्रजापतिर्ना दक्षादौ महीपाले विधातरि" इति, "आश्रमो ब्रह्मचर्यादौ वानप्रस्थे वने मठे" इति च मेदिनी [ फ ] । पुनः कीदृगसौ? **आन्तराणाम्** अन्तःकरणभवानां रागद्वेषादीनामन्तरङ्गाणाम्, **अन्तराणां** बाह्यानां नृपान्तररूपाणाम्, **प्रतिपक्षाणां** विपक्षाणाम्, **विनेता** अपनेता, "अन्तरमवकाशावधि-परिधाना-ऽन्तर्धिभेदतादर्थ्ये । छिद्रात्मीय-विना-बहिरवसरमध्येऽन्तरात्मनि च" इत्यमरः । पुनः **प्राप्तदैवपुरुषकारानुगुण्यः** देवस्यायं दैवः, देवसम्बन्धी यः पुरुषकारः–पराक्रमः, दैवी शक्तिरित्यर्थः, तस्य आनुगुण्यम्–आनुकूल्यं प्राप्तं येन तादृशः, अनुकूलदेवताक इत्यर्थः, अथवा प्राप्तं–लब्धम्, दैवस्य–भाग्यस्य, तत्समुच्चितस्य पुरुषकारस्य–उद्योगस्य च, आनुगुण्यं–सहकारिभावेनैककार्यानुकूल्यं येन तादृशः, "यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् । तथा पुरुषकारेण विना दैवं न सिध्यति" इति नीत्यनुसरणशील इत्यर्थः । पुनः **षाड्गुण्यप्रयोगचतुरः** षण्णां गुणानां मन्त्रगुणानां सन्धिविग्रहादीनां समाहारः षड्गुणी, सैव षाड्गुण्यम्, तस्य प्रयोगा इति षाड्गुण्यप्रयोगाः–सन्धिविग्रहाद्यनुष्ठानानि, तत्र चतुरः–कुशलः, तदुक्तम्–"सन्धिश्च विग्रहं यानमासनं च समाश्रयम् । द्वैधीभावं च संविद्यान्मन्त्रस्यैतांस्तु षड् गुणान्" ॥ इति, पुनः **चतसृष्वपि** आन्विक्षिक्यादिषु चतुःसंख्याकासु, विद्यासु, **लब्धप्रकर्षः** लब्धः–प्राप्तः, प्रकर्ष–उत्कर्षो येन तादृशः, तदुक्तं कामन्दकेन–"आन्विक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । विद्याश्चैताश्चतस्रस्तु लोकसंस्थितिहेतवः" ॥ इति [ ब ] । पुनः कीदृगसौ? **मनुष्यलोक इव** मर्त्यलोक इव, **गुणैः** दयादाक्षिण्यादिभिः, **उपरिस्थितोऽपि** उन्नतोऽपि, सर्वश्रेष्ठोऽपीत्यर्थः, **सर्वलोकानां** सर्वजनानाम्, **मध्यस्थः** मध्यवर्ती, सर्वजनसाधारण इति विरोधः, तत्परिहारस्तु **मध्यस्थः** सर्वजनेषु

लोकानाम्, विशेषज्ञोऽपि समदर्शनः सर्वदर्शनानाम्, अनायासगृहीतसकलशास्त्रार्थयाऽपि नीतिशास्त्रेषु खिन्नया परमाणुसूक्ष्मयापि क्रोडीकृतत्रैलोक्यया व्यक्तविवेकयाऽप्यतिनिबिडया प्रसन्नयाऽप्यसन्निहितमदया विशालहृदयासादितस्वेच्छावकाशयेवातिदूरप्रसृतया प्रज्ञया सम्यग्ज्ञातहेयोपादेयविभागः [ भ ], सन्निहितदण्डनीतिप्रतीहारीसमाकृष्टाभिः समन्ततः पतिंवराभिरिवागत्यागत्य बद्धमालाभिराश्रितो विपक्ष-

---

**सर्वलोकानां** सर्वजनानामधोलोकादीनां च। **समदर्शनः** समज्ञानो विरोधे, अन्यत्र समदृष्टिः। विरोधे **खिन्नया** खेदं गतया, अन्यत्र तत्परया, या परमाणुसूक्ष्मा सा कथं व्याप्तत्रिलोका?, अन्यत्र **विषयीकृतत्रिभुवना**, या व्यक्तविवेका–स्पष्टपृथग्भावा सा कथम् **अतिनिबिडा**–अतिघना, अन्यत्र **विवेकः**–विचारः, या **प्रसन्ना**–मदिरा, सा सन्निहितमत्तता, अन्यत्र **प्रसन्नया** निर्मलया, **मदः**–दर्पः [ भ ]। एकत्र दण्डनीतिः–विद्या, सैव प्रतीहारी, अन्यत्र सन्निहितदण्ड-

---

पक्षपातविकल इति, मनुष्यलोकपक्षे **गुणैः** मानात्मकानेकरज्जुभिः, **उपरिस्थितोऽपि** सर्वोपरिभागे वर्तमानोऽपि, **सर्व-लोकानाम्** ऊर्ध्वाधोमध्यलोकानाम्, **मध्यस्थः** मध्यवर्तीति विरोधः, तत्परिहारस्तु **गुणैः** मोक्षार्हक्षेत्रत्वादिभिः, **उपरिस्थितः** अग्रणीः, **मध्यस्थः** ऊर्ध्वलोकाधोलोकान्तरालवर्तीति, अत्र श्लेषानुप्राणितोपमा विरोधाभासेन संकीर्यते। पुनः **सर्वदर्शनानां** पारगतसुगतादिनिखिलमतानाम्, **विशेषज्ञोऽपि** तत्रत्यो यो विशेषः–क्षणिकत्वादिकृतवैलक्षण्यं तस्य ज्ञाताऽपि, यद्वा तेषां विशेषेण ज्ञाताऽपि, तेषां **समदर्शनः** समं सामान्यं विशेषविकलम्, दर्शनं–ज्ञानं यस्य स तथेति विरोधः, तत्परिहारस्तु समं–सर्वपालकतया पक्षपातविकलम्, दर्शनं–दृष्टिर्यस्य स तथेति। पुनः **प्रज्ञया** बुद्ध्या, **सम्यग्ज्ञातहेयोपादेयविभाग** सम्यक्–संशयविपर्ययरहितं यथा स्यात् तथा, ज्ञातः–विदितः, प्रमित इत्यर्थः, हेयोपादेयविभागः–हेयस्य अनिष्टजनकत्वेन वर्जनीयस्य, उपादेयस्य इष्टजनकत्वेन ग्राह्यस्य प्रवृत्तिविषयस्य च कार्यस्य, विभागः–विवेको येन तादृशः, कृत्याकृत्यप्रवृत्तिनिवृत्तिनिपुण इत्यर्थः, कीदृश्या प्रज्ञया? **अनायासगृहीतसकलशास्त्रार्थयाऽपि** अनायासमेव यथा स्यात्तथा गृहीतः–विषयीकृतः, सकलः–समग्रः, शास्त्रार्थो यया तथाभूतयाऽपि, **नीतिशास्त्रेषु** तदर्थग्रहणेषु, **खिन्नया** श्रमाकुलतया मन्थरयेति विरोधः, तदुद्धारे तु **खिन्नया** तदीयतत्त्वानुसन्धानव्यापृतया, पुनः **परमाणुसूक्ष्मयाऽपि**–परमाण्वपेक्षयाऽपि सूक्ष्मया–अल्पयाऽपि, **क्रोडीकृतत्रैलोक्यया** त्रयाणां लोकानां–भुवनानां समाहारः त्रिलोकी, सैव त्रैलोक्यम्, तत् क्रोडीकृतं–भुजान्तरितं व्याप्तमिति यावत्, यया तादृश्येति विरोधः, तदुद्धारे तु परमाणुवत् सर्वत्राव्याहतगत्या गोचरीकृतत्रैलोक्यया, करतलगतामलकवद्विश्वावभासिकयेत्यर्थः, पुनः **व्यक्तविवेकयाऽपि** व्यक्तः–स्फुटः, विवेकः–पार्थक्यं यस्याः, तथाभूतयाऽपि, **अतिनिबिडया** अतिसान्द्रयेति विरोधः, तदुद्धारे तु स्पष्टविचारया, अभेदनीयया च "विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोः" इति मेदिनी, पुनः **प्रसन्नयाऽपि** मदिरारूपयाऽपि, **असन्निहितमदया** अस्पृष्टमदया, मदशून्ययेति यावत्, अथवा मदधातोर्हर्षग्लेपनोभयार्थकतया **प्रसन्नयाऽपि** हर्षान्वितयाऽपि, हर्षशून्ययेत्यर्थद्वये विरोधः, तदुद्धारे तु **प्रसन्नया** निर्मलया, **असन्निहितमदया** गर्वशून्यया च, "मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः" इति विश्वः, पुनः **विशालहृदयासादितस्वेच्छावकाशयेव** विशालं–बृहत्स्वरूपम्, यद् हृदयं–मेघवाहननृपस्य चित्तम्, तत्र आसादितः–लब्धः, स्वेच्छया अवकाशः–स्थानं यया तथाभूतयेवेत्युत्प्रेक्षा, **अतिदूरप्रसृतया** अधिष्ठानानुगुण्येन सुदूरविस्तृतया प्रज्ञया [ भ ]। पुनः कीदृगसौ राजा? **विपक्षलक्ष्मीभिः** शत्रुभूतनृपलक्ष्मीभिः, न तु कयाचिदेव तदीयलक्ष्म्या, **आगत्याऽऽगत्य** पुनः पुनरागत्य, '**अगत्याऽऽगत्य**' इति विश्लेषे **अगत्या** गत्यन्तरविरहेणेत्यर्थः, **आश्रितः** स्वयं निषेवितः, कीदृशीभिस्ताभिः? **पतिंवराभिरिव** पतिं–भर्तारं, वृण्वन्ति–स्वेच्छया स्वीकुर्वन्तीति पतिंवरास्ताभिरिव, **समन्ततः सन्निहितदण्डनीतिप्रतीहारीसमाकृष्टाभिः** सन्निहिता–अध्ययनादिना हृदयङ्गता, या दण्डनीतिः–शुक्रादिप्रणीतनीतिशास्त्रोद्धृतदण्डविषयकनीतिः, तद्रूपया प्रतीहार्या–द्वारपालिकया स्त्रिया, **समन्ततः**—सर्वतः, समाकृष्टाभिः–विपक्षमन्दिरादाकृष्य प्रवेशिताभिः, पक्षे सन्निहितेन–स्वावलम्बितेन, दण्डेन, नीतिः–देशान्तरनयनं यस्यास्तादृश्या, प्रतीहार्या, समाकृष्टाभिः–स्वयंवरणमन्दिरं प्रवेशिताभिः, **बद्धमालाभिः** बद्धा–रचिता, माला–श्रेणी यासां तादृशीभिः, श्रेणीबद्धाभिरित्यर्थः, पतिंवरापक्षे बद्धा–करे दृढं गृहीता,

लक्ष्मीभिः [ म ], गगनाभोग इव शशि-भास्कराभ्यामच्युत इव शङ्ख-चक्राभ्याममम्भसां पतिरिवामृत-वाडवाभ्यामभिराममभीषणो यशः-प्रतापाभ्याम् [ य ], इन्दुविमलाभिर्जलदसमयारम्भ इव राजहंसपङ्क्तिभिः प्रतिमानसं प्रस्थिताभिर्व्याप्तभुवनान्तरालो गुणपरम्पराभिः [ र ], असङ्ख्यगुणशालिनापि सप्ततन्तुख्यातेन सर्वदाह्लादितलोकेनाप्येकदानानन्दितजनेनोदात्तेनापि स्वरितेन चरितेन पवित्रितत्रिभुवनावनिः [ ल ],

---

गमना या प्रतीहारी [ म ]। मानसं-चित्तं सरश्च [ र ]। योऽसंख्यगुणशाली-असंख्यातदवरकशोभी, स कथं सप्ततन्तुख्यातः-सप्तगुणप्रसिद्धः?, अन्यत्र गुणाः-शौर्यादयः, सप्ततन्तुः-यागः, यः सर्वदा आह्लादितलोकः, स कथमेकदाऽनानन्दितजनः?, अन्यत्र एकदानेन आनन्दितलोकः, य उदात्तस्वरः स कथं स्वरितः-समाहारः?, अन्यत्र उदात्तेन उदारेण, स्वरितेन स्वर्गं गतेन [ ल ]।

---

माला-वरणमाला याभिस्ताभिः [ म ]। पुनः कीदृगसौ राजा? **यशः-प्रतापाभ्याम् अभिराममभीषणः** यशसा-विक्रमकीर्तिकौमुद्या, अभिरामः-चन्द्र इव लोकप्रियः, प्रतापेन-कोशदण्डजन्यतेजसा, भीषणः-सूर्य इव लोकभयङ्करः, काभ्यां क इव? **शशि-भास्कराभ्यां गगनाभोग इव** गगनाभोगः-गगनविस्तारो यथा शशिना-चन्द्रेण, अभिरामः, भास्करेण-सूर्येण, भीषणश्च भवति तथा, "आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपि" इति विश्व-मेदिन्यौ, पुनः **शङ्ख-चक्राभ्याम् अच्युत इव** अच्युतो विष्णुर्यथा शङ्खेन-शं कल्याणं खनति जनयति यः स शङ्खः, यद्वा शाम्यति येनालक्ष्मीरसौ शङ्खः, तेन, अभिरामः-सौम्यः, चक्रेण-तन्नाम्ना अस्त्रविशेषेण, भीषणश्च भवति तथा, "पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः" इत्यमरः, पुनः **अमृत-वाडवाभ्याम् अम्भसां पतिरिव** अम्भसां-जलानां पतिः-समुद्रो यथा अमृतेन अभिरामः, वाडवेन-वडवानलेन, भीषणश्च भवति तथा [ य ]। पुनः कीदृगसौ राजा? **गुणपरम्पराभिः** गुणानां-दयादाक्षिण्यादीनाम्, परम्पराभिः-श्रेणीभिः, **व्याप्तभुवनान्तरालः** व्याप्तं भुवनान्तरालं-भुवनाभ्यन्तरं येन तादृशः, कीदृशीभिस्ताभिः? **जलदसमयारम्भे** जलानि ददतीति जलदा मेघाः, तेषां समयस्य-वर्षर्तुरूपस्य, आरम्भे उपक्रमे, **राजहंसपङ्क्तिभिरिव** हंसानां राजानो राजहंसाः, निरुक्तपूर्वा हंसविशेषाः, तेषां पङ्क्तिभिरिव-श्रेणीभिरिव, **प्रतिमानसं** प्रतिहृदयम्, पक्षे मानसाख्यसरोवराभिमुखम्, तद्दिशमित्यर्थः, **प्रस्थिताभिः** प्रकर्षेण स्थिताभिः, पक्षे प्रयाताभिः, **इन्दुविमलाभिः** पक्षद्वये चन्द्रवदुज्ज्वलाभिः, "हंसाश्चक्राङ्ग-वकाङ्ग-मानसौकः-सितच्छदाः । राजहंसास्त्वमी चञ्चु-चरणैरतिलोहितैः" ॥ इत्यभिधानचिन्तामणिः [ र ]। पुनः कीदृगसौ राजा? **चरितेन** चरित्रेण, **पवित्रितत्रिभुवनावनिः** पवित्रिता-पवित्रीकृता, त्रिभुवनावनिः-स्वर्ग-मर्त्य-पातालाख्यलोकत्रयभूमिर्येन तादृशः, कीदृशेन तेन? **असंख्यगुणशालिनाऽपि** असंख्याः-संख्यारहिताः, ये गुणाः-तन्तवः, तच्छालिनाऽपि, **सप्ततन्तुख्यातेन** सप्तसंख्यकतन्तुख्यातेनेति विरोधः, तदुद्धारे तु दयादाक्षिण्याद्यसंख्यगुणशालिना, अथ च सप्तभिर्भूरादिमहाव्याहृतिभिस्तन्यते विस्तार्यत इति सप्ततन्तुर्यज्ञस्तेन, ख्यातेन-तत्कर्तृतया प्रसिद्धेन, "यज्ञो यागः सवः सत्रं स्तोमो मन्युर्मखः क्रतुः । संस्तरः सप्ततन्तुश्च वितानं बर्हिरध्वरः" ॥ इति हैमः, पुनः कीदृशेन? **सर्वदाह्लादितलोकेनापि** सर्वदा-सर्वकाले, आह्लादिताः-आनन्दिताः, लोकाः-जना येन तादृशेनापि, **एकदा** एककाले, अनानन्दिता जना येन तथाभूतेनेति विरोधः, तदुद्धारे तु एकेन-प्रथमेनैव, दानेन, यद्वा प्रधानेन, दानेन, आनन्दिता जना येन तादृशेन, प्रथमवार एव सर्वार्थदानेन तोषिताय द्वितीयवारे दानानुपयोगात्; प्रधानवस्तुनो वा दानेन तद्वारैवाप्रधानार्थनिष्पत्त्या तद्दानानुपयोगादिति भावः, "एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते" ॥ इति । पुनः **उदात्तेनापि** ताल्वादिस्थानोर्ध्वभागोच्चारितत्वेन तत्संज्ञकेनापि, **स्वरितेन** तन्मध्यभागोच्चारणनिमित्तकस्वरितसंज्ञकेन स्वररूपेणेति विरोधः, तदुद्धारे तु **उदात्तेन** हृदयप्रियेण, **स्वरितेन** स्वः-स्वर्गम्, इतेन-गतेन, तत्पर्यन्तं प्रसिद्धेनेत्यर्थः, "उदात्तोदात्तृमहतोर्हृद्ये च स्वरभिद्यपि" इति हैमः। अत्र सर्वत्र विरोधाभासोऽलङ्कारः [ ल ]।

उच्चापशब्दः शत्रुसंहारे न वस्तुविचारे, वृद्धत्यागशीलो विवेकेन न प्रश्नोत्सेकेन, गुरुवितीर्णशासनो भक्त्या न प्रभुशक्त्या, स्वजनपराङ्मुखः परभार्यासु न सपर्यासु, अवनितापहारी पालनेन न लालनेन, अकृतकारुण्यः करचरणे न शरणे [ व ], सौजन्यपरतन्त्रवृत्तिरप्यसौजन्ये निषण्णः, नलपृथुप्रभोऽप्यनलपृथुप्रभः, समिद्व्यतिकरस्फुरितप्रतापोऽप्यकृशानुभावोपेतः, सगरान्वयप्रभवोऽप्यमृतशीतल-

---

**टिप्पनकम्**—**उच्चापशब्दः** उद्धृतधनुर्ध्वनिः, न **उच्चापशब्दः** महापशब्दः, **वृद्धत्यागः**—महादानम्, अन्यत्र महत्परित्यागः, एकत्र शासनानि-ग्रामादीनाम्, अन्यत्र शासनम्-आदेशः, **स्वजनम्**—आलिङ्गनम्, **स्वजनः**—बन्धुश्च, **अवनितापहारी** पृथ्वीसन्तापापनोदी, अन्यत्र वनिता—योषित्, **अकृतकारुण्यः** अकृत्रिमरक्तत्वः, अन्यत्र अविहितदयः [ व ]। सौजन्यं-सुजनता, **असौ** खड्गे, निषण्णः, क? **जन्ये** सङ्ग्रामे। नल-पृथू—राजानौ, ताभ्यां प्रभः—समः, अनलः—अग्निः, तद्वत् पृथुप्रभः—महातेजाः। यः **समिद्व्यतिकरस्फुरितप्रतापः** काष्ठसम्बन्धदीप्ततापः, स कथम् **अकृशानुभावोपेतः** अनग्नित्वयुक्तः?, अन्यत्र समित्—सङ्ग्रामः, प्रतापः—वीर्यम्,

---

**परागाभिधा विवृति**—पुनः कीदृगसौ राजा? **शत्रुसंहारे** रिपुविध्वंसनावसर एव, **उच्चापशब्दः** उद्गताः, चापानां-धनुषाम्, शब्दाः-टङ्कारध्वनयो येन तादृशः, न तु **वस्तुविचारे** किञ्चिद्वस्तुविवेचने, कदाचन उच्चः—तारस्वरः, अपशब्दः—प्रतिविवेक्तारं प्रत्यनभिज्ञत्वापादनपरः, दुष्टशब्दो यस्य तादृशः। पुनः **विवेकेन** चिरमेभिः सहवासे कदाचिदनवधानवशादनुचितमुच्येतेत्यालोचनेनैव, **वृद्धत्यागशीलः** वृद्धस्य-स्वसमधिकवयस्कजनस्य, त्यागः—चिरसहवासवर्जनमेव शीलं यस्य तादृशः, यद्वा **विवेकेन** अधमर्णरक्षणविचारेण, वृद्धस्य—अधमर्णदेयस्य मूलधनादधिकस्य, कुसीदद्रव्यस्येत्यर्थः, त्यागशीलः—वर्जनशीलः, अथवा **विवेकेन** पुनर्याच्ञाक्लेशनिवारणविचारेण, वृद्धस्य—याचकजनतत्क्षणापेक्षिताधिकस्य धनस्य, त्यागशीलः—दानशीलः, **विवेकेन** पुण्यातिशयविचारेण, वृद्धो महान्, स चासौ त्यागो दानमिति वृद्धत्यागः—महादानम्, तच्छीलो वा, न तु **प्रश्नोत्सेकेन** स्वबुद्धिगर्वेण, वृद्धस्य—पण्डितस्य, त्यागशीलः—उपेक्षाशीलः, तदुक्तम्—"बुध-वृद्धौ पण्डितेऽपि" इति। पुनः **भक्त्या** दर्शितया धर्मप्रीत्या, **गुरुवितीर्णशासनः** गुरुणा—धर्मगुरुणा, वितीर्णं—दत्तम्, शासनं—धर्मोपदेशनं यस्मै तादृशः, न तु **प्रभुशक्त्या** राजशक्त्या, गुरवे दत्तं शासनम्—आज्ञा येन तादृशः, गुरु भयङ्करं दत्तं शासनं येन तादृशो वा, पुनः **परभार्यासु** अन्यदीयाङ्गनासु, **स्वजनपराङ्मुखः** स्वजनम्—आलिङ्गनम्, तत्र पराङ्मुखः-विमुखः, न तु **सपर्यासु** सत्कारविधौ, **स्वजनपराङ्मुख** आत्मीयजनविमुखः, अपि तु राज्याधिकारनिक्षेपणेन स्वजनसंस्कारशील इत्यर्थः, "पूजा नमस्यापचितिः सपर्याऽर्चाऽर्हणाः समाः" इत्यमरः। पुनः **पालनेन** सर्वतो रक्षणेन, **अवनितापहारी** अवनेः—स्वाधिकृतभूमेः, तापं-संतापम्, हरतीत्येवंशीलः, न तु **लालनेन** विलासेन, अवनितानां—वनिता स्त्री, वनिताशब्दस्य स्त्रीसामान्यवाचित्वेऽपि सम्बन्धिशब्दमहिम्ना "मातरि वर्तितव्यम्" "पितरि शुश्रूषितव्यम्" इत्यादौ मात्रादिशब्दस्य प्रत्यासत्त्या स्वमात्रादिपरत्ववत् स्वस्त्रीपरत्वात्, तद्भिन्नानाम्, परवनितानामित्यर्थः, अपहारी-अपहरणशीलः। पुनः **कर-चरणे** करौ च चरणौ च तेषां समाहारः कर-चरणम्, तस्मिन्, **अकृतकारुण्यः** अकृतकम्—अकृत्रिमम्, आरुण्यं—रक्तत्वं यस्य तादृशः, न तु **शरणे** दीनजनरक्षणे, **अकृतकारुण्यः** अकृतकृपः। अत्र सर्वत्र श्लेषानुप्राणितपरिसंख्यालङ्कारः [ व ]।

पुनः कीदृगसौ राजा? **सौजन्यपरतन्त्रवृत्तिरपि** सुजनस्य भावः सौजन्यम्, तत्परतन्त्रा तदधीना, वृत्तिर्वर्तनं यस्य तादृशोऽपि, **असौजन्ये** सौजन्यविरुद्धे दौर्जन्ये, **निषण्णः** स्थित इति विरोधः, तदुद्धारे तु **असौ** कविपरोक्षभूतः प्रकृतो राजा, **जन्ये** कार्ये, **निषण्णः** संलग्नः, यद्वा **जन्ये** युद्धे, तदवसर इत्यर्थः, **असौ** खड्गे, **निषण्णः** तत्प्रहरणपरः, "जन्यं हट्टे परीवादे सङ्ग्रामे च नपुंसकम्" इति मेदिनी। पुनः **नलपृथुप्रभोऽपि** नलात्—नैषधनृपात्, पृथ्वी—विपुला, प्रभा—राजतेजो यस्य, यद्वा नलपृथ्वोः—तन्नामकयोर्नृपविशेषयोः, प्रभेव प्रभा यस्य तादृशोऽपि, न नलपृथुप्रभ इति—**अनलपृथुप्रभ** इति विरोधः, तदुद्धारे तु अनलाद्—अग्नेरपि, पृथ्वी—विपुला, प्रभा—कान्तिर्यस्य तादृशः। पुनः **समिद्व्यतिकरस्फुरितप्रतापोऽपि** समिधां काष्ठानाम्, व्यतिकरेण-मिश्रणेन, स्फुरितः—दीप्तः, प्रतापः— तेजो यस्य एवम्भूतोऽपि, **अकृशानु**-

प्रकृतिः, शत्रुघ्नोऽपि विश्रुतकीर्तिः, अशेषशक्त्युपेतोऽपि सकलभूभारधारणक्षमः, रक्षिताखिलक्षितितपोवनोऽपि त्रातचतुराश्रमः [ श ], सर्वसागरैरिवोत्पादितगाम्भीर्यः, सर्वगिरिभिरिवाविर्भावितोन्नतिः, सर्वज्वलनैरिव जनितप्रतापः, सर्वचन्द्रोदयैरिव रचितकीर्तिः, सर्वमुनिभिरिव निर्मितोपशमः, सर्वकेसरिभिरिव कल्पितपराक्रमः, सर्वमणिमन्त्रौषधैरिवोपबृंहितप्रभावः [ ष ], पृथ्वीमय इव स्थैर्ये, तिग्मांशुमय

---

अकृशानुभावोपेतः महाप्रभावयुक्तः । गरः–विषम्, सगरः–चक्रवर्ती । यः शत्रुघ्नः रामभ्राता, स कथं विश्रुतकीर्तिः विगतश्रुतकीर्त्यभिधानभार्यः, अन्यत्र अरिहन्ता प्रख्यातकीर्तिश्च । शेषः–नागराजः, न निषेधे, अन्यत्र शेषाः–सर्वाः, आश्रमाः–वनस्थानानि, अन्यत्र ब्रह्मचर्यादयः [ श ] ।

---

**भावोपेतः** कृशानुभावम्–अग्निभावम्, अग्नित्वमित्यर्थः, उपेतः–प्राप्तः, यद्वा कृशानुभावेन, उपेतः–युक्त इति कृशानुभावोपेतः, न कृशानुभावोपेत इत्यकृशानुभावोपेतः, अग्निभिन्न इति यावदिति विरोधः, तदुद्धारे तु समिद्–युद्धम्, तद्व्यतिकरेण–तत्सम्बन्धेन, तत्कर्तृत्वेनेत्यर्थः, स्फुरितः–परितः प्रकाशितः, प्रतापः–क्षात्रतेजो यस्य तादृशः, अथ च **अकृशानुभावोपेतः** अकृशेन–विपुलेन, अनुभावेन–प्रभावेण, उपेतः–युक्तः, "इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्" इति, "समुदायः स्त्रियः संयत् समित्याजि-समिद्युधः" इति चामरः, "द्वन्द्वं समाघात-समाह्वया-ऽभिसम्पात-सम्मर्द-समितप्रघातः । आस्कन्दना-ऽऽजिप्रघनान्यनीकमभ्यागमश्च प्रविदारणं च" इति, "समिदिन्धनमेधेध्मतर्पणैधांसि भस्म तु" इति चाभिधानचिन्तामणिश्च । पुनः **सगरान्वयप्रभवोऽपि** गरेण–विषेण, सहितः सगरः सर्पः, तदन्वयः–तद्वंशः, प्रभवः–उत्पत्तिस्थानं यस्य तदन्वये प्रभव उत्पत्तिर्यस्य वा तादृशोऽपि, **अमृतशीतलप्रकृतिः** अमृतस्येव शीतला प्रकृतिः स्वभावो यस्य तादृश इति विरोधः, तदुद्धारे तु सगरः–तत्संज्ञकस्तद्वंशमूलभूतश्चक्रवर्ती नृपस्तद्वंशजः । पुनः **शत्रुघ्नोऽपि** दशरथकनिष्ठपुत्रोऽपि, **विश्रुतकीर्तिः** विरहितः श्रुतकीर्त्या–श्रुतकीर्तिनाम्न्या शत्रुघ्नपत्न्या इति विश्रुतकीर्तिरिति विरोधः, तदुद्धारे तु **शत्रुघ्नः** शत्रुहन्ता, **अथ च विश्रुतकीर्तिः** विख्यातकीर्तिः । पुनः **अशेषशक्त्युपेतोऽपि** शेषस्य–शेषनागस्य, शक्तिः शेषशक्तिः, तया उपेतः–युक्त इति शेषशक्त्युपेतः, न शेषशक्त्युपेत इति अशेषशक्त्युपेतः, तादृशोऽपि, शेषशक्तिशून्योऽपि इति यावत्; **सकलभूभारधारणक्षमः** सकला–समग्रा, या भूः–पृथ्वी, तद्भारधारणे–तद्भारवहने, क्षमः–शक्त इति विरोधः, तदुद्धारे तु अशेषाभिः–सकलाभिः, शक्तिभिः, उपेतः–सहितः, अथ च सकलाया भुवो भारधारणे–रक्षणादिभारग्रहणे क्षमः । पुनः **रक्षिताखिलक्षितितपोवनोऽपि** रक्षितानि–लतापादपादिच्छेदनाद् वारितानि, क्षितितपोवनानि क्षितेः–पृथिव्याः स्वाधिकृतायाः, तपोवनानि–तपोऽधिष्ठानभूतानि वनानि येन तादृशोऽपि, **त्रातचतुराश्रमः** त्राता रक्षिताश्चत्वार आश्रमाः–तपस्विनिवासमठा येनेति विरोधः, तदुद्धारे तु रक्षिताश्चत्वारो ब्रह्मचर्यादय आश्रमा येन तादृशः, "आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठे स्त्रियाम्" इति मेदिनी, "ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये । आश्रमोऽस्त्री" इत्यमरश्च [श]। पुनः कीदृगसौ राजा? **सर्वसागरैरिव** सम्भूय सप्तसमुद्रैरिव, न तु केनचिदेकेन समुद्रेणेति कर्त्रुत्प्रेक्षा, **उत्पादितगाम्भीर्यः** उत्पादितं–स्वनिष्ठगाम्भीर्यौपम्येनोद्भावितम्, गाम्भीर्यम्–अन्तरप्रवेश्यत्वं यस्य तादृशः । निरतिशयगाम्भीर्यशालीत्यर्थः । पुनः **सर्वगिरिभिरिव** सम्भूय सर्वपर्वतैरिवेति कर्त्रुत्प्रेक्षा, **आविर्भावितोन्नतिः** आविर्भाविता–लोके प्रकटिता, उन्नतिः–उच्चता यस्य तादृशः, परमोच्च इत्यर्थः । पुनः **सर्वज्वलनैरिव** गार्हपत्यादिसकलाग्निभिरिव, **जनितप्रतापः** उत्पादिततेजाः । पुनः **सर्वचन्द्रोदयैरिव** सर्वेषां चन्द्राणाम् उदयैरिव, **रचितकीर्तिः** रचिता निर्मिता कीर्तिश्चन्द्रिकावदुज्ज्वला यस्य तादृशः, अतिवेलविपुलोज्ज्वलकीर्तिशालीत्यर्थः । पुनः **सर्वमुनिभिरिव** सर्वे न तु कश्चिदेव ये मुनयस्तैरिव, **निर्मितोपशमः** सम्पादितबाह्याभ्यन्तरेन्द्रियोपशमः, निरतिशयशमदमसम्पन्न इत्यर्थः ।

इव तेजसि, सरस्वतीमय इव वचसि, लक्ष्मीमय इव लावण्ये, सुधामय इव माधुर्ये, तपोमय इवासाध्यसाधनेषु [ स ], अनर्तितो लक्ष्मीमदविकारैरखलीकृतो व्यसनचक्रपीडाभिरनाकृष्टो विषयग्राहैरयन्त्रितः प्रमदाप्रेमनिगडैरजडीकृतः परमैश्वर्यसन्निपातेन [ ह ], गिरावाप्तप्रतिष्ठः सततमवनेचरतः, श्रितविशुद्धसाधुसमाचारोऽपि सर्वकालमुर्व्या भुजङ्गतया भ्राजितः [ क्ष ], सार्वभौमो राजा मेघवाहनो नाम [ ज्ञ ]।

---

**टिप्पनकम्**—ग्राहः–जलचरः, सन्निपातः–ज्वरविशेषः [ह]। यो **गिरौ** पर्वते, **आप्तप्रतिष्ठः** प्राप्तावस्थितिः, स कथम् **अवनेचरतः** अविद्यमानवनेचरभावः? अन्यत्र **गिरा** वाचा, अवाप्तप्रतिष्ठः, **अवने** रक्षणे, च, रतः, यः **श्रितविशुद्धसाधुसमाचारः** स कथम् **उर्व्या** बृहत्या, भुजङ्गतया राजितः? अन्यत्र **उर्व्या** पृथिव्या, **भुजं** बाहुम्, गतया प्राप्तया, शोभितः [ क्ष ]।

---

पुनः **सर्वकेसरिभिरिव** निखिलसिंहैरिव, **कल्पितपराक्रमः** सम्पादितशौर्यः, निरतिशयशौर्यशालीत्यर्थः। पुनः **सर्वमणिमन्त्रौषधैरिव** सर्वे ये मणयो मन्त्राश्च सर्वाणि च यान्यौषधानि च, तैः, **उपबृंहितप्रभावः** उपबृंहितः–वर्धितः, प्रभावो यस्य तादृशः अप्रतिमप्रभावशालीत्यर्थः। अत्र सर्वत्र हेतूत्प्रेक्षाऽलङ्कारः [ ष ]। पुनः कीदृगसौ राजा? **स्थैर्ये** स्थिरताविषये **पृथ्वीमय इव** पृथ्व्या विकारः प्रचुरपृथ्वीको वा पृथ्वीमयः, स इवेति हेतूत्प्रेक्षा। पुनः **तेजसि** तेजोविषये, **तिग्मांशुमय इव** तिग्माः–तीक्ष्णाः, अंशवः–किरणा यस्यासौ तिग्मांशुः सूर्यः, तद्विकार इव तत्परिणाम इवेत्यर्थः, तत्प्राचुर्यवानिव वा। पुनः **वचसि** वाग्वैभवविषये, **सरस्वतीमय इव** सरस्वतीपरिणाम इव। पुनः **लावण्ये** सौन्दर्यांशे, **लक्ष्मीमय इव** लक्ष्मीपरिणाम इव। पुनः **माधुर्ये** मधुरतांशे, सर्वप्रियत्वांश इत्यर्थः, **अमृतमय इव** अमृतपरिणाम इव। पुनः **असाध्यसाधनेषु** असाध्यस्य–साधयितुमशक्यस्य कार्यस्य, साधनेषु–निष्पादनेषु, **तपोमय इव** तपसः परिणाम इव, तपसा सर्वसिद्धिस्मरणात् [स]। पुनः कीदृगसौ राजा? **लक्ष्मीमदविकारैः** सम्पत्तिगर्वोद्गारैः, **अनर्तितः** अनटितः, सम्पत्तौ विद्यमानायामपि तद्गर्वानुद्गमेनात्र विशेषोक्तिरलङ्कारः, एवमुत्तरत्रापि कतिपयवाक्ये। पुनः **व्यसनचक्रपीडाभिः** व्यसनानां–सुरापानादिदुष्कर्मणाम्, चक्रस्य–समूहस्य पीडाभिः–व्यासङ्गव्यथाभिः, **अखलीकृतः** न नीचतां नीतः, "व्यसनं विपदि भ्रंशे दोषे कामजकोपजे" इत्यमरः। पुनः **विषयग्राहैः** विषिण्वन्ति स्वस्मिन् निबध्नन्ति ये ते विषया रूपरसादयः, तद्रूपैः, ग्राहैः–जलजन्तुप्रवरैः, **अनाकृष्टः** स्वव्यासङ्गद्वारा अनाकुलितः। पुनः **प्रमदाप्रेमनिगडैः** प्रमदासु–प्रमदो हर्षोऽस्ति यासां तासु, प्रसन्नप्रकृतिकासु स्त्रीषु, ये प्रेमाणः–प्रीतयः, व्यासङ्गा इत्यर्थः, तद्रूपैः, निगडैः–शृङ्खलैः, **अयन्त्रितः** अबद्धः, प्रमदास्वनासक्त इत्यर्थः। पुनः **परमैश्वर्यसन्निपातेन** परमम्–अतिशयितम्, यदैश्वर्यं तत्सन्निपातेन–तत्सम्बन्धेन, यद्वा तद्रूपेण सन्निपातेन–ज्वरविशेषेण, तदुष्मणेत्यर्थः, **अजडीकृतः** न व्यामोहितः [ ह ]। पुनः कीदृगसौ राजा? **गिरावाप्तप्रतिष्ठोऽपि** गिरौ–पर्वते, आप्तप्रतिष्ठोऽपि प्राप्तशाश्वतिकस्थितिकोऽपि, **सततं** नित्यम्, **अवनेचरतः** अविद्यमानवनेचरताक इति विरोधः, तदुद्धारे तु **गिरा** वाचा, **अवाप्तप्रतिष्ठः** प्राप्तप्रतिष्ठः, अथ च **सततं** सदैव, **अवने** दीनजनरक्षणे, **रतः**, **च** पुनः। पुनः **श्रितविशुद्धसमाचारोऽपि** श्रितः–प्राप्तः, विशुद्धानां–विशेषेण शुद्धानाम्, पवित्रचरित्रशालिनां साधुजनानामित्यर्थः, समाचारः–सम्यगाचरणं येन तादृशोऽपि, **सर्वकालं** सततम्, **उर्व्या** प्रचुरया, **भुजङ्गतया** विटतया, **भ्राजितः** प्रकाशित इति विरोधः, तदुद्धारे तु **उर्व्याः** पृथिवीरूपविलासिन्याः, **भुजङ्गतया** विटवद् भोक्तृतया, स्वामितयेत्यर्थः, **भ्राजितः** शोभितः, यद्वा **भुजं** बाहुम्, **गतया** प्राप्तया, **उर्व्या** पृथिव्या, **भ्राजितः** शोभितः, "भुजङ्गः सर्प-षिङ्गयोः" इति हैमः [ क्ष ]। **सार्वभौमः** सर्वभूमेः–समग्रपृथिव्याः, ईश्वरः, चक्रवर्तीत्यर्थः, यद्वा सर्वभूमौ विदितः, **नामेति** वाक्यालङ्कारे द्रष्टव्यः [ ज्ञ ]।

यस्य फेनस्फुटप्रसृतयशोऽट्टहासभरितभुवनकुक्षिरङ्गीकृतगजेन्द्रकृत्तिभीषणः प्रकटितानेकनरकपालः प्रलयकालविभ्रमेष्वाजिमूर्धसु संजहार विश्वानि शात्रवाणि महाभैरवः कृपाणः [ अ ] । यस्य चाकाण्डदर्शितसकलदिग्दाहो वज्र इव बिडौजसो निर्ददाह महीभृत्कुलानि समन्ततः प्रज्वलत्प्रतापः [ आ ] । यश्च संगरश्रद्धालुरहितानामुन्नत्या तुतोष न प्रणत्या, दानव्यसनी जनानामर्थितयाऽप्रीयत न कृतार्थतया, कुशाग्रीयबुद्धिः कार्याणां वैषम्येण जहर्ष न समतया, लक्ष्मीहठाकर्षणलम्पटो दैवस्य वैमुख्यमाचकाङ्क्ष नाभिमुख्यम्, विजय-

---

**यस्य** मेघवाहनस्य, **विश्वानि** सर्वाणि, **शात्रवाणि** शत्रुसमूहान्, खड्गः—असिः, भैरवः—रौद्रः, **संजहार**—संहृतवान्, अन्यत्र **विश्वानि** जगन्ति, **महाभैरवः** शङ्करः, संजहार, केषु? **आजिमूर्धसु** संग्रामशिरस्सु, अन्यत्र प्रलयकालेषु, यश एवाट्टहासः, अन्यत्र यशोवदट्टहासः, तथा **अङ्गीकृतगजेन्द्रकृत्तिभीषणः** स्वीकृतकरीशच्छेदनभीषणः, अन्यत्र स्वीकृतगजासुरचर्मरौद्रः, तथा **प्रकटितानेकनरकपालः** प्रकाशितबहुपुरुषशिरोऽस्थिः, अन्यत्र प्रकाशितनानानिरयरक्षः [ अ ] महीभृतः—गिरयो राजानश्च [ आ ] ।

---

अनुपदवर्णितं मेघवाहननृपं पुनरुपवर्णयति–**यस्येति** । **यस्य** प्रकृतस्य मेघवाहननृपतेः, **कृपाणः** खड्गः, **प्रलयकालविभ्रमेषु** प्रलयकालस्य–विश्वविध्वंसनकालस्य, विभ्रमः–प्रलयाधिकरणत्वेन साम्याद् विशेषेण भ्रान्तिर्येषु तादृशेषु, प्रलयकालस्थानीयेष्वित्यर्थः, **आजिमूर्धसु** संग्रामारम्भेषु, आजेः–सङ्ग्रामस्य, तदुपलक्षितक्षेत्रस्येत्यर्थः, मूर्धसु–अग्रभागेषु वा, **विश्वानि** सर्वाणि, **शात्रवाणि** शत्रूणां समूहः शात्रवम्, तानि, शत्रुकुलानीत्यर्थः, **संजहार** सम्यक्–निःशेषमित्यर्थः, जहार–विध्वंसयामास, "आजिः स्त्री समभूमौ सङ्ग्रामे" इति मेदिनी, कीदृशोऽसौ कृपाणः ? **महाभैरवः** महांश्चासौ भैरवः–रिपुभयङ्करः, पक्षे महांश्चासौ भैरवः–शिवः, महाकालरूप इत्यर्थः, "भीषणं भैरवं घोरं दारुणं च भयानकम्" इति, "स्याद् व्योमकेशः शिपिविष्टभैरवो दिक्कृत्तिवासा भव-नीललोहितौ सर्वज्ञ-नाट्यप्रिय-खण्डपर्शवो महापरा देव-महेश्वरा हरः" ॥ इति चाभिधानचिन्तामणिः, कुतस्तस्य महाभयङ्करत्वं महाकालरूपत्वं चेत्याह–**फेनस्फुटप्रसृतयशोऽट्टहासभरितभुवनकुक्षिः** फेनवत्–समुद्रकफवत्, "हिण्डीरोऽब्धिकफः फेनः" इत्यमरः, स्फुटं व्यक्तं यथा स्यात्तथा, प्रसृतानि–विस्तृतानि, यानि यशांसि–दस्युदलदलनकौशलकीर्तयः, तद्रूपैः, अट्टहासैः–प्रलयकालिकमहाकालकर्तृकमहाहासैः, भरितः–पूरितः, भुवनकुक्षिः–भुवनमध्यं येन तादृशः, पुनः **अङ्गीकृतगजेन्द्रकृत्तिभीषणः** अङ्गीकृतया–स्वकर्तव्यत्वेन पक्षे स्वपरिधातव्यत्वेन स्वीकृतया, गजेन्द्राणां–रिपुसम्बन्धिनां पट्टहस्तिनाम्, पक्षे गजेन्द्रस्य–गजासुरस्य, कृत्या–छेदनक्रियया, पक्षे चर्मणा, भीषणः–भयानकः, "अजिनं चर्म कृत्तिः स्त्री" इत्यमरः, पुनः **प्रकटितानेकनरकपालः** प्रकटिताः–स्वमारितारिनिग्रहाय अवतारिताः, पक्षे स्वग्रीवायां मालारूपेण प्रकाशिताः, अनेके नरकपालाः–नरकरक्षका यमदूताः, पक्षे नराणां–मनुष्याणाम्, कपालाः–शिरोऽस्थीनि येन तादृशः "कपालोऽस्त्री शिरोऽस्थि स्याद्, घटादेः शकले व्रजे" इति मेदिनी, अत्र श्लेषानुप्राणितरूपकालङ्कारः [ अ ] । पुनः **यस्य** प्रकृतनृपतेः, **अकाण्डदर्शितसकलदिग्दाहः** अकाण्डे–अनवसरे, अतर्कितमेवेत्यर्थः, दर्शितः–अनुभावितः, सकलदिक्षु दाहः–सकलदिग्वर्तिनां शत्रूणामन्तःसन्तापो येन तथाभूतः, **समन्ततः** सर्वतः, **प्रज्वलत्प्रतापः** देदीप्यमानराजतेजः, **बिडौजसः** बिडति–भिनत्तीति बिडम्, तादृशम् ओजो–बलं यस्यासौ बिडौजा इन्द्रः, तस्य, "बिडौजाः पाकशासनः" इत्यमरः, वज्र इव, **महीभृत्कुलानि** महीभृतां–शत्रुभूतानां राज्ञाम्, पक्षे पर्वतानाम्, कुलानि, **निर्ददाह** भस्मीचकार । अत्र श्लेषानुप्राणितोपमालङ्कारः [ आ ] । **च** पुनः, **यः** प्रकृतनृपतिः, यतः **सङ्गरश्रद्धालुः** सङ्ग्रामश्रद्धाशीलः, अतः **अहितानां** शत्रूणाम्, **उन्नत्या** बलदर्पेण, **तुतोष** सन्तुष्यन्नासीत्, न तु **प्रणत्या** कातरतया नमस्कारेण, तथा सति स्पर्धानुदयेन तैः सह संग्रामायोगात्, अतः परं प्रतिवाक्यं यश्चेति पदमनुवर्तते, यतश्च **दानव्यसनी** दानव्यासङ्गी, अत एव, **जनानां** लोकानाम्, **अर्थितया** याचकवृत्त्या, **अप्रीयत** अतृप्यत, न तु **कृतार्थतया** सिद्धार्थतया, तथा सति याच्ञानुदयेन दानायोगात्, यतश्च **कुशाग्रीयबुद्धिः** कुशाग्रीया–कुशाग्रमिव अतिसूक्ष्मा, बुद्धिर्यस्य तादृशः, अतिसूक्ष्मदर्शीत्यर्थः, "कुशाग्रीयमतिः सूक्ष्मदर्शी" इति **हैमः** । अत एव **कार्याणां** कृतिविषयाणाम्, **वैषम्येण** दुरूहत्वेन, दुष्करत्वेनेति यावत्, **जहर्ष** हर्षमनुबभूव,

**श्रीसंविभागकृपणः स्वानुजीविनां भीरुतया रेमे न शौण्डीरतया, धैर्यव्यक्तिकामो व्यसनाय स्पृहयाञ्चकार नाभ्युदयाय, विनयचिकीर्षायासितमतिर्गुरूणां कोपेन मुमुदे न प्रसादेन, सकलाधर्मनिर्मूलनाभिलाषी कलेरवतारस्योदकण्ठत न कृतयुगस्य [ इ ]। यस्य च प्रताप एव वसुधामसाधयत् परिकरः सैन्यनायकाः, महिमैव राजकमनामयन्नीतिः प्रतीहाराः, सौभाग्यमेवान्तःपुरं ररक्ष स्थितिः स्थापत्याः, आकार एव प्रभुतां शशंस परिच्छदश्छत्रचामरग्राहाः, तेज एव दुष्टप्रसरं रुरोध राज्याङ्गमङ्गरक्षाः, आज्ञैवान्यायं न्यषेधयद् धर्मो धर्मस्थेयाः, रूपमेव मनस्विनीः प्रसादमनयद् विनोदो नर्मसचिवाः, धार्मिकतैव दुरितानि प्रतिचकार प्रपञ्चः**

---

**टिप्पनकम्**—आयासिता–प्रयत्नीकृता निष्पन्ना वा [ इ ]। **धर्मस्थेयाः** धर्मकरणाधिकारिणः [ ई ]।

---

तत्रैव सूक्ष्मबुद्धेरुपयोगात्, न तु **समतया** सरलतया, सुकरत्वेनेति यावत्, स्थूलबुद्ध्याऽपि तेषां निष्पत्तिसम्भवेन तत्र तदनुपयोगात्, यतश्च **लक्ष्मीहठाकर्षणलम्पटः** लक्ष्म्याः, हठेन–बलात्कारेण, आकर्षणे-वशीकरणे, लम्पटः–प्रगल्भः, अत एव **दैवस्य** लक्ष्मीप्रयोजकभाग्यस्य, **वैमुख्यं** प्रातिकूल्यम्, **आचकाङ्क्ष** आकाङ्क्षितवान्, तथा सत्येव हठाकर्षणसम्भवात्, न तु **आभिमुख्यम्** आनुकूल्यम्, तथा सति स्वयमेव तदागमनसम्भवेन तदाकर्षणानुपयोगात्, यतश्च **विजयश्रीसंविभागकृपणः** विजयश्रियः–विजयकीर्तिसम्पदः, संविभागे–स्वानुजीवियोधेभ्यो वितरणे, **कृपणः** अनुदारः, स्वस्यैव सम्पूर्णविजयश्रियोऽभिलषितत्वादिति भावः, अतः **स्वानुजीविनां** स्वेनानुजीवनशीलानां योद्धॄणाम्, **भीरुतया** संग्रामे कातरतया, **रेमे** प्रसन्नो बभूव, न तु **शौण्डीरतया** संग्रामप्रगल्भतया, तथा सति तैरपि रिपुविजयसम्भवेन तेभ्योऽपि विजयश्रियो विभागौचित्यापत्तेः, यतश्च **धैर्यव्यक्तिकामः** धैर्यस्य–विपत्सहिष्णुतायाः, व्यक्तिं–लोके प्रसिद्धिं कामयते यः, तादृश आसीत्, अत एव **व्यसनाय** विपदे, **स्पृहयाञ्चकार** स्पृहां कृतवान्, न तु **अभ्युदयाय** सम्पदे, तथा सति धैर्यानुपयोगेन तद्व्यक्तेरसिद्धेः, यतश्च **विनयचिकीर्षायासितमतिः** विनयचिकीर्षया–निजनम्रत्वसम्पिपादयिषया, तल्लिप्सयेति यावत्, आयासिता–प्रयत्नीकृता निष्पन्ना वा, बुद्धिर्यस्य तादृशः, अत एव **गुरूणां** धर्मशास्त्रार्थदेशकानां श्रेष्ठजनानां वा, कोपेन, **मुमुदे** हृष्ट आसीत्, तथा सत्येव नम्रताया उपयोगात्, न तु प्रसादेन, तथा सति तदनुपयोगात्, यतश्च **सकलाधर्मनिर्मूलताभिलाषी** सकलानाम्–अशेषाणाम्, अधर्माणां–पापानाम्, निर्मूलने विध्वंसने, अभिलाषी, अत एव **कलेः** कलियुगस्य, **अवतारस्य** प्रादुर्भावस्य, **उदकण्ठत** उत्कण्ठितवान्, तत्रैवाधर्मभूयस्त्वेन तन्निर्मूलनाभिलाषपूर्तिसम्भवात्, न तु सत्ययुगस्य तत्राधर्मानुदयात्, अत्र काव्यलिङ्गपरिसंख्यालङ्कारसङ्करः [ इ ]।

पुनः **यस्य** प्रकृतनृपतेः, **प्रताप एव** कोशदण्डजन्यतेज एव, **वसुधां** पृथ्वीम्, **असाधयत्** वशमनयत्, एवं तर्हि सैन्यनायकाः कथमित्याह–**सैन्यनायकाः** सेनापतयः, **परिकरः** परिवारमात्रम्, "भवेत् परिकरो व्राते पर्यङ्क–परिवारयोः" इति विश्वः, **महिमैव** माहात्म्यमेव, **राजकं** राजसमूहम्, **अनमयत्** नमितवान्, एवं तर्हि प्रतीहाराः कथमित्याह–**प्रतीहाराः** द्वारपालाः, **नीतिः** राजशासनपद्धतिरेव, **सौभाग्यमेव** अनन्यसाधारणसौन्दर्येण राज्ञीजननिरतिशयस्नेहास्पदत्वमेव, **अन्तःपुरं** राज्ञीमन्दिरम्, पुरुषान्तरेभ्यो न्यवर्तयत्, एवं तर्हि स्थापत्याः कथमित्याह–**स्थापत्याः** अन्तःपुरबाह्यरक्षकाः, "सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते" इत्यमरः, **स्थितिः** अन्तःपुरमर्यादैव, **आकार एव** कविजनप्रसिद्धाष्टलोकपालांशमयत्वेन लोकोत्तरमवयवसंस्थानमेव, **प्रभुतां** वसुधाधिपत्यम्, **शशंस** सूचयामास, "वपुराख्यातिगौरवम्" इत्युक्तेः, एवं तर्हि छत्रचामरग्राहाः कथमित्याह–**छत्रचामरग्राहाः** छत्रचामरधारिणः, **परिच्छदः** परिवार एव, **तेज एव** प्रभाव एव, **दुष्टप्रसरं** विद्वेषिजनानां संचारम्, **रुरोध** निवर्तयामास, एवं तर्हि अङ्गरक्षकाः कथमित्याह–**अङ्गरक्षाः** विद्वेषिवर्गेभ्यो देहरक्षणकारकास्तु, **राज्याङ्गं** राज्याङ्गमात्रम्, **आज्ञैव** शासनमेव, **अन्यायं** नीतिविरुद्धप्रवृत्तिम्, **न्यषेधयत्** न्यवारयत्, एवं तर्हि धर्मस्थेयाः कथमित्याह–**धर्मस्थेयाः** धर्मकरणाधिकारिणः, **धर्मः** राजधर्म एव, "स्थेयो विवादस्थानस्य निर्णेतरि पुरोहिते" इति मेदिनी, **रूपमेव** नयनाह्लादकदेहस्वरूपमेव, **मनस्विनीः** मानिनीजनान्, **प्रसादं** प्रसन्नताम्, **अनयत्** प्रापयत्, एवं तर्हि नर्मसचिवाः कथमित्याह–**नर्मसचिवाः** कान्तास्वान्तोत्सुकीकरणकुशलाः केलिसहायाः, **विनोदः** कौतुकमेव, "द्रव-केलि-परीहासाः क्रीडा खेला च नर्म च" इत्यमरः, "मन्त्रि–सहायौ सचिवौ" इति शाश्वतः, **धार्मिकतैव** धर्माचरणशीलमेव, **दुरितानि** दुर्–दुःखम्, इतं–प्राप्तं यैस्तानि पापानि, **प्रतिचकार** प्रतिरुरोध, स्वयमेव

पुरोधसः, प्रज्ञैव मन्त्रान् निश्चिकाय शोभा मन्त्रिणः, आभिगामिकगुणग्राम एव परपक्षमाचकर्ष रूढिर्गूढपुरुषाः, त्याग एव दिक्षु कीर्तिमगमयद् विभवो बन्दिपुत्राः [ ई ]। यस्य चाश्ववृन्दरहिता अपि मुक्तमण्डला बभूवुः, समस्तानेकपदा अप्योजस्वितां विजहुः, अस्वरवर्णा अपि परं न व्यञ्जनमशिश्रियन्त शत्रवः [ उ ]। यस्मिंश्च राजन्यनुवर्तितशास्त्रमार्गे प्रशासति वसुमतीं धातूनां सोपसर्गत्वम्, इक्षूणां पीडनम्, पक्षिणां दिव्यग्रहणम्,

---

**टिप्पनकम्—अश्ववृन्दरहिता अपि** ये कुर्कुरवृन्दसहितास्ते कथं **मुक्तमण्डलाः** त्यक्तश्वानः?, अन्यत्र घोटकसंघातशून्याः, तथा त्यक्तदेशाः, ये **समस्तानेकपदाः** कृतसमासबहुपदाः, ते कथम् **ओजस्वितां** समासभूयस्त्वम्, तत्यजुः?, **अस्वरवर्णा अपि** ये स्वररहितवर्णास्ते कथं परं व्यजनं न श्रितवन्तः?, अन्यत्र शब्दश्लाघारहिताः, **नव्यं** नूतनम् अन्यान्यं जनम् [ उ ] । **सोपसर्गत्वं** प्रादियुक्तत्वम्, न लोकानां देवाद्युपद्रवः, **पीडनं**

---

जनो धर्ममाचचार, न तु पुरोहितप्रयोजनम्, न वा तस्य प्रायश्चित्तप्रयोजनमासीत्, दुरितानुदयादिति भावः, तर्हि पुरोहिताः किमर्था इत्यत आह—**पुरोधसः** पुरोहितास्तु, **प्रपञ्चः** धर्माचरणकालिकलोकबाहुल्यमात्रम्, धर्मसाक्षिमात्रमिति यावत्, "पुरोधास्तु पुरोहितः" इत्यमरः, **प्रज्ञैव** तदीयोहापोहमयी बुद्धिरेव, **मन्त्रान्** गुप्तविवेचनीयविषयान्, **निश्चिकाय** निश्चितवती, तर्हि मन्त्रिणः किं फलमित्यत आह—**मन्त्रिणः** गुप्तविवेचकाः, **शोभैव** राज्ञ एकाकित्वानौचित्येन तत्स्वरूपशोभामात्रमिति भावः, **आभिगामिकगुणग्राम एव** अभिगामः—उज्वलतया "विकसन्त्येव ते स्वयम्" इत्युक्तेः स्वयमेव लोकाभिमुखीभवनं शीलमस्य स आभिगामिकः, तादृशो गुणग्रामः—शूरत्वादिगुणसमूह एव, **परपक्षं** शत्रुपक्षम्, **आचकर्ष** आकृष्टवान्, **गूढपुरुषाः** गुप्तचरास्तु, **रूढिरेव** राज्ञो गुप्तचरा भवन्तीत्यनादिकालिकप्रसिद्धिरेव, तत्प्रसिद्धिरक्षणार्था एवेति भावः, "परः श्रेष्ठाऽरि-दूरान्योत्तरे क्लीबं तु केवले" इति मेदिनी, **त्याग एव** योग्यपात्रे धनत्याग एव, **दिक्षु** दशसु दिक्षु, **कीर्तिं** तदीयवदान्यतायशः, **अगमयत्** प्रापयत्, **बन्दिपुत्राः** बन्दिनां-स्तुतिपाठकानाम्, पुत्रास्तु, **विभवः** राजकीयशोभासम्पन्मात्रम्। अत्र सर्वत्रार्थिकपरिसंख्यालङ्कारो बोध्यः [ ई ]। **च** पुनः, **यस्य** मेघवाहननाम्नः प्रकृतनृपतेः, शत्रवः, **अश्ववृन्दरहिता अपि** शुनो वृन्दं श्ववृन्दं तेन रहिता इति श्ववृन्दरहिताः, न श्ववृन्दरहिता इति अश्ववृन्दरहिताः, राजधानीरक्षकविधया कुकुरकलापान्विता अपि, **मुक्तमण्डलाः** त्यक्तकुकुरा इति विरोधः, तत्परिहारे तु घोटकवृन्दरहिताः, **मुक्तमण्डलाः** तद्भयेन त्यक्तदेशाश्चेति बोध्यम् । किञ्च **समस्तानेकपदा अपि** समस्तानि- समासापन्नानि, अनेकानि—बहुलानि, पदानि—स्याद्यन्तत्याद्यन्तानि येषां तादृशा अपि—तादृशपदप्रयोक्तारोऽपि, यस्य शत्रवः, **ओजस्वितां** स्वप्रयुक्तपदेषु ओजोगुणवत्ताम्, **विजहुः** तत्यजुरिति विरोधः, समासबाहुल्यस्य ओजोगुणाव्यभिचारित्वात्, यद्वा समस्तानि-सम्पूर्णानि, अनेकानि, पदानि—लोकानां स्थानानि जनपदा येषां तादृशा अपि, **ओजस्वितां** बलवत्ताम्, **विजहुः** त्यक्तवन्त इति विरोधः, बलवत्ताविरहे अनेकसमस्तजनपदस्वामित्वायोगात्, तदुद्धारे तु समस्तान्-सर्वान्, अनेकपान्-हस्तिनः, ददति-उपायनरूपेण वितरन्ति, यद्वा स्वहस्तिनो द्यन्ति—सङ्ग्रामे तत्सैन्यैः खण्डयन्तीति **समस्तानेकपदाः**, यद्वा सम्यग् अस्तानि—विध्वंसितानि, अनेकानि, पदानि—स्थानानि येषां तादृशाः सन्तः, **ओजस्वितां** स्वबलम्, **विजहुः** तत्यजुरित्यर्थः । किञ्च, **अस्वरवर्णा अपि** स्वरहीनवर्णा अपि, स्वराव्यवहितव्यञ्जनरूपा अपीति यावत्, यस्य शत्रवः, **परम्** अन्यद्, व्यञ्जनं न **अशिश्रियन्त** श्रितवन्तः, संयुक्तवन्त इति यावत्, इति विरोधः, स्वरहीनो वर्णः परं धावतीति न्यायातिक्रमात्, तदुद्धारे तु **अस्वरवर्णाः** अनभिव्यज्यमानकण्ठध्वनयः, दुःखातिशयेन मौनावलम्बनात्, अनभिव्यज्यमानक्षत्रियादिवर्णाश्च, वर्णधर्मभ्रंशात्, **परम्** उत्कृष्टम्, **व्यञ्जनं** छत्रचामरादिरूपम्, न अशिश्रियन्त, यद्वा **परम्** अन्यम्, **नव्यं** नवीनम्, **जनं** स्वसहायतया अशिश्रियन्त, इत्यर्थो बोध्यः, "स्यान्मण्डलं द्वादशराजके च देशे च विश्वे च कदम्बके च। कुष्ठप्रभेदेऽप्युपसूर्यकेऽपि भुजङ्गभेदे शुनि मण्डलः स्यात्" ॥ इति विश्वः, "द्विरदोऽनेकपो द्विपः" इत्यमरः [ उ ]। **च** पुनः, **अनुवर्तितशास्त्रमार्गे** अनुसृतनीतिमार्गे, **यस्मिन्** मेघवाहने राजनि, **वसुमतीं** पृथिवीम्, **प्रशासति** प्रकर्षेण अधिकुर्वति सति, **धातूनां** क्रियावाचिनां भ्वादीनामेव, **सोपसर्गत्वम्** उपसर्गैः—"प्र-पराऽ-पऽसमन्वव-निर्दुरभि-व्यधि-सूदति-नि-प्रति-पर्यपयः । उप आङिति विंशतिरेव सखे। उपसर्गगणः कथितः कविना" ॥ इति कविपरिगणितैरुपसर्गसंज्ञकैः प्रादिभिः, सहितत्वं बभूव, न तु लोकानाम्, उपसर्गेण-व्याधिना उपद्रवेण वा, सहितत्वम्, "उपसर्गः पुमान् रोगभेदोपप्लवयोरपि" इति मेदिनी । **इक्षूणाम्** इक्षुदण्डानामेव, **पीडनं** यन्त्रेण रसनिष्काश-

पदानां विग्रहः, तिमीनां गलग्रहः, गूढचतुर्थकानां पादाकृष्टयः, कुकविकाव्येषु यतिभ्रंशदर्शनम्, उदधीनामवृद्धिः, निधुवनक्रीडासु तर्जनताडनानि, द्विजातिक्रियाणां शाखोद्धरणम्, बौद्धानामनुपलब्धेरसद्व्यवहारप्रवर्तकत्वम्, प्रतिपक्षक्षयोद्यतमुनिकथासु कुशास्त्रश्रवणम्, शारीणामक्षप्रसरणदोषेण परस्परं बन्धव्यधमारणानि,

---

मर्दनं पीडा च, **दिवि** आकाशे, **अग्रहणं** दिव्यग्रहणं शुद्धिकरणं च, **विग्रहः** समासवाक्यं संग्रामश्च, गलेन—मांसःखण्डेन ग्रहः—ग्रहणम्, गलामोटिका च, **पादाकृष्टयः** पादाकर्षणानि पादच्छेदाश्च, **यतिः**—विरतिर्मुनयश्च, **अवृद्धिः** जलवृद्धिः, समृद्ध्यभावश्च, तर्जना—निर्भर्त्सना, घातान् ( ? ) [ ताडनानि—आघाताः ] शाखा—अध्ययनविशेषः साहुली च, **असद्व्यवहारः** असदिति ज्ञानम् असन्निति शब्द इत्यादिकोऽशिष्टाचारश्च, **कुशास्त्रश्रवणं** दर्भशस्त्रकर्णनं कुत्सितशास्त्रश्रवणं च, अक्षाः—पाशका इन्द्रियाणि च, **बन्ध-व्यध-मारणानि** बन्धन-ताडन-घातनानि, द्रव्यं—पृथिव्यादि

---

नम्, बभूव, न तु तत्प्रजानां केनचित् क्लेशनम्। **पक्षिणां** शुकादीनामेव, दिवोऽयं दिव्य आकाशप्रदेशः, तद्ग्रहणं तदाश्रयणम्, यद्वा **दिवि** आकाशे, **अग्रहणम्**—उड्डीयमानानामन्येन अनिग्रहो बभूव, न तु केनापि कस्यापि दिव्यस्य—दिवि भवस्य सुवर्णादेर्वस्तुनो हरणम्, यद्वा अग्न्यादिदिव्यग्रहणेन सत्यतापरीक्षणम्। **पदानां** कृदन्त-तद्धितान्तादिप्रकृतिकविभक्त्यन्तानामेव, **विग्रहः** वृत्त्यर्थप्रतिपादकं वाक्यम्, बभूव, न तु लोकानां **विग्रहः** युद्धम्। **तिमीनां** तत्संज्ञकमत्स्यविशेषाणामेव, "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव" इत्युक्तानाम्, **गलग्रहः** तिमिङ्गलनाम्ना मत्स्येन तदधिकबलवता कण्ठकवलनम्, बभूव, न तु केनचिन्मनुष्येण कस्यचिन्मनुष्यस्य गलामोटिका सर्वेषां सौहार्दसत्त्वात्। **गूढचतुर्थकानां** गूढः—अप्रकटितः, चतुर्थः—चतुर्थपादो येषां तादृशानां श्लोकानामेव, पादाकृष्टिः—श्रुतपादत्रयानुगुण्येन चतुर्थपादस्य आकर्षणम्—मनसा प्रकल्प्य योजनम्, बभूव, न तु चोरयित्वा कस्यचिज्जनस्य पलायमानस्य केनचित् पादयोराकर्षणम्। **कुकविकाव्येषु** कुत्सितकविप्रणीतकाव्येष्वेव, **यतिभ्रंशदर्शनं** विरतिभङ्गाख्यकाव्यदोषोपलब्धिर्बभूव, न तु यतीनां—मुनीनाम्, भ्रंशस्य—चारित्रच्युतेः दर्शनम्। **उदधीनां** समुद्राणामेव, **अवृद्धिः** क्षयपक्षे हानिः, यद्वा अपां—जलानाम्, ऋद्धिः—समृद्धिः, अवृद्धिः, वबयोरैक्याद् **अवृद्धिः**—जलसमृद्धिः, बभूव, न त्वत्र कस्यापि जनस्य **अवृद्धिः** हानिः। **निधुवनक्रीडासु** नितरां धुवनं—गात्रकम्पनं यासु तासु क्रीडासु, सुरतक्रीडासु, "मैथुनं निधुवनं रतम्" इत्यमरः, **तर्जनताडनानि** तर्जनानि—प्रतिकूलान् प्रति भर्त्सनानि, ताडनानि—उरःस्थले हस्ताघाताश्च, बभूवुः, न त्वन्यकर्मणि तर्जनानि—कटुवचनानि, ताडनानि—दण्डादिनाऽऽघाताः। **द्विजातिक्रियासु** द्वे जाती उत्पत्ती सामान्यविशेषभावेन येषां ते द्विजातयो ब्राह्मणादयः, तदुक्तम्—"जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते" इति, तेषां क्रियासु—अध्ययनादिकर्मसु, **शाखोद्धरणं** शाखानां माध्यन्दिनादीनां वेदैकदेशानाम्, **उद्धरणं** तदध्येयत्वेन व्यवस्थापनम्, बभूव, न तु शाखानां—वृक्षावयवानाम्, उद्धरणम्—उच्छेदनम्। **बौद्धानां** बुद्धोपासकानामेव, अनुपलब्धेः—प्रत्यक्षेण वस्तूनामनुपलम्भस्यैव, **असद्व्यवहारप्रवर्तकत्वम्** असदिति यो व्यवहारस्तत्प्रयोजकत्वम्, तन्मये प्रमाणान्तराभावेन प्रत्यक्षेणोपलब्ध्यनुपलब्धिभ्यामेव वस्तूनां सत्त्वासत्त्वावगमादित्यर्थः, न तु कस्यचिदसमीचीनव्यवहारजनकत्वम्। **परपक्षक्षयोद्यतमुनिकथासु** परपक्षाणां—विपरीतमतानाम्, क्षये—खण्डने, उद्यताः—लग्नाः, ये मुनयस्तेषां कथासु—तत्प्रणीतकथास्वेव, यद्वा परपक्षक्षयोद्यतासु मुनिकथास्वेव, **कुशास्त्रश्रवणं** कुशास्त्रस्य—खण्डनीयतयोपन्यस्तस्य कुत्सितशास्त्रस्य, यद्वा परपक्षः—अधार्मिकवर्गः, तस्य क्षये—विनाशे, उद्यतानां—प्रयत्नवताम्, मुनीनां कथासु—चरित्रेषु, कुशास्त्रस्य—तपोबलोपबृंहितस्य दर्भमयस्य अस्त्रस्य श्रवणं बभूव, न त्वन्यत्र **कुशास्त्रश्रवणं** कुशास्त्रस्य—अपमार्गोपदेशकशास्त्रस्य, दर्भवद्दुर्बलस्यास्त्रस्य वा श्रवणम्, यद्वा कोः—पृथिव्याः, शास्ता कुशास्ता, तस्याऽश्रवणम्, अपि तु सर्वत्र तच्छ्रवणमेव। **शारीणाम्** अक्षाणामेव, **अक्षप्रसरदोषेण** पाशकप्रतिकूलप्रचलनदोषेण, परस्परं **बन्ध-व्यध-मारणानि** बन्धः—गमनप्रतिबन्धः, व्यधः—प्रत्यावर्तनम्, मारणं—द्यूताधारपट्टान्निष्काशनम्, न तु **अक्षप्रसरदोषेण** इन्द्रियसञ्चारदोषेण, केषाञ्चिद् बन्धः—बन्धनम्, व्यधः—ताडनम्, मारणं—विषभोजनादिद्वारा व्यापादनं च बभूव,

वैशेषिकमते द्रव्यस्य प्राधान्यं गुणानामुपसर्जनभावो बभूव [ ऊ ] । किं बहुना । यस्य धारणे कूर्मपतिनापि पराङ्मुखीभूतमादिवराहेणापि वक्रितं मुखमुरगराजस्यापि सहस्रधा भिन्नाः फणाभित्तयः, तमपि भुवनभारमनायासेनैव धृतासिना भुजेन यो बभार । निर्यत्नधृतसमस्तभुवनभारतया च तं द्वितीयं शेषं तृतीयमादिवराहदंष्ट्राङ्कुरमष्टमं कुलाचलं नवममाशागजममन्यन्त जनाः [ ऋ ] । किञ्च, मुक्तमदजलासारकरिघटासहस्रमेघमण्डलान्धकारिताष्टदिग्विभागेषु घनस्तनितघर्घरघूर्णमानरथनिर्घोषेषु दर्पोत्पतत्पदातिकरतलतुलिततरवारितडिल्लताप्रतानदन्तुरितान्तरिक्षकुक्षिषु प्रचण्डानिलप्रणुन्नकरकोपलप्रकरपातमुखरसप्तिखुरपुटध्वानजनितजगज्ज्वरेषु प्रसर्पन्नृप-

---

धनं च, **गुणानां** संख्यादीनां शौर्यादीनां च, **उपसर्जनभावः** अप्रधानता च [ ऊ ] । **तरवारिः**—खड्गः [ ऋ ]

---

"पणो ग्लहो देवनस्तु पाशकोऽक्षोऽथ शारयः" इति वैजयन्ती । **वैशेषिकमते** कणादसिद्धान्त एव, **द्रव्यस्य** पृथिव्यादिद्रव्यनवकस्य, **प्राधान्यं** समवायिकारणत्वेन मुख्यत्वम्, **गुणानां** रूपादिचतुर्विंशतिगुणानाम्, **उपसर्जनभावः** तदाश्रितत्वेन गौणत्वं बभूव, न तु तत्साम्राज्ये **द्रव्यस्य** हिरण्यरजतादेः, प्राधान्यम्, **गुणानां** विद्यादीनां गौणत्वम्, अपि तु तद्विपरीतमेवासीदिति भावः [ ऊ ] । **किं बहुना** अलमतिवर्णनेन । **यस्य** भुवनभारस्य, **धारणे** वहने, **कूर्मपतिना** कच्छपाधिपेन, **पराङ्मुखीभूतं** वैमुख्यमाश्रितम्, **आदिवराहेणापि** भगवदवतारभूतप्रथमवराहेणापि, मुखं **वक्रितं** कुटिलीकृतम्, **उरगराजस्यापि** शेषनागस्यापि, **फणाभित्तयः** फणारूपा भित्तयः, भित्तिवदुन्नताः फणाः, **सहस्रधा** सहस्रप्रकारेण, **भिन्नाः** विदीर्णाः, तमपि भुवनभारं **यः** मेघवाहननामा नृपः, **अनायासेनैव** आयासं विनैव, **धृतासिना** गृहीतखड्गेन, भुजेन, **बभार** दधारेति तेभ्यस्तस्य व्यतिरेकः । **च** पुनः, **तं** प्रकृतनृपम्, **निर्यत्नधृतसमस्तभुवनभारतया** निर्यत्नम्—अनायासं यथा स्यात्तथा, धृतः—ऊढः, समस्तभुवनभारः—समस्तपृथ्वीभारो येन तत्तया हेतुना, **जनाः** लोकाः, **द्वितीयं** पातालस्थितशेषापेक्षयाऽन्यं शेषम्, **तृतीयं** सामान्यक्रूरवराहदंष्ट्रायुगलापेक्षयाऽधिकम्, **आदिवराहदंष्ट्राङ्कुरम्** आदिवराहस्य दंष्ट्राङ्कुरं-दंष्ट्रारूपाङ्कुरम्, भुवनभारवाहकत्वेन तत्साम्यात्, **अष्टमं** सप्तमहाचलापेक्षयाऽधिकृतम्, **कुलाचलं** महाचलम्, **नवमम्** अष्टदिग्गजव्यतिरिक्तम्, **आशागजं** दिग्गजं च, **अमन्यन्त** मन्यन्ते स्म, तद्वद् भूभारवहनक्षमत्वात् । [ ऋ ] । **किञ्च** अपि च, **यदीयसैन्येषु** यस्य—प्रकृतनृपतेः, सैनिकेषु, **सकलप्रतिपक्षलक्ष्मीजिघृक्षया** प्रतिपक्षाणां—शत्रूणाम्, लक्ष्मीं—राज्यसम्पदम्, ग्रहीतुमिच्छया, **शरत्समये** शरदृतौ, **समन्ततः** सर्वतः, **प्रचलितेषु** प्रस्थितेषु सत्सु, **विषमजलनिधिमध्यवासिनोऽपि** विषमः—दुरवगाहः, यो जलनिधिः—समुद्रः, तन्मध्यवास्तव्यस्यापि, **द्वीपावनीपालनिवहस्य** द्विर्गता आपो यस्याः सा द्वीपा, जलमध्यस्थलरूपेत्यर्थः, तादृशीमवनीं पालयतीति द्वीपावनीपालः, तन्निवहस्य—तत्समूहस्य, निद्रा **क्षयं** भङ्गम्, अगच्छत्, कस्येव ? **कंसद्विष इव** विष्णोरिव, लक्ष्मीजिघृक्षया विपक्षसैन्याक्रमणे जलधिमध्ये शयानस्यापि तस्य निद्रा यथा क्षयं गताऽसीत् तथेति भावः । कीदृशेषु तत्सैन्येषु ? **मुक्तमदजलासारकरिघटासहस्रमेघमण्डलान्धकारिताष्टदिग्विभागेषु** मुक्तः—निष्यन्दितः, मदजलासारः—दानजलधारासम्पातो येन तादृशं करिघटासहस्रं—हस्तियूथसहस्रमेव, मेघमण्डलं—मेघमाला, तेन अन्धकारिताः—अन्धकारमापादिताः, अष्टदिग्विभागाः—अष्टदिगवकाशा यैस्तादृशेषु, पुनः **घनस्तनितघर्घरघूर्णमानरथनिर्घोषेषु** घनस्य—मेघस्य, घनं—सान्द्रं वा, यत् स्तनितं-गर्जितम्, तत्सम्बन्धी यो घर्घरः—क्षरदम्बुध्वनिः, स इव, घूर्णमानस्य—पथि परिभ्रमतः, रथस्य, निर्घोषः—शब्दो येषु तादृशेषु, "स्तनितं गर्जितं मेघनिर्घोषः" इत्यमरः, पुनः **दर्पोत्पतत्पदातिकरतलतुलिततरवारितडिल्लताप्रतानदन्तुरितान्तरिक्षकुक्षिषु** दर्पेण—गर्वेण, उत्पतन्तः—उच्छलन्तो ये, पदातयः पद्भ्यां गन्तारः सैन्याः, तेषां करतलेन—दृढतरपाणितलेन, तुलिताः—परिच्छिन्नाः, न तु दुर्वहाः, ये तरवारयः—तत्संज्ञकाः खड्गविशेषाः, त एव तडिल्लताः—विद्युद्वल्ल्यः, तासां प्रतानेन—विस्तारेण, दन्तुरिताः—उन्नतदन्तवत्तया लोकैः प्रत्यायिताः, अन्तरिक्षकुक्षयः—आकाशमध्यभागा यैस्तादृशेषु, "ऋष्टिः खड्गस्तरवारि-कौक्षेयकौ च नन्दकः" इति रभसः, पुनः **प्रचण्डानिलप्रणुन्नकरकोपलप्रकरपातमुखरसप्तिखुरपुटध्वानजनितजगज्ज्वरेषु** प्रचण्डेन—प्रोद्धतेन, अनिलेन—वायुना, प्रणुन्नाः—अधो विक्षिप्ताः, ये करकोपलाः—करकानामकप्रस्तराः, वर्षोपल-

श्रेणिचूडामणिमरीचिचक्रविरचितेन्द्रचापकलापेषु प्रत्यावृत्तप्रथमजलधरसमयशङ्काविधायिषु लोकस्य यदीयसैन्येषु सकलप्रतिपक्षलक्ष्मीजिघृक्षया शरत्समये समन्ततः प्रचलितेषु विषमजलनिधिमध्यवासिनोऽपि कंसद्विष इव द्वीपावनीपालनिवहस्य निद्रा क्षयमगच्छत् [ **ऋ** ] ।

अन्यच्च—

यस्य दोष्णि स्फुरद्धेतौ प्रतीये विबुधैर्ध्रुवः । बौद्धतर्क इवार्थानां नाशो राज्ञां निरन्वयः ॥१॥ [**ऌ**] ।
लतावनपरिक्षिप्ते निन्ये यदरिभिर्निशा । विन्ध्याद्रेस्तल्परुचिरे न वेश्मनि नवेऽश्मनि ॥ २ ॥ [**ॡ**] ।
अन्तर्दग्धागुरुशुचावाप यस्य जगत्पतेः । नारीणां संहतिश्चारुवेषाकारागृहे रतिम् ॥ ३ ॥ [ **ए** ] ।
दृष्ट्वा वैरस्य वैरस्यमुज्झितास्त्रो रिपुव्रजः । यस्मिन् विश्वस्य विश्वस्य कुलस्य कुशलं व्यधात् ॥४॥ [**ऐ**] ।

---

कणा इत्यर्थः, तेषां प्रकरस्य—समूहस्य, पात इव—अधस्ताद्विकिरणमिव, मुखराः—शब्दायमानाः, ये सप्तीनाम्—अश्वानाम्, खुरपुटाः-सम्पुटितखुराः, तेषां ध्वानैः—ध्वनिभिः, जनितः—उद्भावितः, जगज्ज्वरः—जगतां कर्णज्वरो यैस्तादृशेषु, "हय-सैन्धव-सप्तयः" इत्यमरः, पुनः **प्रसर्पन्नृपश्रेणिचूडामणिमरीचिचक्रविरचितेन्द्रचापकलापेषु** प्रसर्पन्तः—सम्भ्रमेण स्वसिंहासनात् प्रचलन्तो ये, नृपाः—राजानः, तेषां याः श्रेणयस्तासां चूडामणिमरीचिचक्रेण—मौलिमणिकिरणनिकरेण, विरचितः, इन्द्रचापानां—"रविकिरणा बहुवर्णा वातेन विलोडिता नभसि। शक्रायुधसंस्थाना दृश्यन्ते तत्तु इन्द्रधनुः"। इत्युक्तानामिन्द्रधनुषाम्, कलापः समूहो यैस्तादृशेषु, पुनः **लोकस्य** जनतायाः, **प्रत्यावृत्तप्रथमजलधरसमयशङ्काविधायिषु** प्रत्यावृत्तः—पुनरागतो यः, प्रथमः—प्रारम्भिकः, जलधरसमयः-वर्षाकालः, तस्य या शङ्का—संशयः, तद्विधायिषु—तत्प्रयोजकेषु [**ऋ**] ।
**अन्यच्च** अपि च, **यस्य** मेघवाहनसंज्ञकस्य प्रकृतनृपतेः, **दोष्णि** बाहौ, "भुज-बाहू प्रवेष्टो दोः" इत्यमरः, **स्फुरद्धेतौ** स्फुरन्ती—भ्राजन्ती, हेतिः—बाणः, यस्मिन् तादृशे सति, "हेतिः स्यादायुध-ज्वाला-सूर्यतेजस्सु योषिति" इति मेदिनी, **विबुधैः** विशिष्टैः—तर्कवितर्ककुशलैः, बुधैः—पण्डितैः, **ध्रुवः** अवश्यम्भावी, **राज्ञां** प्रतिकूलनृपतीनाम्, **निरन्वयः** अन्वयाद्—वंशात्, निर्गतः, निःशेषतया ततो निर्गत्य प्रतियोगिभावेन तदमात्यादिकमभिव्याप्त इत्यर्थः, यद्वा अन्वयो नाम कथञ्चिदस्तित्वम्, तदभावात्मकः, नाशः, **प्रतीये** तर्कितः, कस्मिन्निव केषाम्? **स्फुरद्धेतौ** स्फुरन्-आरोपगोचरीभवन्, हेतुः—लिङ्गव्याप्यधर्मो यस्मिन् तादृशे, **बौद्धतर्के** बुद्धो देवता येषां ते बौद्धास्तेषां तर्के—'यदि पदार्थानां क्षणिकत्वं न स्यात्तर्हि सत्त्वमपि न स्यादर्थक्रियाकारित्वायोगाद्' इत्याकारके व्याप्यारोपजन्यव्यापकारोपात्मके, **इव** यथा, **अर्थानां** पदार्थानां द्वितीयक्षणे निरन्वयो नाम सर्वथैव नाशः प्रतीतिपथमवतरति तथैव तस्य तादृशभुजदर्शनेन शत्रूणामुक्तरूपो नाश इत्यर्थः ॥ १ ॥ अत्र श्लेषानुप्राणितोपमालङ्कारः [ **ऌ** ] ।

**यदरिभिः** यस्य प्रकृतनृपतेः, अरिभिः—शत्रुभिः, **लतावनपरिक्षिप्ते** लतामयवनपरिक्षिप्ते, **विन्ध्याद्रेः** विन्ध्यगिरेः, **नवे** नवीने, **अश्मनि** प्रस्तरे, निशा **निन्ये** तत्र निलीय व्यतीये, न तु **तल्परुचिरे** तल्पेन-कोमलशय्यया, रुचिरे—मनोहरे, वेश्मनि, तत्र तेषां ततो भीरुत्वादिति भावः ॥ २ ॥ अत्र परिसंख्या यमकं चालङ्कारः [ **ॡ** ] ।

**यस्य** प्रकृतस्य, **जगत्पतेः** नृपतेः, **चारुवेषाकारा** चारुः—सुन्दरः, वेषः—कृत्रिमरूपं यस्य तादृश आकारो यस्या असौ, नारीणां संहतिः—समूहः, **अन्तर्दग्धागुरुशुचौ** अन्तर्—मध्ये, दग्धः—ज्वलितः, योऽगुरुस्तेन शुचौ—शोधिते, सुरभित इति यावत्, गृहे, **रतिं** प्रीतिम्, **आप** प्राप, पक्षे **अगुरुशुचा** राज्यापहरणजनितमहाशोकानलेन, **अन्तर्दग्धा** अन्तः—अन्तःकरणावच्छेदेन, दग्धा, यस्य जगत्पतेः, **अरीणां** शत्रूणाम्, संहतिः, यतः **चारुवेषा** राजोचितचारूपकरणविप्रयुक्ता, अतः **कारागृहे** बन्धनालये, रतिं न अवाप, "कारा दूत्यां प्रसेवके, बन्धने बन्धनागारे हेम-कारिकयोरपि" इति विश्वः ॥३॥ अत्र सभङ्गश्लेषालङ्कारः [ **ए** ] ।

**वैरस्य** शत्रुतायाः, **वैरस्यं** विरसतां दुष्परिणामताम्, दृष्ट्वा, **यस्य** प्रकृतनृपतेः, **रिपुव्रजः** शत्रुसमूहः, **उज्झितास्त्रः** उज्झितानि—त्यक्तानि, अस्त्राणि—अस्यन्ते शत्रूपरि क्षिप्यन्ते यानि तानि शरादीनि येन तादृशः सन्, **यस्मिन्** मेघवाहने, **विश्वस्य** स्वहितकारित्वेन विश्वासं कृत्वा, **विश्वस्य** समग्रस्य, **कुलस्य** स्ववंशस्य, **कुशलं** कल्याणम्, **व्यधात्** अकार्षीत् । अत्र यमकं काव्यलिङ्गं चालङ्कारः, उज्झितास्त्रपदार्थस्य अस्त्रत्यागरूपस्य कुशलविधानं प्रति हेतुत्वात् ॥ ४ ॥ [ **ऐ** ] ।

स राजा बाल एवाधिगतराज्याभिषेकः सकलभुवनाभिभाविना भुजबलेन निर्जित्य सप्ताम्बुराशिरशनाकलापां काश्यपीम्, कृत्वा सततसंचरणशीलस्य यशसः सुखप्रचारार्थमिव निष्कण्टकाः ककुभः, दिक्कुम्भिनामालानस्तम्भानुकारिणः समारोपितस्वनामवर्णश्रेणीकानारोप्य दिशामष्टानामपि पर्यन्तेषु जयस्तम्भान्, उपार्जितप्रभूतकोशं वशीकृतसमस्तसामन्तमायत्तमन्त्रिमण्डलमुपगृहीतमित्रवर्गमाप्तपुरुषाधिष्ठितदुर्गं समग्रमपि राज्यमाजन्मनः प्ररूढपरमसौहृदस्य हृदयस्येवातिविश्वसनीयस्य बाहोरिव वसुन्धराभारवहनक्षमस्कन्धस्य प्रगल्भमत्युपहसितधिषणस्यापि प्रज्ञावतां धौरेयस्य विदितनिश्शेषनीतिशास्त्रसंहतेरमात्यवर्गस्यायत्तमकरोत् [ ओ ] । आत्मनापि निश्शेषितारिवंशतया विगतशङ्कः, स्वधर्मव्यवस्थापितवर्णाश्रमतया जातनिर्वृतिः, पर्यवसिताखिल-

---

**सः** अनुपदवर्णितो राजा मेघवाहनः, **बाल एव** बाल्यावस्थायामेव, अधिगतराज्याभिषेकः सन्, **सकलभुवनाभिभाविना** निखिलभुवनविजयिना, **भुजबलेन** बाहुबलेन, **सप्ताम्बुराशिरशनाकलापां** सप्ताम्बुराशयः—सप्त समुद्राः, त एव रशनाकलापः—काञ्चीश्रेणी यस्यास्तादृशीम्, समुद्रपर्यन्तामित्यर्थः, **काश्यपीं** पृथिवीम्, **निर्जित्य** समन्तादायत्तीकृत्य, "काश्यपी क्षितिः" इत्यमरः, **सततसञ्चरणशीलस्य** अविरतप्रसरणस्वभावकस्य, **यशसः** स्वकीर्तेः, **सुखप्रचारार्थमिव** सुखेन सञ्चारमुद्दिश्येवेत्युत्प्रेक्षा, **ककुभः** दिशः, "दिशस्तु ककुभः काष्ठाः" इत्यमरः, **निष्कण्टकाः** कण्टकायमानशत्रुशून्याः, "रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टकः" इति शाश्वतः, **कृत्वा** सम्पाद्य, **दिक्कुम्भिनाम्** कुम्भौ—शिरःपिण्डौ स्तो येषां ते कुम्भिनः, दिशः कुम्भिनः दिक्कुम्भिनस्तेषाम्, "कुम्भो राश्यन्तरे हस्तिमूर्धांशे" इति मेदिनी, दिग्गजानाम्, **आलानस्तम्भानुकारिणः** दार्ढ्योच्छ्रायाभ्यां बन्धेन स्तम्भायमानान्, "आलानं बन्धस्तम्भे" इत्यमरः, **समारोपितस्वनामवर्णश्रेणिकान्** समारोपिता—लिखित्वा स्थापिता, स्वनाम्नः वर्णश्रेणिः—अक्षरसमूहो येषु तादृशान्, **जयस्तम्भान्** जयसूचकशङ्कून्, अष्टानामपि दिशां पर्यन्तेषु—सीमाप्रदेशेषु, **आरोप्य** स्थापयित्वा; **उपार्जितप्रभूतकोशम्** उपार्जिताः—निर्मिताः, प्रभूताः—प्रचुराः, कोशाः—हिरण्यादिनिधयो यस्मिन् तादृशम्, **वशीकृतसमस्तसामन्तं** वशीकृताः समस्ताः—सकलाः, सामन्ताः—संलग्नोऽन्तश्चरमावयवो यस्याः सा समन्ता, स्वदेशाव्यवहितभूमिः, तस्या ईश्वराः स्वदेशानन्तरनृपा यत्र तादृशम्, "अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः अवयवेऽपि" इति हैमः, **आयत्तमन्त्रिमण्डलं** स्वाधीनसचिवसमूहम्; **उपगृहीतमित्रवर्गम्** उपगृहीतः—अनुकूलितो मित्रवर्गो यस्मिंस्तादृशम्, "उपग्रहः पुमान् वन्द्यामुपयोगेऽनुकूलने" इति मेदिनी, **आप्तपुरुषाधिष्ठितदुर्गं** आप्तपुरुषैः—विश्वस्तपुरुषैः, अधिष्ठितः—रक्षणार्थमाश्रितः, दुर्गः—प्राकारो यस्मिंस्तादृशम्, "आप्तः प्रत्ययितस्त्रिषु" इत्यमरः, **समग्रमपि** सम्पूर्णमपि, राज्यम्, **अमात्यवर्गस्य** मन्त्रिमण्डलस्य, **आयत्तम्** अधीनम्, **अकरोत्** कृतवान्, कीदृशस्य तस्य? **आ जन्मनः** जन्मप्रभृति, **प्ररूढपरमसौहृदस्य** प्ररूढं—प्रवृद्धम्, परमसौहृदं—सान्द्रसख्यं येन तादृशस्य, **हृदयस्येव** स्वान्तःकरणस्येव, अतिविश्वसनीयस्य, **बाहोरिव** स्वभुजस्येव, **वसुन्धराभारवहनक्षमस्कन्धस्य** वसुन्धराभारवहनक्षमः—भूभारग्रहणसमर्थः, स्कन्धो यस्य तादृशस्य, **प्रगल्भमत्युपहसितधिषणः** प्रगल्भमतिभिः—प्रत्युत्पन्नबुद्धिशालिभिः, उपहसिता—निन्दिता, धिषणा—बुद्धिर्यस्य तादृशस्यापि, मन्दप्रज्ञस्यापीत्यर्थः, "प्रगल्भः प्रतिभान्वितः" इत्यमरः, **प्रज्ञावतां** बुद्धिमताम्, **धौरेयस्य** अग्रेसरस्येति विरोधः, तदुद्धारे तु प्रगल्भमत्या—प्रत्युत्पन्नबुद्ध्या, उपहसितो धिषणो बृहस्पतिर्येनेति व्याख्येयम्, "गीष्पतिर्धिषणो गुरुः" इत्यमरः, पुनः **विदितनिःशेषनीतिशास्त्रसंहतेः** विदिता—ज्ञाता, निःशेषाणां—समग्राणाम्, नीतिशास्त्राणां संहतिः—समूहो येन तादृशस्य [ ओ ] । अपि च **आत्मनाऽपि** स्वेनापि, **निःशेषितारिवंशतया** निःशेषितः—निःशेषं यथा स्यात्तथा विध्वंसितः, अरिवंशः—शत्रुवंशो येन तस्य भावस्तत्ता तया, **विगतशङ्कः** शत्रुशङ्काशून्यः, **स्वधर्मव्यवस्थापितवर्णाश्रमतया** स्वधर्मेण—स्वधर्मानुसारेण, व्यवस्थापिताः—विभज्यावस्थापिताः, वर्णाः—ब्राह्मणादयः, आश्रमाः—ब्रह्मचर्यादयो येन तस्य भावस्तत्ता तया हेतुना, **जातनिर्वृतिः** जातधर्मव्यवस्थापनात्मककार्यजन्यपरमसुखः **पर्यवसिताखिलप्रारब्धकार्यतया** पर्यवसितानि—निष्पन्नानि,

प्रारब्धकार्यतया निराकुलमनास्तत्कालं मनःपुरीमनुप्रवेष्टुकामं कार्मुकधारणापराधविलक्षमनसं मकरलक्ष्माणमनुग्राहयितुमागतेन विस्तारितचतुरोक्तिना दूतेनेव नवयौवनेनोपदर्शितेष्विन्द्रियग्रामहारिषु विषयेषु परिभोगलालसं मानसमासञ्जयामास [ औ ]। तथाहि—कदाचित् सकुतूहलगृहदेवतादरविलोकितः, कामिनीजनाभरणझात्कारवर्यतूर्यरवसंवर्धितैस्तारतरविलापिनां वैतालिकानामिव केलिशकुन्तानां ध्वनिभिराधीयमानरभसः, सरभसदशनाग्रदंशदलितदन्तच्छदमदयकचग्रहोल्लसद्भ्रुकुटीभूषितललाटदेशमावेशपरवशप्रवृत्तकरप्रहारव्याहरन्मणिवलयमविरलोद्गतश्रमस्वेदतिम्यद्रोमाञ्चकवचमनवरतमुक्तकौसुमशरासारव्यपदेशादुपजाततुष्टिनेव मानसभुवा देवेन पात्यमानपुष्पवृष्टिरुत्कृष्टकरणप्रयोगरमणीयमत्यद्भुतं रतसमरमाततान [ अं ]।

---

यः **प्रगल्भमत्युपसितधिषणः**—पटुबुद्धिपुरुषहसितबुद्धिः, स कथं प्रज्ञावतां धुर्यः?, प्रगल्भमत्युपहसितबृहस्पति [ ओ ]। **उत्कृष्टकरणप्रयोगरमणीयं** प्रकृष्टकरपादन्यासरम्यम्, अन्यत्र उत्कृष्टकसंग्रामरम्यम् [ अं ]। श्रङ्कम्—

---

अखिलानि—सकलानि, प्रारब्धानि—स्वेनारब्धानि कार्याणि यस्य तस्य भावस्तत्ता तया, **निराकुलमना** अव्यग्रहृदयः सन्, **इन्द्रियग्रामहारिषु** चक्षुरादीन्द्रियाकर्षणशीलेषु, **विषयेषु** कामिनीकमनीयरूपादिषु अन्यत्र देशेषु, **परिभोगलालसं** विषयभोगोत्कटतृष्णाकुलम्, **मानसं** स्वहृदयम्, अन्यत्र स्वशासनप्रवर्तनाभिलाषम्, **आसञ्जयामास** आ समन्ताद् योजयामास, कीदृशेषु तेषु? **नवयौवनेन** अभिनवतारुण्येन, **उपदर्शितेषु** आस्वादितेषु, अन्यत्र सवर्णनं कथितेषु, केनेव तेन? **मनःपुरीं** तदीयहृदयनगरीम्, **अनुप्रवेष्टुकामं** प्रवेष्टुमिच्छुम्, **कार्मुकधारणापराधविलक्षमनसं** कार्मुकधारणं—धनुर्ग्रहणमेवापराधः, तेन विलक्षमनसं—विस्मयापन्नहृदयं "विलक्षो विस्मयान्विते" इत्यमरः, **मकरलक्ष्माणं** मकरो ग्राहः, स लक्ष्म चिह्नं यस्य तं कामदेवम्; **अनुग्राहयितुं** तदपराधपरिमार्जनया तदनुप्रवेशनानुग्रहक्रियायामुपकर्तुम्, **आगतेन** अवतीर्णेन, **विस्तारितचतुरोक्तिना** विस्तारिताः—विस्तरेणोक्ताः, चतुराः—वैदग्ध्यपूर्णाः, उक्तयो वचनानि येन तादृशेन **दूतेनेव** कामदेवगुप्तचरेणेवेत्युत्प्रेक्षा [ औ ]। मानसासञ्जनमुपदर्शयति—**तथाही**ति। स राजा **कदाचित्** कस्मिंश्चित् काले, **रतसमरं** रतिसङ्ग्रामम्; **आततान** विस्तारयामास, कीदृशः सन्? **सकुतूहलगृहदेवतादरविलोकितः** सकुतूहलया—कुतूहलेन दर्शनलालसया सहितया, गृहदेवतया—गृहाधिष्ठातृदेवतया, आदरेण—प्रीत्या, विलोकितः—निरीक्षितः सन्, पुनः **कामिनीजनाभरणझात्कारवर्यतूर्यरवसंवर्धितैः** कामिनीजनानां—नारीजनानाम्, आभरणानि—अलङ्करणानि, तदीयझात्कारैः—झणत्काररूपैः, वर्याणाम्—उत्तमानाम्, तूर्याणां—वाद्यानाम्, रवैः—नादैः, संवर्धितैः—सम्यग् वृद्धिं प्रापितैः, **वैतालिकानामिव** विविधेन तालेन—शब्देन, चरन्ति-राज्ञो जागरणं कुर्वन्तीति वैतालिकाः, राज्ञः प्रातर्जागरयितारः, तेषामिव, "वैतालिका बोधकराः" इत्यमरः, **तारतरविलापिनाम्** अत्युच्चैस्संलापिनाम्, **केलिशकुन्तानां** क्रीडोपकरणशुकानाम्, **ध्वनिभिः** शब्दैः, **आधीयमानरभसः** आधीयमानः—जन्यमानः, रभसः—सुरतसंग्रामवेगः, तदुत्साह इति यावत्, यस्य तादृशः सन्, "रभसो वेग-हर्षयोः" इति विश्वः, पुनः **मानसभुवा** मानसे—हृदये, भवति—आविर्भवतीति मानसभूः कामः, तेन, **देवेन** कामदेवेन, **पात्यमानपुष्पवृष्टिः** पात्यमाना—विमुच्यमाना, पुष्पवृष्टिः—विजयोपहारभूतकुसुमधारा यस्मिन् तादृशः सन्, कीदृशेन तेन? **अनवरतमुक्तकौसुमशरासारव्यपदेशात्** अनवरतं सततम्, मुक्ताः—पातिताः, ये कौसुमाः—कुसुमसम्बन्धिनः, शराः—बाणाः, तेषाम्, आसारः—धारासम्पातः, तद्व्यपदेशात्—तद्व्याजात्, **उपजाततुष्टिनेव** सञ्जातसन्तोषेणेव, कीदृशं रतसमरम्? **सरभसदशनाग्रदंशदलितदन्तच्छदं** सरभसं—सवेगं यथा स्यात्तथा, दशनाग्रेण—दन्ताग्रेण, यो दंशः—दंशनम्, तेन दलितौ—खण्डितौ, दन्तच्छदौ—कामिन्या ओष्ठौ यस्मिंस्तादृशम्, पुनः **अदयकचग्रहोल्लसद्भ्रुकुटीभूषितललाटदेशम्** अदयं—निर्दयं यथा स्यात्तथा, यः कचग्रहः—केशग्रहणम्, तेन उल्लसन्त्या—शोभमानया, भ्रुकुट्या—भ्रुवोः कौटिल्येन, भूषितो ललाटदेशो यस्मिंस्तादृशम्, पुनः **आवेशपरवशप्रवृत्तकरप्रहारव्याहरन्मणिवलयम्** आवेशस्य—स्नेहस्य, परवशं—पराधीनं यथा स्यात्तथा, प्रवृत्ताभ्यां कराभ्यां—हस्ताभ्याम्, प्रहारेण कामिनीकर्तृकराजकर्मकाभिघातेन, व्याहरत्—क्वणत्, मणिवलयं—मणिमयमणिबन्धालङ्करणं यस्मिंस्तादृशम्, पुनः **अविरलोद्गतश्रमस्वेदतिम्यद्रोमाञ्चकवचम्** अविरलं—निरन्तरम्, उद्गतैः—स्यन्दितैः,—श्रमस्वेदैः—सुरतायासधर्मैः, तिम्यन्तः—

कदाचिन्नीलपटावगुण्ठिताङ्गो लाङ्गलीव कालिन्दीजलवेणिकाः प्रत्यग्रमृगमदाङ्गरागमलिनवपुषो बहुलप्रदोषाभिसारिकाः सुदूरमाचकर्ष [ अः ]। कदाचिदुल्लसितकनकशृङ्गसुन्दरो मन्दराद्रिरिव क्षीरोदजलवीचिभिरागृहीतविविधशङ्खशुक्तिपुटाभिरवरोधपुरन्ध्रीभिरुपसृत्योपसृत्य सिच्यमानो जलक्रीडामकरोत् [ क ]। कदाचिन्मुदितसुहृद्गणोपदिश्यमानमार्गो मृगाङ्कमौलिरिव कैलासशिखरे मुखरशिखण्डिनि क्रीडागिरौ देवीसमेतः सविभ्रमं बभ्राम [ ख ]। कदाचिन्मन्युगौरवादतिलङ्घितपादपतनविभ्रमाणां प्रेयसीनां प्रसादनं प्रति निष्प्र-

---

जलक्रीडायन्त्रं शिखरं च [ क ]। सुहृद्गणः–मित्रवृन्दं सुहृत्प्रमथश्च, देव्यः–स्वभार्याः, देवी–गौरी च [ ख ]।

---

आर्द्रीभवन्तः, रोमाञ्चकवचाः–सुरतसङ्गरेऽङ्गत्राणानि यस्मिंस्तादृशम्, पुनः **उत्कृष्टकरणप्रयोगरमणीयम्** उत्कृष्टा ये करणप्रयोगाः–हस्तादीन्द्रियविक्षेपाः, तै रमणीयं–सुन्दरम्, **अत्यद्भुतम्** आश्चर्यजनकम्, जनसामान्यासाध्यमित्यर्थः [ अं ]। **कदाचित्** कस्मिंश्चित् काले, **नीलपटावगुण्ठिताङ्गः** नीलपटेन–अभिसारिकानुरूपकृष्णवस्त्रेण, अवगुण्ठितं–तिरोहितम्, अङ्गं–शरीरं यस्य तादृशः सन्, **कालिन्दीजलवेणिकाः** यमुनाजलमिव कृष्णा वेणी–केशपाशो यासां ताः, **प्रत्यग्रमृगमदाङ्गरागमलिनवपुषः** प्रत्यग्रः–नवः, यो मृगमदः–कस्तूरिका, तत्सम्बन्धिना अङ्गरागेण–शरीरानुलेपनद्रव्येण, मलिनं–लिप्तम्, वपुः–शरीरं यासां ताः, **बहुलप्रदोषाभिसारिकाः** बहुलस्य–कृष्णपक्षस्य, प्रदोषेषु–रजनीमुखेषु, अभिसारिकाः–नीलपटेनात्मानमवगुण्ठ्य कान्ताभिमुखगामिनीः स्त्रीः, **सुदूरम्** अतिदूरम्, **आचकर्ष** आकर्षयति स्म, तदेकवेषशालित्वात्, काः कीदृक् क इव ? **प्रत्यग्रमृगमदाङ्गरागमलिनवपुषः** क्रान्तीनां गोपाङ्गनानां कुचकलशाच्च्यवता प्रत्यग्रमृगमदाङ्गरागेण कलुषितजलीयशरीराः, पुनः **बहुलप्रदोषाभिसारिकाः** बहुलः–कृष्णः, प्रदोषः–अभिसरणसमयो यासां तादृश्यः, अभिसारिका यासु ताः, कृष्णाभिसारिकाविहारयोग्या इत्यर्थः, **कालिन्दीजलवेणिकाः** कालिन्दीजलस्य–यमुनाजलस्य, वेण्यः–प्रवाहा एव वेणिकाः, ताः, नीलपटावगुण्ठिताङ्गो **लाङ्गली** बलराम इव, स यथा यमुनामाकृष्टवानासीत् तथेत्यर्थः, बलरामः कदाचन यमुनामाचकर्षेति पौराणिकमितिवृत्तम् [ अः ]। स राजा **कदाचित्** कस्मिंश्चित् काले तु, **जलक्रीडां** जलैः खेलाम्, **अकरोत्** कृतवान्, कीदृशः सन् ? **उल्लसितकनकशृङ्गसुन्दरः** उल्लसितम्–उत्कृष्टम्, यत् कनकशृङ्गं–कनकं सुवर्णं तन्मयं शृङ्गं शृङ्गाकारो जलक्रीडोपकरणयन्त्रविशेषः, तेन सुन्दरः सन्, पुनः **अवरोधपुरन्ध्रीभिः** अन्तःपुरस्त्रीभिः, **उपसृत्य उपसृत्य** असकृत् समीपमागत्य, **सिच्यमानः** उत्क्षिप्यमाणजलः सन्, काभिः कीदृक् इव? **आगृहीतविविधशङ्खशुक्तिपुटाभिः** आगृहीताः–आ समन्ताद् गृहीताः, उद्धृता इत्यर्थः, विविधानाम्–अनेकविधानाम्, शङ्खशुक्तीनां पुटा याभिस्तादृशीभिः, **क्षीरोदजलवीचिभिः** क्षीरमेवोदकम्–उदकस्थानीयं यस्मिन्नसौ क्षीरोदः क्षीरसागरः, यत्रेन्द्रभयेन मन्दराचलो निपपात, तदीयजलवीचिभिः–तदीयजलतरङ्गैः, **उल्लसितकनकशृङ्गसुन्दरः** उद्–ऊर्ध्वम्, लसितेन–शोभितेन, कनकशृङ्गेण–सुवर्णमयशिखरेण, सुन्दरः–मनोहरः, **मन्दराद्रिः** मन्दराचल इव [ क ]। पुनः **कदाचित्** कस्मिंश्चित् काले, **मुदितसुहृद्गणोपदिश्यमानमार्गः** मुदितेन–विहारकौतुकानन्दितेन, सुहृद्गणेन–मित्रमण्डलेन, उपदिश्यमानः–निर्दिश्यमानः, मार्गः–विहारमार्गो यस्मै तादृशः सन्, **देवीसमेतः** देवीभिः–राज्ञीभिः, समेतः–सहितः, **क्रीडागिरौ** क्रीडापर्वते, **सविभ्रमं** विभ्रमेण–शृङ्गारचेष्टया, सहितं यथा स्यात्तथा, **बभ्राम** विहारं कृतवान्, कीदृशे ? **मुखरशिखण्डिनि** मुखराः–शब्दायमानाः, शिखण्डिनः–मयूरा यस्मिंस्तादृशे, कुत्र कीदृशः क इव ? मुखरशिखण्डिनि **कैलासशिखरे** कैलासपर्वतोपरिभागे, **मुदितसुहृद्गणोपदिश्यमानमार्गः** मुदितेन–विहारहेतोः प्रसन्नेन, सुहृद्गणेन–शोभमानं शिवप्रीतिप्रवणं हृदयं यस्य तादृशेन, गणेन–प्रमथगणेन, उपदिश्यमानमार्गः–निर्दिश्यमानविहारभूमिपथः, **देवीसमेतः** पार्वतीसहितः, **शशाङ्कमौलिः** शशाङ्क–चन्द्रः, मौलौ–मस्तके यस्य स शशाङ्कमौलिः शिवः, स इव, स यथा तादृशः सन् कैलासशिखरे भ्रमति तथेत्यर्थः [ ख ]। स राजा **कदाचित्** कस्मिंश्चित् समये, **बिसिनीपलाशस्रस्तरशायी** बिसिनीनां–कमलिनीनाम्, यानि पलाशानि–पत्राणि, "पत्रं पलाशं छदनम्" इत्यमरः, तत्स्रस्तरे–तन्मयशय्यायाम्, शयनशीलः सन्, **मनसिशयसन्तापं** मनसि–कामिनां हृदये, शेत इति मनसिशयः कामदेवः, तत्सन्तापं–तत्सञ्ज्वरम्, **अत्यवाहयत्**

त्याशः प्रान्तनिपतदम्बुधारान्धकारितोदरकुहरेषु धारागृहेषु बिसिनीपलाशस्रस्तरशायी मनसिशयसंतापमत्यवाहयत् [ ग ] । कदाचिद् देव्या सार्धमारब्धस्पर्धः स्वपरिगृहीतानां गृहोद्यानवीरुधामकालकुसुमोद्गतिकारिणस्तांस्तान् दोहदयोगानदात् [ घ ] । कदाचिद् धौतमृगमदाङ्गरागमनुरागजं स्वेदजलमजस्रमुज्जिहानं बहु मन्यमानः प्रतिकर्मासमाप्तिकाम्यया कामिनीकुचकुम्भभित्तिष्वनेकभङ्गकुटिलाः पत्राङ्गुलीरकल्पयत् [ ङ ] । कदाचित् क्रीडाद्यूतपराजितः पणितमप्रयच्छन् 'क गच्छसि ?' इति बद्धालीकभ्रुकुटिभिर्विदग्धवनिताभिराकृष्य कृतविषमपादपातो बलादिव दत्तकपाटसंपुटेषु वासवेश्मसु सपत्नीसमक्षमेवाक्षिप्यत [ च ] । कदाचिदीर्ष्यारुणप्रतिग्रमदाकटाक्षकर्बुरमुपरिक्षिप्तरक्तोत्पलपलाशमिव कापिशायनं स्वयमुत्क्षिप्तमाणिक्यचषकश्चन्द्रिकाप्रहासिषु

---

**टिप्पनकम्**—मन्युः—कोपः [ ग ] । **कापिशायनं** मद्यम् [ छ ] ।

---

उपशमितवान्, कुत्र ? **प्रान्तनिपतदम्बुधारान्धकारितोदरकुहरेषु** प्रान्ते-समीपे, निपतन्तीभिः-नितरां स्रवन्तीभिः, अम्बुधाराभिः, अन्धकारितम्–अन्धीकृतम्, उदरकुहरं–मध्यवर्त्यवकाशो येषु तादृशेषु, **धारागृहेषु** जलधारास्यन्दनयन्त्रान्वितगृहेषु, कुतस्तथाऽकरोत् ? यतः **मन्युगौरवात्** क्रोधाधिक्यात्, **अतिलङ्घितपादपतनविभ्रमाणाम्** अतिलङ्घितः–अवहेलितः उपेक्षित इत्यर्थः, पादपतनविभ्रमः–तत्कर्तृकचरणोपरिपतनरूपा शृङ्गारचेष्टा याभिस्तादृशीनाम्, **प्रेयसीनां** प्रियतमानाम्, **प्रसादं प्रति** प्रसन्नताविषये, **निष्प्रत्याशः** आशारहितः [ग] । स राजा **कदाचित्** कस्मिंश्चित् समये च, **देव्या** राज्ञ्या, **सार्धं** सह, **आरब्धस्पर्धः** आरब्धा–प्रारब्धा, स्पर्धा–अनुपदवक्ष्यमाणकर्मणि संघर्षो येन तादृशः सन्, **तांस्तान्** अनेकप्रकारान्, **दोहदयोगान्** युज्यते यैस्ते योगाः, दोहदस्य-गर्भस्य, असमयेऽपि पुष्पफलप्रसवस्येत्यर्थः, योगाः–उपचारा धूपादयस्तान्, **अदात्** प्रयुक्तवान्, तान् कीदृशान् ? **स्वपरिगृहीतानां** स्वेन, परिगृहीतानाम्–कुसुमाशयोद्यानेषु स्थापितानाम्, **गृहोद्यानवीरुधां** गृहस्य-गृहपार्श्ववर्ति, यद् उद्यानं-केलिकाननम्, आराम इत्यर्थः, तस्य वीरुधां-लतानां गुल्मानां च, **अकालकुसुमोद्गतिकारिणः** अकाले–अनवसरे, कुसुमोद्गतिकारिणः–पुष्पोद्गमप्रयोजकान्, तदुक्तम्–"ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः । फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोद्गमाः" ॥ इति [ घ ] । स राजा **कदाचित्**, कस्मिंश्चिदवसरे, **धौतमृगमदाङ्गरागं** धौतः–क्षालितः मृगमदस्य–कस्तूरिकायाः, अङ्गरागः–शरीरविलेपनं येन तादृशम्, **अनुरागजं** स्नेहजम्, **अजस्रं** सन्ततम्, **उज्जिहानम्**–उद्गच्छत्, स्यन्दमानमित्यर्थः, **स्वेदजलं** घर्मोदकम्, **प्रतिकर्मासमाप्तिकाम्यया** प्रतिकर्मणः–शरीरप्रसाधनरूपकार्यस्य, असमाप्तिकाम्यया–अविश्रामकामनया, **बहु** इष्टसाधकतया साधु, मन्यमानः, **कामिनीकुचकुम्भभित्तिषु** कामिन्याः कुचौ कुम्भाविव तदाकारकत्वादिति कामिनीकुचकुम्भौ, तयोर्भित्तिषु ऊर्ध्वभागेषु, **अनेकभङ्गकुटिलाः** अनेकैः, भङ्गैः–प्रकारविशेषैः, कुटिलाः–अनृजवीः, **पत्राङ्गुलीः** पत्रसहिताङ्गुल्याकारान्, **अकल्पयत्** चन्दनद्रवेण चित्रयाञ्चकार, "भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये । कौटिल्ये भय-विच्छित्त्योः" इति हैमः [ ङ ] । स राजा **कदाचित्** कस्मिंश्चित् समये, **क्रीडाद्यूतपराजितः** क्रीडायां द्यूतेन प्रतिकूलपतितेन पराजितोऽपि, **पणितं** सति पराजये देयत्वेन प्रतिज्ञातम्, **अप्रयच्छन्** अप्रददत्, अप्रदाय क्वचित् प्रस्थातुमुद्यतः सन्नित्यर्थः, **क** कुत्र स्थले, **गच्छसि** पलायसे, इति कथयन्तीभिः, **बद्धालीकभ्रुकुटिभिः** बद्धा–विरचिता, अलीका–प्रणयकोपेन मिथ्यारूपा, न तु वास्तविककोपप्रयुक्ता, भ्रुकुटिः–भ्रुवोः कौटिल्यं याभिस्ताभिः, **विदग्धवनिताभिः** नर्मनिपुणनारीभिः, **आकृष्य** स्थानान्तरगमनान्निरुध्य, **कृतविषमपादपातः** कृतः, विषमः–कठिनः, चिरपर्यन्त इत्यर्थः, पादपातः–तादृशवनितया चरणाघातो यस्य, यद्वा तादृशवनिताचरणोपरिपातो येन तादृशोऽपि, स राजा **दत्तकपाटसम्पुटेषु** दत्तः–कृतः, कपाटयोः–द्वारपिधानफलकयोः, सम्पुटः–संयोजनं येषु तादृशेषु, **वासवेश्मसु** निजनिवासगृहेषु, **बलादिव** बलात्कारेणेव, **सपत्नीसमक्षमेव** सपत्नीजनानां सम्मुख एव, **अक्षिप्यत** क्षिप्तः, क्षिप्त्वा नियन्त्रितः, नियन्त्रणव्याजेन तत्संयोगरक्षणमकार्षुरिति तासां वनितानामिदमेव वैदग्ध्यम् [ च ] । स राजा **कदाचित्** कस्मिंश्चिदवसरे, **चन्द्रिकाप्रहासिषु** ज्योत्स्नोपहसनशीलेषु, तदधिकोज्ज्वलेष्वित्यर्थः, "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः, **प्रासादतलेषु** राजभवनोपरिभागेषु, **प्रणयकुपिताः** प्रीतिप्रयुक्तकोपवतीः, **प्रेयसीः** प्रियतमाः, **सानुनयम्** अनुनयेन–अनुरञ्जनेन, सहितं यथा स्यात्तथा, **कापिशायनं** द्राक्षारसात्मकं मद्यविशेषम्,

प्रासादतलेषु प्रेमपरवशः प्रणयकुपिताः प्रेयसीः सानुनयमपाययत् [ छ ] । कदाचिद् वदनमण्डनादिभिर्विडम्बनाप्रकारैरुपहसन् विदूषकानन्तःपुरिकाजनमहासयत् [ ज ] । कदाचिदङ्गनालोल इति मत्वा निपुणचित्रकारैश्चित्रपटेष्वारोप्य सादरमुपायनीकृतानि रूपातिशयशालिनीनामवनिपालकन्यकानां प्रतिबिम्बानि परित्यक्तान्यकर्मा दिवसमालोकयत् [ झ ] । कदाचित् स्वयमेव रागविशेषेषु संस्थाप्य समर्थितानि शृङ्गारप्रायरसानि स्वरचितसुभाषितानि स्वभावरक्तकण्ठ्या गाथकगोष्ठ्या पुनरुक्तमुपगीयमानान्यनुरागभावितमनाः शुश्राव [ ञ ] । कदाचिदावेदितनिखिलनाट्यवेदोपनिषद्भिर्नर्तकोपाध्यायैरुपदर्शितानां नर्तकीनामक्षुण्णेन शास्त्रवर्त्मना कृतसूक्ष्मगुणदोषोपन्यासः पश्यँल्लास्यविधिमासन्नवर्तिनो विदग्धराजलोकस्य मनांसि जहार [ ट ] । कदाचिद् भवनदीर्घिकाम्भसि प्रवृत्तनिर्भरक्रीडारसानामन्तःपुरविलासिनीनां निपतिताङ्गुलीयकमुद्रा-

---

**अपाययत्** पायितवान्, कीदृशम् ? **ईर्ष्यारुणप्रतिप्रमदाकटाक्षकर्बुरम्** ईर्ष्यया–सपत्नीशुभासहिष्णुतया, अरुणः–रक्तो यः, प्रतिप्रमदायाः–अन्यकामिन्याः, सपत्न्या इत्यर्थः, कटाक्षः–अपाङ्गदृष्टिः, तेन कर्बुरम्–चित्रम्, अत एव **उपरिक्षिप्तरक्तोत्पलपलाशमिव** उपरिक्षिप्तम्–उपरि स्थापितम्, रक्तोत्पलस्य–रक्तकमलस्य, पलाशं–पत्रं यस्मिंस्तादृशमिवेत्युत्प्रेक्षा, स राजा कीदृशः ? **प्रेमपरवशः** कामिनीप्रीतिपराधीनः, अत एव **स्वयमुत्क्षिप्तमाणिक्यचषकः** स्वयम्, उत्क्षिप्तः–उत्थापितः, माणिक्यचषकः–मणिमयपानपात्रं येन तादृशः [ छ ] । पुनः स राजा **कदाचित्** कस्मिंश्चिदवसरे, **वदनमण्डनादिभिः** मुखरञ्जनादिरूपैः, **विडम्बनाप्रकारैः** तिरस्कारप्रकारैः, **विदूषकान्** हासजनकतया नर्मसचिवान्, **उपहसन्** परिहसन्, **अन्तःपुरिकाजनम्** अन्तःपुरमस्ति यस्याः सा अन्तःपुरिका, तादृशजनम्, अन्तःपुरनारीजनमित्यर्थः, **अहासयत्** हासयति स्म [ ज ] । कदाचित् कस्मिंश्चित् समये, स राजा **अङ्गनालोलः** अङ्गनासु–कामिनीषु, लोलः–चञ्चलः, लम्पट इत्यर्थः, इति **मत्वा** अवधार्य, निपुणचित्रकारैः, **चित्रपटेषु** चित्रलेखनाधारवस्त्रेषु, **आरोप्य** आलेख्य, **सादरम्** आदरसहितं यथा स्यात्तथा, **उपायनीकृतानि** उपहाररूपेण दत्तानि, **रूपातिशयशालिनीनां** रूपोत्कर्षशोभिनीनाम्, **अवनिपालकन्यकानां** राजकन्यकानाम्, **प्रतिबिम्बानि** प्रतिकृतीः, **परित्यक्तान्यकर्मा** परित्यक्तं–परिवर्जितम्, अन्यत्–इतरत्, कर्म–कार्यं येन तादृशः सन्, **दिवसम्** सम्पूर्णदिनम्, न तु कियत्क्षणम्, **अलोकयत्** अपश्यत् [ झ ] । स राजा **कदाचित्** कस्मिंश्चिदवसरे, **रागविशेषेषु** वसन्तादिसंज्ञकस्वरविशेषेषु, **संस्थाप्य** सम्यग् योजयित्वा, **स्वयमेव** स्वेनैव, **समर्थितानि** साधुतया स्वीकृतानि, **समर्पितानी**ति पाठे गायकेभ्यो दत्तानि, **शृङ्गारप्रायरसानि** शृङ्गारप्रायाः–शृङ्गाररसप्रचुराः, रसा येषु तादृशानि, **स्वरचितसुभाषितानि** स्वनिर्मितसुललितगाथाः, **स्वभावरक्तकण्ठ्या** स्वभावेन, रक्तः–प्रियः, कण्ठः–तत्कृतध्वनिर्यस्यास्तादृश्या, गाथकगोष्ठ्या, **पुनरुक्तं** पुनर्गीतं यथा स्यात्तथा, **उपगीयमानानि** गानकर्मक्रियमाणानि, **अनुरागभावितमनाः** प्रीतिपूर्णहृदयः, **शुश्राव** शृणोति स्म [ ञ ] । स राजा **कदाचित्** कस्मिंश्चित् काले तु, **आवेदितनिखिलनाट्यवेदोपनिषद्भिः** आवेदिता–समन्ताद् बोधिता, निखिला–समग्रा, नाट्यवेदस्य–नाट्यशास्त्रस्य, उपनिषत्–रहस्यभावो यैस्तादृशैः, **नर्तकोपाध्यायैः** नर्तकाचार्यैः, **उपदर्शितानां** शिक्षितानाम्, **नर्तकीनां** नृत्यनिपुणनारीणाम्, **अक्षुण्णेन** निर्दोषेण, **शास्त्रवर्त्मना** नाट्यशास्त्रानुशीलितमार्गेण, **कृतसूक्ष्मगुणदोषोपन्यासः** कृतः, सूक्ष्मयोः–जनसामान्यदुर्लक्ष्ययोः, गुण–दोषयोः, उपन्यासः–उद्भावनं येन तादृशः सन्, **लास्यविधिं** नाट्यक्रियाम्, पश्यन्, **आसन्नवर्तिनः** स्वपार्श्ववर्तिनः, **विदग्धराजलोकस्य** नाट्यनिपुणनृपतिजनस्य, **मनांसि** हृदयानि, **जहार** स्ववैदग्ध्यातिशयेन हरति स्म [ ट ] । स राजा **कदाचित्** कस्मिंश्चित् समये च, **भवनदीर्घिकाम्भसि** भवनस्य–गृहस्य, गृहपार्श्ववर्तिन्या इत्यर्थः, दीर्घिकायाः–"शतेन धनुर्भिः पुष्करिणी, त्रिभिर्दीर्घिका, चतुर्भिर्द्रोणः, पञ्चभिस्तडागः" इत्युक्तपूर्वपरिमाणकजलाशयस्य, अम्भसि–जले, **प्रवृत्तनिर्भरक्रीडारसानां** प्रवृत्तः, निर्भरः–अत्यन्तः, क्रीडारसः–क्रीडाकौतुकं यासां तादृशीनाम्, **अन्तःपुरविलासिनीनाम्** अन्तःपुरनारीणाम्, **गृहीतजघनांशुकः** गृहीतः–आकृष्टः, जघनस्य–कटिपुरोभागस्य, अंशुकः–वस्त्रं येन तादृशः, किं कृत्वा ? **पतिताङ्गुलीयकमुद्रान्वेषणादिना** पतितानां–जले स्खलितानाम्, **णाम् अङ्गुलीयकमुद्रा** अङ्गुलिभूषणरूपरत्नप्रतिमानाम्, अन्वेषणादिरूपेण **तेन तेन** अनेकप्रकारकेण, **व्याजेन** छद्मना,

न्वेषणादिना तेन तेन व्याजेन निमज्ज्य गृहीतजघनांशुको विभ्रमभ्रूभङ्गसुभगललाटलेखानि व्याजवैलक्ष्यहासविकसितकपोलदर्पणान्यलीकाक्रोशपदहृद्यवाञ्चि समासन्नप्रतिप्रमदामुखप्रहितकृत्रिमत्रपातरलतरतारकान्यविरतदिदृक्षारसो वीक्षामास मुखानि [ ठ ]। किं बहुना, यदुचितं यौवनस्य रुचितं चित्तवृत्तेराराधकं विदग्धानामबाधकं लोकद्वयस्य, तदपरमप्यविकलतया विवेकस्य स्थिरतया कुलाभिमानस्य स्वभ्यस्ततया विनयस्य भूयिष्ठतया च सत्त्ववृत्तेः, यथा न धर्मः सीदति यथा नार्थः क्षयं व्रजति यथा न राजलक्ष्मीरुन्मनायते यथा न कीर्तिर्मन्दायते यथा न प्रतापो निर्वाति यथा न गुणाः श्यामायन्ते यथा न श्रुतमुपहस्यते यथा न परिजनो विरज्यते यथा न मित्रवर्गो म्लायति यथा न शत्रवस्तरलायन्ते तथा सर्वमन्वतिष्ठत् [ ड ]। सेवकानुरागसंरक्षणाय च वितीर्णसर्वावसरमन्तरान्तरा सभामण्डपमध्यास्त [ ढ ]। धर्मपक्षपातितया च देवद्विजातितपस्विजनकार्येषु महत्सु कार्यासनं भेजे [ ण ]।

---

**टिप्पनकम्—कार्यासनं** धर्माधिकरणम् [ ण ]।

---

**निमज्ज्य** जले प्रविश्य, **विभ्रमभ्रूभङ्गसुभगललाटलेखानि** विभ्रमेण–शृङ्गारचेष्टाविशेषेण, यो भ्रूभङ्गः–नयनोपरितनरोमराजीकौटिल्यम्, तेन सुभगा–मनोहरा, ललाटरेखा–ललाटस्थपङ्क्तिर्येषु तादृशानि, "लेखा राज्यां लिपावपि" इति हैमः, **व्याजवैलक्ष्यहासविकसितकपोलदर्पणानि** व्याजे–तद्राजकर्तृकाङ्गुलीयकान्वेषणादिरूपे छले, यद् वैलक्ष्यम्–आश्चर्यम्, तेन यो हासः, तेन विकसितौ–प्रफुल्लितौ, कपोलदर्पणौ–दर्पणवदुज्ज्वलौ कपोलौ येषु तादृशानि, पुनः **अलीकाक्रोशपदहृद्यवाञ्चि** अलीकानि–मिथ्याभूतानि, न स्वान्तरिकाणि, यानि आक्रोशपदानि–उपालम्भवाक्यानि, तैः हृद्या–हृदयप्रिया, वाक्–वाणी येषु तादृशानि, पुनः **समासन्नप्रतिप्रमदामुखप्रहितकृत्रिमत्रपातरलतरतारकानि** समासन्नाः–निकटस्थाः, याः प्रतिप्रमदाः–सपत्न्यः, तासां मुखेषु प्रहिता–प्रेषिता, निवेशितेत्यर्थः, या कृत्रिमत्रपा–कृत्रिमा स्वयमुत्पन्ना या त्रपा स्वाश्रितलज्जाभारः, तया तरलतरा–अतिचञ्चला, तारका–कनीनिका येषु तादृशानि, **मुखानि** जलक्रीडारतानामन्तःपुरविलासिनीनां मुखमण्डलानि, **अविरतदिदृक्षारसः** अविरतं–सन्ततम्, दिदृक्षारसः–दर्शनेच्छाकौतुकं यस्य तादृशः सन्, **वीक्षामास** विशेषेण पश्यति स्म [ ठ ]। किं **बहुना** किमधिकेन, **यौवनस्य** यौवनावस्थायाः, **उचितं** योग्यम्, चित्तवृत्तेः, **रुचितं** प्रियम्, **विदग्धानां** पण्डितानाम्, **आराधकं** सत्कारकम्, **लोकद्वयस्य** एतद्भवपरभवयोः, **अबाधकम्** अहानिकारकम्, **यद्** यादृशं कर्म, **तत्** तादृशम्, **अपरमपि** अन्यदपि सर्वं कर्म, **अन्वतिष्ठत्** करोति स्म; केन हेतुना? **विवेकस्य** सदसद्विचारशक्तेः, **अविकलतया** अन्यूनतया, परिपूर्णतयेत्यर्थः, **कुलाभिमानस्य** स्वकुलगौरवाभिमानस्य, **स्थिरतया** दृढतया, **विनयस्य** नम्रतायाः, **स्वभ्यस्ततया** सम्यगभ्यासेन, **सत्त्ववृत्तेः** पराक्रमवृत्तेः, **भूयिष्ठतया** अत्यधिकतया; केन प्रकारेण? **यथा** येन प्रकारेण, धर्मो **न सीदति** न नश्यति, पुनः, **यथा** येन प्रकारेण, **अर्थः** धनम्, **न क्षयं व्रजति** वृथा व्ययं न प्राप्नोति, **यथा** येन प्रकारेण, राजलक्ष्मीः, **न उन्मनायते** न पराङ्मुखीभवति, **यथा** येन प्रकारेण, **प्रतापः** राजतेजः, **न निर्वाति** न क्षयति, **गुणाः** दयादाक्षिण्यादयः, **यथा** येन प्रकारेण, **न श्यामायन्ते** न मालिन्यमाप्नुवन्ति, **यथा** येन प्रकारेण, **श्रुतं** शास्त्रं **न उपहस्यते** नोपहासास्पदतामुपैति, **यथा** येन प्रकारेण, **मित्रवर्गः** अमात्यादिसुहृद्वर्गः, **न ग्लायति** न हर्षक्षयमुपैति, **शत्रवः** रिपुगणः, **यथा** येन प्रकारेण, **न तरलायन्ते** न स्पर्धितुं त्वरन्ते [ ड ]। स राजा **च** पुनः, **सेवकानुरागसंरक्षणाय** सेवकानुरागस्य–सेवकजनसमवेतप्रीतेः, संरक्षणाय–सम्यग्रक्षणाय, सेवकैः सह प्रेमालापायेत्यर्थः, **वितीर्णसर्वावसरं** वितीर्णः सर्वः, अवसरः–समयो यस्मिंस्तादृशं यथा स्यात्तथा, **अन्तरा अन्तरा** कामिनीक्रीडाया मध्ये मध्ये, **सभामण्डपं** सभासदनम्; **अध्यास्त** उपविशति स्म [ ढ ]। **च** पुनः, **धर्मपक्षपातितया** धर्मश्रद्धालुतया, **महत्सु** बहुसमयविवेकसाध्येषु, **देव–द्विजाति–तपस्विजनकार्येषु** देवानाम्, द्विजातिजनानां–ब्राह्मण-क्षत्रिय-वैश्यजनानाम्, तपस्विजनानां च, कार्येषु–यज्ञादिषु, **कार्यासनं** कार्याध्यक्षासनम्, **भेजे** गृह्णाति स्म [ ण ]।

पौरलोकपरितोषहेतोश्च वसन्तादिषु सविशेषप्रवृत्तोत्सवां निर्गत्य नगरीमपश्यत् [ त ] । निसर्गत एवास्य पूर्वपार्थिवातिशायिनी प्रजासु पक्षपातपरवशा वृत्तिरासीत्, यतः–स तथाप्रसक्तोऽपि विषयोपभोगसुखेषु, जानन्नपि जागरूकताममात्यानाम्, विद्वानप्युपादेयतां निजाज्ञायाः, प्रत्यहमावेद्यमानप्रजानुरागोऽपि प्रणिधिपुरुषैरादेशसम्पादनपटीयसि श्रद्धेयवचसि नेदीयस्यपि मौलभृत्यवर्गे तासां सुस्थासुस्थोपलम्भाय केनाप्यनुपलक्ष्यमाणविग्रहः कुसुमायुध इवायुधद्वितीयः स्वयमेव निर्गत्य निशामुखेषु प्रतिगृहं नगर्यां बभ्राम [ थ ] । किंवदन्तीशुश्रूषया च तत्र तत्र स्थाने सन्निविष्टा विशिष्टजनगोष्ठीर्जगाहे [ द ] । प्रतिश्रयकुटीषु च दिगन्तरागतपथिकसततसंबाधास्वढौकत [ ध ] । राज्यव्यापारकथाप्रक्रमे च पौराणामाशयपरीक्षार्थमवनीपतेरमात्यस्य तदधिकृतानां च यथासम्भवं परिकल्प्य दोषानुदकीर्तयत्, तैश्च प्रशान्तनिखिलोपद्रवतया सर्वदा सुखितैः स्वामिसचिवाध्यक्षमिथ्यापरिवादश्रवणबद्धामर्षैरप्रत्यभिज्ञानदोषेण परुषाक्षरमधिक्षिप्यमाणः परां मुदमुवाह [न] ।

---

**टिप्पणकम्**—विग्रहः–शरीरम् [ थ ] । किंवदन्ती–जनवार्ता [ द ] ।

---

**च** पुनः, **पौरलोकपरितोषहेतोः** पुरवासिजनसन्तोषार्थम्, **निर्गत्य** स्वराजधानीतो निःसृत्य, **वसन्तादिषु** वसन्तोत्सवादिकालेषु, **सविशेषप्रवृत्तोत्सवां** सविशेषं–सातिशयं यथा स्यात्तथा, प्रवृत्तः–प्रस्तुतः, उत्सवः–समारोहो यस्यां तादृशीं **नगरीं** स्वराजधानीम्, **अपश्यत्** पश्यति स्म [ त ] । **अस्य** कविबुद्धिसन्निकृष्टस्य प्रकृतनृपस्य, **निसर्गत एव** स्वभावत एव, **प्रजासु** प्रजाः प्रति, **पक्षपातपरवशा** पक्षपातस्य–प्रजापक्षपातावलम्बनस्य, प्रजाजनप्रीतेरित्यर्थः, परवशा–पराधीना, **पूर्वपार्थिवातिशायिनी** पूर्वपार्थिवानतिशेते अभिभवति या सा, पूर्वनृपापेक्षयोत्कृष्टेत्यर्थः, **वृत्तिः** चित्तवृत्तिः, आसीत् । कुतः ? **यतः** यस्माद्धेतोः, **स** राजा, **विषयोपभोगसुखेषु** कामिनीसम्भोगरूपसुखेषु, **तथा** तेन प्रकारेण, **प्रसक्तोऽपि** उक्तरूपेण व्यासक्तोऽपि, **अमात्यानां**–मन्त्रिणाम्, **जागरूकताम्** अवधानशीलताम्, **जानन्नपि** निश्चिन्वन्नपि, **निजाज्ञायाः** स्वशासनस्य, **उपादेयतां** ग्राह्यताम्, आदरणीयतामित्यर्थः, **विद्वानपि** जानन्नपि, **प्रणिधिपुरुषैः** गूढचरपुरुषैः, **प्रत्यहं** प्रतिदिनम्, **आवेद्यमानप्रजानुरागोऽपि** आ समन्ताद्बोध्यमानप्रजासमवेतप्रीतिकोऽपि, **आदेशसम्पादनपटीयसि** आज्ञापालननिपुणतमे, **श्रद्धेयवचसि** श्रद्धेयं–श्रद्धायोग्यम्, विश्वसनीयमिति यावत्, वचनं–वाक्यं यस्य तादृशे, **मौलभृत्यवर्गे** मूलादागतो मौलः परम्पराऽऽगतः, अथवा मूलं वेदेति मौलः, मूलाभिज्ञः, तादृशे **भृत्यवर्गे** सेवकसमूहे, **नेदीयसि** अतिनिकटे, **अपि** सत्यपि, **तासाम्** अनुपदवर्णितानां प्रजानाम्, **सुस्थासुस्थोपलम्भाय** सुस्था–सुखेन स्थितिः, असुस्था–दुःखेन स्थितिः, तयोः, उपलम्भाय–ज्ञानाय, केनापि जनेन **अनुपलक्ष्यमाणविग्रहः** प्रच्छन्नतया राजकीयत्वेनाप्रतीयमानशरीरः, **कुसुमायुध इव** कामदेव इव, **आयुधद्वितीयः** आयुध एव न त्वन्यजनो द्वितीयो यस्य तादृशः, एकाकीत्यर्थः, **स्वयमेव** न त्वन्यप्रेरणया, **निर्गत्य** स्वभवनान्निःसृत्य, **निशामुखेषु** प्रदोषेषु, **नगर्याम्** अयोध्यायाम्, **बभ्राम** भ्रमति स्म [ थ ] । **च** पुनः, **किंवदन्तीशुश्रूषया** किंवदन्त्याः–जनश्रुत्याः, शुश्रूषया–श्रोतुमिच्छया, **तत्र तत्र स्थाने** अनेकस्थाने, **सन्निविष्टाः** सम्यगुपविष्टाः, **विशिष्टगोष्ठीः** उत्कृष्टजनसभाः, **जगाहे** प्रविशति स्म [ द ] । **च** पुनः, **दिगन्तरागतपथिकसततसंबाधासु** दिगन्तरेभ्यः–अन्यदिग्भ्यः, आगतानाम्, पथिकानां–मार्गगामिनाम्; सतता–अविच्छिन्ना, संबाधा–सम्मेलनं यासु तादृशीषु, **प्रतिश्रयकुटीषु** प्रतिश्रयस्य–सभायाः, कुटीषु–तृणपर्णमयगृहेषु, **अढौकत** पथिकजनसत्कारार्थं गच्छति स्म [ ध ] । **च** पुनः, **राजव्यापारकथाप्रक्रमे** राज्ञो यो व्यापारः–कार्यप्रणाली, तत्कथाप्रक्रमे–तत्सम्बन्धिकथाप्रारम्भे, **पौराणां** पुरवासिनाम्, **आशयपरीक्षार्थं** हार्दिकभावाभिव्यञ्जनार्थम्, **अवनिपतेः** स्वस्य, **अमात्यस्य** सचिवस्य, **तदधिकृतानां** तदधिकारवर्तिनां कर्मकराणां च, **यथासम्भवं** सम्भवानुसारेण, दोषान्, **परिकल्प्य** परि–समन्तात्, कल्पयित्वा, **उदकीर्तयत्** प्रच्छन्नरूपतया उद्–उच्चैः, अकीर्तयत्–कथयति स्म; **प्रशान्तनिखिलोपद्रवतया** प्रशान्तः–प्रकर्षेण शान्तः, निवृत्तः, निखिलः–सर्वः, उपद्रवः–बाधा येषां तस्य भावस्तत्ता तया, **सर्वदा** **सुखितैः** सुखमनुभवद्भिः, **तैश्च** पौरवासिभिश्च, **स्वामिसचिवाध्यक्षमिथ्यापरिवादश्रवणबद्धामर्षैः** स्वामिनः

सचिवलोकोऽपि श्रुतत्वाद् धर्मशास्त्राणामपेक्षितत्वादतीतपुरुषव्यवहाराणामकर्कशत्वादाशयस्य परिज्ञातत्वाच्च प्रभुचित्तवृत्तेः परिहरन् प्रजाखेदमखिलान्यपि राजकार्याणि चक्रे [ प ] । एवं च राज्ञः परित्यक्तसकलभुवनचिन्ताभारस्य निर्यत्नसमुपस्थितानन्तभोगलालितमूर्त्तेरतिमहासागरमध्यगतस्य सुखनिद्रापरवशात्मनस्तत्कालमनवेक्षितयापि लक्ष्म्या सुचिरप्ररूढप्रणयानुरोधादमुक्तसन्निधेर्देवस्य दानवारेरिवातर्कित एव भूयाञ्जगाम कालः [ फ ] । भूयसा च कालेन यत् किल लोके प्रसिद्धं विषयाणामपि प्रतिबद्धं पुण्यैरपि निष्पाद्यमिन्द्रियैरप्यास्वाद्यमैश्वर्येणापि भोग्यं महीभुजामपि योग्यमखिलमपि तत् प्रायेण जीवलोकसुखमनुबभूव, केवलमात्मजाङ्गपरिष्वङ्गनिर्वृतिं नाध्यगच्छत्, समग्राण्यपि हि कारणानि न प्राग्जन्मजनित-

---

**टिप्पनकम्**—अनन्तः–नागराजः, अनन्ताः–अपर्यन्ताः, अतिशयबृहत्समुद्रः, अन्यत्र रतिरेव महासागरः, सुखमेव निद्रा, अन्यत्र सुखहेतुर्निद्रा [ फ ] ।

---

सचिवस्य च, अध्यक्षं–साक्षादेव, न तु कर्णाकर्णिकया, यत् मिथ्यापरिवादस्य–अवास्तविकनिन्दायाः, श्रवणं तेन बद्धः–गृहीतः, अमर्षः–क्रोधो यैस्तादृशैः सद्भिः, **अप्रत्यभिज्ञानदोषेण** अप्रत्यभिज्ञानस्य–प्रच्छन्नरूपतया राजत्वेनापरिचयस्य, दोषेण **परुषाक्षरं** कठोराक्षरं यथा स्यात्तथा, **अधिक्षिप्यमाणः** भर्त्स्यमानः, **परां** प्रचुरम्, **मुदं** हर्षम्, **उवाह** प्राप, "अवर्णाऽऽक्षेप-निर्वाद-परिवादाऽपवादवत्" इति, "कोप-क्रोधाऽमर्ष रोष-प्रतिघा रुट्-क्रुधौ स्त्रियौ" इति चामरः [ न ] । **सचिवलोकोऽपि** मन्त्रिजनोऽपि, धर्मशास्त्राणां श्रुतत्वात्, **अतीतपुरुषव्यवहाराणाम्** अतीताः–भूतपूर्वाः, ये पुरुषाः–पितापितामहादयः, तेषां व्यवहाराणां–कार्यक्रमाणाम्, **अपेक्षितत्वात्** अनुसृतत्वात्, **आशयस्य** स्वचित्तस्य, **अकर्कशत्वात्** मृदुत्वात्, दयालुत्वादित्यर्थः, **प्रभुचित्तवृत्तेः** स्वामिमनोवृत्तेः, तदभिप्रायस्येत्यर्थः, **परिज्ञातत्वात्** समन्तात् परिचितत्वात्, **प्रजाखेदं** प्रजादुःखम्, **परिहरन्** परिवर्जयन्, **अखिलानि** सर्वाणि, राजकार्याणि, **चक्रे करोति स्म** [ प ] । **एवं च** अनेन प्रकारेण च, **परित्यक्तसकलभुवनचिन्ताभारस्य** परित्यक्तः–सचिवोपरिनिक्षिप्तः, सकलभुवनचिन्ताभारः–समस्तपृथ्वीशासनचिन्तारूपभारो येन तादृशस्य, **राज्ञः** प्रकृतनृपतेः, **दानवारेरिव** दनोरपत्यानि दानवा राक्षसाः, तेषामरिः–विष्णुः, तस्येव, **निर्यत्नसमुपस्थितानन्तभोगलालितमूर्तेः** निर्यत्नं–निरायासम्, समुपस्थिताः–सम्यगुपनताः, ये अनन्ताः–अनवधयः, भोगाः–सुखानुभवाः, तैर्लालिता–विलासिता, मूर्तिः–शरीरं यस्य तादृशस्य, पक्षे निर्यत्नसमुपस्थितः–वरिवस्यायै पातालतः स्वयमुपागतो यः, अनन्तः–शेषनागः, तस्य भोगैः–फणाभिः, लालिता–शाययित्वा विलासिता, मूर्तिर्यस्य तस्य, "शेषो नागाभिधोऽनन्तो द्विसहस्राक्ष आकुलः" "दर्वी भोगः कटः स्फुटः" इत्यभिधानचिन्तामणिः, **रतिमहासागरमध्यगतस्य** रतिः–सम्भोगशृङ्गारः, स एव महासागरः, तन्मध्यगतस्य–तन्मध्यमग्नस्य, पक्षे अतिमहासागरगतस्य कल्पान्तकाले एकार्णवीकृते जगति शेषनागमास्तीर्य विष्णोर्योगनिद्रया शयनस्य पौराणिकेतिवृत्तरूपत्वात्, **सुखनिद्रापरवशात्मनः** सुखमेव निद्रा बहिरिन्द्रियवृत्तिनिरोधकत्वात्, पक्षे सुखेन शीतपवनस्पर्शेन या निद्रा, तत्परवशः–तदधीनः, तन्मग्न इति यावत्, आत्मा यस्य तादृशस्य, **तत्कालं** सुखोपभोगकालम्, पक्षे महासागरशयनकालम्, **अनवेक्षितयापि** सम्भोगव्यासङ्गात्, निद्राव्यासङ्गात् अदृष्टयाऽपि, **लक्ष्म्या** राजलक्ष्म्या, पक्षे स्वभार्यया, **सुचिरप्ररूढप्रणयानुरोधात्** सुचिरेण–अतिदीर्घकालेन, प्ररूढः–प्रवृद्धो यः, प्रणयः–राशि, पक्षे विष्णौ च प्रीतिः, तदनुरोधात्; **अमुक्तसन्निधेः** अमुक्तः–अत्यक्तः, सन्निधिः–सामीप्यं यस्य तस्य, **देवस्य** राज्ञः, पक्षे अमरस्य **अतर्कित एव** अनुपलक्षित एव, **भूयान्** अतिदीर्घः, कालः, **जगाम** व्यतीतः [ फ ] । **भूयसा च** अतिदीर्घेण च, कालेन, **अखिलमपि** सर्वमपि, **तत्** तादृशम्, **जीवलोकसुखं** मर्त्यलोकसुखम्, **प्रायेण** बाहुल्येन, **अनुबभूव** उपबुभुजे, कीदृशम्? **किल** निश्चयेन, **यत्** यादृशं सुखम्, **लोके** जीवलोके, प्रसिद्धम्, यच्च **विषयाणामपि प्रतिबद्धं** विषयविशेषैरपि नियन्त्रितम्, **पुण्यैरपि** सत्कर्मभिरपि, **निष्पाद्यं** साध्यम्, **इन्द्रियैरपि** नेत्रादिभिरपि, **आस्वाद्यम्** अनुभावनीयम्, **ऐश्वर्याणामपि** प्रभुत्वैरपि, **भोग्यं** भोक्तुं योग्यम्, **महीभुजामपि** राज्ञामपि, **योग्यम्** उचितम्, **केवलं** किन्तु, **आत्मजाङ्गपरिष्वङ्गनिर्वृतिम्** आत्मजः–पुत्रः, तदङ्गपरिष्वङ्गेन–तदीयशरीरालिङ्गनेन, निर्वृतिं–सुखम्, **न अध्यगच्छत्** नान्वभवत्, **प्राग्जन्मजनितकर्मोदयक्षणनिरपे-**

कर्मोदयक्षणनिरपेक्षाणि फलमुपनयन्ति, यतोऽस्य नूतनेऽपि वयसि महत्यप्यन्तःपूरे बहुनापि कालेन नैकोऽप्युदपादि तनयः [ ब ]। क्रमादतिक्रामति च यौवने जरठतालिह्यमानवपुषस्तरोरिव त्रुटति कुसुमेषुरसे पल्लवस्येवाविर्भवति वैराग्ये विवेकबलपीडितासु मकरध्वजध्वजिनीष्विव वितीर्णधर्मद्वारासु निर्गच्छन्तीषु मनसः कामिनीसमागमवाञ्छास्वपत्यमुखदर्शनं प्रतिनिराशस्य, 'राजन्! अध्वरस्वाध्यायविधानादानृण्यं गतोऽसि नः, पितृणामपि गच्छ' इति याचितप्रसूतेरिव प्रादुर्भूतधर्मवासनया सन्निहितैर्देवर्षिभिः, 'वत्स! निवापदानैरिदानीमायुष्मता सम्भाविताः स्म प्रभूतकालम्, अग्रतस्तु का गतिरस्माकम्?' इति मुहुर्मुहुरुच्यमानस्येव स्वप्नेषु पितृभिः, 'तात! पूर्वपुरुषैरपि तावकैरियन्तं मार्गमानीताहम्, त्वयाप्यतिवृद्धाया मार्गदर्शको मे निरूपणीयः' इति प्रार्थितस्येव पश्चाल्लग्नयेक्ष्वाकुपार्थिवसन्तत्या, 'शठ! सर्वः कृतार्थीकृतस्त्वया, मम पुनराश्रयमात्रमपि

---

**टिप्पनकम्—कुसुमेषु** पुष्पेषु, **रसे** आर्द्रतायाम्, अन्यत्र **कुसुमेषुरसे** कामरागे, **वैराग्ये** रक्तत्वे विगतरागतायाम्। **श्रुतिधर्मेण** वेदधर्मेण [ भ ]।

---

**क्षाणि** प्राग्जन्मनि–पूर्वभवे, जनितानि–अनुष्ठितानि, यानि कर्माणि, तेषामुदयः–विपाकः, तस्य यत् क्षणं–समयः, तन्निरपेक्षाणि–तदपेक्षारहितानि, **समग्राण्यपि** समस्तान्यपि, कारणानि, हि निश्चयेन न फलम्, **उपनयन्ति** प्रापयन्ति, अपि तु तदपेक्षाण्येव, तदेवोदाहरति कविः–**यतः** यस्माद्धेतोः, **अस्य** प्रकृतनृपतेः, **नूतनेऽपि** नवीनेऽपि, तनयोद्भावनक्षमेऽपि, वयसि, **महत्यपि** विपुलेऽपि, **अन्तःपुरे** राज्ञीसमूहे, **बहुनाऽपि** दीर्घेणापि, कालेन, एकोऽपि, तनयः–पुत्रः, न **उदपादि** उत्पन्नः [ ब ]। **क्रमात्** कालक्रमेण, न तु रोगादिना, यौवने, **अतिक्रामति च** क्षीयमाणे सति तु, **जरठतालिह्यमानवपुषः** जरठतया–वार्धक्येन, लिह्यमानम्–आस्वाद्यमानम्, व्याप्यमानमिति यावत्, वपुः–शरीरं यस्य तादृशस्य, **अस्य** प्रकृतनृपतेः, चेतसि **मुर्मुर इव** अग्निविशेष इव, **मर्मदाही** हृदयदाहकः, पक्षे काष्ठसारांशदाहकः, **चिन्ताज्वरः** चिन्तारूपः सन्तापः, **प्रादुरभवत्** आविर्बभूव, कस्येव कस्मिन् कीदृशे सति कीदृशस्य? **तरोरिव** वृक्षस्येव, **कुसुमेषुरसे** कुसुमेषुः–कामदेवः, तद्रसे–तदावेशे, पक्षे **कुसुमेषु** पुष्पेषु, **रसे** निर्यासे, **त्रुटति** क्षयति सति, पुनः **पल्लवस्येव** नवपत्रस्येव, **वैराग्ये** विषयवैतृष्ण्ये, पक्षे विशिष्टरक्तवर्णे, **आविर्भवति** प्रकाशमाने सति, **मकरध्वजध्वजिनीष्विव** कामदेवसेनास्विवेत्युत्प्रेक्षा, **कामिनीसमागमवाञ्छासु** अङ्गनालिङ्गनलालसासु, **विवेकबलपीडितासु** विवेकः–विषयवासनायां दुःखजनकत्वबुद्धिः, तद्रूपबलेन, पीडितासु–पराहतासु, अत एव **वितीर्णधर्मद्वारासु** समर्पितस्वाक्रान्तधर्मरूपपरलोकद्वारासु, **मनसः** मनोरूपशिबिरात्, **निर्गच्छन्तीषु** पलायमानासु सतीषु, **अपत्यमुखदर्शनं प्रति** पुत्रमुखावलोकनविषये, **निराशस्य** आशाशून्यस्य। **राजन्!** मेघवाहननृपते!, **अध्वरस्वाध्यायविधानात्** अध्वराणां–यज्ञानाम्, स्वाध्यायस्य–वेदपारायणादितपसश्च, विधानात्–अनुष्ठानात्, **नः** अस्माकम्, **आनृण्यम्** ऋणशुद्धिम्, **गतोऽपि** प्राप्तोऽपि, **पितृणामपि** पिता पितामहादीनामपि, **आनृण्यं** पुत्रादिद्वारा श्राद्धतर्पणादिना, **गच्छ** प्राप्नुहि, **इति** इत्येवंरूपेण, **प्रादुर्भूतधर्मवासनया** प्रकटितधर्मवासनावशेन मनसा, सन्निकृष्टैः, **देवर्षिभिः** देवैर्ऋषिभिश्च, **याचितप्रसूतेरिव** प्रार्थितापत्यस्येवेत्युत्प्रेक्षा। **वत्स!** पुत्र!, **निवापदानैः** निवापाः–पित्रुद्देशेन पिण्डादित्यागाः, तद्रूपदानैः, **आयुष्मता** दीर्घायुषा त्वया, **प्रभूतकालं** दीर्घकालम्, **सम्भाविताः स्म** वयं सत्कृताः स्म, सन्तोषिताः स्म इति यावत्, **अग्रतस्तु** अग्रे तु, अस्माकम्, **का गतिः?** का स्थितिः स्यादिति, **स्वप्नेषु** स्वप्नदशासु, **पितृभिः** पितापितामहादिभिः, **उच्यमानस्येव** कथ्यमानस्येवेत्युत्प्रेक्षा, "पितृदानं निवापः स्यात्" इत्यमरः। **तात!** पितः!, **तावकैः** त्वद्वंशजैः, **पूर्वपुरुषैरपि** त्वत्पितापितामहादिभिरपि, **इयन्तम्** एतावन्तम्, **मार्गं** स्वानुसृतन्यायपद्धतिम्, **आनीता** आरोपिता अहमस्मि, **अतिवृद्धायाः** अतिप्राचीनाया मे, त्वयाऽपि, **मार्गदेशकः** न्यायमार्गारोहकः, **निरूपणीयः** निश्चेतव्यः, पुत्र उत्पादनीयो यो मे मार्गं दिशेदित्यर्थः, **इति** अनेन प्रकारेण, **पश्चाल्लग्नया** स्वपर्यन्ताविच्छिन्नधारया, **इक्ष्वाकुपार्थिवसन्तत्या** इक्ष्वाकुनृपापत्यपरम्परया, **प्रार्थितस्येव** कृतप्रार्थनस्येवेत्युत्प्रेक्षा। पुनः **लब्धप्रसरया** लब्धावसरया, **श्रिया** राजलक्ष्म्या, **शठ!** धूर्त!, त्वया सर्वः, **कृतार्थीकृतः** कृतः–निष्पादितः, अर्थः–प्रयोजनं यस्य स कृतार्थः, अकृतार्थः कृतार्थः कृत इति तथा, मम तु **आश्रय-**

न सूत्रितं भवता क्व भूत्वा भविष्यत्प्रतिपक्षप्रतापातपकरालिता कालमतिवाहयिष्यामि मन्दभाग्या' इति सोद्वेगमुपालब्धस्येव लब्धप्रसरया श्रिया, 'नाथ! कस्यचित् काचिदस्ति गतिः, अहमेव निर्गतिका, कुरु यत् साम्प्रतं मदुचितम्' इति सखेदया सन्तानार्थमभ्यर्थितस्येव भुजलग्नया भुवा, 'देव ! त्वद्वंश्येन गोप्त्रा विना कालान्तरे बलवदरातिहठविलुप्यमानाभिः शरणाय कः समाश्रयणीयोऽस्माभिः' इति विज्ञापितस्येव चित्तस्थिताभिः प्रजाभिः, 'सखे! किं मया तव समीहितसिद्ध्यनुपयुक्तशक्तिना वृथैव स्थितेन, अनुजानीहि माम्' इत्यापृष्टस्येव श्लथीकृतोपगूहनं प्रयाता यौवनेन, 'विद्वन् ! किमपरैस्त्रातैः, आत्मानं त्रायस्व पुंनाम्नो नरकात्' इति सोत्प्रासं शासितस्येव गुरुकृतेन श्रुतिधर्मेण, मर्मदाही मुर्मुर इव प्रादुरभवदस्य चेतसि चिन्ताज्वरः [ भ ] । येन प्रतिदिवसमासादितोद्दामप्रौढिना निदाघतपन इव निजतेजसा ताप्यमानो गुणानुरक्तयापि राजलक्ष्म्या दुर्भगाङ्गनयेव नारमत, मूलेऽतिमधुरेष्वपि विषयोपभोगसुखेषु काशस्तम्बेष्विव तृणबुद्धिं बबन्ध,

---

**टिप्पनकम्—मूले** आदौ जटायां च । शरवणं कुमारस्य—स्कन्दस्य, उत्पत्तिकारणम्, अन्यत्र कुमारस्य—पुत्रस्य, पुष्पं-कुसुममार्तवं च । **सुतविभक्तभूभागान्** पुत्रविभागस्थापितधराप्रदेशान्, अन्यत्र सुता इव वयः—पक्षिणः, तैः सेवितधराप्रदेशान् । वंशः—अन्वयो वेणुश्च [ म ] ।

---

**मात्रमपि** केवल आश्रयोऽपि, **न सूत्रितं** न निष्पादितम्, **भवता** त्वया, **क्व भूत्वा** कुत्र स्थित्वा, कमाश्रित्येत्यर्थः, **भविष्यत्प्रतिपक्षप्रतापातपकरालिता** भविष्यतां—भाविनाम्, प्रतिपक्षाणां—विपक्षाणां नृपाणाम्, प्रतापातपेन—प्रतापरूपसूर्यकिरणेन, करालिता—ज्वालिता सती, अहं **मन्दभाग्या** भाग्यहीना, **कालं** समयम्, **अतिवाहयिष्यामि** अतिक्रमिष्यामि, **इति** अनेन प्रकारेण, **सोद्वेगं** ससम्भ्रमं यथा स्यात्तथा, **उपालब्धस्येव** कृतोपालम्भस्येवेत्युत्प्रेक्षा । पुनः **भुजलग्नया** स्वबाहुश्रितया, **सखेदया** खेदसहितया, **भुवा** पृथिव्या, **नाथ !** स्वामिन् !, **कस्यचित्** अन्यस्य कस्यापि, **काचित्** अन्या कापि, **गतिः** निर्वाहोपायः, अस्ति, अहमेव, **निर्गतिका** निर्वाहोपायशून्या अस्मि, **साम्प्रतम्** इदानीम्, **यद् मदुचितं** यद् मम योग्यं पुत्रोत्पादनम्, तत् कुरु, **इति** अनेन प्रकारेण, **सन्तानार्थं** सन्तानहेतोः, **अभ्यर्थितस्येव** प्रार्थितस्येवेत्युत्प्रेक्षा । पुनः **चित्तस्थिताभिः** भावनया मनोनिविष्टाभिः, प्रजाभिः, **देव !** राजन् ! **त्वद्वंश्येन** भवद्वंशजेन, **गोप्त्रा** रक्षकेण, विना, **कालान्तरे** भवदभावकाले, **बलवदरातिहठविलुप्यमानाभिः** बलवद्भिः, अरातिभिः—शत्रुभिः, हठेन—बलात्कारेण, विलुप्यमानाभिः—विपाद्यमानाभिः, अस्माभिः, **शरणाय** रक्षणाय, कः **समाश्रयणीयः** ? सम्यगाश्रयणीयः ? स्यादिति विज्ञापितस्येव । पुनः **श्लथीकृतोपगूहनं** शिथिलीकृतालिङ्गनं यथा स्यात्तथा, **प्रयाता** तदीयशरीरान्निर्गच्छता, **यौवनेन** यौवनावस्थया, **सखे !** सहवासबद्धसख्य !, **समीहितसिद्ध्यनुपयुक्तशक्तिना** समीहितस्य—अभिलषितस्य सन्तानस्य, सिद्धौ—निष्पत्तौ, अनुपयुक्ता—अक्षमा, शक्तिः—सामर्थ्यं यस्य तादृशेन, अतो वृथैव स्थितेन मया तव **किम्** न किमपीत्यर्थः, अतो माम्, **अनुजानीहि** प्रयातुमनुमन्यस्व, **इति** अनेन प्रकारेण, **आपृष्टस्येव** गृहीतानुमतिकस्येवेत्युत्प्रेक्षा। पुनः **गुरुकृतेन** गुरूपदिष्टेन, **श्रुतिधर्मेण** "पुन्नाम्नो नरकाद् यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति ख्यातः" इति वैदिकधर्मेण, विद्वन् ! **अपरैः** अन्यैः, **त्रातैः** रक्षितैः सद्भिः, **किम्** न किमपि, **पुन्नाम्नः** पुदिति नाम यस्य तस्मात्, नरकात्, **त्रायस्व** रक्ष, **इति** अनेन प्रकारेण, **सोत्प्रासं** सोपहासम्, **शासितस्येव** कृतानुशासनस्येव [ भ ] । **येन** चिन्ताज्वरेण, प्रतिदिवसम्, **आसादितोद्दामप्रौढिना** आसादिता—प्राप्ता, उद्दामप्रौढिः—निरतिशयतीव्रता येन तादृशेन, निजतेजसा, **निदाघतपन इव** ग्रीष्मसूर्य इव, **ताप्यमानः** तापमवाप्यमानः सन्, **गुणानुरक्तयाऽपि** सन्धिविग्रहादितद्गुणलुब्धयाऽपि, पक्षे शान्त्यादिगुणानुरागिण्यापि, **राजलक्ष्म्या** राज्यसम्पदा, **दुर्भगाङ्गनयेव** कुरूपस्त्रियेव, **न अरमत** न रमते स्म । **मूले** आदौ, **काशस्तम्बेष्विव** काशः—तृणविशेषः, तत्काण्डेष्विव, पक्षे मूलप्रदेशे, **अतिमधुरेष्वपि** अतिप्रियेष्वपि, **विषयोपभोगसुखेषु** कामिन्यादिसम्भोगसुखेषु, **तृणबुद्धिं** तृणवदसारत्वबुद्धिम्, पक्षे तृणत्वबुद्धिम्, **बबन्ध**

कुमारोत्पत्तिकारणभावं प्रतिपद्यमानमप्यन्तःपुरमफलपुष्पतया शरवणमजीगणत्, सुतविभक्तभूभागान्न केवलमतिक्रान्तपार्थिवान् गिरीनपि बह्वमन्यत, दृष्टवंशवृद्धिषु न नाम स्वबान्धवकुलेषु धर्मारण्येष्वपि दृष्टिं ददौ, अपत्यपरिवारनिर्वृतेभ्यो न परं पौरेभ्यः पशुभ्योऽपि स्पृहयाञ्चकार [ म ], तस्य च राज्ञः सकलभुवनाभिनन्दितोदया द्वितीयाशशिकलेव द्वितीया [ य ], नाभिचक्रादपि गम्भीरेण कुचमण्डलादप्युन्नतेन जघनस्थलादपि विशालेन भुजलतायुगलादपि सरलेन कपोललावण्यादपि स्वच्छेन मदनविलासकलहंसमानसेनेव महतामाहितप्रमोदा मानसेन [ र ], निधानेन गुणानां प्रधानेन सर्वालङ्काराणामतिदुरापेनेतरप्रमदाभिः

---

**टिप्पनकम्—द्वितीया** भार्या द्वितीया–तिथिश्च [ य ]। हृद्–हृदयं चित्तं च [ ल ]।

---

द्रढयामास । पुनः स राजा **कुमारोत्पत्तिकारणभावं** कुमारस्य–पुत्रस्य, उत्पत्तिकारणभावम्–उत्पत्तिकारणताम्, **प्रतिपद्यमानमपि** प्राप्नुवदपि, कुमारोत्पत्तिं प्रत्यन्तःपुरस्य कारणत्वेऽपीत्यर्थः, शरवणं तु कुमारस्य–स्कन्दस्य, उत्पत्तिकारणतां प्रापत्, तत्रैव तस्योत्पत्तेः पुराणप्रसिद्धत्वात्, **अन्तःपुरं** राज्ञीसमाजम्, **अफलपुष्पतया** अफलं–पुत्ररूपफलरहितम्, पुष्पं–रजो यस्य, पक्षे अविद्यमाने फल-पुष्पे यस्मिन्, तस्य भावस्तत्ता तया, तद्रूपसाधारणधर्मेण, **शरवणं** शराणां–तृणविशेषाणाम्, वनम्, तद्रूपेणेत्यर्थः, **अजीगणत्** गणयति स्म । पुनः स राजा **सुतविभक्तभूभागान्** सुतेभ्यः–पुत्रेभ्यः, विभक्ताः–विभज्य दत्ताः, भूभागाः–पृथिवीखण्डा यैस्तादृशान्, केवलम्, **अतिक्रान्तपार्थिवान्** प्राचीननृपतीन् न, अपि तु **सुतविभक्तभूभागान्** सुतानां–पार्थिवानाम्, विभक्ताः–विभागपूर्वकं निर्णीताः, भूभागा येभ्यस्तादृशान्, भूभागविभागावधिभूतानित्यर्थः, "सुतः पुत्र-महीभुजोः" इति शाश्वतः, यद्वा सुता इव वात्सल्यास्पदतां गता ये, वयः–पक्षिणः, तैर्भक्ताः–श्रिताः, भूभागा येषां तादृशान् गिरीनपि, **बहु** सुष्ठु यथा स्यात्तथा, **अमन्यत** मन्यते स्म, भाग्यशालित्वेनावगच्छति स्मेत्यर्थः । किञ्च **दृष्टवंशवृद्धिषु** दृष्टा वंशस्य-पुत्रपौत्राद्यपत्यवर्गस्य वृद्धिर्येषु तादृशेषु, **नाम** केवलं, **स्वबान्धवकुलेषु** स्वबन्धुजनकुलेषु न, अपि तु **दृष्टवंशवृद्धिषु** दृष्टा वंशानां वेणूनां वृद्धिर्येषु तादृशेषु, **धर्मारण्येष्वपि** तपोवनेष्वपि, दृष्टिं **ददौ** श्लाघ्यत्वेन पश्यति स्म, "अन्वयो जननं वंशः," "वंशो वेणुर्यवफलस्त्वचिसारस्तृणध्वजः" इति चाभिधानचिन्तामणिः । **अपत्यपरिवारनिर्वृतेभ्यः** अपत्यानां–पुत्रादीनाम्, परिवारेण समूहेन, निर्वृते तेभ्यः–सुखिभ्यः, **केवलं पौरेभ्यः** स्वपुरवासिभ्यो न, अपि तु तादृशेभ्यः **पशुभ्योऽपि** गोमहिषाजवराहादिभ्यः, **स्पृहयाञ्चकार** श्लाघनीयतया स्पृहयति स्म । अत्र सर्वत्र तुल्ययोगितालङ्कारः [म]। **तस्य च** प्रकृतस्य पुनः, **राज्ञः** मेघवाहननृपतेः, **द्वितीया** भार्या, "द्वितीया कथ्यते जाया" इति शाश्वतः, **मदिरावती** मदिरावतीनाम्नी, **नाम** वाक्यालङ्कारे, **देवी** कृताभिषेका राज्ञी, "देवी कृताभिषेकायाम्" इति हैमः, **अभूत्** समपद्यत, सा कीदृशी ? **द्वितीयाशशिकलेव** द्वितीयायास्तिथेः, शशिनः–चन्द्रस्य, कलेव–खण्ड इव, **सकलभुवनाभिनन्दितोदया** सकलभुवनेन–सम्पूर्णभुवनेन, अभिनन्दितः–श्लाघितः, उदयः–उन्नतिः, पक्षे प्रकाशो यस्यास्तादृशी [ य ]। पुनः **मानसेन** मनसा, **महतां** महापुरुषाणाम्, **आहितप्रमोदा** आहितः–जनितः, प्रमोदः–आनन्दो यया तादृशी, कीदृशेन मानसेन ? **नाभिचक्रादपि** तस्या नाभिरेव चक्राकारकत्वाच्चक्रम्, तस्मादपि–तदपेक्षयाऽपि, **गम्भीरेण** अतिगम्भीरेणेति यावत्, पराप्रवेश्येनेत्यर्थः, पुनः **कुचमण्डलादपि** तदीयस्तनमण्डलापेक्षयाऽपि, **उन्नतेन** परमोत्साहसम्पन्नेनेत्यर्थः, पुनः **जघनस्थलादपि** तदीयकटिपुरोभागादपि, **विशालेन** अतिविशालेन, शक्तिसाहससम्पन्नेनेत्यर्थः, **भुजलतायुगलादपि** भुजौ लते इव दीर्घत्वादिति भुजलते, तयोर्युगलादपि–द्वन्द्वादपि, **सरलेन** अकुटिलेन, कपटरहितेनेत्यर्थः, **कपोललावण्यादपि** कपोलयोः–गण्डस्थलयोः यद् लावण्यं–कान्तिः, तदपेक्षयाऽपि, **स्वच्छेन** निर्मलेन, पुनः **मदनविलासकलहंसमानसेनेव** मदनः–कामदेवः, तद्विलासा एव कलहंसाः–"कादम्बास्तु कलहंसाः पक्षैः स्युरतिधूसरैः" इत्युक्तलक्षणहंसविशेषाः, तत्सम्बन्धिना मानससरोवरेणेवेत्युत्प्रेक्षा, कामदेवविलासकमनीयस्थानेनेत्यर्थः, [ र ]। पुनः कीदृशी ? **शीलेन** स्वभावेन सद्वृत्तेन वा "शीलं स्वभावे सद्वृत्ते न" इति शाश्वतः, **अलङ्कृता** विभूषिता, कीदृशेन ? **गुणानां** दयादाक्षिण्यादीनां गुणरत्नानाम्, **निधानेन** निधिभूतेन, **सर्वालङ्काराणां** समस्तभूषणानाम्, **प्रधानेन** "शीलं परं भूषणम्" इत्यभियुक्तोक्त्या मुख्येन, **इतरप्रमदाभिः** अन्यनारीभिः, **अतिदुरापेण** अतिदुर्लभेन, **सर्वदा** सदैव, **हृदिस्थेन** चित्तस्थेन,

सर्वदा हृदिस्थेन हारेणेवापरेण परमशुद्धिशालिना शीलेनालङ्कृता [ ल ], शीलसहचारिणा रूपेण विनयवता यौवनेन सौभाग्यसङ्गिना लावण्येन मौनकलितेन कलाकौशलेन प्रशमभाजा प्रभुत्वेन निपुणसेवकैरिव गृहीतनिजनिजालङ्कारैर्गुणैः सततमुपासिता [ व ], भाग्यसंपत्तिरिव सौभाग्यस्य, पुण्यपरिणतिरिव लावण्यस्य, संकल्पसिद्धिरिव संकल्पयोनेः, सर्वकामावाप्तिरिव कमनीयतायाः, निःस्यन्दधारेव शृङ्गारसुधाभृङ्गारस्य [श], रङ्गशाला रागशैलूषस्य, ज्येष्ठवर्णिका रूपजातरूपस्य, अम्भोजिनी विभ्रमभ्रमराणाम्, शरत्कालागतिः केलिकलहंसीनाम्, वशीकरणविद्या मदनमहावातिकस्य, रससिद्धिर्वैदग्ध्यधातुवादिकस्य [ ष ], परां कोटिमारूढा स्वामिभावस्य सर्वदासत्त्वे स्थिता, असत्यमुक्ता स्वप्नेऽप्यजातस्वैरिणीसङ्गा, निरपत्या सततमुत्सङ्गेन

---

**टिप्पनकम्**—शैलूषस्य—नटस्य, महावातिकः—मन्त्रवादी, धातुवादिकः—रसवादी [ ष ]। सर्वदासत्त्वे कृतावस्थाना, अनृतरहिता च, **निरपत्या** या अपत्यरहिता सा कथं लालितापत्या? अन्यत्र **लालिता** पालिता, केन? **पत्या** भर्त्रा [स]।

---

पक्षे हृदयाश्रितेन, अत एव **अपरेण** द्वितीयेन, **हारेणेव** हाररूपेणेवेत्युत्प्रेक्षा, **परं शुद्धिशालिना** परम्—अत्यन्तं यथा स्यात्तथा, शुद्ध्या-पाखण्डादिराहित्येन, शालते—शोभते, यत्तादृशेन [ ल ]। पुनः कीदृशी? **शीलसहचारिणा** निरुक्तशीलानुसारिणा, **रूपेण** आकृत्या, **विनयवता** औद्धत्यशून्येन, **यौवनेन** यौवनवयसा, **सौभाग्यसङ्गिना** पतिप्रीत्यास्पदेन, **लावण्येन** सौन्दर्येण, **मौनकलितेन** मुनेर्भावो मौनम्, अप्रतिपादनम्, स्वकर्तृकप्रशंसनाभाव इति यावत्, तत्कलितेन—तदन्वितेन, **कलाकौशलेन** कलासु—शिल्पकर्मसु, नैपुण्येन **प्रशमभाजा** प्रशान्तिशोभितेन, **प्रभुत्वेन** ऐश्वर्येण, एतावद्भिः, **निपुणसेवकैरिव** निपुणैः—चतुरैः, सेवकैः—भृत्यैरिव, **गृहीतनिजनिजालङ्कारैः** गृहीतः—धृतः, निजनिजालङ्कारः—शीलादिरूपस्वस्वोत्कर्षकगुणान्तरं पक्षे केयूराङ्गुलीयकादिभूषणं यैस्तादृशैः, **गुणैः** अनुपदोक्तरूपयौवन-लावण्य-कलाकौशल-प्रभुत्वरूपैः, **सततं** सर्वदा **उपासिता** सेविता। अत्रापि तुल्ययोगितैवालङ्कारः [ व ]। पुनः कीदृशी? **सौभाग्यस्य** सौन्दर्यस्य शोभनैश्वर्यस्य वा, **भाग्यसम्पत्तिरिव** भाग्यसमृद्धिरिवेत्युत्प्रेक्षा, समृद्धभाग्ययोगेनैव सौभाग्येनाश्रयतया तस्या लाभात्। पुनः **लावण्यस्य** कान्तेः, **पुण्यपरिणतिरिव** पुण्यफलमिव, पुण्यबलेनैव लावण्येन तादृशाधारलाभात्। पुनः **संकल्पयोनेः** संकल्पः—इच्छा, योनिः—उत्पत्तिकारणं यस्य तस्य, कामदेवस्येत्यर्थः, **संकल्पसिद्धिरिव** इच्छापूर्तिरिव। पुनः **कमनीयतायाः** स्पृहणीयतायाः, **सर्वकामावाप्तिरिव** सर्वाभीष्टसिद्धिरिवेत्युत्प्रेक्षा, तदाश्रयलाभेनैव तत्सकलेष्टनिष्पत्तेः। पुनः **शृङ्गारसुधाभृङ्गारस्य** शृङ्गाररस एव सुधा तस्या भृङ्गारः—सुवर्णमयजलपात्रम्, तस्य-तत्सम्बन्धिनी, **निःस्यन्दधारेव** प्रस्रवणधारेवेत्युत्प्रेक्षा "भृङ्गारः कनकालुका" इत्यमरः [ श ]। पुनः **रागशैलूषस्य** स्नेहरूपनर्तकस्य, **रङ्गशाला** नाट्यशालारूपा। पुनः **रूपजातरूपस्य** स्वरूपात्मकसुवर्णस्य, तन्मयीत्यर्थः, **ज्येष्ठवर्णिका** श्रेष्ठलेखनी। पुनः **विभ्रमभ्रमराणां** विलासरूपभ्रमराणाम्, **अम्भोजिनी** कमलिनीरूपा, तदाधारत्वात्। पुनः **केलिकलहंसीनां** क्रीडारूपहंसीविशेषाणाम्, **शरत्काला** शरत्कालिकी, मनोहरेत्यर्थः, **गतिः** गमनरूपा, **शरत्कालागतिः** शरत्कालस्य आगमनरूपा वा। पुनः **मदनमहावार्तिकस्य** कामदेवरूपगरुडोक्तमहावार्तिकरूपागमसम्बन्धिनी, तत्प्रतिपादितेत्यर्थः, **'मदनमहावातिकस्य'** इति पाठे महावातिको मन्त्रवादीति बोध्यम्। **वशीकरणविद्या** सर्ववशीकारिणी शक्तिः। पुनः **वैदग्ध्यधातुवादिकस्य** वैदग्ध्यं—विज्ञत्वमेव, धातुः—शारीरिकरसः तद्वादिकस्य—तद्वादिनः, रसवादिनो जनस्येत्यर्थः, **रससिद्धिरिव** रसनिष्पत्तिरिवेत्युत्प्रेक्षा [ ष ]। पुनः कीदृशी? **स्वामिभावस्य** स्वामित्वस्य, **परां** निरतिशयाम्, **कोटिम्** उत्कर्षम्, **आरूढा** प्राप्ता, सर्वस्वामित्वात्। "कोटिः स्त्री धनुषोऽग्रेऽश्री संख्याभेद-प्रकर्षयोः" इति मेदिनी, तथापि **सर्वदासत्वे** सर्वेषां भृत्यभावे, **स्थिते**ति विरोधः—तदुद्धारे तु सर्वदा **सत्त्वे** साधुभावे, सत्त्वगुणे वा पराक्रमे वा स्थितेत्यर्थः। पुनः **असत्यमुक्ता** असतीभिः—दुराचारिणीभिः, अमुक्ता—सहिताऽपि, **स्वप्नेऽपि** स्वप्नावस्थायामपि, **अजातस्वैरिणीसङ्गा** अजातः—अभूतः, स्वैरिणीभिः—स्वेच्छाचारिणीभिः, दुराचारिणीभिरिति यावत्, सङ्गः—संसर्गो यस्यास्तादृशीति विरोधः, तदुद्धारे असत्येन—अलीकेन, मुक्ता—वर्जिता। पुनः **निरपत्या** सन्तानशून्याऽपि, सततम्, **उत्सङ्गेन** क्रोडेन, **लालितापत्या** उपलालितसन्तानेति

लालितापत्या [ स ], समस्तान्तःपुरशिरोरत्नभूता मदिरावती नाम देव्यभवत् [ ह ], यस्याश्च पुरतो विशुद्धाचारायाः सुरापगेति लोके लब्धसम्भावना पावनतया न परभागं प्राप गङ्गा, प्रीतिप्रतिपक्षभूता सकललोकम्पृणदर्शनायास्तृणगणनायां रतिः, अधिकमलमात्मानं धारयन्ती शुचितया न कापि सरस्वती, मकरध्वजविनाशहेतुः सौभाग्यभङ्गिविचारे रेणुरचलकन्या, धनविसरकृतार्थीकृतप्रणयिसार्थाया गत्यभावेन गृहीतरत्नाकरवेला कलयापि न समाना मेदिनी, पर्यन्तज्वलितरत्नदीपमहार्हतल्पशायिन्या निशि तमसि पट्टमधिशयाना न लेशेनापि सदृशविभवा बभूव राज्यलक्ष्मीः [ क्ष ]।

---

**टिप्पनकम्—सुरापगेति** मद्यनदीति, यद्वा मद्यपगामिनीति, **परभागं** शोभाम् । **प्रीतिप्रतिपक्षभूता** प्रीतिशत्रुभूता । **अधिकमलं** बहुतरदोषम्, अन्यत्र पद्माश्रित्य [ पद्ममाश्रित्य ] । **रेणुः** धूलिः, अन्यत्र गौरी । **गत्यभावेन** निर्वाहाभावेन गमनाभावेन, वेला—अङ्गुलिखण्डनं समुद्रपर्यन्तभूमिश्च । **निशि तमसि** रात्रावन्धकारे, **पट्टं** फलकम्, अन्यत्र **निशितं** तीक्ष्णम्, **असिपट्टं** खड्गलताम् [ क्ष ] ।

---

विरोधः, तदुद्धारे तु **पत्या** भर्त्रा, उत्सङ्गेन लालितेति व्याख्येयम् [ स ] । पुनः **समस्तान्तःपुरशिरोरत्नभूता** सम्पूर्णराज्ञीमण्डलमौलिमणिः [ ह ] । **च** पुनः, **विशुद्धाचारायाः** पवित्रचरित्रायाः, **यस्याः** मदिरावत्या राज्ञ्याः, **पुरतः** अग्रे, **गङ्गा** तन्नाम्नी स्वर्णदी, **पावनतया** पवित्रताप्रयुक्तम्, **परभागं** गुणोत्कर्षम्, **न प्राप** प्राप्तवती, "परभागो गुणोत्कर्षः प्राग्भारोऽतिशयो भरः" इति वैजयन्ती, कुतः ? यतः सा **सुरापगा** सुरां मदिरां पिबन्तीति सुरापाः, तान् गच्छति—अनुगच्छतीति तथा, मद्यपानुगामिनीत्यर्थः, यद्वा सुरायाः—मदिरायाः, आपगा—नदीति सुरापगा, **इति** एवंस्वरूपेण, **लोके** जनतायाम्, **लब्धसम्भावना** सम्भाविता, वस्तुगत्या तु सुराणां—देवानाम्, अपां समूहः—आपः, समुद्रः, तं गच्छतीति आपगा नदीति सुरापगा, देवनदीत्यर्थः, **इति** एवंरूपेण, लोके **लब्धसम्भावना** प्राप्तप्रतिष्ठेति बोध्यम्, "स्रवन्ती निम्नगाऽऽपगा" इत्यमरः । पुनः **सकललोकम्पृणदर्शनायाः** सकलान् लोकान् पृणाति सुखयतीति सकललोकम्पृणम्, तादृशं दर्शनं यस्यास्तादृश्याः, यस्या मदिरावत्याः पुरतः, **प्रीतिप्रतिपक्षभूता** प्रीतेः—प्रेम्णः, प्रतिपक्षभूता—शत्रुभूता, प्रेमविघातिनीति यावत्, **रतिः** कामदेवपत्नी, **तृणगणनायां** तृणसंख्यायाम्, तृणमिव तुच्छेत्यर्थः, वस्तुगत्या तु **प्रीतिप्रतिपक्षभूता** प्रीतिः—कामदेवभार्या, तस्याः प्रतिपक्षभूता—सपत्नीरूपेत्यर्थो बोध्यः । "प्रीतिर्योगान्तरे प्रेम्णि स्मरपत्नी-मुदोः स्त्रियाम्" इति मेदिनी । पुनः **अधिकमलम्** अधिको मलो यस्मिंस्तादृशम्, लज्जयाऽतिमलिनमित्यर्थः, **आत्मानं** "कलेवरे प्रयत्ने च स्वभावे परमात्मनि । स्वान्ते धृतौ मनीषायामात्मानं कवयो विदुः" । इति शाश्वतोक्तस्वरूपम्, धारयन्ती, **सरस्वती** तन्नाम्नी वागधिष्ठात्री देवी, यस्या मदिरावत्याः पुरतः, **न काऽपि** गणनानर्हा, तुच्छेत्यर्थः, वस्तुगत्या तु **अधिकमलम्** कमले, **आत्मानं धारयन्ती** निवसन्तीत्यर्थः । पुनः **सौभाग्यभङ्गिविचारे** सौन्दर्यविच्छित्तिविचारे सौन्दर्योत्कर्षविचारे वा, "भङ्गिस्तु व्याकृतिः खेदो निर्वेदो घटना घटा" इति वैजयन्ती, **अचलकन्या** पार्वती, यस्या मदिरावत्याः पुरतः, **रेणुः** धूलिः, तद्वत्तुच्छेत्यर्थः, कुतः ? यतः सा **मकरध्वजविनाशहेतुः** मकरध्वजस्य—सौभाग्यसम्राजः कामदेवस्य, विनाशे—भस्मसाद्भवने, हेतुः । तपस्यतोऽपि शिवस्य हृदि पार्वतीपरिणयार्थं कामविकारमुद्भावयन् कामदेवः सपदि शिवेन स्वतृतीयनेत्राग्निना भस्मसादभावीति पौराणिकमितिवृत्तमत्रानुसन्धेयम् । पुनः **धनविसरकृतार्थीकृतप्रणयिसार्थायाः** धनविसरेण—धनसमूहेन, विपुलधनेनेत्यर्थः, कृतार्थीकृतः—सन्तोषितः, प्रणयिसार्थः—स्नेहिवर्गो यया तादृश्याः, यस्याः मदिरावत्याः पुरतः, **गत्यभावेन** स्वनिर्वाहाभावेन, अन्यत्र गमनाभावेन वा, **गृहीतरत्नाकरवेला** गृहीतः—स्वीकृतः, रत्नाकरे—रत्नखनौ, वेला-कालो यया तादृशी, रत्नयाचनाय रत्नखनिं गतवतीत्यर्थः, **मेदिनी** पृथ्वी, **कलया** लेशेनापि, **न समाना** न तत्तुलनार्हा, वस्तुगत्या तु गृहीतः—प्राप्तः, रत्नाकरवेला-समुद्रतटः स्वसीमारूपेण ययेत्यर्थः । पुनः **पर्यन्तज्वलितरत्नदीपमहार्हतल्पशायिन्याः** पर्यन्ते—पार्श्वे, ज्वलितः—दीप्तः, रत्नदीपः—पर्यङ्कस्तम्भभूतरत्नरूपो दीपो यस्य तादृशे, यद्वा पर्यन्ते ज्वलन्तो रत्नदीपा रत्ननिर्मिता दीपा यत्र तादृशे महार्हतल्पे—बहुमूल्यकरत्नमयपर्यङ्करूपशय्यायाम्, शयितुं शीलं यस्यास्तादृश्याः, यस्या मदिरावत्याः पुरतः, **निशि** रात्रौ, **तमसि** अन्धकारे, **पट्टं**

आढ्यश्रोणि दरिद्रमध्यसरणि स्रस्तांसमुक्षस्तनं
नीरन्ध्रालकमच्छगण्डफलकं छेकभ्रु मुग्धेक्षणम् ।
शालीनस्मितमस्मिताञ्चितपदन्यासं बिभर्ति स्म या
स्वादिष्ठोक्तिनिषेकमेकविलसल्लावण्यपुण्यं वपुः ॥ [ झ ] ॥

एकदा च राजा याममात्रे वासरे समुच्छ्रितानेकभूमिकस्य गगनयात्रायासिताभिः सिद्धाध्वगवधूभिर्विश्रान्तये सततमध्यासितशिखरविटङ्कवेदिकस्य भद्रशालनाम्नो महाप्रासादस्य पृष्ठे समुपविष्टः. समीपदेशो-

**टिप्पनकम्—शालीनस्मितं** सलज्जेषद्धासम्, यत् तत् कथम् **अस्मिताञ्चितपदन्यासं** अनीषद्धासप्रशस्यक्रमनिक्षेपम्? अन्यत्र असीत्येतस्य भावोऽस्मिता–अहङ्कारः, तेनाञ्चितपदम्, स्वादिष्ठा–मधुरतमा [ झ ] ।

काष्ठफलकम्, अधिशयाना राजलक्ष्मीः, लेशेनापि, **सदृशविभवा** समानधना, न बभूव, धनसाम्ये सुखसाधनसाम्यस्यापि सम्भवात्, वस्तुगत्या तु **निशितं** तीक्ष्णम्, **असिपट्टं** खड्गाधिष्ठितकाष्ठयष्टिमित्यर्थः, "पट्टः पेषणपाषाणे व्रणादीनां च बन्धने । चतुष्पथे च राजादिशासनान्तर-पीठयोः" इति मेदिनी । इत्थं चेदृशवाक्येषु श्लेषानुप्राणितव्यतिरेकालङ्कारो बोध्यः । [ झ ] ।
पुनः **या** मदिरावती, **एकविकसल्लावण्यपुण्यं** एकम्–अद्वितीयम्, अनुपममिति यावत्, विकसत्–परिस्फुरत्, यल्लावण्यं–सौन्दर्यम्, तेन पुण्यं–पवित्रम्, **वपुः** शरीरम्, **बिभर्ति स्म** धारयति स्म । कीदृशम्? **आढ्यश्रोणिः** आढ्या–परिपूर्णा, विस्तृतेत्यर्थः, श्रोणिः–कटिः, तदुपलक्षितनितम्बभागो यस्मिंस्तादृशम्, "कटिः श्रोणिः ककुद्मती" इत्यमरः । पुनः **दरिद्रमध्यसरणि** दरिद्रा–कृशा, मध्यसरणिः-मध्यभागः, कटिभाग इत्यर्थः, यस्मिंस्तादृशम्, "सरणिः श्रेणि-वर्त्मनोः" इति रभसः । पुनः **स्रस्तांसं** स्रस्तौ–अवनतौ, अंसौ स्कन्धौ यस्मिंस्तादृशम् । पुनः **नीरन्ध्रालकं** नीरन्ध्राः–अविरलाः, निरन्तरा इति यावत्, अलकाः–केशा यस्मिंस्तादृशम् । पुनः **अच्छगण्डफलकम्** अच्छे-निर्मले, गण्डफलके–पट्टाकारे गण्डस्थले यस्मिंस्तादृशम् । पुनः **छेकभ्रु** छेके–मनोहरे, कुटिलश्यामले इत्यर्थः, भ्रुवौ यस्मिंस्तादृशम्, "छेकास्त्रिषु विदग्धेषु" इति रभसः । पुनः **मुग्धेक्षणं** मुग्धे–रम्ये, ईक्षणे–नेत्रे, मुग्धं-रम्यम्, ईक्षणम्–अवलोकनं वा यत्र तादृशम् । पुनः **शालीनस्मितं** शालीनं–सलज्जम्, स्मितम्–ईषद्धासो यस्मिंस्तादृशम्, पुनः **अस्मिताञ्चितपदन्यासम्** ईषद्धासरहितपदविक्षेपमिति पूर्वविशेषणेन विरोधः, तदुद्धारे तु अस्मिता–अहङ्कारः, तेन अञ्चितः–युक्तः, पदन्यासः–पादविक्षेपो यस्य, यद्वा अस्मितः–उपहासानास्पदम्, अञ्चितः–मनोहरश्च पदन्यासो यस्य, यद्वा स्मितेन–अन्यकृतोपहासेन, अञ्चितः–युक्त इति स्मिताञ्चितः, न स्मिताञ्चित इत्यस्मिताञ्चितः पदन्यासो यस्य तादृशम् । पुनः **स्वादिष्ठोक्तिनिषेकं** स्वादिष्ठाः–अतिशयेन स्वादवः, अतिमधुरा इति यावत्, या उक्तयः, तासां निषेकम्–आसेचनभूतम् [ झ ] ।

**परागाभिधा विवृतिः—च** पुनः, **एकदा** एकसमये, **याममात्रे** प्रहारमात्रे, **वासरे** दिवसे व्यतीते सति, "याम-प्रहरौ समौ" इत्यमरः, **भद्रशालनाम्नः** भद्रा-शुभावहा, चासौ शाला, भद्रस्य–मङ्गलस्य वा शाला भद्रशाल इति सार्थकसंज्ञकस्य, **महाप्रासादस्य** विशालराजभवनस्य, **पृष्ठे** उपरिभागे, **समुपविष्टः** सम्यगासितः सन्, स राजा **विद्याधरमुनिं** विद्याबलेन गगनविहारिणं मुनिम्, **अपश्यत्** दृष्टवान्, कीदृशस्य महाप्रासादस्य? **समुच्छ्रितानेकभूमिकस्य** समुच्छ्रिताः–अत्युन्नताः, अनेकाः, भूमिकाः–अधोऽधः सन्निविष्टावान्तरप्रसादा यस्मिंस्तादृशस्य, पुनः **गगनयात्रायासिताभिः** गगनयात्रया–आकाशविहारेण, आयासिताभिः परिश्रान्ताभिः, **सिद्धाध्वगवधूभिः** सिद्धाः–गगनगमनादिविद्यासिद्धिकलिता ये अध्वगाः–गगनमार्गेण विहारिणः, तेषां वधूभिः-भार्याभिः, **विश्रान्तये** विश्रामानुभवाय, **सततं** नित्यम्, **अध्यासितशिखरविटङ्कवेदिकस्य** अध्यासिताः–अधिष्ठिताः, शिखरस्य, विटङ्काः–कपोतावासस्थानानि, वेदिका–चतुरस्रपरिष्कृतभूमिश्च यस्य तादृशस्य, कीदृशस्य कीदृशः सन्? **समीपदेशोपविष्टया** स्वपार्श्वस्थितया, **दृष्टिपातपथावस्थितेन** दृष्टिपातस्य–चक्षुर्विस्फारणस्य, यः पन्थाः–मार्गः, स्थानमिति यावत्, तत्रावस्थितेन, दृश्यमानेनेति यावत्, **वदनारविन्दनिहितनिश्चलदृशा** वदनम् अरविन्दमिव मनोज्ञत्वादिति वदनारविन्दम्, मदिरावत्या मुखकमलम्, तत्र न तु बहिः,

पविष्टया दृष्टिपातपथावस्थितेन वदनारविन्दनिहितनिश्चलदृशा विश्रान्तमिथःसंकथेन वर्षधरवनिताप्रायेण परिजनेनोपास्यमानया सह तया प्रस्तुतालापः सहसैवान्तरिक्षेण दक्षिणापथादापतन्तम् [अ], उद्योतितसमस्तान्तरिक्षम् [आ], आपीतसप्तार्णवजलस्य रत्नोद्गारमिव तीव्रोदानवेगनिरस्तमगस्त्यस्य, स्थूलकरनिःश्वासविप्रकीर्णमुत्तमाङ्गसिन्दूरनिकरमिव दक्षिणाशागजस्य, प्रचण्डपवनप्रेरितं रेणुपटलमिव सुवर्णद्वीपस्य, केरलीरक्षितशरणागतानङ्गवैलक्ष्यप्रतिनिवृत्तमीक्षणानलमिव विशालाक्षस्य, दिवापि दीप्यमानमीशानशिरःशशाङ्कप्रीत्या कैलासवासाय प्रचलितमौषधिव्रातमिव विन्ध्यस्य, कनकगिरिपर्यन्तचारिसूर्यतुरगानुसारेण नायनरश्मिनिवहमिव मन्दाकिनीं प्रति प्रधावितमन्तकमहिषस्य, त्रिशङ्कुसम्पर्कजाशौचशोधनाय शिखाजालमिव विजृम्भितमाग्नेयदिङ्निवासिहुतवहस्य, वैश्रवणरत्नकोशदर्शनकुतूहलादलकापुरीमुच्चलितमन्तरात्मानमिव रोहणाचलस्य [इ], तत-

---

**टिप्पनकम्**—उदानः—ऊर्ध्ववातः । त्रिशङ्कुः—चण्डालविशेषः [ इ ] ।

---

निहिता—निवेशिता, निश्चला—स्थिरा, दृक्-दृष्टिर्येन तादृशेन, पुनः **विश्रान्तमिथःसंकथनेन** विश्रान्ता-निवृत्ता, मिथः—परस्परं, सङ्कथा—सम्भाषणं यस्य तादृशेन, पुनः **वर्षधरवनिताप्रायेण** "ये त्वल्पसत्त्वाः प्रथममात्मीयाः स्त्रीस्वभाविनः । जात्या न दुष्टाः कार्येषु ते वै वर्षधराः स्मृताः" ॥ इत्युक्तलक्षणा अन्तःपुररक्षका वर्षधराः, तद्वनितानां—तन्नारीणाम्, प्रायः—प्राचुर्यं यस्मिंस्तादृशेन, **परिजनेन** परिवारेण, **उपास्यमानया** सेव्यमानया, **तया** मदिरावत्या, सह **प्रस्तुतालापः** प्रस्तुतः—प्रारब्धः, आलापः—सम्भाषणं येन तादृशः सन्, **'विद्याधरमुनिमपश्यद्'** इति दूरेणान्वयः, कीदृशम्? **सहसैव** अकस्मादेव, **अन्तरिक्षेण** गगनद्वारा, **दक्षिणापथात्** दक्षिणस्या दिशो मार्गात्, **आपतन्तम्** अवतरन्तम् [ अ ] । पुनः **उद्योतितसमस्तान्तरिक्षमार्गम्** उद्द्योतितः—स्वतेजसा प्रकाशितः, समस्तः—समग्रः, अन्तरिक्षमार्गः—आकाशमार्गो येन तादृशम् [आ] । पुनः **आपीतसप्तार्णवजलस्य** आ—समन्तात्, पीतानि सप्तार्णवानां—सप्तसमुद्राणां जलानि येन तादृशस्य, **अगस्त्यस्य** तत्संज्ञकमुनेः, **तीव्रोदानवेगनिरस्तं** तीव्रस्य—अत्यन्तोद्भूतस्य, उदानस्य—कण्ठदेशस्थवायोः, ऊर्ध्ववायोरित्यर्थः, वेगेन, निरस्तं—निष्काशितम्, **रत्नोद्गारमिव** निगीर्णरत्नोद्गिरणमिवेत्युत्प्रेक्षा । पुनः **दक्षिणाशागजस्य** दक्षिणदिग्गजस्य, **स्थूलकरनिःश्वासविप्रकीर्णं** स्थूलो यः करः—शुण्डादण्डः, तस्य निःश्वासेन—नासिकावायुना, विप्रकीर्णं—विक्षिप्तम्, **उत्तमाङ्गसिन्दूरनिकरमिव** उत्तमाङ्गे—शिरसि, यः सिन्दूरनिकरः, तमिवेत्युत्प्रेक्षा । पुनः **सुवर्णद्वीपस्य** सुवर्णमयद्वीपस्य, **प्रचण्डपवनेरितं** प्रचण्डेन—उद्धतेन, पवनेन—वायुना, ईरितं—प्रेरितम्, उद्धूतमित्यर्थः, **रेणुपटलमिव** धूलिपुञ्जमिवेत्युत्प्रेक्षा । पुनः **विशालाक्षस्य** शिवस्य, **केरलीरक्षितशरणागतानङ्गवैलक्ष्यप्रतिनिवृत्तं** केरलो नाम—"कोलिसर्पा महिषका दर्वाश्चोलाः सकेरलाः । सर्वे ते क्षत्रियास्तात ! धर्मस्तेषां निराकृतः" ॥ इति हरिवंशपुराणोक्तक्षत्रियविशेषः, तज्जातीया स्त्री केरली, तया रक्षितः पुनरुज्जीवितो यः, शरणागतः, अनङ्गः—कामदेवः, तस्मात्, वैलक्ष्येण—स्वव्यापारवैफल्यजन्याश्चर्येण, प्रतिनिवृत्तं—प्रत्यावृत्तम्, **ईक्षणानलमिव** नेत्राग्निरूपमिवेत्युत्प्रेक्षा । पुनः **विन्ध्यस्य** विन्ध्याचलस्य, **दिवाऽपि** दिनेऽपि, **दीप्यमानं** भासमानम्, **ईशानशिरःशशाङ्कप्रीत्या** ईशानस्य—शिवस्य, शिरःशशाङ्कः—मौलिस्थितश्चन्द्रः, तत्प्रीत्या—तत्प्रेम्णा, चन्द्रस्यौषधिपतित्वात्, कैलासवासाय, **प्रचलितौषधिव्रातमिव** प्रचलिता—प्रस्थिता, या ओषधिः, तस्या व्रातमिव—पुञ्जमिवेत्युत्प्रेक्षा । पुनः **अन्तकमहिषस्य** अन्तकस्य—यमराजस्य, यो महिषस्तद्वाहनरूपः, तस्य, **कनकगिरिपर्यन्तचारिसूर्यतुरगानुसारेण** कनकगिरेः-सुमेरुपर्वतस्य, पर्यन्ते—उपरितनसीम्नि, संचरणशीलः यः सूर्यः, तस्य तुरगाः—रथसंबद्धा अश्वाः, तदनुसारेण—तदनुगमेन, **मन्दाकिनीं प्रति** गङ्गां प्रति, **प्रधावितं** प्रकर्षेण शीघ्रप्रस्थितम्, **नायनरश्मिनिवहमिव** नायनानां—नयनसम्बन्धिनाम्, रश्मीनां—किरणानाम्, निवहं—पुञ्जमिव, "श्राद्धदेवो वैवस्वतोऽन्तकः" इत्यमरः । पुनः **आग्नेयदिङ्निवासिहुतवहस्य** अग्निर्देवता यस्याः सा आग्नेयी दिक्—पूर्वदक्षिणदिङ्मध्यभागः, तन्निवासिनो हुतवहस्य—अग्नेः, **त्रिशङ्कुसम्पर्कजाशौचशोधनाय** त्रिशङ्कोः—आकाशलम्बितस्य चाण्डालविशेषस्य, यः सम्पर्कः—संसर्गः, तज्जं—तज्जन्यम्, यदशौचम्—अपवित्रत्वम्, तत्संशोधनाय तन्मार्जनाय, **विजृम्भितं** प्रज्वलितम्, **शिखाजालमिव** ज्वालापुञ्जमिवेत्युत्प्रेक्षा । पुनः **रोहणाचलस्य** रत्नगिरेः, **वैश्रवणरत्नकोशदर्शन-**

तपनीयपिङ्गलेन समन्ततः प्रसर्पता देहप्रभाप्रवाहेण सन्तर्पयन्तमिव बालातपं दिवसम्, अजातशत्रुणा सत्यव्रताधिष्ठितेन कृष्णद्वैपायनमिव युधिष्ठिरेण तपोजन्मना जनितबहुमानं जगति महत्त्वेन [ई], त्रयीमिव महामुनिसहस्रोपासितचरणां विन्ध्यगिरिमेखलामिवाक्षमालोपशोभितां त्रिभुवनसृष्टिमिव प्रकटोपलक्ष्यमाणब्रह्मसूत्रां सत्तर्कविद्यामिव विधिनिरूपितानवद्यप्रमाणां सुकविवाचमिव मार्गानुसारिप्रसन्नदृष्टिपातामसितपक्षचतुर्दशीमिव

---

**टिप्पनकम्—कृष्णद्वैपायनमिव** व्यासमिव, युधिष्ठिरेण, **महत्त्वेन** माहात्म्येन, जनितबहुमानम्, विशेषणानि समानि [ ई ]। चरणाः–अध्ययनविशेषाः पादाश्च । अक्षमाला–बिभीतकराजिः, अक्षसूत्रं च । ब्रह्मसूत्रं–प्रजापतिसूत्रणं यज्ञोपवीतं च । विधिः–विधाता यथावच्च, अनवद्यप्रमाणां–प्रशस्यमानां प्रशस्यप्रत्यक्षादिप्रमाणाम् । दृष्टिः–दर्शनं चक्षुश्च । भूताः–प्रेताः सत्त्वाश्च । **अङ्गलक्ष्मीं** शरीरशोभां द्वादशाङ्गानि [ उ ]।

---

**कुतूहलात्** वैश्रवणस्य–विश्रवसोऽपत्यस्य कुबेरस्य, यो रत्नकोशः–रत्ननिधिः, तद्दर्शनकुतूहलात्–तद्दर्शनाभिलाषात्, **अलकापुरीम्** अलकानाम्नीं कुबेरपुरीम्, **उच्चलितं** प्रचलितम्, **अन्तरात्मानमिव** अन्तःकरणावच्छिन्नमात्मानमिवेत्युत्प्रेक्षा। पुनः **तप्ततपनीयपिङ्गलेन** तप्तं–वाह्निनोद्दीपितम्, यत्तपनीयं–सुवर्णम्, तद्वत् पिङ्गलेन–पीतवर्णेन, **समन्ततः** सर्वतः, **प्रसर्पता** प्रसरता, **देहप्रभाप्रवाहेण** स्वशरीरद्युतिधारया, **क्षीणातपं** क्षीणः–मान्द्यमापन्नः, आतपः प्रकाशो यस्मिंस्तादृशम्, **दिवसं** दिनम्, **सन्तर्पयन्तमिव** स्वप्रकाशेन प्रसादयन्तमिवेत्युत्प्रेक्षा। "**बालातपम्**" इतिपाठे बालः–मन्दः, शेषं प्राग्वत्। पुनः **अजातशत्रुणा** अजातः–अनुत्पन्नः, शत्रुर्विद्वेषी यस्य तादृशेन, सर्वस्यैव युधिष्ठिरहितैषित्वात् कौरवाणामपि भीमादीन् प्रत्येव दुर्भावश्रवणात्, पुनः **सत्यव्रताधिष्ठितेन** सत्यमेव यद् व्रतं–नियतकृत्यम्, तदधिष्ठितेन–तदन्वितेन, युधिष्ठिरेण **कृष्णद्वैपायनमिव** द्वीपः–यमुनाकच्छः, अयनं–स्थानं यस्य स द्वीपायनः, द्वीपायन एव द्वैपायनः, स्वार्थिकाण्प्रत्ययेन तन्निष्पत्तेः, तदुक्तम्–"द्वीपे न्यस्तस्तया बालस्तस्माद् द्वैपायनोऽभवत्" इति, धीवरात्मजया सत्यवत्या प्रसूय यमुनाकच्छे स निक्षिप्तः पराशरेणाऽऽसादित आसीदिति पौराणिकवृत्तम्, कृष्णः–विष्णुः, तद्रूपो यो द्वैपायनः–व्यासः, अथवा कृष्णः–कृष्णवर्णो यो द्वैपायनो व्यासः, तमिव, स यथा तेन **जनितबहुमानः** कृतपरमादर आसीत् तथैव **अजातशत्रुणा** अनुत्पन्नकामादिप्रतिपक्षकेण, **सत्यव्रताधिष्ठितेन** सत्याख्ययमनिबन्धनेन, **तपोजन्मना** तपस्याजनितेन, **महत्त्वेन** गौरवेण, **जनितबहुमानं** समुपचितनिरतिशयादरम् [ ई ]। पुनः **अचिरपरिणताम्** अभिनवमुपचिताम्, **अङ्गलक्ष्मीं** शरीरावयवशोभाम्, यद्वा अङ्गानि आचाराङ्गादीनि द्वादश, तेषां शोभाम्, **दधानं** धारयन्तम्, कीदृशीम्? **त्रयीमिव** वेदत्रयमिव, **महामुनिसहस्रोपासितचरणां** महामुनीनां–मुनिप्रवराणाम्, सहस्रेण उपासितौ–सेवितौ, चरणौ–पादौ यस्या यया वा, पक्षे चरणाः–शाखा अध्ययनविशेषा यस्यास्तादृशीम्, पुनः **विन्ध्यगिरेः** विन्ध्याचलस्य, **मेखलामिव** नितम्बप्रदेशमिव, **अक्षमालोपशोभिताम्** अक्षमालया–जपमालया, पक्षे बिभीतकवृक्षपङ्क्त्या, उपशोभितां जनितशोभाम्, **त्रिभुवनसृष्टिमिव** त्रिभुवनरचनामिव, **प्रकटोपलक्ष्यमाणब्रह्मसूत्रां** प्रकटं–विस्पष्टं यथा स्यात्तथा, उपलक्ष्यमाणं–वक्षसि प्रतीयमानम्, ब्रह्मसूत्रं–यज्ञोपवीतं यस्याम्; पक्षे उपलक्ष्यमाणानि इदानीं दृश्यमानानि, यानि ब्रह्मसूत्राणि–यज्ञोपवीतानि, तानि प्रकटानि–ब्रह्मणः सकाशादाविर्भूतानि यस्यां तादृशीम्, यद्वा प्रकटं यथा स्यात् तथा उपलक्ष्यमाणं ब्रह्मणः विधातुः, सूत्रं–व्यवस्था यस्यां तादृशीम्, "सूत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः" इत्यनेकार्थसंग्रहः, पुनः **तर्कविद्यामिव** न्यायविद्यामिव, **विधिनिरूपितानवद्यप्रमाणां** विधिना–विधात्रा, निरूपितं–सर्जनेन दर्शितम्, अनवद्यप्रमाणं–प्रशस्यदेहमानं यस्यास्तादृशीम्, यद्वा विधिना–ब्रह्मणा, निरूपितः–निर्णीतः, अनवद्यः–श्लाघनीयः, प्रमाणः–प्रकृष्टः, मानः सम्मानो यस्याः, पक्षे विधिना यथावद् युक्त्या निरूपितम्, अनवद्यम्–अनिन्द्यम्, आवश्यकमिति यावत्, प्रमाणं–प्रत्यक्षानुमानादिकं यया तादृशीम्; पुनः **सुकविवाचमिव** सुकवीनां सत्कवीनाम्, पाठान्तरे शसयोरैक्ये वा शुकवीनां–शुकपक्षिणाम्, वाचमिव–वाणीमिव, **मार्गानुसारिप्रसन्नदृष्टिपातां** मार्गानुसारी–जन्तुरक्षणाय गन्तव्यमार्गानुसरणशीलः, प्रसन्नः–करुणापूर्णत्वात् प्रसादान्वितः, दृष्ट्योः–चक्षुषोः, पातः–विक्षेपो यस्याम्, पक्षे मार्गानुसारिषु–रीतियुक्तेषु, प्रसन्नेषु–प्रसादगुणयुक्तेषु पदेषु, दृष्टिपातः–अन्तश्चक्षुःप्रसारो यस्यां तादृशीम्, उक्तपाठान्तरपक्षे तु मार्गानुसारिणां–शुकाधिष्ठितपादपनिकटमार्गगामिनाम्, प्रसन्नयोः–तदीयशब्दश्रवणोत्फुल्लयोः, दृष्ट्योः पातः–शुकोपरि विक्षेपो यया तादृशीम्; पुनः **असितपक्षचतुर्दशीमिव** असितपक्षस्य–कृष्णपक्षस्य, चतुर्दशीं

सर्वभूतानन्दकारिणीमचिरपरिणतामङ्गलक्ष्मीं दधानम् [उ], अस्थूलमुक्ताफलश्रियः श्रमस्वेदकणिका गगनगङ्गाजलविप्रुष इव जवादनिलानीता विशालोन्नतललाटदेशसङ्गिनीरुद्वहन्तम् [ऊ], अञ्जनत्विषा निजशरीरच्छायापुरुषेण दक्षिणाशागमनपरिचयप्रतिबुद्धेन धर्मराजेनेव सद्योगृहीतदीक्षेण दक्षिणेतरभागवर्तिना सदृशवेषाकारधारिणा सततमनुगम्यमानम् [ऋ], अभिनवतमालखण्डहरितान्यप्सरोभिरिव सविभ्रमोन्मेषाभिरितस्ततो विलसन्तीभिस्तडिद्भिरध्यासितानि तपोभीतशतमखप्रदर्शितानि मायावनानीव सजलमेघमण्डलानि प्रतिमार्गमवलोकयन्तम् [ॠ], अर्धपथदृष्टसिद्धसादरोत्सृष्टाभिरायामिनीभिरर्धकुसुमस्रग्भिः समन्ततो जटिलीकृतेन दुरुत्तरभवकूपनिपतितप्राणिसार्थोद्धरणार्थमधःप्रवर्तितपुण्यरज्जुनेव स्वभावमृदुना चरणद्वयेन द्योतमाने-

---

**धर्मराजेन** यमेन [ ऋ ]।

---

तिथिमिव, **सर्वभूतानन्दकारिणीं** सर्वेषां भूतानां प्राणिनाम्, आनन्दः—दर्शनसुखम्, तत्कारिणीम्, पक्षे सर्वेषां भूतानां पिशाचादीनाम्, महोत्सवकारिणीम्, चतुर्दश्यां निशि तेषां स्वेच्छया विहारोत्सवश्रवणात्, "भूतं क्ष्मादौ पिशाचादौ" इति मेदिनी [ उ ]। पुनः कीदृशममुं मुनिम्? **श्रमस्वेदकणिका उद्वहन्तं** श्रमेण—निरालम्बगगनमार्गातिक्रमणक्लेशेन हेतुना, याः स्वेदकणिकाः - घर्मोदबिन्दवः, ता उद्—ऊर्ध्वदेशावच्छेदेन, वहन्तं—धारयन्तम्, तमूर्ध्वदेशं कणिकाविशेषणघटकतयाह—**विशालोन्नतललाटदेशसङ्गिनीः** विशालः—बृहत्, उन्नतः—उच्चश्च, यो ललाटदेशः, तत्सङ्गिनीः—तत्सङ्गताः, कीदृशीस्ताः कणिकाः? **अस्थूलमुक्ताफलश्रियः** अस्थूलानि—लघूनि, यानि मुक्ताफलानि—मौक्तिकरत्नानि, तेषां श्रिय इव श्रियो यासां तादृशीः, पुनः कीदृशीः? **जवादनिलानीता गगनगङ्गाजलविप्रुष इव** जवाद्—वेगतः अनिलेन—वायुना, आनीताः—प्रापिताः, गगनगङ्गायाः—आकाशगङ्गायाः, विप्रुषः—बिन्दूनिवेत्युत्प्रेक्षा, "पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्" इत्यमरः [ ऊ ]। पुनः कीदृशम्? **निजशरीरच्छायापुरुषेण** स्वशरीरसम्बन्धिच्छायात्मकेन पुरुषेण, **सततं** निरन्तरम्, **अनुगम्यमानम्** आश्रीयमाणम्, कीदृशेन तेन? **अञ्जनत्विषा** अञ्जनस्येव त्विद्—कान्तिः कृष्णोज्ज्वलकान्तिर्यस्य तादृशेन, पुनः कीदृशेन तेन? **दक्षिणेतरभागवर्तिना** वामभागवर्तिना, पुनः कीदृशेन? **सदृशवेषाकारधारिणा** मुनितुल्यवस्त्रादिवेष्टिताकारधारिणा, पुनः कीदृशेन? **धर्मराजेनेव** यमराजस्वरूपेणेवेत्युत्प्रेक्षा, कीदृशेन धर्मराजेन? **दक्षिणाशागमनपरिचयप्रबुद्धेन** दक्षिणस्याम्, आशायां—दिशि, यद् गमनं—विद्याधरमुनेः प्रस्थानम्, तेन हेतुना यः परिचयः—तदीयाध्यात्मिकशक्तिप्रतीतिः, तेन प्रतिबुद्धेन—उन्मीलितश्रद्धेन, अत एव सद्यः—तत्क्षण एव, **गृहीतदीक्षेण** गृहीता—तन्मुनेः सकाशादवाप्ता, दीक्षा—प्रव्रज्या येन तादृशेन, तदीयशिष्यतां गतेनेत्यर्थः [ ऋ ]। पुनः कीदृशं मुनिम्? **प्रतिमार्गं** मार्गे मार्गे, **सजलमेघमण्डलानि** सजलानि—जलपूर्णानि, मेघमण्डलानि—गगनलम्बमानातिनिकटजलदपटलानि, **पश्यन्तं** तदीयशोभामनुभवन्तमित्यर्थः, तानि कीदृशानि? **अभिनवतमालखण्डहरितानि** अभिनवानां—नूतनानाम्, तमालानां—तज्जातीयवृक्षविशेषाणाम्, ये खण्डाः—अवान्तरविभागाः, तद्वत् **हरितानि** हरितवर्णानि, पुनः कीदृशानि? **तडिद्भिः** विद्युल्लताभिः, अध्यासितानि—अधिष्ठितानि, काभिरिव ताभिः? **अप्सरोभिरिव** स्वर्वेश्याभिरिव, कीदृशीभिरप्सरोभिः? **सविभ्रमोन्मेषाभिः** सविभ्रमाः—विभ्रमेण शृङ्गारचेष्टया सहिताः, पक्षे शृङ्गारचेष्टोद्भावकाः, उन्मेषाः—चक्षुरुन्मीलनानि, पक्षे आविर्भावा यासां तादृशीभिः, पुनः कीदृशीभिः? **इतस्ततः** अनवस्थया, **विलसन्तीभिः** क्रीडन्तीभिः, पुनः कीदृशानि मेघमण्डलानि? **तपोभीतशतमखप्रदर्शितानि** तपोभीतेन—तपसा—तन्मुनेस्तपस्यया, भीतेन—स्वपदाक्रमणत्रस्तेन, शतमखेन—इन्द्रेण, प्रदर्शितानि—तपोविच्छेदार्थमुद्भावितानि, **मायावनानीव** ऐन्द्रजालिकवनानीवेत्युत्प्रेक्षा [ ॠ ]। पुनः कीदृशममुं मुनिम्? **चरणद्वयेन** स्वपादयुगलेन, **द्योतमानम्** उद्भासमानम्, कीदृशेन तेन? **अर्घकुसुमस्रग्भिः** अर्घस्य—पूजायाः, यानि कुसुमानि, पूजोपकरणभूतानीत्यर्थः, "मूल्ये पूजाविधावर्घः" इत्यमरः, तेषां—तन्मयीभिरित्यर्थः, स्रग्भिः—मालाभिः, **जटिलीकृतेन** गुरुतामापादितेन, कीदृशीभिस्ताभिः? **अर्धपथदृष्टसिद्धसादरोत्सृष्टाभिः** अर्धपथे—अर्धमार्गे, दृष्टाः—दृष्टिपथं गताः, ये सिद्धाः विद्यासिद्धादिपुरुषाः, तैः सादरम्—आदरसहितम्, उत्सृष्टाभिः—समर्पिताभिः, पुनः **आयामिनीभिः** दीर्घाभिः। काभिरिव ताभिः? **दुरुत्तरभवकूप-**

नम् [ऌ], नदीतटतरुमिव स्फुटोपलक्ष्यमाणजटम्, ग्रीष्मकूपमिव प्रकटतनुशिराजालम्, क्षेत्रगणितमिव लम्बभुजकर्णोद्भासितम्, अमरशैलमिव स्वयंपतितकल्पद्रुमदुकूलवल्कलावृतनितम्बम्, अम्बिकायौवनोदयमिव वशीकृतविषमाक्षचित्तम्, अकालविजिगीषुनृपतिसैन्यमिव यथासंख्यं तपोदयक्षपितानेकपापकलिम्, दक्षिणार्णवपारमिव त्रिकूटकटकोरःस्थलङ्कमलसमकरम्, निष्परिग्रहमपि सकलत्रम्, विदितवस्तुसारेतरविभागमपि

---

**टिप्पणकम्**—जटा–मिलितकेशा मूलानि च । एकत्र तनुशिराजालं–सूक्ष्मजलवाहस्थानम्, अन्यत्र च प्रकटशरीरनशावृन्दम् । एकत्र लम्बभुजकर्णैः–गणितभेदैः, शोभितम्, अन्यत्र लम्बा ये भुज-कर्णास्तैः । नितम्बः–कटीप्रदेशः, अधोभागश्च । [**वशीकृतविषमाक्षचित्तं**] वशीकृतक्रूरेन्द्रियमानसम् । **तपोदयक्षपितानेकपापकलिम्** एकत्र ग्रीष्मोदयेन क्षपिताः–हतवीर्याः सन्तः, अनेकपाः–करिणः, अपकलयः–गतकलहा यस्मिन् स तथोक्तस्तम्, सैन्यशब्दस्योभयलिङ्गत्वात्, अन्यत्र तपःकारुण्याभ्यां नाशितबहुपापकलिकालम् । **त्रिकूटकटकोरःस्थलङ्कमलसमकरम्** एकत्र त्रिकूटाचलप्रस्थहृदयस्थितलङ्कापुरम्, मन्दजलचरं च, अन्यत्र त्रिकूटकटकवद् उरःस्थलं

---

**निपतितप्राणिसार्थोद्धरणार्थमधःप्रवर्तितपुण्यरज्जुभिरिव** दुरुत्तरः–दुःखेनोत्तरितुं शक्यः, यो भवकूपः–संसारकूपः, तत्र निपतितानां–स्वस्वकर्मविपाकानुगुणं निमग्नानाम्, प्राणिनां–जीवानाम्, सार्थस्य–समूहस्य, उद्धरणार्थम्–उन्नयनार्थम्, अधःप्रवर्तिताभिः–अधःप्रक्षिप्ताभिः, पुण्यरज्जुभिः–पुण्यात्मकरज्जुरूपाभिरिवेत्युत्प्रेक्षा, 'रज्जुभिः' इत्यस्य स्थाने 'रज्जुना' इति पाठे चरणद्वये तदन्वयः, अर्थस्तु स एव किन्तु स्त्रीलिङ्गत्वाद् 'रज्जुना' इति न स्यादिति अधःप्रवर्तिता पुण्या रज्जवः स्वगात्मका येनेति बहुव्रीहिणा व्याख्येयम्, पुनः कीदृशेन चरणद्वयेन ? **स्वभावमृदुना** प्रकृतिकोमलेन [ ऌ ] । पुनः कीदृशममुं मुनिम् ? **नदीतटतरुमिव** नदीतटे यस्तरुर्वृक्षस्तमिव, **स्फुटोपलक्ष्यमाणजटं** स्फुटं यथा स्यात्तथा उपलक्ष्यमाणा–दृश्यमाना, जटा–अन्योन्यसंश्लिष्टकेशकलापः, पक्षे तरङ्गाभिघातविशीर्णशिफासंघो यस्य तादृशम् । 'जटा लग्नकचे मूले मांस्यां लक्षे पुनर्जटी' इति मेदिनी । पुनः **ग्रीष्मकूपमिव** ग्रीष्मकालिककूपमिव, **प्रकटतनुशिराजालं** प्रकटं–कार्श्यातिशयेन स्फुटम्, तनोः–शरीरस्य, शिराजालं–नाडीसमूहो यस्य, पक्षे प्रकटं–जलशोषणेनाभिव्यक्तम्, तनु–सूक्ष्मम्, शिराजालं–निकटवृक्षशिफासमूहो यद्वा सूक्ष्मजलवाहस्थानानि यस्मिन् तादृशम् । पुनः **क्षेत्रगणितमिव** रेखागणितमिव, **लम्बभुजकर्णोद्भासितं** लम्बाभ्यां–दीर्घाभ्याम्, भुजाभ्यां–बाहुभ्याम्, कर्णाभ्यां श्रोत्राभ्यां च, उद्भासितं–सुशोभितम्, पक्षे त्रिभुजादिक्षेत्रस्य यद्बिन्दुस्थानं तदारभ्य तदधोलम्बमाना रेखा लम्बः, त्रिभुजमध्ये या दीर्घरेखा स कर्णः, रेखासामान्यं तु भुजः, तैरुद्भासितम् । पुनः **अमरशैलमिव** अमराणां–देवानाम्, शैलः–पर्वतः, सुमेरुः, तमिव, **स्वयंपतितकल्पद्रुमदुकूलवल्कलावृतनितम्बं** स्वयं–स्वयमेव, पतितानि–जीर्णतयाऽधोगतानि, यानि कल्पद्रुमस्य–दिव्यवृक्षविशेषस्य, दुकूलानि–वस्त्ररूपाणि, वल्कलानि–त्वचः, तैः, आवृतः–आच्छादितः, नितम्बः–कटिप्रदेशः, पक्षे मध्यप्रदेशश्च यस्य तादृशम् । पुनः **अम्बिकायौवनोदयमिव** अम्बिकायाः–पार्वत्याः, यौवनोदयमिव–तारुण्योद्गममिव, **वशीकृतविषमाक्षचित्तं** वशीकृतम्–आकृष्टम्, विषमं–कठिनम्, अक्षाणि–इन्द्रियाणि, चित्तं–मनश्चेति अक्षचित्तम्, पक्षे विषमाक्षस्य–शिवस्य, चित्तं येन तादृशम् । "अक्षो ज्ञानाऽऽत्म-शकट-व्यवहारेषु पाशके । चक्रे कर्षे पुमान् क्लीबं तुत्थे सौवर्चलेन्द्रिये" ॥ इति मेदिनी । पुनः **अकालविजिगीषुनृपतिसैन्यमिव** अकाले–संग्रामायोग्यकाले, विजिगीषोः–विजेतुमिच्छोः युयुत्सोरिति यावत्, नृपतेः सैन्यमिव, **यथासङ्ख्यं** क्रमेण, पक्षे युद्धानुसारेण, **तपोदयक्षपितानेकपापकलिं** तपश्च दया चेति तपोदयम्, तेन क्षपितानि–वारितानि, अनेकानि पापानि, अनेके कलयः–युद्धानि च येन तादृशम्, तपसा पापानां क्षपणम्, दयया च युद्धानामिति बोध्यम्, यद्वा तपोदयक्षपितः–तपःकारुण्यां विनाशितः, अनेकपापः–बहुपापः, कलिः–कलहः कलिकालो वा येन तादृशम्, 'यथासङ्ख्यम्' इति क्वचिन्नास्ति, पक्षे तपस्य–ग्रीष्मस्य, उदयेन–आविर्भावेन, क्षपिताः–निरुद्धाः, अनेकपानां–हस्तिनाम्, आपकलयः–अप्सु भवा आपाः, जलाधिकरणकाः, कलयः–युद्धानि यस्मिन्, यद्वा ग्रीष्मोदयेन क्षपिताः–शक्तिक्षयमापादिताः, सन्तः, अनेकपाः–हस्तिनः, अपकलयः–निवृत्तकलहा यस्मिंस्तादृशम्, "कलिः स्त्री कलिकायां ना शरा-ऽऽजि-कलहे युगे" इति मेदिनी । पुनः **दक्षिणार्णवपारमिव** दक्षिणार्णवस्य–दक्षिणसमुद्रस्य, पारमिव–दक्षिणतीरमिव, **त्रिकूटकटकोरःस्थलङ्कमलसमकरं** त्रिकूटस्य–शिखरत्रयविशिष्टस्य

समतृणप्रवालमुक्तालेष्टुलोष्टकाञ्चनम् [लृ], परपुरुषदर्शनसावधानं सौविदल्लमिन्द्रियवृत्तिवनितानाम्, भूतापद्द्रुहमम्बुधरागमं साधुमयूराणाम्, दुर्विषहतेजसं महामन्त्रमनङ्गविकाराशीविषाणाम्, काशधवलगुणोद्भासितमगस्त्योदयं हृदयजलाशयानाम् [ए], आचारमिव चारित्रस्य, प्रतिज्ञानिर्वाहमिव ज्ञानस्य, शुद्धिसंचयमिव शौचस्य, धर्माधिकारमिव धर्मस्य, सर्वस्वदायमिव दयायाः, मार्गदेशकमिवापवर्गस्य [ऐ], तैजसं मूर्त्या,

---

वक्षो यस्य स तथा तम्, विपुलवक्षसमित्यर्थः, पद्मतुल्यहस्तं च । **निष्परिग्रहमपि** यदि भार्यारहितं कथं **सकलत्रम्?** अन्यत्र परिग्रहरहितं सकलजनरक्षकं च । **विदितवस्तुसारेतरविभागमपि** ज्ञातपदार्थप्रधानाप्रधानविवेकं यदि कथं समे तृणप्रवाले मुक्तालेष्टुनी लोष्टकाञ्चने च यस्य स तथोक्तस्तम्? अन्यत्र **समतृणप्रवालमुक्तालेष्टुलोष्टकाञ्चनं** वीतरागत्वेन रागाभावात् [ लृ ] । **परपुरुषदर्शनसावधानं** परपुरुषः अन्यनरः, अन्यत्र परमात्मा । **भूतापद्द्रुहम्** एकत्र पृथ्वीसन्तापहारिणम्, अन्यत्र प्राणिविपत्तिघातिनम् । **दुर्विषहतेजसं** तेजः—दीप्तिः, अन्यत्र वीर्यम् । **कासधवलगुणोद्भासितम्** एकत्र कासानां धवलगुणेन श्वेतत्वेनोद्भासितम्, अन्यत्र कासवद् ये धवला गुणाः क्षान्त्यादयस्तैः शोभितम् [ ए ] । **तैजसम्** आग्नेयम्, अन्यत्र तेजोविकारम् । **पावनं** वायव्यम्, अन्यत्र पवि-

---

पर्वतविशेषस्य, कटक इव-नितम्ब इव, मेखलाख्यमध्यभाग इव, विशालम् उरस्थलं—वक्षःस्थलं यस्य तादृशम्, पुनः **कमलसमकरं** कमलकोमलहस्तम्, पक्षे त्रिकूटस्य—पर्वतविशेषस्य, यः कटकः—मेखलाख्यमध्यभागः, तस्य उरसि—ऊर्ध्वभूमौ, तिष्ठतीति त्रिकूटकटकोरस्था, तादृशी लङ्का यस्मिंस्तादृशम्, पुनः **अलसमकरम्** अलसाः—निश्शङ्कतया निश्चलाः, मकरा यस्मिंस्तादृशम् । पुनः **निष्परिग्रहमपि** दारापत्यादिरहितमपि, **सकलत्रं** कलत्रेण—स्त्रिया, सहितमिति विरोधः, सकलान्—सर्वान्, त्रायते—रक्षतीति सकलत्रस्तादृशमित्यर्थेन तु तत्परिहारः "परिग्रहः परिजने शपथे च परिग्रहः । परिग्रहः कलत्रे च मूलस्वीकारयोरपि" ॥ इति शाश्वतः । पुनः **विदितवस्तुसारेतरविभागमपि** विदितः—निश्चितः, वस्तूनां—कनककाचादिपदार्थानाम्, सारस्य, तदितरस्य—असारस्य, विभागः—वैलक्षण्यं येन तादृशमपि, **समतृणप्रवालमुक्तालोष्टुलोष्टकाञ्चनं** समं—तुल्यम्, तृणम्, प्रवालं—नवपल्लवो विद्रुमो वा, मुक्ता—मणिविशेषः, लेष्टुः—मृत्पिण्डः, लोष्टं—लोहमलम्, काञ्चनं—सुवर्णं च यस्य तादृशमिति विरोधः, तुल्यम्—अनपेक्षत्वेन सर्वं समानं यस्येत्यर्थेन तु तत्परिहारः, "प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे" इति मेदिनी, "लोष्टानि लेष्टवः पुंसि" इत्यमरः [ लृ ] । पुनः **इन्द्रियवृत्तिवनितानाम्** इन्द्रियाणां—चक्षुरादीनाम्, या वृत्तयः—विषयाकारपरिणामविशेषाः, ता एव वनिताः—स्त्रियः, तासाम्, **परपुरुषदर्शनसावधानं** परपुरुषस्य—अन्यपुरुषस्य, पक्षे उत्कृष्टपुरुषस्य, दर्शने—साक्षात्करणे, सावधानं—स्वाधिकारपरम्, **सौविदल्लम्** अन्तःपुररक्षकम् । पुनः **साधुमयूराणां** साधवः—सज्जना एव, मयूरास्तेषां कृते, **भूतापद्द्रुहं** भुवः—पृथिव्याः, तापाय—रविकिरणसम्पातजनितोष्णतायै, द्रुह्यति—तं हरतीति तादृशम्, पक्षे भूतानां—प्राणिनाम्, आपदे—विपत्तये, द्रुह्यति—तां विनाशयतीति तादृशम्, **अम्बुधरागमम्** अम्बुधरस्य-मेघस्य, आगमम्—आगमनम् । पुनः **अनङ्गविकाराशीविषाणाम्** अनङ्गस्य—कामदेवस्य, ये विकाराः—मोहादयः, त एवाशीविषाः—सर्पाः, तेषाम्, **दुर्विषहतेजसं** दुर्विषं—दुष्टविषम्, हन्ति—शमयतीति दुर्विषहम्, तादृशं तेजः शक्तिर्यस्य तादृशम्, **महामन्त्रं** महामन्त्रस्वरूपम्; पक्षे दुःसहद्युतिम् । पुनः **हृदयजलाशयानां** हृदयान्येव जलाशयाः—कासाराः, तेषां कृते, तत्स्वच्छताप्रयोजकमित्यर्थः, **काशधवलगुणोद्भासितं** काशस्य-काशाख्यतृणपुष्पस्य, यो धवलः—शुभ्रताख्यो गुणः, तेन उद्भासितं-प्रकाशितम्, कार्यविधया सूचितमित्यर्थः, पक्षे काशधवलाः—काशपुष्पवच्छुभ्राः, ये गुणाः क्षान्त्यादयस्तैरुद्भासितम्, **अगस्त्योदयमिव** अगस्त्यस्य—तन्नाम्नो नक्षत्रस्य, उदयमिव, तदुदये आश्विन-कार्तिकयोर्जलानां स्वच्छभावात् काशपुष्पोद्गमाच्चेति बोध्यम् [ ए ] । पुनः **चारित्रस्य** सम्यक्चारित्रस्य कृते, **आचारमिव** नियममिवेत्युत्प्रेक्षा, पुनः **ज्ञानस्य** सम्यग्ज्ञानस्य कृते, **प्रतिज्ञानिर्वाहमिव** प्रतिज्ञायाः—तत्तद्व्रतसंकल्पस्य, निर्वाहमिव—पालनमिव, पुनः **शौचस्य** एकैकस्याः शुद्धेः कृते, **शुद्धिसञ्चयमिव** शुद्धिपुञ्जमिव, शुद्धिकेन्द्रभूतमित्यर्थः, पुनः **धर्मस्य** धर्मस्य कृते, **धर्माधिकारमिव** धर्मविनियोक्तृत्वमिव, पुनः **दयायाः** करुणायाः, **सर्वस्वदायमिव** अशेषविभवरूपं भागमिव, **अपवर्गस्य** मोक्षस्य, **मार्गदेशकमिव** मार्गप्रदर्शकमिव [ ऐ ] । पुनः **मूर्त्या** आकृत्या, **तैजसं** तेजस्विनम्, सुवर्णादितेजोविकारभूतं

पावनं चरितैः, आप्यं पुण्यैः, पार्थिवमतीतावस्थया, विद्याधरमुनिमपश्यत् [ओ]। दृष्ट्वा च तमदृष्टपूर्वमुपजातकुतूहलो विस्मयस्तिमितदृष्टिरुपरतनिमेषतया दर्शनप्रीत्युपार्जितेन पुण्यराशिना तस्यामेव मूर्तावाविर्भूतदिव्यभाव इव मुहूर्तमराजत्। अभिमुखीभूतं च तं प्रासादस्य दिवसकरमिव पौरस्त्यभूधराभिलाषिणं सप्रभातसन्ध्यो वासरः सुदूरविकासितमुखः समं मदिरावत्या प्रत्युज्जगाम [औ]। धार्मिकजनानुवृत्त्यभिमुखानि हि भवन्ति सर्वदा धर्मतत्त्ववेदिनां हृदयानि, यतः स तं तथाकृताभ्युत्थानमादरातिशयपुनरुक्तोक्तस्वागतमुपारूढप्रौढपुलकप्रकटितान्तःप्रीतिमुत्पक्ष्मलोचनयुगललक्ष्यीकृतमुखमग्रतः सपरिग्रहमवलोक्य समुपजातपक्षपातो विसृज्य मुनिभावसहभाविनीं निरपेक्षतामुपेक्षितनिजप्रयोजनो जन इवेतरस्तरसाभिमुख्यभवत्, अवा-

---

व्रताकारकम्। आप्यम् अब्मयम्, अन्यत्र आप्यं प्राप्यम्। **पार्थिवं** पृथिवीविकारम्, अन्यत्र राजानम् [ओ]। **आविर्भूतदिव्यभावः** संजातदेवत्व इव निश्चलदृष्टयादित्वात्। **सुदूरविकसितमुखः** एकत्र सुदूराद् विकसितं मुखं वक्त्रं यस्य स तथोक्तः, अन्यत्र सुदूरं विकसितानि मुखानि यस्य स तथोक्तः [औ]।

---

वा, पुनः **चरितैः** सच्चारित्रैः, **पावनं** पवित्रम्, वायव्यं वा, पुण्यैः, **आप्यं** प्राप्यं जलमयं वा, पुनः **अतीतकालावस्थया** भूतपूर्वावस्थया, अदीक्षितावस्थयेत्यर्थः, **पार्थिवं** राजानम्, पृथिवीविकारं वा, अत्र सर्वत्र पाक्षिकविषमालङ्कारविच्छित्तिर्बोध्या। एतावद्विशेषणविशिष्टं **विद्याधरमुनिं** गगनगमनादिविद्याबलसम्बलितं मुनिम्, **अपश्यत्** राजा दृष्टवान् [ओ]। **अपूर्वम्** अविद्यमानः तत्समानः पूर्वो यस्मात् तादृशं तं मुनिम्, यद्वा **'अपूर्वम्'** अभूतपूर्वं यथा स्यात्तथा, **दृष्ट्वा** निरीक्ष्य, मध्यमणिन्यायेन 'अपूर्वम्' इत्यस्योत्तरत्राप्यन्वयात् **अपूर्वम्** यथा स्यात्तथा, **उत्पन्नकुतूहलः** उत्पन्नतदवलोकनौत्सुक्यः, **विस्मयस्तिमितदृष्टिः** आश्चर्यनिश्चललोचनः, **प्रीत्यर्जितेन** तदवलोकश्रद्धासञ्चितेन, **पुण्यराशिना** सुकृतसम्पदा हेतुना, **उपरतनिमेषतया** निवृत्तनयनस्पन्दतया साधर्म्येण, **आविर्भूतदिव्यभाव इव** आविर्भूतः–अभिव्यक्तः, दिवि स्वर्गे भवः–दिव्यः, तस्य भावो दिव्यभावः देवत्वमित्यर्थः, यस्य तादृश इवेत्युत्प्रेक्षा, **तस्यामेव मूर्तौ** मुनिशरीरे, **मुहूर्तं** किञ्चित्कालपर्यन्तम्, "मुहूर्तमल्पकाले स्याद् घटिकाद्वितयेऽपि च" इत्यनेकार्थसंग्रहः, **अराजत** मनसा लीनः सन्नशोभत, राजेति शेषः, **पौरस्त्यभूधराभिलाषिणं** पुरः–पूर्वस्यां दिशि, भवः पौरस्त्यः, तस्य भूधरस्य, उदयाचलस्येत्यर्थः, अभिलाषिणम्–तदारोहणोन्मुखम्, **दिवसकरं** सूर्यम्, **सप्रभातसन्ध्यः** प्रातरात्मकसन्ध्यया सहितः, **वासरः** दिवस इव, **सुदूरविकासितमुखः** सुदूरेण–अतिदूरस्थेनापि मुनिना, पक्षे सूर्येण च, यद्वा सुदूरम्–अतिदूरं यावत्, विकासितम्–उद्भासितम्, मुखं वदनं पक्षे आद्यभागश्च यस्य तादृशः, **मदिरावत्या** तन्नाम्न्या राज्ञ्या, **समं** सह, **प्रासादस्य** राजमन्दिरस्य, **अभिमुखीभूतं** तदभिमुखमवतरन्तम्, मुनिं प्रति, **उज्जगाम** उत्थाय तमुपजगाम, स राजेति शेषः [औ]। हि यतः, **धर्मतत्त्ववेदिनां** धर्मतत्त्वज्ञानाम्, हृदयानि सर्वदा, **धार्मिकजनानुवृत्त्यभिमुखानि** धर्मं चरन्ति आचरन्तीति धार्मिकाः, तादृशजनानाम्, अनुवृत्तौ–अनुकूलाचरणे, अभिमुखानि–अवहितानि, **भवन्ति** वर्तन्ते। **यतः** यस्माद्धेतोः, **स** मुनिः, **तथाकृताभ्युत्थानं** तथा–तेन प्रकारेण, कृतं–विहितम्, अभ्युत्थानम्–अभि अभिमुखम् उत्थानं येन तादृशम्, पुनः **आदरातिशयपुनरुक्तोक्तस्वागतम्** आदरातिशयेन–श्रद्धाऽऽधिक्येन, पुनरुक्तम्–उक्तम् उक्तपूर्वम्, स्वागतं–तदागमनश्लाघावाक्यं येन तादृशम्, पुनः **उपारूढपुलकप्रकटितान्तःप्रीतिम्** उपारूढैः–उद्भूतैः, पुलकैः–रोमाञ्चैः, प्रकटिता–प्रकाशिता, अनुमापितेत्यर्थः, अन्तःप्रीतिः–हार्दिकश्रद्धा येन तादृशम्, पुनः **उत्पक्ष्मलोचनयुगललक्ष्यीकृतमुखम्** उद्–ऊर्ध्वमवस्थिते, पक्ष्मणी–नेत्रलोमलतिके यस्य तादृशेन लोचनयुगलेन, लक्ष्यीकृतं–लक्षितम्, मुखं यस्य तादृशम्, पुनः **अग्रतः** अग्रे, **सपरिग्रहं** सपत्नीकम्, **तं** राजानम्, अवलोक्य, **समुपजातपक्षपातः** समुत्पन्नतदनुकूलभावनः सन्, मुनिभावस्य, सहभाविनीं सहावस्थायिनीम्, **निरपेक्षताम्** अन्यानपेक्षताम्, उदासीनतामित्यर्थः, **विसृज्य** परित्यज्य, **इतरजन इव** साधारणजन इव, **उपेक्षितनिजप्रयोजनः** अनुद्दिष्टस्वप्रयोजनः, **तरसा** वेगेन, **अभिमुख्यभवत्** अभिमुखीबभूव, **च** पुनः, **अम्बरतलात्** आकाशप्रदेशात्, **अवातरत्** अधस्तादागच्छत् [अं]।

तरत्नाम्बरतलात् [अं] । उपरितनकुट्टिमन्यस्तचरणं च तमुपसृत्य सविनयमवनीपतिः प्रगुणीकृतार्घपात्रो विधाय विधिसम्पादितया सपर्यया सानन्दमानन्दपर्यश्रुलोचनः प्रणम्य स्वयं समुपनीते सुदूरदर्शितादरया मदिरावत्या निजोत्तरीयपल्लवेन प्रमृष्टरजसि न्यवेशयत् [अः] ।

कृतगृहागतमहर्षिसमुचितसमस्तोपचारश्च तं गुरुमिवाधिदैवतमिवोपास्य सुचिरमास्यनिहितनिश्चलचक्षुरवनितलोपविष्टः सप्रश्रयमुवाच—'भगवन्! एष तावदभ्रङ्कषाग्रशिखरस्तुषारगिरिरिव गङ्गास्रोतसा गगनमण्डलादवतीर्य मुनिगणमाननीयेन गुरुतां परामारोपितः प्रासादस्त्वया, तदनु सर्वतः कृतावलोकनेन स्वच्छशिशिरैः शान्त्युदकशीकरैरिव दृष्टिपातैर्दूरीकृतो दुरितराशिरस्य समस्तस्यापि नगरीनिवासिनो मत्परिग्रहस्य, प्रणामसमये च मूर्धानमधिरोपितेन प्रकृतिपूतेन निजपादपांशुना सम्पादितमखिलतीर्थस्नानफलम्; एवं च सामान्येन सर्वतः समुपजातमप्यसंजाततृप्तिरधिकतरकल्याणसम्पल्लाभाय भगवता क्रियमाणमिच्छाम्यात्मनो

---

**सप्रश्रयं** सविनयम् [ क ] ।

---

**उपरितनकुट्टिमन्यस्तचरणम्** उपरितने—तत्प्रासादोपरिस्थे, कुट्टिमे—मणिबद्धभूमौ, "कुट्टिमं तस्य बद्धभूः" इति कोशः, न्यस्तौ—धृतौ, पादौ—चरणौ येन तादृशम्, **तं** मुनिम्, **सविनयं** विनयसहितं यथा स्यात्तथा, **उपसृत्य** निकटं गत्वा, **प्रगुणीकृतार्घपात्रः** प्रगुणीकृतम्—ऋजूकृतम्, पूजोपकरणपूर्णतया ऋजुरूपेण धृतमिति यावत्, अर्घपात्रं—दूर्वाक्षतादिपात्रं येन तादृशः सन्, "ऋजौ त्वजिह्मप्रगुणौ" इत्यमरः, **विधिसम्पादितया** विधिविहितया, **सपर्यया** पूजया, "सपर्यार्चार्हणाः समाः" इत्यमरः, **सानन्दम्** आनन्दान्वितम्, विधाय, **आनन्दपर्यश्रुलोचनः** आनन्देन हेतुना, पर्यश्रुणी—अश्रुपूर्णे, लोचने यस्य तादृशः सन्, **प्रणम्य** नमस्कृत्य, **स्वयं** स्वेनैव, **समुपनीते** समानीते, पुनः **सुदूरदर्शितादरया** सुदूरात्—अतिदूरादेव, दर्शित आदरः सम्मानो यया तादृश्या, मदिरावत्या, **निजोत्तरीयपल्लवेन** निजं—स्वकीयम्, यदुत्तरीयम्—ऊर्ध्ववस्त्रम्, तदेव कोमलत्वात् पल्लवः, तेन **प्रमृष्टरजसि** प्रमृष्टानि रजांसि धूलिकणा यस्मिंस्तादृशे, **हेमविष्टरे** सुवर्णासने, **न्यवेशयत्** उपावेशयत् [ अः ] ।

**च** पुनः, **कृतगृहागतमहर्षिसमुचितसमस्तोपचारः** कृतः—सम्पादितः, गृहागतस्य महर्षेः, समुचितः—योग्यः, समस्तः, उपचारः—पादक्षालनादिरूपसत्कारो येन तादृशः सन्, स राजा तं **गुरुमिव** गुरुवत्, **अधिदैवतमिव** परमेश्वरवच्च, **उपास्य** सेवित्वा, **सुचिरम्** अतिदीर्घकालम्, **आस्यनिहितनिश्चलचक्षुः** आस्ये—मुखोपरि, निहिते—धृते, निश्चलचक्षुषी—निःस्पन्दनयने येन तादृशः सन्, **अवनितलोपविष्टः** पृथ्वीपृष्ठमासितः, **सप्रश्रयं** प्रीतिपुरस्सरम्, **उवाच** वक्तुमारेभे, "प्रणय-प्रश्रयौ समौ" इत्यमरः । किमुवाचेत्याह—**भगवन्!** ऐश्वर्यशालिन्!, **मुनिगणमाननीयेन** मुनिवृन्दवन्दनीयेन त्वया, **गगनमण्डलादवतीर्य** आकाशमण्डलादधस्तादागत्य, **गङ्गास्रोतसा** गङ्गाप्रवाहेण, **तुषारगिरिरिव** हिमालय इव, **तावत्** प्रथमम्, तावदिति वाक्यालङ्कारे वा, **अभ्रङ्कषाग्रशिखरः** अभ्रङ्कषाणि मेघसङ्घर्षीणि, अग्रशिखराणि—शिखराग्रस्थानानि, यद्वा अभ्रङ्कषाग्राणि शिखराणि यस्य तादृशः, एष प्रासादः, **परां** निरतिशयां **गुरुतां** महत्ताम्, **आरोपितः** प्रापितः । **तदनु** तदनन्तरम्, **सर्वतः कृतावलोकनेन** समन्ततः कृतदर्शनेन, त्वयेति शेषः **स्वच्छशिशिरैः** विमलशीतलैः, **शान्त्युदकशीकरैरिव** शान्तिफलकजलकणैरिव, **दृष्टिपातैः** निजनयननिक्षेपैः, निजनयनाभ्यामवलोकनैरिति यावत्, **समग्रस्यापि** सर्वस्यापि, **नगरीनिवासिनः** एतन्नगरीवास्तव्यस्य, **अस्य** सन्निकृष्टस्य, **मत्परिग्रहस्य** मत्परिजनस्य, **दुरितराशिः** इष्टसिद्धिप्रतिबन्धकप्रत्यवायपुञ्जः, **दूरीकृतः** दूरमपसारितः । **च** पुनः, **प्रणामसमये** नमस्कारावसरे, **मूर्धानमधिरोपितेन** मस्तकधृतेन, **प्रकृतिपूतेन** स्वभावतो विशुद्धेन, **निजपादपांशुना** स्वचरणरेणुना, **अखिलतीर्थस्नानफलं** सर्वतीर्थाधिकरणकावगाहनफलम्, सम्पादितं—निष्पादितम्, त्वयेति शेषः । **एवं च** अनेन प्रकारेण तु, **सर्वतः** सर्वथा, **सामान्येन** साधारणतया, **समुपजातमपि** सम्पन्नमपि, **आत्मनः** स्वस्य, **अनुग्रहम्** अभिमुखावतरणकृपाम्, **असञ्जाततृप्तिः** अनुत्पन्नसन्तोषः, अहमिति शेषः, **अधिकतरकल्याणसम्प-**

विशेषेणानुग्रहम्; इदं राज्यम्, एषा मे पृथिवी, एतानि वसूनि, असौ हस्त्यश्वरथपदातिप्रायो बाह्यः परिच्छदः, इदं शरीरम्, एतद् गृहम्, गृह्यतां स्वार्थसिद्धये परार्थसम्पादनाय वा यदत्रोपयोगार्हम्, अर्हसि नश्चिरान्निर्वापयितुमेतज्जन्मनः प्रभृत्यघटितानुरूपपात्रविषादविक्लवं हृदयम्' [क] । इति व्याहरन्तं च तं समुपजातहर्षो महर्षिरुवाच— 'महाभाग! सर्वमनुरूपमस्य ते महिमातिशयतृणीकृतवारिराशेराशयस्य, केवलमभूमिर्मुनिजनो विभवानाम्, विषयोपभोगगृध्नवो हि धनान्युपाददते, मद्विधास्तु संन्यस्तसर्वारम्भाः समस्तसङ्गविरता निर्जनारण्यबद्धगृहबुद्धयो भैक्षमात्रभावितसन्तोषाः किं तैः करिष्यन्ति?; ये च सर्वप्राणिसाधारणमाहारमपि शरीरवृत्तये गृह्णन्ति, शरीरमपि धर्मसाधनमिति धारयन्ति, धर्ममपि मुक्तिकारणमिति बहु मन्यन्ते, मुक्तिमपि निरुत्सुकेन चेतसाऽभिवाञ्छन्ति, ते कथमसारसांसारिकसुखप्राप्त्यर्थमनेकानर्थहेतुमर्थं गृह्णन्ति?, परार्थसम्पादनमपि धर्मोपदेशदानद्वारेण शास्त्रेषु तेषां समर्थितम्, नान्यथा, तदलमत्र निर्बन्धेन; कथय तावत् केयमुपहसितसुरलोकरामणीयका नगरी? कश्चास्यां महाभागस्त्वम्? कतमं च महापुरुषवंशममरोद्यानवेणुमिव

---

**लाभाय** अधिकतरायाः–अत्यधिकायाः, कल्याणसम्पदः–स्वशुभसम्पदः, लाभाय–प्राप्तये, भगवता, **विशेषेण** असाधारणरूपेण, वक्ष्यमाणप्रकारेणेत्यर्थः, क्रियमाणम्, **इच्छामि** अभिलषामि । कथम्? **इदं** प्रत्यक्षरूपं राज्यम् । **एषा** अभिमुखवर्तिनी, **मम** मत्स्वामिकेत्यर्थः, पृथ्वी । एतानि **वसूनि** धनानि । **असौ** परोक्षवर्ती, **हस्त्यश्वरथपदातिप्रायः** हस्तिनः, अश्वाः, रथाः, पदातयः–पद्भ्यां गन्तारो जनाः, प्रायः–प्रचुरा यस्मिन्नीदृशः, बाह्यः **परिच्छदः** परिवारः । इदं **शरीरं** मामको देहः । **एतद्** भवदधिष्ठितशिखरम्, **गृहं** प्रासादः । **अत्र** एषु वस्तुषु मध्ये, यत्, **उपयोगार्हम्** उपयोगयोग्यं भवेत् तत्, **स्वार्थसिद्धये** स्वप्रयोजनसम्पादनाय, **परार्थसम्पादनाय वा** परप्रयोजनसाधनाय वा, **गृह्यतां** स्वीक्रियताम् । जन्मनः प्रभृति **अघटितानुरूपपात्रविषादविक्लवम्** अघटितम्–अप्राप्तम्, यदनुरूपम्–अनुकूलम्, अभिमतमित्यर्थः, पात्रं त्वादृशं सद्गुणभाजनम्, तस्य–तत्प्रयुक्तेन, विषादेन–खेदेन, विक्लवं–विह्वलम्, **नः** अस्माकम्, एतत्, **हृदयम्** अन्तःकरणम्, **चिरात्** चिरकालपर्यन्तम्, **निर्वापयितुं** शमयितुम्, **अर्हसि** योग्योऽसि [क] । **समुपजातहर्षः** तदीयविनयपूर्णोक्तिप्राप्तप्रसादः सन्, **महर्षिः** असौ मुनिः, **इति** पूर्वप्रकारेण, **व्याहरन्तं** ब्रुवन्तम्, **तं** राजानम्, उवाच । **महाभाग!** महानुभाव!, **महिमातिशयतृणीकृतवारिराशेः** महिमातिशयेन गाम्भीर्यातिशयेन, तृणीकृतः–तृणवत्तुच्छतामापादितः, वारिराशिः–समुद्रो येन तादृशस्य, अस्य, **ते** तव, **आशयस्य** अभिप्रायस्य, सर्वम्, **अनुरूपम्** अनुकूलमेव, भविष्यतीति शेषः, **केवलं** किन्तु, मुनिजनः, **विभवानां** धनानाम्, **अभूमिः** अनाश्रयः, अस्तीति शेषः । **हि** यतः, **विषयोपभोगगृध्नवः** विषयाणां–कामिनी-काञ्चनादीनाम्, उपभोगे–तज्जन्यसुखानुभवे, गृध्नवः–लुब्धा जनाः, धनानि **उपाददते** गृह्णन्ति, **मद्विधास्तु** मादृशास्तु, **संन्यस्तसर्वारम्भाः** परित्यक्तलौकिकसर्वव्यापाराः, **समस्तसङ्गविरताः** दारापत्यादिसकलसम्बन्धनिवृत्ताः, **निर्जनारण्यबद्धगृहबुद्धयः** निर्जने–जनसामान्यशून्ये, अरण्ये–वने, बद्धा–दृढीकृता, गृहबुद्धिर्यैस्तादृशाः, **भैक्षमात्रभावितसन्तोषाः** भैक्षमात्रेण–केवलभिक्षया, भावितः–सम्पादितः, सन्तोषो यैस्तादृशाः, **तैः** राज्यादिभिः, **किं करिष्यन्ति?** न किमपीत्यर्थः । **च** पुनः, **शरीरवृत्तये** स्वशरीरस्थितये, न तूपभोगाय, **सर्वप्राणिसाधारणं** प्राणिसामान्यापेक्षितम्, **आहारमपि** अन्नादिकमपि, **गृह्णन्ति** खादन्ति, **शरीरमपि** स्वशरीरमपि, **धर्मसाधनं** "शरीरमाद्यं खलु धर्मसाधनम्" इति न्यायेन धर्मप्रयोजकम्, इति हेतोः, न तु विलासार्थम्, **धारयन्ति** रक्षन्ति, धर्ममपि **मुक्तिकारणं** नित्यनिरतिशयानन्दरूपमुक्तिप्रयोजकम्, इति हेतोः, न त्वैहिकफलाय, **बहु** सुष्ठु, मन्यन्ते, **मुक्तिमपि** तदाख्यं सर्वोत्कृष्टपुरुषार्थमपि, **निरुत्सुकेन** औत्सुक्यशून्येनैव, चेतसा **अभिवाञ्छन्ति** स्पृहयन्ति, **ते** मुनयः, **कथं** कस्माद्धेतोः, **असारसांसारिकसुखप्राप्त्यर्थम्** असारं–तुच्छभूतम्, यत् सांसारिकं–लौकिकम्, सुखं–भोगविलासादिकम्, तत्प्राप्त्यर्थम्, **अनेकानर्थहेतुम्** अनेकेषां–कामक्रोधादीनाम्, अनर्थानाम्, हेतुं–जनकम्, **अर्थं** राज्यादिकम्, **गृह्णन्ति?** न कथमपि गृह्णन्तीत्यर्थः । **तेषां** मुनिजनानाम्, **परार्थसम्पादनमपि** परकीयप्रयोजननिष्पादनमपि, **धर्मोपदेशदानद्वारेण** धर्मोपदेशानुष्ठानद्वारैव, शास्त्रेषु **समर्थितं** निरूपितम्, **अन्यथा** धनदानद्वारा न, **तत्** तस्माद्धेतोः, **अत्र** राज्यादिग्रहणविषये, **निर्बन्धेन** आग्रहेण, **अलं** वृथा । **कथय** परिचायय, यत्, **तावदिति** वाक्यालङ्कारे, **उपहसितसुरलोकरामणीयका**

मुक्तामणिरात्मोत्पत्त्या स्पृहणीयतमतां नीतवानसि ?; का चेयं पुण्यभागिनी निरवद्यसर्वावयवा, निवासः सर्वेलक्षणानाम्, सिंहलद्वीपभूमिरिव रत्ननिवहस्य पात्रमकृत्रिमस्य विनयादिगुणगणस्य पार्श्ववर्तिनी भवतः ? किं चाभिधानमस्याः ?; किं निमित्तं च कोटरोदरनिमग्नदावाग्निमुर्मुर इव महाद्रुमः. मूललग्नकीट इव पङ्कजाकरः. देहनष्टराहुदंष्ट्राशकल इव निशाकरः. सान्तस्ताप इव लक्ष्यते भवान् ?. इयमपि च कल्याणी किमिति म्लानदेहा पाणितलसंक्रान्तकज्जलकलङ्कपिशुनिताश्रुप्रमार्जना सद्यो विरतेव रोदनाद् विज्ञायते; कच्चिन्न सम्पन्नः प्रयत्नसंरक्षितस्यार्थस्य कस्यचिदतर्कितो विनाशः ? कच्चिन्न जातः केनापि प्रेमैकनिबन्धनेन बन्धुना सह प्रवासादिकारणसुलभो विप्रलम्भः ? कच्चिन्न सम्भाविता दुर्लभता चिरं हृदि स्थापितस्य कस्यचिन्मनोरथस्य ? कथय यदि नातिरहस्यं श्रवणार्हं वाऽस्मद्विधानाम्' [ ख ] । इति कुतूहलाकृष्टेन पृष्टो महर्षिणा क्षोणिपतिरवोचत–'भगवन् ! सकलदुःखितप्राणिवत्सलानां परमवाङ्मनःकायसंयमवतां सर्वदा परोपकारप्रवणवृत्तीनां भवादृशामपि रहस्यम-

---

उपहसितं–तिरस्कृतम्, सुरलोकस्य–देवलोकस्य, रामणीयकं–सौन्दर्यं यया तादृशी, इयं नगरी का? । **च** पुनः, **अस्यां** नगर्याम्, **महाभागः** भाग्यवान्, त्वं कः ? । **च** पुनः, **अमरोद्यानवेणुम्** अमरोद्यानस्य–देवोपवनस्य, वेणुं–वंशकाण्डम्, मुक्तामणिरिव **आत्मोत्पत्त्या** स्वोत्पत्त्या, **कतमं** कम्, **महापुरुषवंशं** महापुरुषस्य–भाग्यशालिपुरुषस्य, वंशं–कुलम्, **स्पृहणीयतमताम्** अतिस्पृहणीयताम्, **नीतवानसि** प्रापितवानसि । **च** पुनः, **पुण्यभागिनी** सुकृतशालिनी, **निरवद्यसर्वावयवा** मनोहरनिखिलाङ्गा, **सर्वेलक्षणानां** सौभाग्याशेषचिह्नानां कलशादिरूपाणाम्, **निवासः** आश्रयः । **रत्ननिवहस्य** रत्नानां–मौक्तिकादीनाम्, निवहस्य–समूहस्य, सिंहलद्वीपभूमिरिव, **अकृत्रिमस्य** स्वाभाविकस्य, **विनयादिगुणगणस्य** विनयलज्जादिगुणसमूहस्य, **पात्रं** स्थानम् । एतावद्विशेषणविशिष्टा भवतः **पार्श्ववर्तिनी** वामपार्श्वोपवेशिनी, **इयं** स्त्री, का ? **अस्याः** स्त्रियाः, **अभिधानं** नाम, किम् ? । **च** पुनः, **किंनिमित्तं** केन हेतुना, भवान्, **सान्तस्ताप इव** अन्तस्तापेन–अन्तःखेदेन, सहित इव, **लक्ष्यते** मया प्रतीयते । क इव ? **कोटरोदरनिमग्नदावाग्निमुर्मुरः** कोटरोदरे-वृक्षगुहाभ्यन्तरे, निमग्नाः–विलीनाः, दावाग्नेः–दावानलस्य, मुर्मुराः–कणा यस्मिंस्तादृशः, **महाद्रुम इव** महावृक्ष इव । पुनः **मूललग्नकीटः** मूललग्नाः–मूलसम्बद्धाः, कीटा यस्य तादृशः, **पङ्कजाकर इव** कमलकाननमिव । पुनः **देहनष्टराहुदंष्ट्राशकलः** देहनष्टाः- देहे त्रुटिताः, राहुदंष्ट्राणां–राहुश्वतदन्तानाम्, शकलाः–खण्डा यस्य तादृशः, **निशाकर इव** चन्द्रमा इव । **च** पुनः, **कल्याणी** सौभाग्यवती, **इयमपि** भवत्पत्नी, **म्लानदेहा** मलिनाङ्गी, **पाणितलसंक्रान्तकज्जलकलङ्कपिशुनिताश्रुप्रमार्जना** पाणितले–हस्ततले, संक्रान्तं–संलग्नं यत् कज्जलं तदेव कलङ्कः–चिह्नं तेन पिशुनितं–सूचितम्, अश्रुप्रमार्जनम्–अश्रुप्रक्षालनं यस्यास्तादृशी, रोदनात् **सद्यः** तत्क्षणे, **विरता इव** निवृत्ता इव, **विज्ञायते** प्रतीयते । **प्रयत्नसंरक्षितस्य** प्रयाससंरक्षितस्य, **कस्यचित्** कस्यापि, **अर्थस्य** वस्तुनः, विभवस्य वा, **अतर्कितः** आकस्मिकः, विनाशः, **न सम्पन्नः** न जातः, **कच्चित्** किमु ?, "कच्चित् कामप्रवेदने" इत्यमरः । केनापि **प्रेमैकनिबन्धनेन** प्रेम्णः–प्रीतेः, एकनिबन्धनेन–अद्वितीयहेतुना, बन्धुना सह, **प्रवासादिकारणसुलभः** प्रवासादिकारणेन–देशान्तरनिवासादिकारणेन, सुलभः-अनायाससाध्यः, **विप्रलम्भः** विरहः, **कच्चित्** किमु ? । **हृदि** हृदये, चिरं **स्थापितस्य** धृतस्य, कस्यचित् **मनोरथस्य** अभिलाषस्य, **दुर्लभता** दुःसाधता, न **सम्भाविता** सम्भावनागोचरतां गमिता, **कच्चित्** किमु ? । यदि **अतिरहस्यम्** अतिगोपनीयं न, स्यादिति शेषः, **अस्मद्विधानाम्** अस्मत्सदृशानाम्, मुनीनामिति शेषः, **श्रवणार्हं** श्रवणयोग्यं स्यात्, तर्हि **कथय** प्रकाशय [ ख ] । **इति** इत्थम्, **कुतूहलाऽऽकृष्टेन** औत्सुक्यप्रेरितेन, **महर्षिणा** विद्याधरमुनिना, पृष्टः, **क्षोणिपतिः** राजा, **अवोचत्** तदुत्तरमुक्तवान्–भगवन् ! **सकलदुःखितप्राणिवत्सलानां** सकलानां–सर्वेषाम्, दुःखितप्राणिनाम्–आर्तजीवानाम्, वत्सलाः–त्राणपरायणाः, तेषाम्, **परमवाङ्मयमनःकायसंयमवतां** परमः–उत्कृष्टः, यः, वाचः, मनसः, कायस्य–शरीरस्य च, संयमः, तद्वताम्, **सर्वदा** सर्वस्मिन् काले, **परोपकारप्रवणवृत्तीनां** परोपकारप्रवणा–परोपकारोन्मुखा, वृत्तिः–वर्तनं येषां तादृशानाम्, **भवादृशानामपि** भवत्सदृशानामपि, **रहस्यं** गोप्यम्,

श्रवणार्हमस्ति ? एष विज्ञपयामि—असावस्य सकलस्यापि भारतवर्षस्य चूडालङ्कारभूता गोत्रराजधानी रघु-दिलीपदशरथप्रभृतीनां नराधिपानामयोध्याभिधाना पुरी प्रधानभूता सर्वनगरीणाम्, अहमपीक्ष्वाकुकुलसम्भवो भोक्ताऽस्य कियतोऽपि भारतक्षेत्रस्य वर्तमानक्षोणीपालापेक्षया भूयसा विभवेन भूयसा प्रभावेन भूयसा सेना-परिच्छदेन भूयस्या प्रभुशक्त्या भूयस्या च भूमण्डलावाप्त्या समेतो मेदिनीपतिर्मेघवाहनाख्यः, इयमप्युपजात-जन्मा महति मूर्धाभिषिक्तक्षत्रियाम्नाये माननीया समग्रस्यापि मत्परिग्रहस्य सर्वान्तःपुरप्रधानभूता मदिरावती नाम प्रेमपात्रं मे कलत्रम्; अनयास्माकमविकला त्रिवर्गसम्पत्तिः, अनुद्वेजको राज्यचिन्ताभारः, आकीर्णा महीस्पृहणीया भोगाः, सफलं यौवनम्, अजनितव्रीडः क्रीडारसः, अभिलषणीया विलासाः, प्रीतिदायिनो महोत्सवाः, रमणीयो जीवलोकः, माननीया मन्मथाज्ञा, पालनीया गृहस्थाश्रमस्थितिः; अस्वस्थताकारणं चावयोर्गुरुजनदेवताभक्त्यनुभावादनुदिनोपचीयमानसकलसंकल्पितार्थयोर्धनविसरकृतार्थीकृतेन ज्ञातिसार्थेन सकलकालमविरहितपार्श्वयोः प्रायेण नाल्पमप्यपरमस्ति मुक्त्वैकमनपत्यतादुःखम्, तत् तु दैवादतिशयेना-

---

**अश्रवणार्हं** श्रवणायोग्यम्, **अस्ति ?** नास्तीत्यर्थः, **एष** भवदभिमुखवर्ती, अहमिति शेषः, **विज्ञापयामि** भवज्जिज्ञासितं सर्वं बोधयामि । तथाहि—**सकलस्यापि** समग्रस्यापि, **अस्य** प्रत्यक्षभूतस्य, **भारतवर्षस्य** भरतक्षेत्रस्य, **चूडालङ्कारभूता** मस्तकालङ्कारभूता, रघु-दिलीप-दशरथप्रभृतीनाम्, **नराधिपानां** प्राचीनानां राज्ञाम्, **गोत्रराजधानी** कुलपरम्परागत-राजधानी, सर्वनगरीणाम्, **प्रधानभूता** श्रेष्ठा, **अयोध्याभिधाना** अयोध्यानाम्नी, असौ पुरी । **इक्ष्वाकुकुलसम्भवः** इक्ष्वाकुवंशोत्पन्नः, अहमपि, **कियतोऽपि** कतिपयभागावच्छिन्नस्य, भारतवर्षस्य, **भोक्ता** अधिकर्ता । **वर्तमानक्षोणी-पालापेक्षया** वर्तमानाः—साम्प्रतिका ये, क्षोणीपालाः—पृथ्वीपालाः, तदपेक्षया, **भूयसा** बहुतरेण, **विभवेन** धनेन, भूयसा **प्रभावेण** कोशदण्डतेजसा, भूयसा **सेनापरिच्छदेन** सेनायाः परिच्छदः—हस्त्यश्वरथादिरुपकरणम्, तेन, **भूयस्या** प्रचुर-तरया, **प्रभुशक्त्या** मन्त्रोत्साहशक्त्या, **भूयस्या च** महत्या च, **भूपमण्डलावाप्त्या** स्ववशवर्तिराजसमूहप्राप्त्या, **भूमण्ड-लेति** पाठे भूमण्डलस्य, आवाप्त्या-प्राप्त्या, स्वामितयेत्यर्थः, समेतः, **मेघवाहनाख्यः** मेघवाहननामा, **मेदिनीपतिः** भूपतिः, अस्मीति शेषः । **इयमपि** मत्पार्श्ववर्तिनी स्त्री, **महति** प्रशस्ते, **मूर्धाभिषिक्तक्षत्रियाम्नाये** मूर्धाभिषिक्तानां—मूर्धनि मस्त-केऽभिषिक्तानां कृताभिषेकाणाम्, अत्यादृतानामित्यर्थः, क्षत्रियाणाम्, आम्नाये-वंशे, **उपजातजन्मा** जातोत्पत्तिका, उच्चकुल-प्रसूतेत्यर्थः । **समग्रस्यापि** समस्तस्यापि, **मत्परिग्रहस्य** मत्परिवारस्य, **माननीया** आदरणीया, **सर्वान्तःपुरप्रधाना** सर्वस्मिन्–समग्रे, अन्तःपुरे–राजस्त्रीमण्डले, प्रधानभूता–श्रेष्ठा, मदिरावती, **नामेति** प्रसिद्धौ, **प्रेमपात्रं** स्नेहास्पदम्, **मे** मम, **कलत्रं** भार्या, अस्तीति शेषः । **अनया** मदिरावत्या, अस्माकम्, **त्रिवर्गसम्पत्तिः** त्रयाणां–धर्मार्थकामानाम्, वर्गः–समूहः, त्रिवर्गः, तद्रूपा सम्पत्तिः, **अविकला** परिपूर्णा । अनयेत्यस्य प्रतिवाक्यं सम्बन्धाद् अनया राज्यचिन्ताभारः, **अनु-द्वेजकः** उद्वेगाजनकः, **महीस्पृहणीयाः** मह्यां–पृथिव्याम्, स्पृहणीयाः–अभिलषणीयाः, भोगाः, अनया **आकीर्णाः** पुञ्जिताः, यद्वा आकीर्णा मही स्पृहणीयाश्च भोगा इति । **यौवनं** मत्तारुण्यम्, अनया, **सफलं** फलसहितम् । **अजनितव्रीडः** अजनिता–अनुत्पादिता, व्रीडा–लज्जा येन तादृशः, अनया, **क्रीडारसः** खेलनानन्दः, भवति । अनया **विलासाः** "गति-स्थानासनादीनां मुखनेत्रादिकर्मणाम् । विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना" ॥ इति परिभाषितचेष्टाविशेषाः, **अभिलषणीयाः** स्पृहणीयाः । अनया **महोत्सवा** नृत्यादिरूपाः, **प्रीतिदायिनः** प्रीतिजनकाः । अनया **जीवलोकः** मर्त्यलोकः, **रमणीयः** मनोहरः, अस्तीति शेषः । अनया **मन्मथाज्ञा** कामदेवाज्ञा, **माननीया** आदरणीया, भवतीति शेषः । अनया **गृहस्था-श्रमस्थितिः** गृहस्थाश्रममर्यादा, **पालनीया** रक्षणीया, भवतीति शेषः । **आवयोः** दम्पत्योः, **अस्वस्थताकारणं च** अस्वस्थताहेतुस्तु, एकम्, **अनपत्यतादुःखं** सन्तानशून्यतादुःखम्, **मुक्त्वा** त्यक्त्वा, प्रायेण **अल्पमपि** किञ्चिदपि, **अपरम्** अन्यद्, दुःखमिति शेषः, नास्ति । कीदृशयोरावयोः ? **गुरुजनदेवताभक्त्यनुभावात्** गुरुजने देवतायां च या, भक्तिः–प्रीतिः, तदनुभावात्–तत्प्रभावात्, **अनुदिनोपचीयमानसकलसंकल्पितार्थयोः** अनुदिनं–प्रतिदिनम्; उपचीयमानाः–वर्धमानाः, सकलाः–समग्राः, संकल्पितार्थाः–अभिलषितार्था ययोस्तादृशयोः । पुनः **धनविसरकृतार्थीकृतेन** धनविसरेण–धनसमूहेन, कृतार्थीकृतेन–सन्तोषितेन, **ज्ञातिसार्थेन** आत्मीयजनतया, सर्वकालम्, **अविरहितपार्श्वयोः** अत्यक्तपार्श्वयोः ।

सह्यतां गतम्; तथाहि—अशक्यप्रतीकारेण प्रतिक्षणमनेन जनिततीव्रहृदयव्यथावेगयोरेकशयनवर्तिनोरपि प्रवासगतयोरिवानवेक्षितपरस्परयोरधिकदुःसहैः श्वासदहनोष्मभिरर्धपथदग्धदीपानुसारिविलासवलभीशलभसङ्घाः प्रलघवोऽपि शतयामा इव प्रयान्ति नौ विभावर्यः, एवं च यत् समादिष्टं तदुदितम् [ग] । रुदितनिमित्तमप्यमुष्याः कथयामि—अद्य क्षपाचरमयामे क्षणमात्रलब्धक्षीणनिद्रोऽहमासादितावसरेण यामाङ्गरक्षेणेव समुपेत्य सत्वरमपत्यचिन्ताज्वरेण विहितसान्निध्यो बौद्ध इव सर्वतः शून्यदर्शी सन्तानसिद्ध्यर्थमात्मनस्तांस्तानुपायानितस्ततोऽन्वेषयन्नुषःकालकृत्यविदनाय प्रविष्टेन बन्दिना मसृणमुपगीयमानमिदमपरवक्त्रमश्रृणवम्—

"विपदिव विरता विभावरी निरपायमुपास्स्व देवताः ।
उदयति भुवनोदयाय ते कुलमिव मण्डलमुष्णदीधितेः" ॥

---

**बौद्ध इव शून्यदर्शी** विचार्यमाणं न किञ्चिद् वस्तु अवयवावयविरूपमस्तीति पश्यति, **सन्तानसिद्ध्यर्थमात्मनस्तांस्तानुपायानितस्ततोऽन्वेषयन्** आत्मनः—जीवस्य, ज्ञानलक्षणप्रवाहसाधनोपायान् युक्तिकलापान् अन्वेषयति—अन्यत्र पुत्राभावात् सर्वं शून्यं पश्यति, आत्मनः—स्वस्य, अपत्यसन्ततेः, उपायान्—हेतून्, अन्वेषयति [ घ ] । प्रतीक्ष्यः—

---

**तत्तु** अनपत्यतादुःखं तु, **दैवात्** दुर्भाग्यवशात्, **असह्यतां** सोढुमशक्यताम्, **गतं** प्राप्तम् । तदेव दर्शयति—**तथाहि । अशक्यप्रतीकारेण** अशक्यः—स्वकृत्यसाध्यः, प्रतीकारः—निवृत्त्युपायो यस्य तादृशेन, **अनेन** अनपत्यतादुःखेन, **प्रतिक्षणं** प्रत्येकक्षणम्, **जनिततीव्रहृदयव्यथावेगयोः** जनितः, तीव्रः—निरतिशयः, हृदयव्यथायाः—अन्तस्तापस्य, वेगः—प्रादुर्भावो ययोस्तादृशयोः, **नौ** आवयोः, **एकशयनवर्तिनोरपि** एकशय्याशयानयोरपि, **प्रवासगतयोरिव** देशान्तरं गतयोरिव, **अनवेक्षितपरस्परयोः** अन्योऽन्यदर्शनसौभाग्यशून्ययोः । अधिकदुस्सहैः **श्वासदहनोष्मभिः** श्वासाग्नितापैः, **अर्धपथदग्धदीपानुसारिविलासवलभीशलभसङ्घाः** अर्धपथे—दीपागमनमार्गार्ध एव, दग्धः—भस्मीकृतः, दीपानुसारी—दीपानुधावी, विलासवलभीशलभानां—विलासभवनभित्तिमस्तकस्थवक्रकाष्ठाधिष्ठितपतङ्गानाम्, सङ्घो यासु तादृश्यः, **प्रलघवोऽपि** अत्यल्पा अपि, **विभावर्यः** रात्रयः, **शतयामा इव** शतं यामाः—प्रहरा यासां तादृश्य इव, **प्रयान्ति** व्यतियन्ति, विलम्बेन व्यतियन्तीति भावः । **एवं च** अनेन प्रकारेण च, **यत् समादिष्टं** यद् वक्तुमाज्ञप्तम्, तद्, **उदितम्** उक्तम् [ ग ] ।

**अमुष्याः** मदिरावत्याः स्वपत्न्याः, **रुदितनिमित्तमपि** रोदनकारणमपि, **कथयामि** निवेदयामि । **अद्य** अस्मिन् दिने, **क्षपाचरमयामे** क्षपायाः—रात्रेः, चरमे—अन्तिमे, यामे—प्रहरे, "द्वौ याम-प्रहरौ समौ" इत्यमरः, **क्षणमात्रलब्धक्षीणनिद्रः** क्षणमात्रं—किञ्चित्कालमात्रम्, लब्धा—प्राप्ता, क्षीणा—शाश्वतिकचिन्ताकृशा निद्रा येन तादृशः, क्षपापदादि-निद्रापदान्तैकसमासपाठकल्पे तु क्षपाचरमयामे ईक्षणमात्रेण—नयनमात्रेण, न त्वन्तःकरणेन, चिन्तात्मकवृत्तियोगेन तस्य तदानीमपि जागृतत्वादिति भावः, लब्धा निद्रा येन तादृशः, स्वप्नावस्थ इत्यर्थः, अहम्, **आसादितावसरेण** प्राप्तावसरेण, **यामाङ्गरक्षेणेव** यामे—एकैकप्रहरे, अङ्गं—राज्ञः, शरीरं रक्षति यः स यामाङ्गरक्षः, तेनेवेत्युत्प्रेक्षा, **अपत्यचिन्तासंज्वरेण** सन्तानचिन्तासन्तापेन, "सन्तापः संज्वरः समौ" इत्यमरः, **सत्वरं** शीघ्रं **समुपेत्य** समुपागत्य, **विहितसान्निध्यः** विहितं—कृतम्, सान्निध्यं—सामीप्यं यस्य तादृशः सन्, **बौद्ध इव** बुद्धानुगामीव, **सर्वतः** परितः, **शून्यदर्शी** पुत्राभावेन सर्वं शून्यमिव पश्यतीति तथाभूतः, पक्षे नीलादीनां ज्ञानाकारतयैव सिद्ध्या बाह्यवस्तूनामसत्त्वेन, शून्यं—बाह्यवस्तुशून्यं तत्तदाकारविज्ञानमयमेव, जगत्, पश्यति यः स तथाभूतः, **आत्मनः** स्वस्य, **सन्तानसिद्ध्यर्थं** सन्ततेरुत्पत्त्यर्थम्, पक्षे **आत्मनो** जीवस्य, विज्ञानधारोपपत्त्यर्थम्, **तांस्तान्** नानाविधान्, **उपायान्** सहोपलम्भनियमादियुक्तिसमूहम्, पक्षे कारणानि, **अन्वेषयन्** वितर्कयन्, **उषःकालकृत्यावेदनाय** प्राभातिककार्यक्रमोद्बोधनाय, **प्रविष्टेन** स्वशयनागारद्वारमागतेन, **बन्दिना** स्तुतिपाठकेन, **उपगीयमानम्** उप-समीपे, सुस्वरेण पठ्यमानम्, **इदम्** अनुपदवक्ष्यमाणानुपूर्वीकम्, **अपरवक्त्रं** तत्संज्ञकच्छन्दोविशेषबद्धं पद्यम्, **अश्रृणवं** श्रुतवान् । **नृप !** भो राजन् !, **ते** तव, **विपदिव** विपत्तिरिव, सुतसौभाग्यशून्यत्वापत्तिरिवेत्यर्थः, **विभावरी** रात्रिः, **विरता** व्यतीता, "विभावरी-तमस्विन्यौ रजनी यामिनी तमी" इत्यमरः, तव सन्तानाभावसमयो व्यतीत इति यावत्, कुत इत्याह—यतः तव कुलमिव **उष्णदीधितेः** सूर्यस्य, मण्डलं **भुवनोदयाय** जगत्प्रकाशनाय, पक्षे जगद्वर्धनाय,

श्रुत्वा चोपजातहर्षश्चिन्तितवान्—'अहो महात्मनाऽनेन मागधपुत्रेण यदृच्छयाऽपि गायतेदमपरवक्त्रमावेदितः करणीयमूढस्य मे कार्यसिद्ध्युपायः, तदिदमेवाङ्गीकरोमि सारस्वतमस्योपदेशवचनम्, आराधयामि गत्वाऽरण्यमुपनतशरण्यां कामपि प्रख्यातां देवताम्' इति, उत्थाय च यथाक्रियमाणं पौर्वाह्णिकानुष्ठानमनुष्ठायाधिरुह्यान्तःपुरप्रासादमिममस्याश्चित्रशालिकायाः प्राङ्गणवितर्दिकोपविष्टां समाश्लिष्य देवीमिदं सदुःखमवदम्—'देवि ! त्वदपत्यसन्ततिनिमित्तमितो मया गत्वाऽरण्यमा वरप्रदानाद् देवताराधनं कर्तुमध्यवसितम्, यावच्च सिद्धप्रयोजनोऽहमागच्छामि तावत् त्वया शुश्रूषमाणया गुरुजनमिह स्थातव्यम्' इति, निशम्य चेदमश्रुतपूर्वमतिदुःसहं वचनमस्माकमकस्मादेव मूर्च्छितेयम्, उच्छन्नसंज्ञा च तिर्यक् पतन्ती सत्वरेणोपसृत्य धारिता परिजनेन, स्थित्वा च क्षणं समाश्वस्ता, निःश्वस्य चातिदीर्घमिदमपारदुःखभारभज्यमानगलसरण्या गदितमनया स्वरेण गद्गदेन स्वैरम्—'आर्यपुत्र ! सन्तानकार्यसिद्धये तव प्रस्थितस्य नाहं प्रतिपन्थिनी, किन्तु पुनरिदं विज्ञापयामि—

---

**उदयति** आविर्भवति, पक्षे सन्तत्या वर्धते, वर्धनोन्मुखमास्त इत्यर्थः, अतस्तत्प्रत्यूहापनोदनाय, **निरपायं** निरुपद्रवं यथा स्यात्तथा, **देवताः** स्वेष्टदेवान्, **उपास्स्व** आराधय । **श्रुत्वा च** तथा निशम्य च, **उपजातहर्षः** उत्पन्नानन्दः, **चिन्तितवान्** आलोचितवान्, अहमिति शेषः । किमित्याह—**अहो** इत्याश्चर्ये, **अनेन** निकटस्थितेन, **महात्मना** अतीतानागतादिज्ञात्रा, **मागधपुत्रेण** बन्दिसुतेन, **इदं** श्रूयमाणम्, **अपरवक्त्रं** तत्संज्ञकच्छन्दोविशेषम्, **यदृच्छयाऽपि** स्वेच्छयाऽपि, गायता, **करणीयमूढस्य** कर्तव्यमूढस्य, **मे** मम, **कार्यसिद्ध्युपायः** कार्यस्य-पुत्रोत्पत्तिरूपस्य, सिद्धेः, उपायः–देवतोपासनरूपः, **आवेदितः** ज्ञापितः, "स्युर्मागधास्तु मगधा बन्दिनः स्तुतिपाठकाः" इत्यमरः । **तत्** तस्माद्धेतोः, **इदमेव** श्रूयमाणमेव, **अस्य** मागधपुत्रस्य, तदुच्चारितमित्यर्थः, **सारस्वतं** सरस्वत्या उपदेशवचनम्, देवतोपासनोपदेशवाक्यम्, **अङ्गीकरोमि** तदनुसारमनुतिष्ठामीत्यर्थः । **अरण्यं** वनम्, गत्वा, **उपनतशरण्याम्** उपनतानां–स्वाश्रितानाम्, शरण्यां–शरणे रक्षणे साधुः–शरण्यः, तादृशीम्, **प्रख्यातां** प्रसिद्धाम्, देवताम् आराधयामीति । **उत्थाय च** अनेन संकल्पेन शयनादपसृत्य च, **यथाक्रियमाणं** क्रियमाणमनतिक्रम्य, नित्यकृत्यरूपमिति यावत्, **पौर्वाह्णिकानुष्ठानम्** अह्नः पूर्वं पूर्वाह्णः, दिवसप्रथमभागः, तत्र भवं पौर्वाह्णिकम्, तादृशम्, अनुष्ठानं–कृत्यम्, **अनुष्ठाय** कृत्वा, **इमं** प्रत्यक्षभूतम्, **अन्तःपुरप्रासादं** राज्ञीनिकेतनम्, **अधिरुह्य** आरुह्य, **अस्याः** प्रत्यक्षभूतायाः, **चित्रशालिकायाः** चित्रवर्णशालायाः, **प्राङ्गणवितर्दिकोपविष्टां** प्राङ्गणे या वितर्दिका–वेदिका, तस्यामुपविष्टाम्, "स्याद् वितर्दिस्तु वेदिका" इत्यमरः । **देवीं** राज्ञीम्, मदिरावतीमित्यर्थः, **समाश्लिष्य** सम्यगालिङ्ग्य, **सदुःखं** दुःखपूर्वकम्, **इदं** स्वसंकल्पादिवाक्यम्, **अवदम्** उक्तवान् । किमित्याह—**देवि !** राज्ञि !, **त्वदपत्यसन्ततिनिमित्तं** तवापत्यसन्ततिः–अपत्यसमूह एव, निमित्तं–फलविधया कारणं यस्मिंस्तादृशं यथा स्यात्तथा, यद्वा त्वदपत्यसन्ततेः, निमित्तं–प्रयोजकं यथा स्यात्तथा, **इतः** अस्मात् स्थानात्, **अरण्यं** तपोवनम्, गत्वा, **आ वरप्रदानात्** पुत्रात्मकवरदानपर्यन्तम्, मया, **देवताराधनं** देवतोपासनम्, **कर्तुम्** अनुष्ठातुम्, **अध्यवसितं** निश्चितम्, **यावच्च** यावत्कालम्, **सिद्धप्रयोजनः** प्राप्तवरः, अहम्, आगच्छामि, **तावत्** तावत्कालम्, **त्वया** भवत्या, **गुरुजनं** श्वश्रूप्रभृतिम्, **शुश्रूषमाणया** निषेवमाणया, **इह** अत्रैव, **स्थातव्यं** निवसनीयम् । **इदम्** उच्यमानम्, **अश्रुतपूर्वं** पूर्वं कदाऽप्यश्रुतम्, **अतिदुःसहं** विश्लेषावेदकत्वेन दुःश्रवम्, अस्माकम् **वचनं** वनगमनवाक्यम्, **निशम्य च** श्रुत्वा च, **अकस्मादेव** हेतुविशेषव्यतिरेकेणैव, **इयं** मदिरावती, **मूर्च्छिता** मूर्च्छामवाप्तवती, **उच्छन्नसंज्ञा च** विध्वस्तचैतन्या च सती, **तिर्यक्** कुटिलम्, **पतन्ती** अधो लुठन्ती, **सत्वरेण** त्वराशालिना, **परिजनेन** स्वजनेन, **उपसृत्य** समीपमेत्य, **धारिता** अवलम्बिता, **च** पुनः, **क्षणं** किञ्चित् कालम्, **स्थित्वा** स्थैर्यमाश्रित्य, **समाश्वस्ता** प्रत्यावृत्तचैतन्या, समजनि, अतिदीर्घं निःश्वस्य च चैतन्यप्रत्यावृत्त्या महान्तं निःश्वासं गृहीत्वा च, **अपारदुःखभारभज्यमानगलसरण्या** अपारस्य-अनन्तदुःखस्य, भारेण, भज्यमाना-विदार्यमाणा, गलसरणिः–कण्ठध्वनिमार्गो यस्यास्तादृश्या, भिद्यमानकण्ठयेत्यर्थः, **अनया** मदिरावत्या, **गद्गदेन** विश्लेषवेदनयाऽव्यक्तेन, स्वरेण, **स्वैरं** स्वतन्त्रं यथा स्यात्तथा, **इदम्** अनुपदवक्ष्यमाणवाक्यम्, **गदितं** प्रतिपादितम् । **आर्यपुत्र !** राजकुमार !, **सन्तानकार्यसिद्धये** सन्तानस्य–पुत्रात्मकस्य,

यथा तव तथा ममाप्याराधनीया देवता, एवं च कस्मात् परित्यज्य मामेक एव व्रजसि वनम्, अथ मन्यसे मदीयाराधनेनैव सिद्धं तवाराधनमिति कस्यात्र सन्देहः, किन्त्विदानीं त्वमुज्झितापरान्तःपुरिकासमीहितो मत्कृते व्रतं चरिष्यसीति वचनशतैरपि न प्रत्येमि, न च त्वया विरहिता मुहूर्तमपि स्थातुं शक्नोमि, तदवश्यं मयापि गन्तव्यमरण्यम्, अवमन्य चेदं गच्छसि मां गच्छ, सिध्यतु तवाभीष्टम्, दृष्टस्त्वमधुनैव' इत्यभिदधाना ललाटविलुलितविशृङ्खलालकपद्धतिरधोमुखीभूता, भूयोऽप्यनुबध्यमानया च निःशब्दमवर्जिताब्दजलधारैरश्रुधारै रुदितमनया, न पुनः किञ्चिदुदितम् [ घ ]। तदियमस्थान एवात्मानुगमनेन कुर्वती मे गमनभङ्गं भगवतोऽपि युज्यते वक्तुं यथायुक्तम्' इत्युक्तवति पार्थिवे चित्तपरिभाविततदीयोपतापदत्तोद्वेगो मुनिस्तत्क्षणमेव योगनिद्रामगात्। उन्मुद्रितेक्षणश्चानतिचिरेण सप्रहर्षो नृपमुवाच—

'राजन्! भुक्तभूयिष्ठमधुना वर्तते तवापत्यसन्ततिप्रतिबन्धकमदृष्टम्, अतो मनसि धृतिमाधेहि, मा विधाः स्वल्पमपि विषादम्, मा समुत्पादय चित्तखेदमस्याः सदा सुखोचिताया निजप्रणयिन्याः प्रतिकूला-

---

कार्यस्य, सिद्धये-निष्पत्तये, **प्रस्थितस्य** कृतारण्यप्रस्थानस्य, तव, अहं न **प्रतिपन्थिनी** प्रतिबन्धिनी। **किञ्च** किन्तु, पुनः, इदं **विज्ञापयामि** बोधयामि। किमित्याह—**यथा** येन प्रकारेण, तव देवता आराधनीया, **तथा** तेन प्रकारेण, ममापि। **एवं च** एवं सति च, **कस्मात्** कुतः कारणात्, मां **परित्यज्य** इहैव त्यक्त्वा, **एक एव** एकाक्येव, वनं **व्रजसि** गच्छसि। अथ चेद् **मदीयाराधनेनैव** मत्कर्तृकाराधनयैव, **तवाराधनं** त्वत्कर्तृकाराधनम्, सिद्धम्, आवयोरभेदात्, **इति मन्यसे**, **अत्र** अस्मिन् विषये, **कस्य सन्देहः?** न कस्यापीत्यर्थः, किन्तु **उज्झितापरान्तःपुरिकासमीहितः** उज्झितं-त्यक्तम्, अपरान्तःपुरिकाणाम्-अन्यराज्ञीनाम्, समीहितम्-अभिलषितं येन तादृशस्त्वम्, इदानीं **मत्कृते** मदर्थमेव, व्रतं-देवताराधनम्, **चरिष्यसि** आचरिष्यसि, इति **वचनशतैरपि** शपथवाक्यशतैरपि, न **प्रत्येमि** विश्वसिमि। **न च** नापि, त्वया **विरहिता** त्यक्ताऽहम्, **मुहूर्तमपि** क्षणमपि, **स्थातुं** जीवितुम्, **शक्नोमि** प्रभवामि। **तत्** तस्मात्, मयाऽपि, **अरण्यं** वनम्, **अवश्यं** निश्चितमेव, गन्तव्यम्। **चेत्** यदि, माम्, **अवमन्य** उपेक्ष्य, गच्छसि गच्छ। तव, **अभीष्टम्** अभिलषितम्, सिध्यतु। **अधुनैव** इदानीमेव, त्वं **दृष्टः** मया स्वदृष्टिगोचरतां नीतः, त्वत्प्रयाणोत्तरं ममापि लोकान्तरप्रयाणावश्यम्भावेन पुनर्दर्शनासम्भवात्, मत्त्यागस्वभावोऽधुनैव त्वं ज्ञातो मया न पुरेति वार्थः। **इति** इत्थम्, **अभिदधाना** कथयन्ती, **ललाटविलुलितविशृङ्खलालकपद्धतिः** ललाटे-भालस्थले, विलुलिता-विक्षिप्ता, विशृङ्खला-विमुक्तबन्धना, अलकपद्धतिः-केशश्रेणिर्यस्यास्तादृशी सती, **अधोमुखीभूता** अवनतमस्तका जाता। **भूयोऽपि** पुनरपि, **अनुबध्यमानया च** वक्तुमनुरुध्यमानया च, **निषिध्यमानया** चेति पाठे वनगमनान्निवार्यमाणया चेत्यर्थः, **अनया** मदिरावत्या, **निःशब्दम्** अन्यानवगतये शब्दरहितं यथा स्यात्तथा, **अवर्जिताब्दजलधारैः** अवर्जिता-तिरस्कृता, अब्दस्य-मेघस्य, जलधारा यैस्तादृशैः, **अश्रुधारैः** नयनजलधारैः, **रुदितं** रोदनं कृतम्, पुनः न **किञ्चित्** किमपि, **उदितम्** उक्तम् [ घ ]।

**तत्** तस्मात्, **अस्थाने एव** अनवसरे एव, **आत्मानुगमनेन** स्वानुव्रजनाग्रहेण, **मे** मम, **गमनभङ्गं** गमननिरोधम्, कुर्वती, **इयं** मदिरावती, **भगवतोऽपि** तवापि विद्याधरमुनेः, **यथायुक्तं** यथोचितम्, **वक्तुं** किमपि कथयितुम्, **युज्यते** योग्या वर्तते। **इति** इत्थम्, **पार्थिवे** राज्ञि, **उक्तवति** निवेदितवति, मुनिः **चित्तपरिभावितदीयोपतापदत्तोद्वेगः** चित्तेन-मनसा, परिभावितः-समालोचितो यः, तदीयोपतापः-तत्सम्बन्धी उपतापः-अपत्याभावदुःखम्, तेन दत्तः-जनितः, उद्वेगः-उद्भ्रमः, हृदयसम्भ्रम इति यावत्, यस्य तादृशः सन्, "उद्वेग उद्भ्रमे" इत्यमरः; **तत्क्षणमेव** नृपनिवेदनसमय एव, **योगनिद्रां** समाधिरूपनिद्राम्, **अगात्** प्राप्तवान्। **च** पुनः, **अनतिचिरेण** अनतिविलम्बेन, **उन्मुद्रितेक्षणः** उन्मीलितलोचनः सन्, **सप्रहर्षः** प्रकृष्टहर्षसहितः, नृपम्, **उवाच** वक्ष्यमाणमाश्वासनवाक्यं कथयामास। किमित्याह—राजन्! अधुना तव, **अपत्यसन्ततिप्रतिबन्धकम्** अपत्योत्पत्तिप्रतिरोधकम्, **अदृष्टं** दुरितविशेषः, **भुक्तभूयिष्ठं** भुक्ता भूयिष्ठा बहुतरा अंशा यस्य तादृशम्, **वर्तते** अवशिष्यते। **अतः** अस्माद्धेतोः, **मनसि** हृदि, **धृतिं** धैर्यम्, **आधेहि** जनय, **स्वल्पमपि** अत्यल्पमपि, **विषादम्** अपत्याभावदुःखम्, **मा विधाः** न कुरु। **सदा** सर्वकाले, **सुखोचितायाः** सुखयोग्यायाः,

चरणेन, **मुञ्चारण्यगमनस्पृहाम्**, गृहावस्थित एव कुरु देवताराधनम्, अर्पय समस्तस्यापि वनवासोचितस्य क्लेशस्याङ्गम्, अङ्गीकुरु मुनिव्रतक्रियाम्। किं ते दूरवर्तिनीभिरपराभिर्दुराराध्याभिर्देवताभिः; इमामेव प्रकृतिसौम्यां सततसन्निहितामुपास्स्व सकलक्षितिपालकुलदेवतां राजलक्ष्मीम्, इयं हीक्ष्वाकुभरतभगीरथादिभूपालपराक्रमक्रीता त्वदन्वयनिसर्गपक्षपातिनी त्वया सकलभुवनप्रतीक्ष्येण शुचिना धार्मिकेण निगृहीतेन्द्रियवृत्तिना दृढभक्तिनात्युदाराशयेन प्रमादपरिहारिणा कालोचितज्ञेन प्रक्रमप्रकटितक्षात्रतेजसा विधिवदाराध्यमाना नियमात् प्रसादं गमिष्यति, अभिमतार्थविषयं च वरमचिरेण वितरिष्यति [ ङ ]। अमूं च भक्तिप्रवणेन चेतसा गृहाण निर्विकल्पमल्पपुण्यजनदुर्लभां त्रिभुवनख्यातयशसमपराजिताभिधानामशेषविद्याधरेन्द्रवन्दितां विद्याम्, कुरु दिवसस्य रात्रेश्च भागत्रयमशून्यं देवतार्चनेन, अवसाने च तस्य जप जप्यचरितसमाहितेन

---

**टिप्पनकम्**—प्रतीक्ष्यः-पूज्यः [ ङ ]।

---

**अस्याः** पुरोवर्तिन्याः, **निजप्रणयिन्याः** स्वप्रियायाः, **प्रतिकूलाचरणेन** अनभिमताचरणेन, **चित्तखेदं** हृदयविषादम्, **मा समुत्पादय** न जनय। **अरण्यगमनस्पृहां** वनगमनकामनाम्, **मुञ्च** त्यज। **गृहावस्थित एव** निजनिकेतने स्थित एव, **देवताराधनं** स्वेष्टदेवतोपासनं कुरु। **समस्तस्यापि** सर्वस्यापि, **वनवासोचितस्य** वनवासभोग्यस्य, **क्लेशस्य** कष्टस्य, **अङ्गं** तादृशकष्टसहनक्षमं शरीरम्, **अर्पय** समर्पय, गृहे स्थित्वैव वनवासोचितनियमान् सहस्वेत्यर्थः। **मुनिव्रतक्रियां** मुनिव्रतानां–तपोयोग्योपवासादिनियमानाम्, क्रियाम्–अनुष्ठानम्, **अङ्गीकुरु** स्वीकुरु। **दूरवर्तिनीभिः** अरण्यरूपदूरस्थानस्थाभिः, **दुराराध्याभिः** दुःखेनाराधनीयाभिः, **अपराभिः** स्वराज्यलक्ष्या अन्याभिः, देवताभिः, **ते** तव, **किम्?** न किमपि प्रयोजनमिति भावः। **प्रकृतिसौम्यां** निसर्गमनोहराम्, **सततसन्निहिताम्** अनवरतं समीपगाम्, **सकलक्षितिपालकुलदेवतां** सकलानां–सर्वेषाम्, क्षितिपालानां–नृपाणाम्, **कुलदेवतां** कुलपरम्परोपास्यदेवताम्, **इमां** प्रत्यक्षभूताम्, **राजलक्ष्मीं** राजसम्पत्तिमेव, राजसम्पदधिष्ठात्रीं लक्ष्मीनाम्नीं देवीमेवेत्यर्थः, **उपास्स्व** आराधय। **हि** यतः, **इक्ष्वाकु-भरत-भगीरथादिभूपालपराक्रमक्रीता** इक्ष्वाकु-भरत-भगीरथादयो ये, भूपालाः–प्राचीननृपतयः, तेषां पराक्रमेण–सामर्थ्येन, क्रीता–अर्जिता वशीकृतेत्यर्थः। **त्वदन्वयनिसर्गपक्षपातिनी** त्वदन्वयस्य–त्वद्वंशस्य, निसर्गेण–स्वभावेन, पक्षपातिनी–प्रणयिनी। **इयं** राजलक्ष्मीः। **सकलभुवनप्रतीक्ष्येण** निखिलजगतः, प्रतीक्ष्येण–पूज्येन, **शुचिना** पवित्रेण, **धार्मिकेण** धर्माचारिणा, **निगृहीतेन्द्रियवृत्तिना** वशीकृतेन्द्रियव्यापारेण, **दृढभक्तिना** पूजनीयजनविषयकस्थिरप्रीतिशालिना, **अत्युदाराशयेन** परमोच्चहृदयेन, **प्रमादपरिहारिणा** प्रमादमनवधानतां परिहर्तुं शीलमस्य तादृशेन, प्रमादशून्येन, **कालोचितज्ञेन** यस्य कालस्य यत् कार्यमुचितं योग्यं तदभिज्ञेन, इदमस्मिन् काले कर्तव्यमित्येतादृशप्रज्ञासम्पन्नेनेत्यर्थः, **प्रक्रमप्रकटितक्षात्रतेजसा** प्रक्रमेण–क्रमशः, यद्वा प्रक्रमे–अवसरे, प्रकटितम्–आविष्कृतम्, क्षात्रतेजः–क्षत्रस्येदं क्षात्रम्, क्षत्रियसम्बन्धि, तेजः–सामर्थ्यं शौर्यमित्यर्थः, येन, यद्वा क्षात्रेषु–"शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्" ॥ इति गीतागीतेषु क्षत्रियसम्बन्धिकर्मसु, तेजः–पराक्रमो येन तादृशेन त्वया, यद्वा प्रक्रमे–देवताराधनावसरे, प्रकटितं–नानोपद्रवोपनिपातेऽप्यविचलतया प्रकाशितम्, क्षात्रतेजः–क्षत्रियपरम्परागतप्रौढसामर्थ्यं येन तादृशेन त्वया, **विधिवत्** शास्त्रोक्तक्रमेण, **आराध्यमाना** उपास्यमाना सती, **नियमात्** निश्चयेन, **प्रसादं** प्रसन्नताम्, **गमिष्यति** अनुभविष्यति। **च** पुनः, **अभिमतार्थविषयम्** अभिमतः–अभिलषितो योऽर्थः–पुत्ररूपः, तद्विषयं–तज्जनकम्, **वरम्** आशीर्वाक्यम्, **अचिरेण** अविलम्बेन, **वितरिष्यति** दास्यति [ ङ ]। **च** पुनः, **अल्पपुण्यजनदुर्लभाम्** अल्पं–परिमितम्, पुण्यं–सुकृतं येषां तादृशैर्जनैः, दुर्लभां–दुष्प्रापाम्, **त्रिभुवनख्यातयशसं** लोकत्रयप्रसिद्धप्रभावाम्, **अशेषविद्याधरेन्द्रवन्दिताम्** अशेषैः–समस्तैः, विद्याधरेन्द्रैः–विद्याधरश्रेष्ठैः, वन्दिताम्–आदृताम्, **अपराजिताभिधानां** न पराजिता कदाचिदन्यविद्ययेत्यपराजिता, अभिधानम्–अन्वर्थनामधेयं यस्यास्तादृशीम्, **अमूम्** अनुपदमुपदेक्ष्यमाणाम्, **विद्यां** देवीसमधिष्ठितमन्त्ररूपाम्, **भक्तिप्रवणेन** प्रीतिपूर्णेन, चेतसा, **निर्विकल्पं** ग्रहीतव्यत्वसंशयशून्यं यथा स्यात्तथा, **गृहाण** अवधारय। **दिवसस्य** दिनस्य, रात्रेश्च, **भागत्रयं** प्रातर्मध्याह्नसायंरूपान् प्रदोषनिशीथोषचन्द्ररूपांश्चैन् भागान्, **देवतार्चनेन** देवतापूजनेन,

चेतसा भक्तिमज्जनैकचिन्तामणिमिमाम्, अतिमहाप्रभावा ह्यसौ प्रयत्नवता पुरुषविशेषेण सततमाराध्यमाना नास्ति तत् फलं यन्न साधयति, फलाभिमुखीभूता च त्रिलोकीपतेः पुरन्दरस्यापि चेतो विधेयीकरोति, किमुतापरासां देवतानाम् । केवलं कर्तव्येषु दृढमप्रमादिना भवितव्यम्, आलोचितव्यं च सम्यक्प्रज्ञया प्रस्तावोचितमनुष्ठानम्, प्रज्ञोद्यमावरणिमन्थाविव हविर्भुजः पितरौ कार्यसिद्धेः, तौ हि पुरुषव्यापारानुगृहीतौ नास्ति तद् वस्तु यन्न साधयतः' [ च ] इत्यभिधाय कृतपार्श्वावलोकनो विहितमन्त्रदेवतानुध्यानविधिर्विधाय नरपतेरात्मनश्च वपुषि रक्षामन्त्राक्षरमयं कवचमुपकर्णमूलमनुच्चैरुच्चरिताक्षरपदस्तां विद्यां न्यवेदयत् । राजाऽपि सविनयाबद्धकरसम्पुटः श्रद्धावता हृदयेन परमनुगृहीतमात्मानं मन्यमानो विधानतस्तां जग्राह, संज्ञादिष्टपरिजनसम्पादितैश्च सामान्यमनुजेश्वरगृहदुर्लभैः पुष्पैः फलैः पत्रैरंशुकै रत्नाभरणैश्च भूरिभिः परमया भक्त्या रोमाञ्चिततनुर्मुनिमर्चयाञ्चकार [ छ ] । विरते च पूजाया राजनि पुनः स्वस्थानोपविष्टे प्रीतहृदयो मुनिः

---

**अशून्यं** पूर्णं कुरु । **च** पुनः, **तस्य** देवतार्चनस्य, **अवसाने** अन्ते, **जप्यचरितसमाहितेन** जप्यचरितेषु—जप्यस्य जपयोग्यस्य देवस्य चरितेषु, समाहितेन—तद्भावनैकाग्रतां गमितेन, **चेतसा** मनसा, **भक्तिमज्जनैकचिन्तामणिं** भक्तिमन्तः—सेवाकारिणः श्रद्धालवो वा ये जनास्तेषां कृते, एकम्—अद्वितीयम्, चिन्तामणिं—सद्यश्चिन्तिताखिलेष्टसाधकमणिविशेषरूपाम्, **इमां** मयोपदिश्यमानां विद्याम्, **जप** जापं कुरु, **अतिमहाप्रभावा** निरतिशयशक्तिशालिनी, **असौ** विद्या, **प्रयत्नवता** उद्यमवता, **पुरुषविशेषेण** भक्तिमता पुरुषेण, **सन्ततं** निर्विच्छेदम्, **आराध्यमाना** उपास्यमाना सती, तत् फलं **नास्ति** जगति न विद्यते, यद् **न साधयति** न साधयितुं शक्नोति । **च** पुनः, असौ **फलाभिमुखीभूता** फलप्रदानपरा सती, **त्रिलोकीपतेः** लोकत्रयेश्वरस्य, **पुरन्दरस्यापि** इन्द्रस्यापि, **चेतः** हृदयम्, **विधेयीकरोति** वशीकरोति, **किमुत** का कथा, **अपरासाम्** अन्यासां देवतानाम्, **केवलं** किन्तु, **कर्तव्येषु** देवार्चनादिनियमपालनेषु, **दृढम्** अत्यन्तम्, **अप्रमादिना** अनवधानशून्येन, निरन्तरमवहितहृदयेनेति यावत्, **भवितव्यं** वर्तितव्यम् । **च** पुनः, **सम्यक्प्रज्ञया** विवेकबुद्ध्या, **प्रस्तावोचितं** प्रस्तावस्य—अवसरस्य, उचितं—योग्यम्, अवसरानुकूलम्, **अनुष्ठानं** कार्यसम्पादनम्, **आलोचितव्यं** विवेचनीयम् । **हविर्भुजः** अग्नेः, **अरणिमन्थाविव** अरणिः—अग्निप्रादुर्भावककाष्ठविशेषः, मन्थः—तयोः काष्ठयोः संघर्षः, ताविव, **प्रज्ञोद्यमौ** प्रज्ञा—विवेकबुद्धिः, उद्यमः—उद्योगः, तौ, **कार्यसिद्धेः** कार्यसाफल्यस्य, **पितरौ** जनकौ । **हि** यतः, **तौ** प्रज्ञोद्यमौ, **पुरुषव्यापारानुगृहीतौ** पुरुषस्य व्यापारेण—कार्यानुष्ठानेन, अनुगृहीतौ—सहकृतौ सन्तौ, **तद्वस्तु** तादृशमिष्टवस्तु, **नास्ति** न वर्तते, **यन्न साधयतः** न सम्पादयतः, न प्रापयत इति यावत् । **इति** इत्थम्, **अभिधाय** उक्त्वा, **कृतपार्श्वावलोकनः** कृतं पार्श्वयोरवलोकनं जनान्तराभावपरीक्षणं येन तादृशः सन्, **विहितमन्त्रदेवतानुध्यानविधिः** विहितः—कृतः, मन्त्रदेवतायाः—मन्त्राधिष्ठातृदेवतायाः, अनुध्यानस्य-स्मरणस्य, विधिः—मनस्समाधानात्मकव्यापारो येन तादृशः सन् मुनिः, **नरपते** राज्ञः, **आत्मनश्च** स्वस्य च, **वपुषि** शरीरे, **रक्षामन्त्राक्षरमयं** रक्षायाः—शरीररक्षणस्य, यानि मन्त्राक्षराणि तन्मयं कवचं—वर्म, **विधाय** परिधाय, **उपकर्णमूलं** कर्णमूलसमीपे, **अनुच्चैः** अतिमन्दस्वरेण, **उच्चरिताक्षरपदः** उच्चरितानि अक्षराणि पदानि च येन तादृशः सन्, **ताम्** अपराजितां विद्याम्, **न्यवेदयत्** उपदिष्टवान् । **सविनयाबद्धकरसम्पुटः** सविनयं—विनयसहितं यथा स्यात्तथा, आ—समन्तात्, बद्धः—निर्मितः, करयोः—हस्तयोः, संपुटः—संश्लेषणं येन तादृशः, कृताञ्जलिरित्यर्थः, **राजाऽपि** मेघवाहनोऽपि, **श्रद्धावता** प्रीतिपूर्णेन, हृदयेन, **आत्मानं** स्वम्, **परम्** अत्यन्तम्, **अनुगृहीतम्** अनुकम्पितम्, **मन्यमानः** स्वीकुर्वाणः, **विधानतः** विधिपूर्वकम्, **तां** विद्याम्, **जग्राह** गृहीतवान् । **च** पुनः, **परमया** अत्यन्तया, **भक्त्या** प्रीत्या, **रोमाञ्चिततनुः** पुलकितशरीरः, राजा, **संज्ञादिष्टपरिजनसम्पादितैः** सम्यग् ज्ञायते यया सा संज्ञा—सङ्केतविशेषः, तया, आदिष्टाः—प्रवर्तिता ये, परिजना—स्वजनास्तैः, **सम्पादितैः** समानीयोपकल्पितैः, **सामान्यमनुजेश्वरगृहदुर्लभैः** सामान्यमनुजेश्वरगृहे—साधारणनृपमन्दिरे, दुष्प्रापैः, **भूरिभिः** बहुभिः, **पुष्पैः** मनोहरकुसुमैः, **फलैः** नैवेद्यभूतकदल्यादिफलैः, **पत्रैः** तत्स्थापनाय कदलीप्रभृतिदलैः, **रत्नाभरणैः** रत्नालङ्करणैः, **मुनिं** विद्याधरमुनिम्, **अर्चयाञ्चकार** पूजयामास [ छ ] । **च** पुनः, राजनि पूजाया **विरते** निवृत्ते, पुनः **स्वस्थानोपविष्टे** स्वस्थानस्थिते च सति, **प्रीतहृदयः**

पात्रकृतोपकारतया कृतार्थमात्मानं मन्यमानस्तूष्णीक एव क्षणमात्रं स्थित्वा किञ्चिद्वलितकन्धरो भर्तुः पृष्ठभागे **समुपविष्टां** विनयनिभृतवपुषं प्रहर्षनिर्भरां मदिरावतीं प्रसादार्द्रया दृष्ट्या सुचिरमवलोक्य सस्मितमवादीत्—

'राजपुत्रि ! निवर्तितस्तावदरण्यगमनादेष ते प्रणयी जनः, नियोजितश्चातिदुष्करे देवताराधनकर्मणि, **मा स्म** कुप्यश्चेतसि यदस्माभिरकृत्वा प्रश्नमश्रुत्वा प्रतिवचनमगृहीत्वाऽनुमतिं महाभागायाः कृतास्य चेतसो नियन्त्रणा, निवारणा च विषयोपभोगसुखानाम्, अत्र च भवत्कल्याणसम्पादनसत्वरा चित्तवृत्तिरेवापराध्यति, **न बुद्धिः** । कल्पश्चायं यतोऽस्य कतिचिद् दिनानि दूरस्थितयैव कल्याणभागिन्या सर्वापि कर्तव्या भर्तृजनोचिता प्रतिपत्तिः, तथाहि—आत्मा निवारणीयो धृत्या न वृत्त्या, स्वभावस्निग्धयोपसर्पणीयो दृष्ट्या न काययष्ट्या, सम्भाषयितव्यो मनसा न वचसा, प्रेषयितव्याः शरीरवार्तोपलम्भाय सख्यश्चतुरवर्णरेखा नानङ्गलेखाः, बहु मन्तव्यमवस्थानं विरलपरिजने देवतायतनवने न रतिभवने, श्रावयितव्यः श्रवणहारीणि देवतास्तुति-

---

**टिप्पनकम्**—मागधी—नग्नाचार्यभार्या । **कण्टकिनि** कण्टकयुक्ते, रोमाञ्चिते च [ ज ] ।

---

तृप्तमनाः, मुनिः, **पात्रकृतोपकारतया** पात्रे—योग्यजने, कृत उपकारो येन तादृशतया, आत्मानं **कृतार्थं** कृतकृत्यम्, **मन्यमानः**, **तूष्णीक एव** गृहीतमौन एव, क्षणमात्रं स्थित्वा, **किञ्चिद्वलितकन्धरः** किञ्चिद्—ईषद्, वलिता—चलिता, तिर्यग्भूतेत्यर्थः, कन्धरा—ग्रीवा यस्य तादृशः सन्, **भर्तुः** पत्युः, मेघवाहननृपतेरिति यावत्, **पृष्ठभागे** पश्चाद्भागे, **समुपविष्टां** सम्यगासिताम्, **विनयनिभृतवपुषं** विनयनिश्चलशरीराम्, **प्रहर्षनिर्भरां** प्रहर्षेण—प्रकृष्टहर्षेण, निर्भरां—पूर्णाम्, **मदिरावतीं** तत्संज्ञकराज्ञीम्, **प्रसादार्द्रया** प्रसादेन—प्रसन्नतया, आर्द्रया—सरसया, दृष्ट्या, **सुचिरं** सुदीर्घकालम्, **अवलोक्य** निरीक्ष्य, **सस्मितम्** ईषद्धासान्वितं यथा स्यात्तथा, **अवादीत्** वक्ष्यमाणरीत्या अवोचत् । किमित्याह—**राजपुत्रि! राजकन्ये!, ते** तव, एष, **प्रणयी** प्रियो जनः, **तावदिति** वाक्यालङ्कारे, **अरण्यगमनात्** वनगमनात्, **निवर्तितः** निवारितः । **च** पुनः, **अतिदुष्करे** अतिदुस्सम्पादे, **देवताराधनकर्मणि** देवार्चनकार्ये, **नियोजितः** प्रवर्तितः, **चेतसि** मनसि, **मा स्म कुप्यः** न कोपं कुरु, **यत्** यस्मात्, अस्माभिः, **प्रश्नमकृत्वा** त्वामपृष्ट्वेत्यर्थः, **महाभागायाः** महानुभावाया भवत्याः, **प्रतिवचनम्** उत्तरवाक्यम्, अश्रुत्वा, **अनुमतिं** सम्मतिम्, **अगृहीत्वा** अप्राप्य, **अस्य** तव पत्युः, **चेतसः** मनसः, **नियन्त्रणा** अरण्यगमनप्रतिबन्धः, **विषयोपभोगसुखानां** विषयाः—चक्षुरादीन्द्रियगोचरा रूप-रस-गन्ध-स्पर्श-शब्दाः, तेषामुपभोगः—तत्तदिन्द्रियेणानुभवः, तज्जन्यसुखानाम्, निवारणा च **कृता** विहिता । **अत्र च** अस्मिंस्तु, वनगमनादिसमर्थनकार्ये, **भवत्कल्याणसम्पादनसत्वरा** भवत्याः, कल्याणस्य—शुभस्य, सम्पादने—साधने, सत्वरा—क्षिप्रकारिणी, **चित्तवृत्तिरेव** मदीयमनोवृत्तिरेव, **अपराध्यति** निवारणात्मकमपराधं करोति, न तु **बुद्धिः** मदीया मतिः, मदीयमत्या तु सुखसाध्यकार्यापेक्षया कष्टसाध्यकार्यस्यैव फलसिद्धौ श्रेष्ठत्वसमर्थनात् । **कल्पश्च** देवतार्चनस्य विधिश्च, **अयं** विषयोपभोगसुखनिवारणाचारः, "कल्पे विधि-क्रमौ" इत्यमरः, **यतः** यस्माद्धेतोः, **कतिचिद्दिनानि** कतिपयदिवसान्, **कल्याणभागिन्या** सौभाग्यशालिन्या भवत्या, **दूरस्थितयैव** दूरत एव, **अस्य** स्वभर्तुः, **भर्तृजनोचिता** भर्तृयोग्या, **प्रतिपत्तिः** सत्क्रिया, शुश्रूषेत्यर्थः, **कर्तव्या** विधातव्या, न तु समीपतः, तथा सति मनोविक्षेपापत्तेः । कथमित्याह—**तथाहि, आत्मा** स्वः, **धृत्या** धैर्येण, तुष्ट्या वा हेतुना, **निवारणीयः** भर्तुर्व्यावर्तनीयः, न तु **वृत्त्या** । तदुचितनिजाचरणेन सह, तदुचिताचारस्य दूरतोऽपि रक्षणसम्भवात् । **स्वभावस्निग्धया** नैसर्गिकस्नेहार्द्रया, **दृष्ट्या** दृष्टिद्वारा, आत्मा, **उपसर्पणीयः** पतिपार्श्वं प्रेषणीयः, न तु **स्वभावस्निग्धया** प्रकृतिकोमलया, **काययष्ट्या** यष्टिवत्कृशकायद्वारा । **मनसा** मनोवृत्तिभूतया भर्तृचरणप्रीत्यैव, आत्मा, **सम्भावयितव्यः** सम्माननीयः, न तु **वचसा** भर्त्रा सह वाग्विलासेन । **शरीरवार्तोपलम्भाय,** तदीयस्वास्थ्यसमाचारबोधाय, **चतुरवर्णरेखाः** मनोगतार्थसङ्केतनकुशलाक्षरपङ्क्तिरूपा एव, सख्यः, **प्रेषयितव्याः** प्रेषणार्हाः, न तु चतुरः—पुरुषान्तःकरणहरणनिपुणः वर्णः—गौरवर्णः, रेखा—कपोलपत्ररचनादिचिह्नं च यासां तादृश्यः, **अनङ्गलेखाः** वेश्यारूपाः सख्यः, तासां मनोमादकत्वात्, "वेश्यायां तु खगालिका, वारवाणिः कामलेखा क्षुद्रा" इत्यन्यत्रोक्तेः । **विरलपरिजने** विरलाः—स्वल्पाः, परिजनाः—बान्धवजना यस्मिन् तादृशे, **देवतायतनवने** देवताधिष्ठितवने, **अवस्थानं**

गीतानि न निजचरणनूपुररणितानि, त्वरयितव्यः सायन्तनविधये सुघटितसन्धिभिर्मागधीश्लोकैर्न सुरतदूतीलोकैः, कारयितव्यः कण्टकिनि पत्रच्छेदविरचनं देवतार्चनकेतकदलेन कपोलतले' [ज] इत्युक्ते महर्षिणा मदिरावती त्रपातरलतारया दृशाऽवलोक्य पत्युर्मुखमधोमुखीबभूव। तां च तथावस्थितां निर्वचनामधःस्रस्ताभिरलकवल्लरीभिर्विलक्षस्मितमिवाच्छादयितुमाच्छादितकपोलदर्पणां करनखशुक्तिभिरलग्नमपि विलेपनाङ्कं चरणोर्मिकारत्नशकलेषु पुनः पुनरुल्लिखन्तीमवनतग्रीवतया सम्यगविभाव्यमानामपि तत्कालकन्दलितापूर्वशोभाकमनीयस्य मुखचन्द्रस्य चारुतां रत्नकुट्टिमावलम्बिना प्रतिबिम्बेन पिशुनयन्तीं पुनः पुनरवलोक्य कृतस्मितो नरपतिर्मुनिं बभाषे—'भगवन्! किमिति वारं वारमेनां नियमयसि, नन्वेकवचसैव सर्वमवधारितमनया, प्रतिपन्नं च मनसा, करिष्यति चाद्य प्रभृति सर्वं भगवदादिष्टम्, अतिदक्षिणा ह्यसौ प्रायेणापरस्यापि मान्यजनस्य न करोति

---

स्वस्य स्थितिः, बहु श्रेयस्करं मन्तव्यम्, **न** न तु, **रतिभवने** केलिगृहे। **श्रवणहारीणि** कर्णकौतुकावहानि, **देवतास्तुतिगीतानि** देवतास्तुतिरूपाणि, गायनानि, **श्रावयितव्यः** श्रावणेनोल्लासयितव्यः, आत्मेति शेषः, **न** न तु, **निजचरणनूपुररणितानि** स्वपादपरिहितनूपुरध्वनीन्, तेषां मनोव्यामोहकत्वात्। **सायन्तनविधये** सन्ध्यासमयोचितानुष्ठानाय, **सुघटितसन्धिभिः** सुघटितः–श्रवणसुखार्थं सम्पादितः, सन्धिः–व्याकरणोक्तवर्णसंश्लेषः, अनेकार्थबोधचमत्काराय शब्दार्थश्लेषो वा येषु तादृशैः, **मागधीश्लोकैः** स्तुतिपाठिकापठ्यमानपद्यैः, तादृशपद्यश्रवणेनेत्यर्थः, **त्वरयितव्यः** आत्मा शीघ्रयितव्यः, न तु **सायन्तनविधये** वेषभूषाविन्यासाय, सुघटितः–सुसम्पादितः, सन्धिः–नायक-नायिकयोः सम्मेलनं यैस्तादृशैः, **सुरतदूतीलोकैः** सम्भोगार्थसन्देशहारिस्त्रीजनैः, आत्मा त्वरयितव्यः। **कण्टकिनि** कण्टकान्विते, **देवतार्चनकेतकदले** देवतार्चनोपकरणभूतकेतकाख्यपुष्पद्रुमपत्रे, **पत्रच्छेदविरचनम्** अन्योऽन्यसंश्लिष्टपत्राणां खण्डशो विश्लेषणकार्यम्, कारयितव्यः, आत्मेति शेषः, न तु **कण्टकिनि** पुलकिते, **कपोलतले** गण्डमण्डले, **पत्रच्छेदविरचनं** चन्दनपङ्कादिना पत्रखण्डनिर्माणम् [ज]।

**महर्षिणा** विद्याधरमुनिना, **इति** इत्थम्, **उक्ते** कथिते सति, **मदिरावती** राज्ञी, **त्रपातरलतारया** लज्जाचञ्चलकनीनिकाशालिन्या, **दृशा** दृष्ट्या, पत्युः–राज्ञः, मुखम्, **अवलोक्य** निरीक्ष्य, **अधोमुखी** नम्रमुखी, **बभूव** जाता। **तथावस्थिताम्** अधोमुखीभूयोपविष्टाम्, **निर्वचनां** वचनरहिताम्, गृहीतमौनामिति यावत्, **अधःस्रस्ताभिः** स्वभर्तृविश्लेषनिश्चयोपचितवेदनावशेनासंयततया अधोनिपतिताभिः, **अलकवल्लरीभिः** कुटिलकेशरूपमञ्जरीभिः **विलक्षस्मितं** साश्चर्यमीषद्धासम्, **आच्छादयितुमिव** तिरोधातुमिवेत्युत्प्रेक्षा, **आच्छादितकपोलदर्पणाम्** आच्छादितौ–आवृतौ, कपोलदर्पणौ–दर्पणवदुज्ज्वलकपोलौ यस्यास्तादृशीम्, पुनः **करनखशुक्तिभिः** करनखरूपाभिः शुक्तिभिः, **अलग्नमपि** असंसृष्टमपि, ताभिरधृतमपीत्यर्थः, **विलेपाङ्कं** कुङ्कुमद्रवचिह्नम्, **चरणोर्मिकारत्नशकलेषु** चरणाङ्गुलीयकरत्नखण्डेषु, "अङ्गुलीयकमूर्मिका" इत्यमरः, **पुनः पुनः** असकृत्, **उल्लिखन्तीं** प्रतिबिम्बयन्तीम्, कुङ्कुमादिद्रवलेपनाभावेऽपि नैसर्गिक्या एव करनखद्युतेरङ्गुलीयकरत्नेषु सङ्क्रान्तिरासीदिति भावः, पुनः **अवनतग्रीवतया** अवनता–अधोलम्बिता, ग्रीवा–कन्धरा यस्यां तादृशतया, **सम्यगविभाव्यमानामपि** सम्यक्–स्फुटं यथा स्यात्तथा, अलक्ष्यमाणामपि, **तत्कालकन्दलितापूर्वशोभाकमनीयस्य** तत्काले–तत्क्षणे, कन्दलिता–मुनिवचनश्रवणोन्मीलिता, या अपूर्वशोभा, तया कमनीयस्य–स्पृहणीयस्य, मुखचन्द्रस्य, **चारुतां** सुन्दरताम्, **रत्नकुट्टिमावलम्बिना** रत्नबद्धभूमिसंक्रामिणा, प्रतिबिम्बेन, **पिशुनयन्तीं** सूचयन्तीम्, **तां** मदिरावतीम्, **पुनः पुनः** असकृत्, अवलोक्य, **कृतस्मितः** कृतमन्दहासः, **नरपतिः** मेघवाहनः, मुनिम्, **आबभाषे** वक्ष्यमाणक्रमेण वक्तुमारेभे। **भगवन्!** आध्यात्मिकशक्तिशालिन्!, **इति** अनया रीत्या, **वारं वारम्** अनेकवारम्, **एनां** मदिरावतीम्, **किं** किमर्थम्, **नियमयसि** प्रतिज्ञापयसि, **ननु** निश्चये, **एकवचसैव** भगवतः सकृदुक्त्यैव, सर्वम्, **अवधारितं** निश्चितम्, श्रुतात्मकसम्यग्ज्ञानगोचरीकृतमिति यावत्, **च** पुनः, **मनसा** मननात्मकव्यापारवताऽन्तःकरणेन, **प्रतिपन्नं** मननात्मकज्ञानगोचरीकृतम्, स्वीकृतमित्यर्थः, **च** पुनः, **अद्य प्रभृति** अद्यारभ्य, **भगवदादिष्टं** भगवदाज्ञप्तम्, सर्वं **करिष्यति** अनुष्ठास्यति, हि यतः, **अतिदक्षिणा** अतिशयेन गुरुजनादेशानुवर्तननिपुणा, **असौ** मदिरावती, **प्रायेण**

वाक्यमन्यथा, किं पुनरशेषभुवनवन्दितशासनस्य महातपोनिधेः, करिष्यति केवलं विहाय त्रपामवलम्ब्य धैर्यमुन्मुच्य स्त्रीस्वभावसुलभमप्रागल्भ्यम्; अस्या अपि युज्यते स्वयं वास्मन्मुखेन वा सखीवचनद्वारेण वा विवक्षितं वक्तुम्, अभ्युपगमावेदनेन च भगवतः प्रमोदं जनयितुम्, आत्मनो निर्वहणानिर्वहणे च चिन्तयितुम्; अथवा न किञ्चिदुपदिष्टेनानेन, सम्प्रति प्रस्थिता वनमियम्, गतायां च तत्रास्यामिह स्थितस्य मे निष्प्रत्यूहमुपजातं देवताराधनम्' इत्यभिदधानं च पार्थिवमधिकतरमवनतानना रचितभङ्गुरभ्रुकुटिभूषणेन सा साभ्यसूयेव चक्षुषा तिर्यगैक्षत [ झ ]। मुनिरपि मनागुपजातहासः—'राजन्! अतिमात्रमुत्सुकस्त्वमिदानीमेव वनमिमां नेतुमिच्छसि, विधेहि तावन्मन्त्रजपविधिम्, आराधितप्रसन्नया राजलक्ष्म्या वितीर्णमाप्नोतु पुत्रवरमियम्, आसादयतु तत्प्रभावेण भुवनत्रयख्यातमहसमात्मजम्, पश्यतु तदीयमानन्दितसकलसंसारं कुमारभावम्, अनुभवतु तद्वधूजनोपजनितानि चरणपरिचर्यासुखानि, ततो धृताधिज्यधनुषि भुवनभारधारण-

---

**टिप्पनकम्—अनूत्थितयोश्च** पश्चादुत्थितयोः [ ञ ]।

---

बाहुल्येन, **अपरस्यापि** अन्यस्यापि, **मान्यजनस्य** गुरुजनस्य, **वाक्यम्** आदेशपरामुक्तिम्, न **अन्यथा करोति** अतिक्रामति, **अशेषभुवनवन्दितशासनस्य** निखिलजगदादृताऽऽदेशस्य, **महातपोनिधेः** तपस्विप्रवरस्य, **पुनः किं** कथैव केत्यर्थः, **केवलं** किन्तु, **त्रपां** लज्जां विहाय, **धैर्यं** सहनशक्तिम्, **अवलम्ब्य** गृहीत्वा, **स्त्रीस्वभावसुलभम्** अबलाजनोचितम्, **अप्रागल्भ्यं** कातरत्वम्, **उन्मुच्य** त्यक्त्वा, **करिष्यति** भगवत आदेशं पालयिष्यति, **स्वयं वा** साक्षाद्वा, साक्षात्प्रतिपादने लज्जा चेदत आह—**अस्मन्मुखेन वा** अस्मद्द्वारा वा, तथाऽपि सा तदवस्थेत्यत आह—**सखीवचनद्वारेण वा** स्वसखीं द्वारीकृत्य वा, **अस्या अपि** मदिरावत्या अपि, **विवक्षितं** वक्तुमभिमतम्, **वक्तुं** भगवतः पुरस्तात् प्रकाशयितुम्, **युज्यते** योग्यम्, **च** पुनः, **अभ्युपगमावेदनेन** स्वस्वीकारविज्ञापनेन, भगवतः, **प्रमोदम्** आनन्दम्, **जनयितुम्** उत्पादयितुं युज्यते, **च** पुनः, **आत्मनः** स्वस्य, **निर्वहणानिर्वहणे** स्वनियमपालनापालने, तदशक्यता-शक्यते इत्यर्थः, **चिन्तयितुं** पर्यालोचयितुम्। अथवा **उपदिष्टेन** कर्तव्यत्वेनानुपदमादिष्टेन, **अनेन** कार्यकलापेन, **न किञ्चित्** किमपि न प्रयोजनम्। सम्प्रति इयं वनं प्रस्थिता, **तत्र** वने, **अस्यां** मदिरावत्याम्, गतायां सत्याम्, **इह** अत्र, निकेतन इत्यर्थः, स्थितस्य, **मे** मम, **च** तु, **निष्प्रत्यूहं** निर्विघ्नम्, देवताराधनम्, **उपजातं** निष्पन्नम्, भविष्यतीति शेषः। **इति** इत्थम्, **अभिदधानं** कथयन्तम्, **पार्थिवं** राजानम्, **अधिकतरम्** अत्यधिकं यथा स्यात्तथा, **अवनताऽऽनना** अधोमुखी, **सा** मदिरावती, **साभ्यसूयेव** अभ्यसूयया-आक्षेपेण, सहितेवेत्युत्प्रेक्षा, **रचितभङ्गुरभ्रुकुटिभूषणेन** रचिता—सम्पादिता, भङ्गुरा—भञ्जनशीला, चञ्चलेत्यर्थः, भ्रुकुटिः—नेत्रोपरितनरोमावलीकौटिल्यमेव, भूषणं यस्य तादृशेन चक्षुषा, **तिर्यक्** सकटाक्षं यथा स्यात्तथा, **ऐक्षत** अपश्यत् [ झ ]। **मनाक्** किञ्चित्, "किञ्चिदीषन्मनागल्पे" इत्यमरः, **उपजातहासः** उत्पन्नमन्दहास इत्यर्थः, मुनिरपि इत्युक्त्वा पुनरवादीत्, किमित्याह—**राजन्!** भो नृपते!, **अतिमात्रम्** अत्यन्तम्, **उत्सुकः** स्वेष्टसिद्ध्यर्थमुत्कण्ठितः, त्वम्, **इदानीमेव** अधुनैव, **इमां** स्वभार्याम्, वनं **नेतुं** प्रेषयितुम्, इच्छसि, प्रवर्तसे इत्यर्थः। **तावत्** इदानीम्, **मन्त्रजपविधिं** देवताभिमुखीकारकमन्त्रजपनियमम्, **कुरु** अनुतिष्ठ। **आराधितप्रसन्नतया** मन्त्रजपाद्यनुष्ठानेन पूर्वमाराधितया पश्चात् प्रसन्नया वरवितरणोन्मुखीभूतया, **राजलक्ष्म्या** तदात्मकदेव्या, **वितीर्णं** दत्तम्, **पुत्रवरं** पुत्रस्ते भूयादित्याशिषम्, **इयं** मदिरावती, **आप्नोतु** प्राप्नोतु। **तत्प्रभावेण** वरमाहात्म्येन, **भुवनत्रयख्यातमहसं** जगत्त्रयविश्रुततेजसम्, **आत्मजं** पुत्रम्, **आसादयतु** लभताम्। **आनन्दितसकलसंसारम्** आनन्दितः—चेष्टाचमत्कृतिभिराह्लादितः, सकलः—समग्रः, संसारः—लोको येन तादृशम्, **तदीयं** तत्पुत्रसम्बन्धिनम्, **कुमारभावं** पञ्चमाब्दपर्यन्तां "जातः कुं पृथिवीं पद्भ्यां मारयेत् स कुमारकः" इत्युक्तरूपां कौमारावस्थाम्, **पश्यतु** तद्दर्शनकौतुकमनुभवतु। **तद्वधूजनोपजनितानि** तस्य-पुत्रस्य, यो वधूजनः—यो भार्याजनः, तेनोपजनितानि—सम्पादितानि, **चरणपरिचर्यासुखानि** स्वचरणसेवाजन्यानन्दान्,

क्षमे तत्र निक्षिप्य निजराजसम्पदं समर्प्य प्रजाः प्रस्थितेन त्वयैव सहिता गमिष्यति पश्चिमे वयसि वनम्; अस्माकमप्येतदर्थ एवायमारम्भः, अन्यथा गृहस्थकार्येषु कर्तव्येषु सर्वारम्भनिवृत्तानां को यतीनामधिकारः' इत्युक्त्वा पुनरवादीत्—'नरेन्द्र! पुष्करद्वीपागतेन मयाऽपि जम्बूद्वीपवर्तिषु प्रधानतीर्थेषु सम्प्रति प्रयातव्यम्, अनुजानीहि माम्' इत्यभिधाय संवृतवल्कलांशुको जपञ्शनकैराकाशगमनदायिनीं विद्यामासनादुत्तस्थौ, अनूत्थितयोश्च तयोरादरकृतप्रणामयोः क्रमेण निक्षिप्य पक्षपातार्द्रतारकं चक्षुरीषदुत्क्षिप्तदक्षिणकरः स्फुटाक्षरोच्चारया गिरा दत्त्वाऽऽशिषमन्तरिक्षमुदपतत् [ अ ]। अन्तरितदर्शने च तस्मिन् रणरणकदूयमानः शून्य इव पार्थिवः स्थित्वा मुहूर्तं हर्म्यशिखरादवततार। निर्वर्तितमाध्याह्निकविधिश्च तत्कालकृतसन्निधीनां गुरूणां बान्धवानां बुद्धिसचिवानां च यथावृत्तं सर्वमेव मुनिवृत्तान्तमाख्यत्, देवताराधनविषये चापृच्छत्। उच्छिद्यमानभरतवंशदर्शननित्योद्विग्नैश्च तैरालोच्य कार्यगौरवमभ्यनुज्ञातः प्रमदवनमध्य एव सन्निधावाक्रीडपर्वतस्य

---

अनुभवतु। **ततः** तदनन्तरम्, **धृताधिज्यधनुषि** धृतं—स्वकरगृहीतम्, अधिज्यं—ज्यां मौर्वीम्, अधिरूढम्, आकृष्टमिति यावत्, धनुर्येन तादृशे, **भुवनभारधारणक्षमे** राज्यभारग्रहणसमर्थे, **तत्र** तस्मिन् पुत्रे, **निजराज्यसम्पदं** स्वराज्यलक्ष्मीम्, **निक्षिप्य** निधाय, तदायत्तीकृत्येत्यर्थः। प्रजाः **समर्प्य** तदधीनयोगक्षेमाः कृत्वा, **स्वस्थमनसा** निश्चिन्तचित्तेन, **पश्चिमे वयसि** वार्धक्यावस्थायाम्, **प्रस्थितेन** वनं प्रव्रजितेन, त्वया सहितैव वनं गमिष्यति, इयमिति शेषः। **अस्माकमपि** यतीनामपि, **एतदर्थ एव** पुत्रोत्पादनेन गार्हस्थ्यावस्थां निस्तीर्य वानप्रस्थावस्थायां वनप्रस्थानसिद्ध्यर्थ एव, **अयं** प्रत्यक्षरूपः पुत्रवरवितरणात्मकः, **आरम्भः** प्रयासः, अन्यथा **सर्वारम्भनिवृत्तानां** वैराग्यवशेन बाह्यसकलकार्यव्यापारव्यावृत्तमनसाम्, **यतीनां** मुनीनाम्, **गृहस्थकार्येषु** गृहस्थयोग्येषु, **कर्तव्येषु** कार्येषु, **कोऽधिकारः**? न कोऽपीत्यर्थः। **इति** इत्थम्, **उक्त्वा** वरदानवाक्यं कथयित्वा, पुनः **अवादीत्** उक्तवान्। किमित्याह—**नरेन्द्र!**, **पुष्करद्वीपात्** पुष्करनाम्नः "पढमो जंबूदीवो धाइयखण्डो य पुक्खरो तइयो। वारुणवरो चउत्थो खिरवरो पंचमो दीवो"॥ इत्यभियुक्तोक्ततृतीयद्वीपात्, **आगतेन** भवत्कल्याणार्थमत्रोपस्थितेन, मयाऽपि, **जम्बूद्वीपवर्तिषु** जम्बूद्वीपस्थितेषु, **प्रधानतीर्थेषु** मुख्यपुण्यक्षेत्रेषु, संप्रति **प्रयातव्यं** प्रस्थातव्यम्, प्रस्थानं प्राप्तकालमित्यर्थः। माम् **अनुजानीहि** प्रस्थातुमनुमन्यस्व। **इति** इत्थम्, **अभिधाय** स्वप्रस्थानमावेद्य, **संवृतवल्कलांशुकः** आच्छादितो वल्कलांशुकः तरुत्वग्वस्त्रं येन तादृशः, वल्कलावृताङ्गः सन्नित्यर्थः, **आकाशगमनदायिनीं** गगनतलोत्पतनप्रयोजिकाम्, **विद्यां** देव्यधिष्ठितं मन्त्रम्, **शनकैः** उपांशुस्वरेण, **जपन्** उच्चारयन्, आसनात्, **उत्तस्थौ** उत्थितवान्। **च** पुनः, **अनूत्थितयोः**—अनु—पश्चाद् उत्थितयोः, **आदरकृतप्रणामयोः** श्रद्धाविहिताभिवादनयोः, **तयोः** दम्पत्योः, **क्रमेण** प्रथमं पत्युरुपरि ततस्तद्भार्योपरीत्येवं क्रमेण, **पक्षपातार्द्रतारकं** पक्षपातेन—पक्ष्मनिमीलनेन, स्नेहेन वा, आर्द्रा-सरसा, तारका—कनीनिका यस्य तादृशम्, चक्षुः, **निक्षिप्य** निधाय, निरीक्ष्येत्यर्थः। **ईषदुत्क्षिप्तदक्षिणकरः** किञ्चिदुन्नमितदक्षिणहस्तः, **स्फुटाक्षरोच्चारया** स्फुटः—व्यक्तः, अक्षराणाम्, उच्चारः—उच्चारणं यस्यां तादृश्या, **गिरा** वाचा, **आशिषं** शुभाशंसनम्, **दत्त्वा** कृत्वा, **अन्तरिक्षं** गगनम्, **उदपतत्** उत्पतितवान् [ अ ]।

**तस्मिन्** मुनौ, **अन्तरितदर्शने** अन्तरितं—व्यवहितम्, व्यवधानप्रतिबद्धमित्यर्थः, दर्शनमवलोकनं यस्य तादृशे सति, **रणरणकदूयमानः** रणरणकेन—तद्विरहव्याकुलीभावेनोत्तप्यमानः सन्, **पार्थिवः** राजा, **शून्य इव** मुग्ध इव, **मुहूर्तं** क्षणम्, स्थित्वा, **हर्म्यशिखरात्** प्रासादशिरोगृहात्, **अवततार** अधस्तादाजगाम। **च** पुनः, **निर्वर्तितमाध्याह्निकविधिः** निर्वर्तितः—सम्पादितः, माध्याह्निकः—मध्याह्नकालिकः, विधिः—अनुष्ठानं येन तादृशः, **तत्कालकृतसन्निधीनां** तत्क्षणसन्निहितानाम्, **गुरूणां** पूज्यानाम्, **बान्धवानां** बन्धुजनानाम्, **बुद्धिसचिवानां** बुद्धौ—विचारणायाम्, सचिवानां—सहायानाम्, विचारकुशलानां मन्त्रिणामित्यर्थः, **यथावृत्तं** यथाभूतम्, **सर्वमेव** समस्तमेव, **मुनिवृत्तान्तं** मुनिसमागमनादिसमाचारम्, **आख्यत्** कथितवान्। देवताराधनविषये च **अपृच्छत्** अभ्यनुज्ञां पृष्टवान्। **उच्छिद्यमानभरतवंशदर्शननित्योद्विग्नैः** उच्छिद्यमानस्य—अवरुध्यमानपरम्पराकस्य भरतवंशस्य, दर्शनेन, नित्यं—सततमेव,—उद्विग्नैः विषण्णैः,

नातिखर्वं नातिविस्तीर्णमल्पस्तम्भपरिकरमप्रांशुप्राकारकृतपरिक्षेपमनुपलक्षितान्योऽन्यसन्धिभागैराभोगशालिभिः प्रकाममसृणैर्मणिशिलातलैरवनद्धविस्तीर्णाङ्गणमतिमनोहरतया सुरलोकवासिनामप्युत्पादितनिवासस्पृहं देवतागृहमकारयत् । तत्र चातिप्रशस्तेऽहनि यथायोग्यमर्चितसमस्तपूज्यवर्गः परिपूर्णसर्वावयवां सर्वप्रतिमालक्षणोपेतां सर्वालङ्कारभूषितवपुर्लतां सर्वलोकलोचनानन्दजननीं सर्वदोषनिर्मुक्तामत्युदारमुक्ताशैलदारुसम्भवां भगवत्याः श्रियः प्रतिकृतिं यथाविधि प्रतिष्ठाप्य प्रतिपन्ननैष्ठिकोचितक्रियो मुनिप्रदर्शितेन क्रमेण प्रतिदिनमुपासाञ्चक्रे [ट] । तथाहि—प्रातरेवोत्थाय प्रस्थितः प्रथमतरमुत्थितैरितस्ततो निपतितावश्यायजलदलितकेसराणि प्रत्यग्रविकसितानामुद्यानवीरुधां कुसुमान्यवचिन्वानैः प्रयत्नवद्भिः परिचारकैरनुगम्यमानः, गत्वा कृत्रिमाद्रिपरिसर-

---

**तैः** गुरुबन्धुबुद्धिसचिवजनैः, **कार्यगौरवं** कार्यस्य—देवताऽऽराधनस्य, **गौरवं** माहात्म्यम्, **आलोच्य** विविच्य, **अभ्यनुज्ञातः** दत्ताभ्यनुज्ञः सन् राजा, **आक्रीडपर्वतस्य** "आक्रीडः पुनरुद्यानं राज्ञामन्तःपुरोचितम्" इति कोशोक्तस्य अन्तःपुरक्रीडापर्वतस्य, **सन्निधौ** निकटे, **प्रमदवनमध्ये** अन्तःपुरक्रीडोपवनमध्ये एव, **देवतागृहं** देवतामन्दिरम्, **अकारयत्** निर्मापितवान् । तत् कीदृशम् ? **नातिखर्वं नातिविस्तीर्णं** नातिह्रस्वं नातिदीर्घम्, पुनः **अल्पस्तम्भपरिकरम्** अल्पः—अनधिकः, स्तम्भपरिकरः—स्तम्भपरिवारो यस्मिंस्तादृशम्, पुनः **अप्रांशुप्राकारकृतपरिक्षेपम्** अप्रांशुभिः—अनतिशयोन्नतैः, प्राकारैः आवेष्टनकुड्यैः, कृतः, परिक्षेपः—परिवेष्टनं यस्य तादृशम्, पुनः **अवनद्धविस्तीर्णाङ्गणम्** अवनद्धं—सम्यग्बद्धम्, विस्तीर्णं—विशालम्, अङ्गणं—प्राङ्गणं यस्य तादृशम्, कैः ? **मणिशिलातलैः** मणयः—मौक्तिकहीरकादयः, शिला—मनःशिला, मणिमय्यः शिला वा—मणिशिलाः, तासां तलैः, कीदृशैस्तैः ? **अनुपलक्षितान्योऽन्यसन्धिभागैः** अनुपलक्षितः—सुश्लिष्टतया अप्रतीतः, अन्योऽन्यसन्धिभागः—परस्परश्लिष्टांशो येषां तादृशैः, पुनः आभोगेन—अतिविस्तरेण, शालन्ते—शोभन्ते ये तैः—**आभोगशालिभिः, प्रकाममसृणैः** अतिकोमलैः, पुनः कीदृशं देवतागृहम् ? **अतिमनोहरतया** निरतिशयसुन्दरतया, **सुरलोकवासिनामपि** स्वर्गवास्तव्यानामपि, देवानामपीत्यर्थः, **उत्पादितनिवासस्पृहम्** उत्पादिता—उन्मीलिता, निवासस्पृहा—निवासेच्छा येन तादृशम्, स्वर्गीयगृहादपि सुन्दरमित्यर्थः । **च** पुनः, **तत्र** तस्मिन् देवतामन्दिर इत्यर्थः, **अतिप्रशस्ते** शुभयोग-नक्षत्र-लग्नादिशालिनि, **अहनि** दिने, **यथायोग्यं** यथोचितम्, **अर्चितसमस्तपूज्यवर्गः** अर्चितः—प्रथमं पूजितः, समस्तः—समग्रः, पूज्यानां—मुख्यदेवताङ्गभूतपूजनीयदेवानाम्, वर्गः—समूहो येन तादृशः सन्, राजेति शेषः, **परिपूर्णसर्वावयवां** परिपूर्णाः—प्रतिमावयवपरिमाणपरिमिताः, अवयवाः—हस्तपादादयो यस्यास्तादृशीम्, **सर्वप्रतिमालक्षणोपेतां** सर्वैः—समस्तैः, प्रतिमालक्षणैः—लक्षणशास्त्रोक्तमूर्तिचिह्नैः, उपेतां—लक्षिताम्, **सर्वालङ्कारभूषितवपुर्लतां** सर्वैः, अलङ्कारैः—कङ्कणकेयूरादिभिः, भूषिता—अलङ्कृता, वपुर्लता—वपुः शरीरमेव कोमलत्वादायतत्वाच्च लता यस्यास्तादृशीम्, **सर्वलोकलोचनानन्दजननीं** सर्वेषां लोकानाम्, लोचनानां—नेत्राणाम्, आनन्दजननीम्—उल्लासिनीम्, **सर्वदोषनिर्मुक्तां** छिद्रादिनिखिलदोषशून्याम्, **अत्युदारमुक्ताशैलदारुसम्भवाम्** अत्युदाराः—अतिशयेनोदारा उत्कृष्टाः, या मुक्ताः—मौक्तिकाख्यमणिविशेषाः, शैलदारु—तदाख्यमणिविशेषः, काष्ठविशेषो वा, तत्सम्भवां—तन्मयीम्, भगवत्याः **श्रियः** लक्ष्म्याः, **प्रतिकृतिं** प्रतिमाम्, **यथाविधि** विधिसहितम्, प्रतिष्ठाप्य, **प्रतिपन्ननैष्ठिकोचितक्रियः** प्रतिपन्ना—स्वीकृता, नैष्ठिकस्य—आजन्मब्रह्मचारिणः, उचिता—योग्या, क्रिया—स्त्रीसङ्गादिवर्जनात्मिका येन तादृशः सन्, **क्रमेण** यथाक्रमम्, **प्रतिदिनं** सर्वस्मिन् दिने, **उपासाञ्चक्रे** राजश्रियमाराधयामास [ ट ] । तत्क्रममुपदर्शयति—**तथाही**ति । **प्रातरेव** ब्राह्ममुहूर्त एव, **उत्थाय** जागरित्वा, **प्रस्थितः** शयनागारान्निर्गतः, **प्रथमतरं** सर्वप्रथमम्, **उत्थितैः** जागरितैः, **इतस्ततः** यत्र तत्र, **निपतितावश्यायजलदलितकेसराणि** निपतितेन, अवश्यायजलेन—हिमजलेन, "अवश्यायस्तु नीहारः" इत्यमरः, दलिताः—खण्डिताः उत्फुल्ला वा, केसराः—तन्तवो येषाम्, तादृशानि, **प्रत्यग्रविकसितानाम्** अभिनवपुष्पितानाम्, **उद्यानवीरुधां** क्रीडाकाननलतिकानाम्, **कुसुमानि** पुष्पाणि, **अवचिन्वानैः** त्रोटयित्वा संगृह्णद्भिः, **प्रयत्नवद्भिः** श्रमशीलैः, **परिचारकैः** स्वसेवकैः, **अनुगम्यमानः** पश्चाद्देशावच्छेदेनाश्रीयमाणः, **कृत्रिमाद्रिपरिसरसरिति** कृत्रिमः—क्रियया निर्वृत्तः, नेतराद्रिरिव

सरिति गृहीतदन्तधावनो निर्वर्तितस्नानजपविधिः, परिधाय तत्कालधौते कालधौते इवातिधवलतया विभाव्यमाने दुकूलवाससी, विधाय सन्ध्योपासनकृत्यम्, आगत्यायतनमुत्तमाङ्गघटितग्रन्थिनोत्तरीयपल्लवेन मुद्रितमुखो मुखोद्गीर्णमुखरवारिस्रोतोभिः कनककुम्भैः सुचिरमेनामभ्यषिञ्चत् । एणनाभिकर्पूरकणसन्तर्पितामोदेन च स्पर्शनेन्द्रियहारिणा चन्दनद्रवेण विरचिताङ्गरागामङ्गलेखारोपितरुचिरमौक्तिकाभरणामुदारमालतीदामग्रथितशेखरां श्रवणशिखरावतंसितैककेतकगर्भपत्रामवदातवेषतया साक्षादमृतमथनोद्भूतामिवोपलक्ष्यमाणां निरीक्ष्य सादरमुत्क्षिप्तकृष्णागुरुक्षोदधूपः प्रणम्य परमया भक्त्या पुरस्तान्नातिदूरे समुपविष्टो मुखनिविष्टनिश्चलदृष्टिरानर्तितशिखण्डिना दत्तमार्जनमृदङ्गस्तनितगम्भीरेण स्वरेण संगीतकमिव प्रस्तावयन् पुष्टार्थाभिः स्तुतिभिरतिचिरं तुष्टाव । [ठ] । समापितमन्त्रजपविधिश्चातिक्रान्ते कियत्यपि समये विनिर्गत्य देवतागृहाद् दर्शनार्थमागतमुचितस्थान-

---

प्रथमत एव स्थितः, एवंविधो यः, अद्रिः—पर्वतः, तस्य यः परिसरः—समीपदेशः, तत्र या कृत्रिमा, सरित्—नदी, तत्र गत्वा, **गृहीतदन्तधावनः** कृतदन्तमार्जनः, **निर्वर्तितस्नानजपविधिः** निर्वर्तितौ—सम्पादितौ, स्नानं च जपश्च तौ, विधी—व्यापारौ येन तादृशः, **तत्कालधौते** तत्क्षणप्रक्षालिते, अतः **कालधौते** कलधौतस्य—रजतस्य, विकारभूते, इव, **अतिधवलतया** अतिशुभ्रतया, **विभाव्यमाने** प्रतीयमाने, **कलधौते इवे**ति पाठे **कलधौते** रजते इवेत्येवं व्याख्येयम्, **दुकूलवाससी** श्लक्ष्ण-सूक्ष्मवस्त्ररूपे अधरीयोत्तरीयवस्त्रे, **परिधाय** धृत्वा, **सन्ध्योपासनकृत्यं** प्रातःसन्ध्यावन्दनात्मककार्यम्, **विधाय** अनुष्ठाय, **आयतनं** निकेतनम्, देवतामन्दिरमिति यावत्, **आगत्य** प्रत्यागत्य, **उत्तमाङ्गघटितग्रन्थिना** उत्तमाङ्गे—शिरसि, घटिता लग्ना, ग्रन्थिर्यस्य तादृशेन, **उत्तरीयपल्लवेन** ऊर्ध्वदेहधृतवसनाञ्चलेन, **मुद्रितमुखः** मुद्रितं—स्वनिःश्वासेन देवताया आशातनापरिहारार्थमावृतम्, मुखं येन तादृशः, **मुखोद्गीर्णमुखरवारिस्रोतोभिः** मुखात्—ग्रीवोर्ध्वभागात्, उद्गीर्णं—निःसृतम्, मुखरं—ध्वनिपूर्णम्, वारिस्रोतः—जलधारा येषां तादृशैः, **कनककुम्भैः** सुवर्णकलशैः, **सुचिरं** सुदीर्घकालम्, **एनां** लक्ष्मीम्, **अभ्यषिञ्चत्** अभिषिञ्चति स्म । **एणनाभिकर्पूरकणसन्तर्पितामोदेन** एणस्य—कृष्णमृगस्य, नाभिः—कस्तूरिका, तया, कर्पूरकणैः—कर्पूरचूर्णैश्च, मिश्रितैः, सन्तर्पितः—समेधितः, आमोदः—परिमलो यस्य तादृशेन, **स्पर्शनेन्द्रियहारिणा** त्वगिन्द्रियाकर्षणशीलेन, **चन्दनद्रवेण** चन्दनपङ्केन, **विरचिताङ्गरागां** विरचितः—सम्पादितः, अङ्गरागः—अङ्गलेपनं यस्यास्तादृशीम् । पुनः **अङ्गलेखारोपितरुचिरमौक्तिकाभरणाम्** अङ्गे—अङ्गलतायाम्, लेखारोपितानि राजिरूपेण स्थापितानि, विन्यस्तानीत्यर्थः, रुचिराणि—मनोहराणि, मौक्तिकाभरणानि—मौक्तिकभूषणानि यस्यास्तादृशीम् । पुनः **उदारमालतीदामग्रथितशेखराम्** उदारेण—महता, निर्मलेनेत्यर्थः, मालतीदाम्ना—मालत्याख्यकुसुमावल्या, ग्रथितः—संघटितः, सम्पादित इति यावत्, शेखरो मस्तकमाल्यं यस्यास्तादृशीम् । पुनः **श्रवणशिखरावतंसितैककेतकगर्भपत्रां** श्रवणशिखरे—श्रवणोपरिभागे, अवतंसितम्—अलङ्कृतम्, एकम्, केतकस्य—तदाख्यपुष्पवृक्षविशेषस्य, गर्भपत्रम्—अन्तर्गतपत्रं यस्यास्तादृशीम् । पुनः **अवदातवेषतया** अतिशुभ्रवेषशालितया, साक्षात्, **अमृतमथनोद्भूताम्** अमृतमथनेन—सुधासागरालोडनेन, उद्भूताम्—आविर्भूताम्, इव, **उपलक्ष्यमाणां** प्रतीयमानाम्, **सादरम्** आदरसहितम्, **निरीक्ष्य** दृष्ट्वा, **उत्क्षिप्तकृष्णागुरुक्षोदधूपः** उत्क्षिप्तः—उन्मीलितः, कृष्णागुरोः "कृष्णं गुणाधिकं तत्तु लोहवद् वारि मज्जति" इत्युक्तगुणकस्य काष्ठविशेषस्य, यः क्षोदः—चूर्णम्, तत्सम्बन्धी धूपो येन तादृशः, **परमया** अत्यन्तया, **भक्त्या** प्रीत्या, प्रणम्य, **पुरस्तात्** तस्या अग्रे, **नातिदूरे** समीपे, **समुपविष्टः** सम्यगासितः सन्, **मुखनिविष्टनिश्चलदृष्टिः** मुखे—लक्ष्म्या वदनप्रदेशे, निविष्टा—लग्ना, निश्चला—निःस्पन्दा, दृष्टिर्येन तादृशः, **आनर्तितशिखण्डिना** आ—समन्तात्, नर्तितः—उल्लासातिशयेन नादितः, शिखण्डी—मयूरो येन तादृशेन, **दत्तमार्जनमृदङ्गस्तनितगम्भीरेण** दत्तं—सम्पादितम्, मार्जनं—प्रोञ्छनादिद्वारेण शोधनं यस्य तादृशस्य, मृदङ्गस्य—वाद्यविशेषस्य, यत् स्तनितं—ध्वनिविशेषः, तद्वद् गम्भीरेण—धीरेण, "स्वरे सत्त्वे च नाभौ च त्रिषु गम्भीरता शुभा" इत्यत्रोक्तसौन्दर्यकेणेत्यर्थः, स्वरेण, **पुष्टार्थाभिः** पुष्टः—पूर्णः, अर्थो यासां तादृशीभिः, **स्तुतिभिः** देव्या गुणोक्तिभिः, **सङ्गीतकं** नृत्यवादित्रादिविशिष्टगीतम्, **प्रस्तावयन्निव** निष्पादयन्निव, गायन्निवेति यावत्, **अतिचिरम्** अतिदीर्घकालम्, **तुष्टाव** लक्ष्मीमस्तौषीत् [ ठ ] । **च** पुनः, **समापितमन्त्रजपविधिः** सम्पादितमन्त्रजपानुष्ठानः, **कियत्यपि** कतिपयेऽपि, समये, **अतिक्रान्ते** व्यतीते, **देवतागृहात्** लक्ष्मीमन्दिरात्, **विनिर्गत्य** निःसृत्य, **दर्शनार्थं** लक्ष्मी-

स्थितं गत्वा गुरुजनं ववन्दे । विहितमध्यन्दिनावश्यकविधिश्चापराह्णसमयानुज्ञातदर्शनेन सर्वदर्शनग्रन्थार्थवेदिना विद्वज्जनेन सार्धं तैस्तैः कथालापैस्तस्थौ । उपस्थिते च प्रदोषसमये तेनैव विधिना श्रियः पूजोपचारं चक्रे । अन्यदिवसेष्वप्येतदेवान्वतिष्ठत् । देवताकृत्यशून्ये च क्षणे समुपजातचित्तोत्कलिकः कदाचिदारुह्य क्रीडाशैलशिखरं समन्ततो दत्तदृष्टिरुद्यानवापीवनखण्डसरित्तडागदेवतायतनमण्डितान् साकेतपुरपरिसरोद्देशान् ददर्श । कदाचिच्च परिमितपरिचारकानुगम्यमानः प्रमदवनमध्ये मन्दं मन्दं विजहार । एवं च तस्योपरतराज्यचिन्ताभारस्य विरचिताभ्यर्णपर्णशालाकृतस्थितेस्त्रिकालस्नायिनः परिमितफलाहारपरिपालितशरीरस्य कुशतल्पशायिनो मुनिसमुपदिष्टेन विधिना व्रतमपत्यसन्ततिनिबन्धनमनतिचारं पालयतो गृहीतब्रह्मचर्यस्य दिवसाः कतिचिदतिजग्मुः । एकदा तु विहितमन्त्रदेवतापूर्वसेवः स राजा पर्वदिवसे विशेषेण निर्वर्त्य देव्याः श्रियः सायन्तनीमायतनपूजामनुपलक्षितः परिचारकगणेन नगरबाह्यारामण्डनमादितीर्थतया पृथिव्यां प्रथितमतितुङ्गशिखरतोरण-

---

दर्शनसुकृतार्थम्, आगतम्, **उचितस्थानस्थितं** योग्यस्थानोपविष्टम्, **गुरुजनं** स्वपूज्यजनम्, **गत्वा** उपस्थाय, **ववन्दे** अभिवादयामास । **च** पुनः, **विहितमध्यन्दिनावश्यकविधिः** कृतमाध्याह्निकनित्यकृत्यः, **अपराह्णसमयानुज्ञातदर्शनेन** अपराह्णसमये-दिवसापरभागे, अनुज्ञातम्-अनुमतम्, दर्शनं यस्य तादृशेन, **सर्वदर्शनग्रन्थार्थवेदिना** सर्वेषाम् दर्शनानाम्, आध्यात्मिकदृष्टिभेदानाम्, ये ग्रन्थाः-निबन्धाः, तेषाम्, अर्थवेदिना-अर्थाभिज्ञेन, **विद्वज्जनेन** बुधजनेन, **सार्द्धं** सह, **तैस्तैः** प्रसिद्धविविधैः, **कथालापैः** वार्तालापविनोदैः, **तस्थौ** तिष्ठति स्म । **च** पुनः, **उपस्थिते** प्राप्ते, **प्रदोषसमये** सायंसमये, **तेनैव** पूर्वोक्तेन, **विधिना** विधानेन, **श्रियः** लक्ष्म्याः, **पूजोपचारं** पूजात्मकशुश्रूषाम्, **चक्रे** कृतवान् । **अन्यदिवसेष्वपि** अन्यदिनेष्वपि, **एतदेव** इदमेव कार्यजातम्, **अन्वतिष्ठत्** अकरोत् । **च** पुनः, **देवताकृत्यशून्ये** लक्ष्म्याराधनरहिते, **क्षणे** मुहूर्ते, **समुपजातचित्तोत्कलिकः** समुपजाता-सम्यगुत्पन्ना, चित्तोत्कलिका-हृदयोत्कण्ठा यस्य तादृशः, **कदाचित्** कस्मिंश्चित् समये, **क्रीडाशैलशिखरं** क्रीडापर्वतोपरिभागम्, आरुह्य, **समन्ततः** सर्वतो **दत्तदृष्टिः** विक्षिप्तलोचनः, **उद्यानवापीवनखण्डसरित्तडागदेवतायतनमण्डितान्** उद्यानेन-राज्ञः साधारणक्रीडाकाननेन, वापीभिः, वनखण्डैः-वनावान्तरविभागैः, सरिद्भिः-नदीभिः, तडागैः-पद्माकरजलाशयैः, देवतायतनैः-देवमन्दिरैः, मण्डितान्-अलङ्कृतान्, **साकेतपुरपरिसरोद्देशान्** साकेतपुरस्य-अयोध्यापुर्याः, परिसरान्-समीपभूतान्, उद्देशान्-उन्नतदेशान्, उत्कृष्टदेशान् वा, **ददर्श** दृष्टवान् । **च** पुनः, **कदाचित्** कस्मिंश्चित् काले, **परिमितपरिचारकानुगम्यमानः** परिमितैः-अनधिकैः, परिचारकैः-सेवकैः, अनुगम्यमानः-अनुस्रियमाणः, **प्रमदवनमध्ये** अन्तःपुरोचितक्रीडाकाननमध्ये, **मन्दं मन्दं** यथा स्यात्तथा, **विजहार** विहारमकरोत् । **एवम्** अनुपदमुपदर्शितक्रमेण, **तस्य** मेघवाहनस्य, **उपरतराज्यचिन्ताभारस्य** उपरतः-निवृत्तः, राज्यचिन्तारूपो भारो यस्य तादृशस्य, विरचिता-निर्मापिता, अभ्यर्णा-निकटभूता, या पर्णशाला-पर्णकुटी, तस्यां **कृतस्थितेः** कृतनिवासस्य, **त्रिकालस्नायिनः** त्रिकालेषु-प्रातर्मध्याह्नसायंकालेषु, स्नानशीलस्य, **परिमितफलाहारपरिपालितशरीरस्य** परिमितेन-अल्पेन, फलाहारेण, रक्षितशरीरस्य, **कुशतल्पशायिनः** कुशतल्पे-कुशाख्यपवित्रतृणशय्यायाम्, शयनशीलस्य, **मुनिसमुपदिष्टेन** मुनिबोधितेन, **विधिना** विधानेन, **अनतिचारम्** अतिक्रमणशून्यं यथा स्यात्तथा, **अपत्यसन्ततिनिबन्धनम्** अपत्यविस्तारकारणभूतम्, **व्रतं** नियमम्, **पालयतो** रक्षतः, **गृहीतब्रह्मचर्यस्य** वर्जितकामासङ्गस्य, **कतिचित्** कतिपये, **दिवसाः** दिनानि, **अतिजग्मुः** अतीताः । **च** पुनः, **एकदा** एकस्मिन् दिने, **विहितमन्त्रदेवतापूर्वसेवः** विहिता-अनुष्ठिता, मन्त्रदेवतयोः, मन्त्राधिष्ठातृदेवताया वा, अपूर्वा सेवा, मन्त्रेण देवताया अपूर्वसेवा वा येन तादृशः, **स** मेघवाहनो राजा, **पर्वदिवसे** पुण्यतिथौ, **श्रियः** लक्ष्म्याः, **देव्याः** भगवत्याः, **सायन्तनीं** सायंकालिकीम्, **आयतनपूजां** मन्दिरपूजाम्, **विशेषेण** विशिष्टविधिना, **निर्वर्त्य** सम्पाद्य, **परिचारकगणेन** सेवकसङ्घेन, **अनुपलक्षितः** अचिह्नितः, तेनाननुगत इति यावत्, **नगरबाह्यारामण्डनं** नगरबाह्यानाम्-नगराद् बहिः स्थितानाम्, आरामाणाम्-उपवनानाम्, मण्डनं-शोभाऽऽधायकम्, **आदितीर्थतया** आदितीर्थङ्करऋषभदेवाधिष्ठितत्वेन प्रथमतीर्थतया, **पृथिव्यां** जगति, **प्रथितं** प्रसिद्धम्, **अतितुङ्गशिखरतोरणप्राकारम्** अतितुङ्गानि परमोन्नतानि, शिखराणि-शृङ्गाणि,

प्राकारं शक्रावतारं नाम सिद्धायतनमगमत् [ड], प्रविशन्नेव च तस्य द्वारदेशे झटिति दत्तदर्शनम्, अखिलविष्टपत्रयाधिपतिना ज्वलितज्वलनच्छटाजटालकुलिशकोटिकुट्टितकुलाचलेन भुजबलविनिर्जितबलप्रमुखदर्पितासुरचक्रेण भगवता स्वयं शक्रेण साकेतपुरनिवेशकाल एव कृतप्रतिष्ठस्य भगवतो युगादिजिनस्य कृत्वा प्रणाममभिमुखमापतन्तम् [ढ], अल्पावशेषदेवायुषम्, आसन्नसमुपस्थितविनाशतया समुपजातद्वादशारुणोदयमिव ब्रह्मस्तम्बमस्तशिखरपर्यस्तसूर्यमिव दिवसमुपरिसन्नद्धसजलमेघदुर्दिनमिव ग्रीष्मदावानलमिन्दुमण्डलाभिमुखीभूतसैंहिकेयमिव पार्वणचन्द्रिकापटलम् [ण], उल्लिखितशातकुम्भस्तम्भावदातदेहम् [त], उचितप्रमाणशालिनामतिभास्वरतया तडिद्दण्डैरिव निर्मितानां पुष्परागपरमाणुमृत्तिकाभिरिव दत्तोपचयानामातपेनेव कल्पित-

---

तोरणानि–बहिर्द्वाराणि, प्रकाराः–दुर्गभूमयश्च यस्य तादृशम्, **शक्रावतारं** शक्रस्य अवतारः–स्वर्गादवतरणं यत्रेत्यर्थः, तन्नामकम्, **सिद्धायतनं** सिद्धमन्दिरम्, सिद्धिं गतस्य जिनस्य मन्दिरमित्यर्थः, **अगमत्** गतवान् [ ड ] ।

**स** पुनः, तस्य **द्वारदेशे** अन्तःप्रवेशप्रदेशे, **प्रविशन्नेव** प्रवेशं कुर्वन्नेव, **झटिति** शीघ्रम्, तत्क्षण एवेत्यर्थः, **दत्तदर्शनं** दत्तं दर्शनं येन तादृशम्, दृष्टिगोचरतां गतमित्यर्थः, एकं **वैमानिकं** विमाने वसति यः स वैमानिको देवः, तम्, **अपश्यत्** दृष्टवानिति दूरतरेणान्वेति । कीदृशं तम्? **भगवतः** अनन्तज्ञानादिसम्पत्तिशालिनः, **युगादिजिनस्य** युगस्यादिभूतो यो जिनः, आदिनाथः, तस्य, वृषभदेवस्येत्यर्थः, **प्रणामम्** अभिवादनम्, कृत्वा, **अभिमुखं** सम्मुखम्, **आपतन्तम्** आगच्छन्तम् । कीदृशस्य तस्य भगवतः? **अखिलविष्टपत्रयाधिपतिना** समग्रभुवनत्रयाधिनायकेन, पुनः **ज्वलितज्वलनच्छटाजटालकुलिशकोटिकुट्टितकुलाचलेन** ज्वलितज्वलनस्येव–दीप्तपावकस्येव, या छटा–दीप्तिः, तया जटालस्य–व्याप्तस्य, कुलिशस्य–वज्रस्य, "ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः" इत्यमरः, कोट्या–अग्रभागेन, कुट्टिताः–खण्डिताः, कुलाचलाः–"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः" ॥ इत्यभियुक्तोक्तकुलपर्वता येन तादृशेन, पुनः **भुजनिर्जितबलप्रमुखदर्पितासुरचक्रेण** भुजबलेन–बाहुविक्रमेण, निर्जितं–पराजितम्, बलप्रमुखानां–बलप्रभृतीनाम्, दर्पितानां–गर्वितानाम्, असुराणां–दानवानाम्, चक्रं–समूहो येन तादृशेन, **भगवता** परमैश्वर्यशालिना, **शक्रेण** इन्द्रेण, **साकेतपुरनिवेशकाल एव** अयोध्यानगरनिर्माणसमय एव, **स्वयं** स्वेनैव, **कृतप्रतिष्ठस्य** तत्र प्रतिष्ठापितस्य [ ढ ] । पुनः कीदृशम्? **अल्पावशेषदेवायुषम्** अल्पं–किञ्चिदेव, अवशेषम्–अवशिष्टम्, देवायुः–दैविकजीवनकालो यस्य तादृशम्, अत एव **आसन्नसमुपस्थितविनाशतया** आसन्नं–निकटं यथा स्यात्तथा, समुपस्थितः–सम्यगुपगतः, विनाशः–दिव्यदेहत्यागो यस्य तादृशतया, अत्यासन्नमृत्युतयेत्यर्थः, **समुपजातद्वादशारुणोदयं** समुपजातः–सम्यग्जातः, द्वादशानां–द्वादशसंख्यकानाम्, अरुणानां–रक्तवर्णबिम्बमण्डलाधिष्ठितसूर्याणाम्, उदयः–युगपदुद्गमो यस्मिन् तादृशम्, **ब्रह्मस्तम्बं** प्रलयकालिकं ब्रह्माण्डमिवेत्युत्प्रेक्षा । पुनः **अस्तशिखरपर्यस्तसूर्यम्** अस्तशिखरपर्यस्तः–अस्ताचलशिखरापतितः, तदारूढ इत्यर्थः, सूर्यो यस्मिन् तादृशम्, **दिवसमिव** सायङ्कालिकं दिनमिवेत्युत्प्रेक्षा । पुनः **उपरिसन्नद्धसजलमेघदुर्दिनं ग्रीष्मदावानलमिव** उपरि–गगनमण्डले, सन्नद्धैः–विस्तीर्णैः, सजलमेघैः–जलपूर्णमेघैः, दुर्दिनं–तिरोहितम्, ग्रीष्मकालिकं दावाग्निमिवेत्युत्प्रेक्षा । पुनः **इन्दुमण्डलाभिमुखीभूतसैंहिकेयम्** इन्दुमण्डलाभिमुखीभूतः–चन्द्रमण्डलस्पर्शोन्मुखीभूतः, सैंहिकेयः–सिंहिकासुतः, राहुरिति यावत्, यस्य तादृशम्, राहुग्रसनकालिकमित्यर्थः, **पार्वणचन्द्रिकापटलमिव** पार्वणं–पूर्णिमासम्बन्धि, चन्द्रिकापटलं–चन्द्रज्योत्स्नाकलापमिवेत्युत्प्रेक्षा [ ण ] । पुनः **उल्लिखितशातकुम्भस्तम्भावदातदेहम्** उल्लिखितस्य–सद्यः शाणसंघृष्टस्य, शातकुम्भस्य–सुवर्णस्य, यः स्तम्भः–स्थूणा, तद्वत् अवदातः–उज्ज्वलः, देहः–शरीरं यस्य तादृशम् [ त ] । पुनः **उचितप्रमाणशालिनाम्** उचितं–लक्षणशास्त्रोक्तदिशा योग्यं यत्, प्रमाणं–शरीरावयवपरिमाणम्, तच्छालिनाम्, **अतिभास्वरतया** अतिदीप्तिमत्तया, **तडिद्दण्डैः** सौदामिनीशलाकाभिः, **निर्मितानां** रचितानामिवेत्युत्प्रेक्षा । पुनः **पुष्परागपरमाणुमृत्तिकाभिः** पुष्पस्येव, रागः–रक्तवर्णो यस्य स पुष्परागः, अन्वर्थतत्संज्ञको मणिविशेषः, तस्य परमाणवः–अतिसूक्ष्मरेणव एव, मृत्तिकाः–मृत्तिकारेणवः, ताभिः, **दत्तोपचयानामिव** दत्तः–कृतः, उपचयो वृद्धिर्येषां तादृशानामिवेत्युत्प्रेक्षा । पुनः **आतपेन** सूर्यप्रभया, **कल्पितत्वचामिव** कल्पिता–निर्मिता, त्वक्–अङ्गं येषां तादृशानामिवेत्यु-

स्त्वचामङ्गानामनलस्फुलिङ्गपिङ्गलेन गलता समन्ततः प्रभाजालेन ज्वलदनेकदीपिकाचक्रवालमिव मण्डपान्तरालं कुर्वाणम्, अन्तरिक्षगतमप्यतिबहलतया चरणतलप्रभायाः स्पृष्टभूतलमिवोपलक्ष्यमाणम् [थ], अकठोरविद्रुमकन्दलीसरलाभिरम्भोजदलभ्रमापतद्भ्रमरसम्भ्रमादिवान्योऽन्यलग्नाभिरग्रतः स्फुरदुन्मयूखनखलेखाभिरन्धकारदुरुपलक्ष्याध्वपरिस्खलनशङ्कया पुरस्कृतशशिकलाभिरिवाङ्गुलीभिरुपेतेन गत्युत्कम्पगलितवैकक्षस्रग्दामरेणुनिश्चलनिलीनैरलिभिः पुनरागमनप्रार्थनापुरःसरमानतायास्त्रिदशलोकश्रियो वियोगाश्रुभिरिव सकज्जलैः कल्माषितेन कल्पतरुपल्लवचारुणा चरणद्वयेन द्योतमानम् [द], अग्रतोऽग्रतः श्लक्ष्णपरिमण्डलजङ्घाकाण्डेनैरावतकरमिवान्तिके विधाय वेधसा निर्मितेन मूले मूले स्थूलेन भ्राजमानम् [ध], ऊरुस्तम्भयुगलेन निवसितातिसूक्ष्मदेवाङ्गवसनम् [न], आनीलपाटलेन पद्मरागेन्द्रनीलखण्डखचितस्य मेखलादाम्नः प्रेङ्खताऽधोमुखेन मयूख-

---

त्प्रेक्षा। **अङ्गानां** शरीरावयवसम्बन्धिना, **समन्ततः** परितः, **गलता** प्रसरता, स्फुरतेत्यर्थः, **अनलस्फुलिङ्गपिङ्गलेन** अनलस्य—अग्नेः, यः स्फुलिङ्गः—कणः, तद्वत् पिङ्गलेन—पिशङ्गवर्णेन, **प्रभाजालेन** कान्तिपुञ्जेन, **मण्डपान्तरालं** शक्रावतारतीर्थमण्डपमध्यभागम्, **ज्वलदनेकदीपिकाचक्रवालमिव** ज्वलद्—दीप्यमानम्, अनेकदीपिकानां चक्रवालं—मण्डलं यस्मिन् तादृशम्, **कुर्वाणं** रचयन्तम्। पुनः **अन्तरिक्षगतमपि** नभोमण्डलस्थितमपि, **चरणतलप्रभायाः** स्वचरणतलद्युतेः, **अतिबहलतया** अतिशयबाहुल्येन, **स्पृष्टभूतलमिव** स्पृष्टं—संसृष्टम्, भूतलं—पृथ्वीतलं येन तादृशमिव, **उपलक्ष्यमाणं** लोकैः प्रतीयमानम् [थ]। पुनः कीदृशमसुम्? **चरणद्वयेन** पादयुगेन, **द्योतमानम्** उद्भासमानम्, कीदृशेन तेन? **कल्पतरुपल्लवचारुणा** कल्पतरोः—कल्पाख्यदेववृक्षस्य, यः पल्लवः—नवपत्रम्, तद्वच्चारुणा—सुन्दरेण। पुनः कीदृशेन? **अङ्गुलीभिः**, **उपेतेन** अन्वितेन, कथम्भूताभिस्ताभिः? **अकठोरविद्रुमकन्दलीसरलाभिः** अकठोरा—कोमला, या विद्रुमकन्दली—प्रवालगुल्मविशेषः, तद्वत् सरलाभिः—ऋज्वीभिः। पुनः **अन्योऽन्यसंलग्नाभिः** परस्परसंश्लिष्टाभिः, कस्मादिव? **अम्भोजदलभ्रमापतद्भ्रमरसम्भ्रमादिव** अम्भोजदलभ्रमेण—रक्तकमलपत्रभ्रान्त्या, आपतन्तः—आक्रामन्तः, ये भ्रमराः, तेभ्यः—तज्जन्यादित्यर्थः, सम्भ्रमात्—भयजन्यत्वरावशादिवेत्युत्प्रेक्षा। पुनः **स्फुरदुन्मयूखनखलेखाभिः** स्फुरन्ती—स्फुदन्ती, उन्मयूखा—उद् उच्छलन्तो मयूखा रश्मयो यस्यास्तादृशी च, नखलेखा—नखपङ्क्तिर्यासां तादृशीभिः, अत एव **अन्धकारदुरुपलक्ष्याध्वपरिस्खलनशङ्कया** अन्धकारेण—रात्रिध्वान्तेन, दुरुपलक्ष्यः—दुःखेनोपलक्षयितुं प्रत्येतुं शक्यः, योऽध्वा—मार्गः, तत्र परिस्खलनशङ्कया—विचलनसंशयेन, **पुरस्कृतशशिकलाभिः** पुरस्कृता—मार्गोद्भासनार्थमग्रतः कृता, शशिकला—चन्द्रकला याभिस्तादृशीभिरिवेत्युत्प्रेक्षा। पुनः कीदृशेन चरणद्वयेन? **अलिभिः** भ्रमरैः, **कल्माषितेन** स्वकृष्णवर्णमिश्रणच्चित्रीकृतेन, कीदृशैस्तैः? **गत्युत्कम्पगलितवैकक्षस्रग्दामरेणुनिश्चलनिलीनैः** गत्या—गमनेन, य उत्कम्पः—उद्वेलनम्, तेन हेतुना, गलितं—पादयोः स्खलितम्, यद् वैकक्षकं—वक्षःस्थले तिर्यग्धृतम्, स्रग्दाम—कुसुमहारयष्टिः, तत्र, निश्चलं निःस्पन्दं यथा स्यात्तथा, निलीनैः—संश्लिष्टैः, "वैकक्षकं तु तत् यत् तिर्यक् क्षिप्तमुरसि" इत्यमरः, अत एव **पुनरागमनप्रार्थनापुरस्सरं** स्वर्गप्रत्यागमनानुनयपूर्वकम्, **आनतायाः** पादयोः पतितायाः, **त्रिदशलोकश्रियः** स्वर्लोकलक्ष्म्याः, **सकज्जलैः** कज्जलमिश्रितैः, **वियोगाश्रुभिः** विरहवेदनागलितनयनवारिभिरिवेत्युत्प्रेक्षा [द]। पुनः कीदृशम्? **अग्रतोऽग्रतः** अग्रेऽग्रे भागे, **श्लक्ष्णपरिमण्डलजङ्घाकाण्डेन** श्लक्ष्णं—कोमलम्, परिमण्डलं—वर्तुलम्, यज्जङ्घाकाण्डं—गुल्फजानुमध्यवर्त्यवयवरूपदण्डः, तेन, **भ्राजमानं** दीप्यमानम्, कीदृशेन तेन? **ऐरावतकरम्** इन्द्रगजशुण्डदण्डम्, **अन्तिके** स्वपार्श्वे, स्वपुरत इति यावत्, **विधायेव** आदर्शरूपेण स्थापयित्वेव, **वेधसा** ब्रह्मणा, **मूले मूले** मूलानुपूर्व्येण, **स्थूलेन** स्थौल्यगुणवत्तया, **निर्मितेन** रचितेन [ध]। पुनः कीदृशम्? **ऊरुस्तम्भयुगलेन** ऊरू—जानूपरिभागावेव, स्तम्भौ—ऊर्ध्वदेहगृहस्थूणारूपौ, तयोर्युगलेन, **निवसितातिसूक्ष्मदेवाङ्गवसनं** निवसितम्—आच्छादितम्, परिधृतमिति यावत्, अतिसूक्ष्मं—कौशेयमित्यर्थः, देवाङ्गवसनं—देवोचितं परिधानीयवस्त्रं येन तादृशम् [न]। पुनः **पद्मरागेन्द्रनीलखण्डखचितस्य** पद्मरागस्य—रक्तमणेः, इन्द्रनीलस्य—नीलमणेश्च, खण्डैः, खचितस्य—व्याप्तस्य, **मेखलादाम्नः** कटिसूत्रश्रेणीसम्बन्धिना, **मयूखमालामण्डलेन** मयू-

मालामण्डलेन समन्तादाच्छादितनितम्बभागम् [प], अभिनवकल्पपादपप्रवालविरचितपरिधानम्, साक्षाद्धृतकिरातवेषमिव विषमलोचनम् [फ], उन्निद्रकाञ्चनारविन्दचारुणा विमलकान्तिसलिलपरिपूरितेन मानसेनेव मज्जनक्रीडापरम्परोपजातपरिचयागतेनावर्तिना नाभिमण्डलेनालङ्कृतप्रतनुमध्यभागम् [ब], प्रियापयोधरपरिरम्भशंसिभिः पृथुलपरिमण्डलैर्दिव्यचन्दनरसस्तबकैः स्वर्गच्यवनकालसुलभो हृदयदवथुरितरसुरमिवैनमपि मा पीडयेदिति बुद्ध्या समागतैरखिलपौर्णिमासीशशिमण्डलैरिवाधिष्ठितवक्षस्थलाभोगम् [भ], अतिबहलकेयूरपद्मरागप्रभाभारभरितोदरेण गम्भीरेणापि मांसपरिपूरितेनेव चिरप्ररूढेनाप्यार्द्रेणेव महासुरशस्त्रप्रहारनिवहेन स्थपु-

---

**टिप्पनकम्**—**विषमलोचनं** शङ्करम् [ फ ]। मानसेनेव नाभिमण्डलेन कीदृशेन द्वयेन? **उन्निद्रकाञ्चनारविन्दचारुणा** विकसितसौवर्णपद्मवत् तैश्च रम्येण, **विमलकान्तिसलिलपूरितेन** निर्मला कान्तिरेव सलिलम्, विमलकान्ति यज्जलं च तेन भरितेन, **आवर्तिना** आवर्तयुक्तेन भ्रमवता च [ ब ]।

---

खानां–रश्मीनाम्, मालामण्डलेन मण्डलाकारसमूहेन, **समन्तात्** सर्वतः, **आच्छादितनितम्बभागम्** आच्छादितः–व्याप्तः, नितम्बभागः–कटिप्रदेशो यस्य तादृशम्, कीदृशेन तेन? **आनीलपाटलेन** आ समन्तात् नीलरक्तोभयवर्णविशिष्टेन, पुनः **अधोमुखेन** अधोदेशाभिमुखेन, **प्रेङ्खता** प्रसरता [ प ]। पुनः कीदृशम्? **अभिनवकल्पपादपप्रवालविरचितपरिधानम्** अभिनवैः–नवीनैः, अचिरप्रसूतैरिति यावत्, कल्पपादपप्रवालैः–कल्पाख्यदेववृक्षपत्रैः, विरचितं कल्पितम्, परिधानं–नाभ्यधस्तनवस्त्रं येन तादृशम्, अतः **धृतकिरातवेषं** तपसोपार्जितस्यार्जुनपराक्रमस्य परीक्षणाय तेन योद्धुं कल्पितभिल्लवेषम्, साक्षात्, **विषमलोचनं** शिवमिवेत्युत्प्रेक्षा [ फ ]। पुनः **नाभिमण्डलेन** मण्डलाकारनाभिप्रदेशेन, **अलङ्कृतप्रतनुमध्यभागम्** अलङ्कृतः–शोभितः, प्रतनुः–परमसूक्ष्मः, मध्यभागः–शरीरमध्यप्रदेशो यस्य तादृशम्, केनेव? **मज्जनक्रीडापरम्परोपजातपरिचयागतेन** मज्जनक्रीडापरम्परया–स्नानक्रीडासन्तत्या, उपजातेन परिचयेन–चिरपरिचयोपचितप्रेम्णा, आगतेन–अनुधावितेन, **मानसेन** मानसाख्यदिव्यसरोवरेणेवेत्युत्प्रेक्षा, कीदृशेन? मानसेन? **उन्निद्रकाञ्चनारविन्दचारुणा** उन्निद्राणि–विकसितानि, यानि काञ्चनारविन्दानि–सुवर्णकमलानि, तैः, चारुणा–सुन्दरेण, पक्षे तादृशारविन्दवत् सुन्दरेण, पुनः **विमलकान्तिसलिलपरिपूरितेन** विमला–स्वच्छा, कान्तिः–छविर्येषां तादृशैः, सलिलैः–जलैः, परिपूरितेन–समन्तात् पूर्णेन, पक्षे स्वच्छकान्तिरूपसलिलपूर्णेन, पुनः **आवर्तिना** आवर्तः–जलभ्रमिः, पक्षे चक्राकाररेखा, तद्वता [ ब ]। पुनः कीदृशम्? **दिव्यचन्दनरसस्तबकैः** दिव्यस्य–देवोपभोग्यस्य, चन्दनरसस्य–चन्दनपङ्कस्य, यत् स्तबकं–पिण्डः, तैः, **अधिष्ठितवक्षस्थलाभोगम्** अधिष्ठितः–व्याप्तः, वक्षस्थलाभोगः–वक्षस्थलविस्तारो यस्य तादृशम्, कीदृशैस्तैः? **प्रियापयोधरपरिरम्भशंसिभिः** प्रियायाः–कान्तायाः, पयोधरयोः–स्तनयोर्यः, परिरम्भः–सम्पर्कः, आलिङ्गनमिति यावत्, तच्छंसिभिः–तद्व्यञ्जकैः, कथमित्यत आह–**पृथुलपरिमण्डलैः** यतः पृथुलं–विशालम्, परिमण्डलं–वर्तुलाकारत्वं येषां तैः, कैरिव तैः? **अखिलपौर्णमासीशशिमण्डलैरिव** अखिलं–समग्रम्, यत् पौर्णमास्याः, शशिमण्डलं–चन्द्रमण्डलम्, तैरिवेत्युत्प्रेक्षा, कीदृशैस्तैः? **इतरसुरमिव** अन्यदेवमिव, **एनमपि** प्रस्तुतदेवमपि, **स्वर्गच्यवनकालसुलभः** मासषट्कं प्रागेव सर्वेषामपि देवानां स्वर्गच्युतिप्रतिभानात् तत्समयेऽवश्यम्भावी, **हृदयदवथुः** दिव्यभोगत्यागजन्यहृदयपरितापः, **मा पीडयेत्** न व्यथयेत्, **इति बुद्ध्या** तदन्तस्तापोपशमनधिया, **समागतैः** स्वयमुपागतैरिवेत्युत्प्रेक्षा [ भ ]। पुनः कीदृशम्? **महाऽसुरशस्त्रप्रहारनिवहेन** महाऽसुराणां–दुर्दमराक्षसानाम्, शस्त्रैर्ये प्रहाराः–आघाताः, तन्निवहेन–तत्समूहेन **स्थपुटितस्थूलबाहुशिखरं** स्थपुटिते–निम्नोन्नते, स्थूले च, बाहुशिखरे–बाहूर्ध्वभागौ यस्य तादृशम्, कीदृशेन तेन? **अतिबहलकेयूरपद्मरागप्रभाभारभरितोदरेण** अतिबहलैः–अतिप्रचुरैः, केयूरपद्मरागप्रभाभारैः–केयूरौ–बाहुभूषणे, तयोः–तत्सम्बद्धा इत्यर्थः, ये पद्मरागाः–रक्तमणिविशेषाः, तेषां प्रभाभारैः–प्रभापुञ्जैः, भरितं–पूर्णम्, उदरं–मध्यं यस्य तादृशेन, अतः **गम्भीरेणापि** प्रहारवशेन निम्नेनापि, **मांसपूरितेनेव** मांससमवर्णप्रभापुञ्जपूर्णतया समुपचितमांसकृतपूर्तिकेनेवेत्युत्प्रेक्षा, अत एव **चिरप्ररूढेनापि** चिरपूर्वकालोत्पन्नेनापि, अतिशुष्केणापीति यावत्, **आर्द्रेणेव** रक्तप्रभापूर्णतया सद्यःसंजातेनेवेत्युत्प्रेक्षा [ म ]।

टितस्थूलबाहुशिखरम् [म], वामेन सविलासभुजगतागतद्राघितया तत्क्षणोदितेन्दुलेखाकारया नखमणिप्रभया विराजितेन दक्षिणेन चादिदेवप्रणामसमयस्रस्तस्य कुसुमापीडस्य निबिडनाय तिर्यगुन्नमितेन पाणिना बन्धुजीवकचापधारिणः प्रारब्धपृष्ठतूणीरशराकर्षणस्य कुसुमधनुषः स्थानकमङ्गीकुर्वाणम् [य], अभिनवजपाकुसुमकान्तिहारिणो हारनायकमणेरुन्मुखीभिर्मयूखलेखाभिस्तत्कालसंगलितमपरागमपनेतुमारोपिताभिः शिखिशिखावलीभिरिव कपिशिताग्निशौचसिचयोत्तरासङ्गम् [र], अन्तकालनिद्रोदयादीषन्निमिषितस्य दूरविस्तारिणो नयनयुगलस्योन्मेषलीलासु विसर्पता क्षीरधवलेन प्रभाप्रवाहेण मथनारम्भरभसपीतमेकहेलया सकलमिव क्षीरसागरमुद्गिरन्तम् [ल], आयतरक्तनालेन सततविकासिना नाकमन्दाकिनीनीलोत्पलेन सहस्रलोचनात् प्रसाद-

---

**टिप्पनकम्—द्राघितया** दीर्घीकृतया [ य ]। **संगलितं**—न मिलितम्, **अपरागं** मालिन्यम् [ र ]।

---

पुनः कीदृशम्? **कुसुमधनुषः** कुसुममेव धनुर्यस्य तादृशस्य, कामदेवस्येत्यर्थः, **स्थानकं** स्थानम्, तदीयशोभामित्यर्थः, **अङ्गीकुर्वाणं** स्वीकुर्वाणम्, धारयन्तमित्यर्थः, कीदृशस्य तस्य? **बन्धूजीवकचापधारिणः** बन्धूजीवकसंज्ञकपुष्पविशेषरूपधनुर्धारिणः, पुनः **प्रारब्धपृष्ठतूणीरशराकर्षणस्य** पृष्ठे-पृष्ठभागे, लम्बमानं यत् तूणीरं—बाणाधारपात्रम्, ततः शराकर्षणं-बाणाकर्षणम्, प्रारब्धं—प्रवर्तितं येन—तादृशस्य, केन वस्तुना तदीयशोभानुकरणम्? **सविलासभुजगतागतद्राघितया** सविलासं—विलाससहितं यथा स्यात् तथा, भुजगतागताभ्यां—बाहूत्क्षेपणापक्षेपणाभ्याम्, द्राघितया-दीर्घतामापादिततया, **तत्क्षणोदितेन्दुलेखाकारया** तत्क्षणे—तस्मिन्नेव क्षणे, उदिता—प्राप्तोदया, या इन्दुलेखा-रेखाकारचन्द्रः, तत्सदृश्या, **नखमणिप्रभया** नखरूपमणिदीप्त्या, विराजितेन वामेन, **आदिदेवप्रणामसमयस्रस्तस्य** आदिनाथनमस्कारकाले मस्तकस्खलितस्य, **कुसुमापीडस्य** पुष्पशिरोमाल्यस्य, "शिखास्वापीडशेखरौ" इत्यमरः, **निबिडनाय** नियन्त्रणाय, **तिर्यक्** कुटिलं यथा स्यात् तथा, **उन्नमितेन** उद्यतेन; दक्षिणेन च **पाणिना** हस्तेन। कामस्य वामहस्ते यः कुसुमचापस्तत्स्थानीया तस्य वामहस्ते नखप्रभा, यच्च दक्षिणहस्तेन तूणीरतः शराकर्षणं तत्स्थानीयं तस्य दक्षिणहस्तेन कुसुममाल्याकर्षणमित्यूहनीयम् [ य ]। पुनः कीदृशम्? **उन्मुखीभिः** ऊर्ध्वमुखीभिः, **मयूखलेखाभिः** रश्मिपङ्क्तिभिः, **कपिशिताग्निशौचसिचयोत्तरासङ्गं** कपिशितः—कपिवत् कृष्णपीतवर्णमापादितः, अग्निशौचः—अग्निना प्रक्षालनीयो यः, सिचयः—पटः, स एवोत्तरासङ्गः—उत्तरीयवस्त्रं यस्य तादृशम्, "द्वौ प्रावारोत्तरासङ्गौ" इत्यमरः, कस्य ताभिः? **हारनायकमणेः** हारे, नायकस्य-प्रधानस्य, मणेः, कीदृशस्य तस्य? **अभिनवजपाकुसुमकान्तिहारिणः** अभिनवानि—तत्क्षणविकसितानि, यानि जपाकुसुमानि—जपासंज्ञकरक्तपुष्पाणि, तेषां कान्तिहारिणः—कान्तिहरणशीलस्य, काभिरिव ताभिः? **तत्कालसंगलितं** तत्समयेऽमिलितम्, **'तत्कालसंकलितम्'** इतिपाठे तत्क्षणप्राप्तम्, **अपरागं** रक्ताविरुद्धं श्यामलत्वम्, **अपनेतुं** परिहर्तुम्, **आरोपिताभिः** स्थापिताभिः, **शिखिशिखावलीभिरिव** शिखिनः—वह्नेः, या शिखा—ज्वाला तस्या आवलीभिः—श्रेणीभिरिवेत्युत्प्रेक्षा [ र ]। पुनः कीदृशम्? **अन्तकालनिद्रोदयात्** अन्तकाले—दिव्यदेहावसानसमये, निद्रोदयात्—देवानामपि किञ्चिन्निद्रोद्भवात्, **ईषन्निमिषितस्य** किञ्चिन्निमीलितस्य, **दूरविस्तारिणः** अतिदीर्घस्य, नयनयुगलस्य, **उन्मेषलीलासु** उन्मीलनक्रीडासु, **विसर्पता** परितः प्रसरता, **क्षीरधवलेन** दुग्धवत् स्फीतेन, **प्रभाप्रवाहेण** प्रभानिर्झरेण, ज्ञापकेन, **मथनारम्भरभसपीतं** मथनारम्भे—क्षीरसागरविलोडनारम्भे, रभसेन—त्वरया, **'मथनारम्भरसपीतम्'** इति पाठे तु रसेन—तृष्णया, पीतं—पानकर्मीकृतम्, **सकलं** समग्रम्, **क्षीरसागरं** दुग्धसिन्धुम्, **एकहेलया** एकेनैव विलासेन, युगपदेवेत्यर्थः, **उद्गिरन्तमिव** उद्वमन्तमिवेत्युत्प्रेक्षा [ ल ]। पुनः कीदृशम्? **नाकमन्दाकिनीनीलोत्पलेन** स्वर्गङ्गासम्बन्धिनीलकमलेन, **चुम्बितैकश्रवणपार्श्वं** चुम्बितं—संस्पृष्टम्, एकं—दक्षिणम्, श्रवणपार्श्वं—श्रोत्रान्तिकप्रदेशो यस्य तादृशम्, कीदृशेन तेन? **आयतरक्तनालेन** आयतं—दीर्घम्, रक्तं—रक्तवर्णं च, नालं—मृणालं यस्य तादृशेन, पुनः **सततविकासिना** सततम्—अहर्निशम्, चन्द्रोदयेऽपीत्यर्थः, विकासिना—विकसनशीलेन, केनेव? **सहस्रलोचनात्** सहस्रसंख्यकलोचनविशिष्टात् इन्द्रात्, तत्सकाशादित्यर्थः, **प्रसादलब्धेन**

लब्धेनैकलोचनेनेव चुम्बितैकश्रवणपार्श्वम् [व], उल्लसिताधरप्रभासान्द्रविद्रुमवनमुद्धूतधवलदीर्घलोचनतरङ्ग-मुत्सङ्गितकपोलमुक्ताशुक्तिकान्तमाक्रान्तोज्ज्वलललाटतटमाविष्कृतभ्रूलताशैवलवल्लरीकमापीतामृतदर्शनदूराशया क्षीरोदसलिलमिव सकलमावासितमुपहसितशरच्चन्द्रिकाप्रकाशमास्यलावण्यमुद्वहन्तम् [श], आपीडमधुकर-प्रतिबिम्बकर्बुरितोदरेण बहलरागवर्षिणा चूडारत्नेन भाविसुरलक्ष्मीविनाशसूचनाय कृतसान्निध्येनोत्पातसूर्यमण्ड-लेनेव सकीलेन कलितोत्तमाङ्गम् [ष], अमरकाननप्रभवघनसारसंस्कारातिशयसुरभिणा सुरकरिकपोलमद-मिश्रेण गोशीर्षचन्दनेन कृतमसृणसर्वाङ्गीणाङ्गरागम् [स], अनिलकृतसूक्ष्मान्तरालप्रविष्टपटुविलेपनामोदमुषित-निद्रैर्निर्दयचरणप्रणोददलितदलपुटैरपहायापहाय कमलगर्भशयनानि धावद्भिरुद्यानदीर्घिकामधुकरकुलैः सम-

---

स्वामिभूततत्प्रसन्नताप्राप्तेन, **एकलोचनेनैव** एकनेत्रेणेवेत्युत्प्रेक्षा [ व ] । पुनः कीदृशम् ? **उपहसितशरच्चन्द्रिका-प्रकाशम्** उपहसितः–तिरस्कृतः, शरच्चन्द्रिकायाः–शरत्कालिकज्योत्स्नायाः, प्रकाशो येन तादृशम्, **आस्यलावण्यं** मुख-सौन्दर्यम्, **उद्वहन्तम्** उद्–ऊर्ध्वभागे, धारयन्तम्, **किमिव ? आपीतामृतदर्शनदुराशया** आपीतं-स्वेन समन्तात् पानकर्मीकृतम्, यद् अमृतं–तदुद्धृतं पीयूषम्, तद्दर्शनदुराशया–तदवलोकनविषयिण्या दुराशया असम्भाव्यफलकाङ्क्षया, **आवासितं** स्वपार्श्वे निवासितम्, **सकलं** सम्पूर्णम्, **क्षीरोदसलिलमिव** क्षीरसागरजलमिवेत्युत्प्रेक्षा, कीदृशं तत् सलि-लम् ? **उल्लसिताधरप्रभासान्द्रविद्रुमवनम्** उल्लसिता–उज्ज्वलिता, या अधरप्रभा–ओष्ठच्छविः, तद्रूपं सान्द्रं–निबिडम्, विद्रुमवनं–प्रवालप्रसविवनं यस्मिन् तादृशम्; पुनः **उद्धूतधवलदीर्घलोचनतरङ्गम्** उद्धूते–उन्मीलिते, धवले दीर्घे च, ये लोचने, लोचनप्रमेति यावत्, तद्रूपस्तरङ्गो यस्मिन्, उद्धूतो धवलदीर्घलोचनात्मकस्तरङ्गो यस्मिन् वा तादृशम्, पुनः **उत्स-ङ्गितकपोलमुक्ताशुक्तिकान्तम्** उत्सङ्गिताभ्यां–स्वान्तर्धृताभ्याम्, कपोलाभ्यां–गण्डयुगलरूपाभ्याम्, मुक्ताशुक्तिकाभ्यां–मुक्तोद्भवक्षेत्ररूपशुक्तिभ्याम्, कान्तं–सुन्दरम्, पुनः **आक्रान्तोज्ज्वलललाटतटम्** आक्रान्तं–व्याप्तम्, उज्ज्वलललाटरूपं तटं येन तादृशम्, पुनः **आविष्कृतभ्रूलताशैवलवल्लरीकम्** आविष्कृता–प्रकटिता, भ्रूलता–नेत्रोपरितनरोमराजिरूपा, शैवलवल्लरी–शैवालमञ्जरी येन तादृशम्, [ श ] । पुनः **चूडारत्नेन** चूडामणिना, मुकुटमणिनेत्यर्थः, **कलितोत्तमाङ्गं** कलितं–संवलितं विभूषितमिति यावत्, उत्तमाङ्गं–शीर्षं यस्य तादृशम्, "उत्तमाङ्गं शिरः शीर्षम्" इत्यमरः, कीदृशेन तेन ? **आपीडमधुकरप्रतिबिम्बकर्बुरितोदरेण** आपीडे–स्वशिरोधृतकुसुममाल्ये, ये मधुकराः–भृङ्गाः, तत्प्रतिबिम्बैः–छायाभिः, कर्बुरितं–चित्रितम्, उदरं–मध्यं यस्य तादृशेन, पुनः **बहलरागवर्षिणा** विपुलरक्तच्छविविस्तारिणा, केनेव ? **भाविसुर-लक्ष्मीविनाशसूचनाय** भाविनः–अचिरेण भविष्यतः, सुरलक्ष्म्याः–दैविकस्वकीयसम्पदः, विनाशस्य–अवसानस्य, सूचनाय–ज्ञापनाय, **कृतसान्निध्येन** सन्निहितेन, **सकीलेन** कीलया–वह्निशिखया, सहितेन–आश्लिष्टेन, **उत्पातसूर्यमण्डलेनेव** उत्पातः–प्राणिनां शुभाशुभसूचको भूतविकारः, तद्रूपेण सूर्यमण्डलेन–आकस्मिकसूर्यबिम्बेनेवेत्युत्प्रेक्षा । "वह्नेर्द्वयोर्ज्वालकीला-वर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः [ ष ] । पुनः कीदृशम् ? **गोशीर्षचन्दनेन** चन्दनविशेषेण, **कृतमसृणसर्वाङ्गी-णाङ्गरागं** कृतः–सम्पादितः, मसृणः–कोमलः, सर्वाङ्गीणः–सर्वाङ्गव्यापकः, अङ्गरागः–शरीरविलेपनं येन तादृशम्, कीदृशेन तेन ? **अमरकाननप्रभवघनसारसंस्कारातिशयसुरभिणा** अमरकाननं–नन्दनवनमेव, प्रभवः–उत्पत्तिक्षेत्रं यस्य तादृशो यो घनसारः–कर्पूरः, तेन यः संस्कारः–संमिश्रणम्, तेन अतिशयसुरभिणा–समधिकसुगन्धिना, पुनः **सुरकरि-कपोलमदमिश्रेण** सुरकरिणः–देवहस्तिनः, ऐरावतस्येत्यर्थः, यः कपोलमदः–गण्डमदः, तन्मिश्रितेन [ स ] । पुनः कीदृ-शम् ? **उद्यानदीर्घिकामधुकरकुलैः** उद्यानस्य–क्रीडाकाननस्य, या दीर्घिका–जलाशयविशेषः, तत्सम्बन्धिभिः, मधुकरकुलैः–भ्रमरपुञ्जैः, **समन्ततः** परितः, **कृततुमुलकोलाहलं** कृतः, तुमुलः–विपुलः, कोलाहलः–गुञ्जनं यस्मिंस्तादृशम्, कीदृशैस्तैः ? **अनिलकृतसूक्ष्मान्तरालप्रविष्टपटुविलेपनामोदमुषितनिद्रैः** अनिलेन–वायुना, कृतानि–विहितानि, यानि सूक्ष्मान्त-रालानि–कमलदलानां मधुकरकुलानां वा सूक्ष्मावकाशाः, तत्र प्रविष्टः, यः पटुः–उत्कटः, विलेपनामोदः–अङ्गरागसौरभं तेन मुषिता–अपहृता, निद्रा येषां तादृशैः, पुनः **निर्दयचरणप्रणोददलितदलपुटैः** निर्दयं–दयाशून्यं यथा स्यात् तथा,

न्ततस्तिमिरशिबिरैरिव शरीरप्रभारोषितैः कृततुमुलकोलाहलम् [ह], अम्बरागमनसमीरणशोषितसुधाशीकरसेकेन मर्त्यलोकषट्चरणहठचुम्बनशङ्कयेव निबिडसंकोचितमुखीभिर्मन्दारकलिकाभिरन्तरान्तरा दन्तुरितेन किञ्चिदारूढम्लानिना पारिजातकुसुमशेखरेण विराजमानम् [क्ष], अनेकसुरपादपप्रसूनपरिमलमुचः श्वासपवनानतिदीर्घकालमाघ्रातानाखण्डलक्रीडावनमारुतानिव जवागमनखेदादनवरतमुद्धमन्तमेकं वैमानिकमपश्यत् [ज्ञ]।

आलोकनमात्रेणैव तं प्रत्युपजातदिव्यतानिश्चयस्य चक्षुर्निमेषादिलिङ्गदर्शनोन्नीतस्वर्गच्यवनसमयस्य रूपसंपन्निरूपणादात्मनि श्लथीभूतचारुताभिमानग्रन्थेः पार्थिवस्याभून्मनसि–'अहो प्रभावः सुरलोकभूमीनाम्? यत्र खलु संभूतानि पुण्यभागिनां शरीराण्यप्येवंविधानि भवन्ति यानि चरमास्वपि दशासु तावदास्तामुपसर्पितुं द्रष्टुमप्यनलमनलमिव वैद्युतं पुमांसः, तथाहि—अस्य वपुषि प्रकामसौम्येऽपि स कोऽपि स्वभाव-

---

**टिप्पनकम्—अनलम्** असमर्थम्, **अनलमिव** अग्निमिव [ अ ]।

---

चरणप्रणोदैः–चरणाघातैः, दलिताः–बहिर्जिगमिषया विश्लेषिताः–दलपुटाः–संश्लिष्टपत्राणि यैस्तादृशैः, पुनः **कमलगर्भशयनानि** कमलमध्यरूपशय्याः, **अपहाय २** त्यक्त्वा त्यक्त्वा, **धावद्भिः** आमोदलिप्सया भ्रमद्भिः, कैरिव? **शरीरप्रभारोषितैः** शरीरप्रभया–तदीयशरीरदीप्त्या, रोषितैः–विद्वेषितैः, **तिमिरशिबिरैः** अन्धकारसैन्यावासैरिवेत्युत्प्रेक्षा [ ह ]। पुनः कीदृशम्? **पारिजातकुसुमशेखरेण** पारिजातस्य–तत्संज्ञकदिव्यवृक्षस्य, यत् कुसुमं–पुष्पम्, तन्मयेन, शेखरेण–शिरोमाल्येन, **विराजमानं** सुशोभमानम्, कीदृशेन तेन? **अम्बरागमनसमीरणशोषितसुधाशीकरसेकेन** अम्बरात्–आकाशात्, आगमनेन–अवतरणेन, तद्वेगेनेति यावत्, यः समीरणः–वायुः, तेन शोषितः, सुधाशीकरसेकः–अमृतकणक्षरणं यस्मिंस्तादृशेन, पुनः **मन्दारकलिकाभिः** मन्दारनामकदेववृक्षकोरकैः, **अन्तरा अन्तरा** मध्ये मध्ये, **दन्तुरितेन** उन्नमितेन, उपचितेनेति यावत्, कीदृशीभिस्ताभिः? **मर्त्यलोकषड्चरणहठचुम्बनशङ्कयेव** मर्त्यलोकस्य–मर्त्यभुवनसम्बन्धिनो ये, षड्चरणाः–भ्रमराः, तैः, हठेन–बलात्कारेण, यच्चुम्बनं–मकरन्दपिपासया ओष्ठसंयोजनम्, तस्य शङ्कयेव–संशयेनेवेति हेतूत्प्रेक्षा, **निबिडसंकोचितमुखीभिः** निबिडम्–अत्यन्तं यथा स्यात्तथा, सङ्कोचितं–मुद्रितम्, मुखं याभिस्तादृशीभिः, पुनः कीदृशेन तेन? **किञ्चिदारूढम्लानिना** किञ्चित् आरूढा–प्राप्ता, म्लानिः–मालिन्यं येन तादृशेन [ क्ष ]। पुनः कीदृशम्? **जवागमनखेदात्** जवेन–वेगेन, यदागमनम्, तज्जन्यश्रमात्, **अनवरतं** निरन्तरम्, **श्वासपवनान्** नासावायून्, **उद्धमन्तं** निर्गमनागमनमुखेन शब्दाययन्तम्, **'उद्वमन्तम्'** इति पाठे त्यजन्तम्, कीदृशांस्तान्? **अनेकसुरपादपप्रसूनपरिमलमुचः** अनेकसुरपादपानाम्–अनेकदेववृक्षाणाम्, यानि प्रसूनानि–प्रातकुसुमानि, तत्परिमलमुचः–तदामोदविस्तारिणः, कानिव? **अतिदीर्घकालं** बहुकालपर्यन्तम्, **आघ्रातान्** समन्तात् घ्राणजप्रत्यक्षगोचरीकृतान्, **आखण्डलक्रीडावनमारुतान्** आखण्डलस्य–इन्द्रस्य, यत् क्रीडावनं–नन्दनवनम्, तन्मारुतानिव–तदीयविविधकुसुमसौरभाढ्यवायूनिवेत्युत्प्रेक्षा, एतावद्विशेषणविशिष्टम्, एकम्, **वैमानिकं** देवविशेषम्, **अपश्यत्** अद्राक्षीत् [ ज्ञ ]।

**आलोकनमात्रेण** केवलदर्शनेनैव, न तु प्रश्नेनेत्यर्थः, **तं प्रति** निरुक्तव्यक्तिविषये, **उपजातदिव्यतानिश्चयस्य** उपजातः–प्रादुर्भूतः, दिव्यतायाः–देवत्वस्य निश्चयो यस्य तादृशस्य; पुनः **चक्षुर्निमेषादिलिङ्गदर्शनोन्नीतस्वर्गच्यवनसमयस्य** चक्षुर्निमीलनादिरूपस्य लिङ्गस्य–आसन्नस्वर्गच्यवनलक्षणस्य, दर्शनेन, उन्नीतः–अनुमितः, स्वर्गच्यवनसमयः–स्वर्गतश्च्युतिकालप्राप्तिर्येन तादृशस्य; पुनः **रूपसम्पन्निरूपणात्** सौन्दर्यसम्पद्दर्शनात्, **आत्मनि** स्वस्मिन्, **श्लथीभूतचारुताभिमानग्रन्थेः** श्लथीभूता चारुताभिमानग्रन्थिः–सौन्दर्याभिमानरूपा ग्रन्थिर्यस्य तादृशस्य; **पार्थिवस्य** मेघवाहनस्य, मनसि, अभूत्, आश्चर्यमिति शेषः। किमित्याह–**अहो** आश्चर्यजनकः, **सुरलोकभूमीनां** स्वर्गभूमीनाम्, **प्रभावः** माहात्म्यम्, **यत्र** यस्यां भूमौ, **खलु** निश्चयेन, **सम्भूतानि** समुत्पन्नानि, **पुण्यभागिनां** पुण्यशालिनाम्, **शरीराणि अपि** का कथा बुद्धि-वैभवादीनाम्, **एवंविधानि** ईदृशानि, **भवन्ति** सम्पद्यन्ते, **चरमास्वपि** अन्तिमास्वपि, **दशासु** स्वर्गच्यवनावस्थासु, **यानि** शरीराणि, **उपसर्पितुं** सन्निधातुम्, **आस्ताम्** असम्भाव्यान्येव, किन्तु **पुमांसः** पुरुषाः, **वैद्युतं** विद्युत्सम्बन्धिनम्, **अनलमिव** अग्निमिव, **द्रष्टुमपि** दूरतो दृष्टिपथमवतारयितुमपि, **अनलम्** असमर्थाः,। **तावदिति**

भास्वरः स्फुरति प्रतापो यस्मिन्नसौ प्रकृतिप्रगल्भापि भीतेव लज्जितेवोत्कुपितेव मे न चिरमाबध्नाति लक्ष्यमीक्षणद्वयी, चित्रं यदस्यात्र शकलितमनःशिलागर्भबभ्रुण्यतनुबले तनुप्रभाजाले निरन्तरनिमग्नाः स्वतेजस्तिरस्कारलज्जिता इव मनागपि दर्शयन्ति नात्मानमायतनप्रदीपाः, इमेऽपि सर्वतः प्रधाविताः प्रनष्टदीपान्वेषणायेव भ्रमन्ति दहनालोकलोलुभाः शलभसंघाः, सर्वथा कृतार्थोऽहम्, यस्य मे मर्त्यभावेऽपि प्रकटितदिव्यवपुषा दर्शनमनेन दत्तम्' इति विचिन्त्य मुक्त्वा च सफलकं प्रभुताभिमानेन सार्धं कृपाणमाबद्धाञ्जलिः स्तोकमुपेत्य स्वागतमकरोत् [अ],

सोऽपि तथा समुपसृत्य तं पुरस्तादवस्थितमतिस्तिमितप्रगल्भस्निग्धदृष्टिप्रकटितान्तःप्रीतिमाबद्धकरसंपुटमतिशयस्पृहणीयदेहावयवदर्शनानन्दनिःस्यन्दविकसितेन पुनरपि प्राक्तनीं प्रकृतिमापन्नेनेव चक्षुषा सुचिरमुप-

---

वाक्यालङ्कारे बोध्यम् । तदेव स्फुटयति-**तथाहि, अस्य** देवस्य, प्रकामम्-अत्यन्तम्, सौम्येऽपि-सत्त्वसम्पदा शान्तेऽपि, **वपुषि** शरीरे, **स्वभावभास्वरः** स्वतः स्फुरणशीलः, न त्वौपाधिकः, **कोऽपि** अपूर्वः, **स** सर्वानुभवसाक्षिकः, **प्रतापः** प्रभा, स्फुरति, **यस्मिन्** शरीरे, **प्रकृतिप्रगल्भापि** स्वभावतः प्रौढा अपि, **मे** मम, **ईक्षणद्वयी** लोचनद्वयम्, **लक्ष्यं** स्वदृश्यम्, **चिरं** दीर्घकालम्, न **आबध्नाति** अभिव्याप्नोति, किन्तु त्वरितमेव च्यवते इत्यर्थः, तत्र हेतुमुत्प्रेक्षते **भीतेव** भयादिव, **लज्जितेव** लज्जायोगादिव, **कुपितेव** कोपादिव । **चित्रम्** इदमाश्चर्यम्, यत् **शकलितमनःशिलागर्भबभ्रुणि** शकलितायाः-खण्डितायाः, मनःशिलायाः-शिलाविशेषस्य, गर्भः-मध्यम्, तद्वत् बभ्रुणि-पिङ्गले, **अतनुबले** अतनु-अत्यन्तम्, बलं-स्फुरणशक्तिर्यस्य तादृशे, **अस्य** देवस्य, **अत्र** अस्मिन् पुरोवर्तिनि, **तनुप्रभाजाले** देहप्रभापुञ्जे, **निरन्तरनिमग्नाः** सन्ततमन्तर्भूताः, **आयतनप्रदीपाः** मन्दिरप्रदीपाः, **स्वतेजस्तिरस्कारलज्जिता इव** स्वतेजसः-निजप्रभायाः, यस्तिरस्कारः-तत्प्रभाभिरभिभवः, तेन लज्जिता इवेति हेतूत्प्रेक्षा, **आत्मानं** स्वरूपम्, न **मनागपि** किञ्चिदपि, **दर्शयन्ति** प्रकटयन्ति । तस्मात् **दहनालोकलोलुभाः** दीपस्याग्निशिखालोभाकुलाः, **इमे** पुरोवर्तिनः, **शलभसङ्घाः** पतङ्गपुञ्जाः, **अपि, प्रनष्टदीपान्वेषणायेव** प्रनष्टः-एतदीयप्रभापुञ्जतिरोहिततया अत्यन्तमदृष्टः, यो दीपः, तस्य अन्वेषणायेव, **सर्वतः** इतस्ततः, **प्रधाविताः** प्रारब्धधावनाः, **भ्रमन्ति** नैकत्रावतिष्ठन्ते । **अहम्** इष्टार्थचिन्ताकुलो राजा, **सर्वथा** सर्वप्रकारेण, **कृतार्थः** सिद्धार्थः, अस्मीति शेषः, यस्य **मे** मम, **मर्त्यभावेऽपि** मानवत्वेऽपि, **प्रकटितदिव्यवपुषा** प्रकटितम्-आविष्कृतम्, दिव्यं-स्वर्गीयम्, वपुः-शरीरं येन तादृशेन, **अनेन** प्रस्तुतदेवेन, **दर्शनं** स्वदर्शनसौभाग्यम्, **दत्तं** सम्पादितम्, **इति** एवं प्रकारेण, **विचिन्त्य** पर्यालोच्य, **च** पुनः, **सफलकं** फलकेन-खड्गाधारपात्रेण, खड्गकोशेनेति यावत्, सहितं **कृपाणं** खड्गम्, **प्रभुताभिमानेन** स्वकीयप्रभुत्वप्रयुक्ताहङ्कारेण, **सार्धं** सह, **मुक्त्वा** त्यक्त्वा, **आबद्धाञ्जलिः** रचिताञ्जलिः सन्, **स्तोकं** किञ्चित्, **उपेत्य** समीपं गत्वा, **स्वागतं** तदागमनश्लाघाम्, **अकरोत्** सप्रीतिदर्शन-कुशलप्रश्नादिद्वारेणाकार्षीत् [ अ ] ।

**सोऽपि** प्रकृतदेवोऽपि, **समुपसृत्य** सम्यगभिमुखमागत्य, **आचरणयुगलात्** चरणद्वयमारभ्य, **उत्तमाङ्गं** मस्तकं यावत्, **सुचिरं** सुदीर्घकालम्, **तथा** यथा राजा दृष्टवान् तथा, **तं** राजानम्, **आलोकितवान्** दृष्टवान् । कीदृशं राजानम्? **पुरस्ताद्** अग्रे, **अवस्थितम्** उपविष्टम्, पुनः **अतिस्तिमितप्रगल्भस्निग्धदृष्टिप्रकटितान्तःप्रीतिम्** अतिस्तिमितया-अतिनिःस्पन्दया, प्रगल्भया-पाटवान्वितया, स्निग्धया-स्नेहार्द्रितया, दृष्ट्या-नयनयुगलेन दर्शनक्रियया वा, प्रकटिता-अभिव्यक्ता, अन्तःप्रीतिः-हार्दिकानुरागो येन तादृशम्, पुनः **आबद्धकरसम्पुटम्** आबद्धः-रचितः, करसम्पुटः-अञ्जलिर्येन तम्; केनालोकितवान्? **चक्षुषा** नयनयुगलेन, जातिविवक्षयैकवचनम्, कीदृशेन? **अतिशयस्पृहणीयदेहावयवदर्शनानन्दनिःस्यन्दविकसितेन** अतिशयेन, स्पृहणीयाः-मनोरमाः, ये देहावयवाः-राज्ञः शरीरावयवा मुखनयनादयः, तद्दर्शनेन य आनन्दः-प्रमोदामृतरसः, तन्निःस्यन्देन-प्रस्रवणेन, विकसितेन-प्रफुल्लितेन, कीदृशेनेव? **पुनरपि** भूयोऽपि, **प्राक्तनीं** पूर्वावस्थासम्बन्धिनीम्, **प्रकृतिम्** अनिमेषादिस्वभावम्, **आपन्नेनेव** प्राप्तेनेवेत्युत्प्रेक्षा; कीदृश इव कीदृशो देवः? **उपजात**-

जातप्रत्यभिज्ञानलव इव सत्वरोपसंहृतगतिराचरणयुगलादुत्तमाङ्गं यावदालोकितवान्, [ आ ] । आनीतकरसंपुटश्च हेमाद्रितट इव पृथुश्रीवृक्षलाञ्छिते वक्षसि स्तोकमुपदर्शितस्मितः प्रस्तुतपरीहास इव सलिलनिर्भराम्भोधरनिनादगम्भीरेण स्वरेण मधुरमब्रवीत्—'नरेन्द्र ! सर्वदा शरीरसंनिहितैः प्रधानपुरुषैरिव प्रस्तावावेदिभिरपृष्टैरपि निवेदितोऽसि चक्रवर्तिलक्षणैः, स खलु भवान् मध्यमलोकपालो राजा मेघवाहनः, योऽस्माभिः पुरा देवासुरसमूहसंबाधे दिव्यसदसि विष्टपत्रयपतेः पुरो देवस्य पाकशासनस्य मर्त्यलोकवार्तानिवेदनाधिकारनियुक्तैः प्रधाननाकिभिरेवं जिगीषुः, एवं शूरः, एवं प्रजापालः, एवं त्यागशीलः, एवं धार्मिक इति बहुप्रकारमङ्कुरितपुलकपक्ष्मलकपोलैरवनिपालकथाप्रक्रमे सुचिरमुपवर्ण्यमानः श्रुतोऽसि; सर्वथा नः कृतार्थं चक्षुरुपजातम्, फलितं च सद्यो देवतादर्शनसमुत्थं पुण्यजातमतर्कितोपनतेनामुना त्वदवलोकनेन, गच्छामि

---

**टिप्पनकम्—आनीतकरसम्पुटः** बद्धमुकुलः । हेमाद्रितट इव वक्षसि **श्रीवृक्षलाञ्छिते** [ वृक्षविशेष] **चिह्निते** महापुरुषलाञ्छनचिह्निते च । **प्रस्तावावेदिभिः** समयकथकैः [ इ ] ।

---

**प्रत्यभिज्ञानलव इव** उपजातः–उत्पन्नः, प्रत्यभिज्ञानस्य–संस्कारसहकृतेन्द्रियसन्निकर्षजन्यस्य 'सोऽयं मेघवाहनो यो दिव्यसभायामुपवर्ण्यमान आसीद्' इति ज्ञानस्य, लवः–लेशो येन तादृश इव, **सत्वरोपसंहृतगतिः** सत्वरं–शीघ्रं यथा स्यात् तथा, उपसंहृता–निवर्तिता, गतिः–अग्रदेशगमनं येन तादृशः [ आ ] । **च** पुनः, **हेमाद्रितट इव** हेम्नः–सुवर्णस्य, अद्रिः–पर्वतः, हेमाद्रिः सुमेरुः, तस्य तटे–पर्यन्तभूमौ इव, **पृथुश्रीवृक्षलाञ्छिते** पृथुभिः–विशालैः, श्रीवृक्षैः–शुभ्ररोमावर्तरूपमहापुरुषलक्षणैः, पक्षे बिल्ववृक्षैः, लाञ्छिते–चिह्निते, वक्षसि, **आनीतकरसम्पुटः** आनीतः–आनीय संयोजितः, करसम्पुटः–अञ्जलिर्येन तादृशः सन्, **प्रस्तुतपरीहास इव** प्रस्तुतः–प्रारब्धः, परीहासः–उपहासो येन तादृश इव, **स्तोकम्** अल्पं यथा स्यात् तथा, **उपदर्शितस्मितः** प्रकटितमन्दहासः, **सलिलनिर्भराम्भोधरनिनादगम्भीरेण** सलिलनिर्भरः–जलपरिपूर्णः, योऽम्भोधरः–मेघः, तस्य निनादवत्–गर्जितवत्, गम्भीरेण–तारेण, **स्वरेण** ध्वनिना, **मधुरं** श्रोत्रप्रियं यथा स्यात् तथा, **अब्रवीत्** उवाच । किमित्याह–**नरेन्द्र !** नृपते !, **चक्रवर्तिलक्षणैः** चक्रवर्तिचिह्नैः, **स** वक्ष्यमाणयत्पदप्रतिपाद्यत्वेनाभिप्रेतः, **मध्यमलोकपालः** मध्यमः–स्वर्गलोक-पाताललोकयोर्मध्यवर्ती, लोकः–मर्त्यलोकः, तस्य पालकः, भवान् मेघवाहनो राजा **निवेदितोऽसि** सूचितोऽसि, कैरिव? सर्वदा **शरीरसन्निहितैः** शरीरपार्श्ववर्तिभिः, पक्षे शरीरस्थितैः, **अपृष्टैरपि** जिज्ञासामज्ञापितैरपि, **प्रस्तावावेदिभिः** तत्तत्कार्यावसरसूचकैः, पक्षे प्राशस्त्यव्यञ्जकैः, **प्रधानपुरुषैः** अमात्यादिव्यक्तिभिरिवेत्युत्प्रेक्षा । **यः** त्वम्, **देवासुरसमूहसंबाधे** देवानाम्, असुराणां–दैत्यानां च, समूहेन, संबाधे सङ्कीर्णे, व्याप्ते इत्यर्थः, **दिव्यसदसि** देवसभायाम्, **विष्टपत्रयपतेः** भुवनत्रयस्वामिनः, देवस्य **पाकशासनस्य** इन्द्रस्य, **पुरः** अग्रे, **मर्त्यलोकवार्तानिवेदनाधिकारनियुक्तैः** मर्त्यलोकवार्तानां–मर्त्यभुवनसमाचाराणाम्, निवेदनं–विज्ञापनमेव, अधिकारः–अवश्यकर्तव्यम्, तत्र नियुक्तैः–प्रतिष्ठापितैः, **अङ्कुरितपुलकपक्ष्मलकपोलैः** अङ्कुरितैः–अङ्कुरात्मनोद्भूतैः, पुलकैः–रोमाञ्चैः, पक्ष्मलाः–लोमसङ्कुलाः, कपोलाः–गण्डस्थलानि येषां तादृशैः, **प्रधाननाकिभिः** प्रधानदेवैः, **अवनिपालकथाप्रक्रमे** अवनिपालानां–पृथ्वीपालानाम्, कथायाः–वार्तायाः, प्रक्रमे–प्रस्तावे, **एवम्** अनेन प्रकारेण, **जिगीषुः** मेघवाहनः स्वरिपुपराजयमिच्छुः, अस्तीति शेषः, **एवम्** अनेन रिपुपराजयप्रकारेण, **शूरः** पराक्रमी, **एवम्** अनेन प्रकारेण, **प्रजापालः** प्रजारक्षकः, **एवम्** अनेन प्रकारेण, देश-काल-पात्रविवेचनेनेत्यर्थः, **त्यागशीलः** दानशीलः, **एवम्** अनेन प्रकारेण, **धार्मिकः** धर्माचरणशीलः, इति **बहुप्रकारं** बहवः–अनेके, प्रकाराः–वर्णनरीतयो यस्मिंस्तादृशं यथा स्यात् तथा, **सुचिरम्** अतिदीर्घकालम्, **उपवर्ण्यमानः** स्तूयमानः, **श्रुतः** श्रवणगोचरतां गतः, **असि** वर्तसे । **नः** अस्माकम्, चक्षुः, **सर्वथा** सर्वप्रकारेण, **कृतार्थं** सफलम्, **उपजातं** सम्पन्नम् । **च** पुनः, **अतर्कितोपनतेन** अकस्मादुपजातेन, अमुना **त्वदालोकनेन** भवद्दर्शनेन, **देवतादर्शनसमुत्थं** अधुनैव विहितेन ऋषभजिनदर्शनेन समुत्पन्नम्, **पुण्यजातं** पुण्यपुञ्जः, **सद्यः** सपदि, शीघ्रतरमेवेत्यर्थः, **फलितं** दत्तफलम् । **साम्प्रतम्** अधुना, **गच्छामि** इतो नन्दीश्वरद्वीपं व्रजामि, माम्, **अनुजानीहि** इतो गन्तुमनुमन्यस्व [ इ ] ।

सांप्रतम्, अनुजानीहि माम्, [ इ ]–जानीहि च मदीयमपि लेशतो वृत्तान्तम्–अहं हि सौधर्मसुरलोकसद्मा ज्वलनप्रभाभिधानो वैमानिकः संप्रत्येव नाकतः प्रस्थितो गच्छन् पुरस्थितेन कियताऽपि परिजनेनानुगम्यमानो गगनपथेन पथि विलोक्य लोकोत्तरं देवतायतनमिदमिदं मनस्यकरवम्—हन्त ! स एष भगवानशेषजगन्नाभिर्नाभिकुलकरकुलालङ्कारः, कारणं सकललोकव्यवहारसृष्टेः, द्रष्टा कालत्रितयवर्तिनां भावानाम्, उपदेष्टा चिरप्रनष्टस्य धर्मतत्त्वस्य, सर्वसत्त्वनिर्निमित्तबन्धुः, सेतुबन्धः संसारसिन्धोः, आद्यो धर्मचक्रवर्तिनाम्, आराध्यश्चतुर्विधस्यापि सुरनिकायस्य, नायकः समग्राणां गणधरकेवलिप्रमुखाणां महर्षीणामृषभनामा जिनवृषः, यस्य पुरा स्वामिना शक्रेण स्वयमनुष्ठितः प्रतिष्ठाविधिः; अवधार्य चैतदधिकोपजातभक्तिः 'आसतामिहैव मुहूर्तमेकं भवन्तः' इति निवर्त्य पृष्ठानुपातिनः सुरपदातीनतिमात्रमुत्सुको गन्तुमङ्गमात्र एवागतः। दृष्टश्चैषभगवानशेषकल्मषक्षयहेतुरादिदेवः [ ई ]।

---

**टिप्पनकम्**— जगन्नाभिः भुवनप्रधानः [ ई ]।

---

**च** पुनः, **मदीयमपि** मदागमनसम्बन्धिनमपि, **वृत्तान्तं** समाचारम्, **लेशतः** संक्षेपतः, **जानीहि** शृणु। किमित्याह–**हि** निश्चयेन, अहं **सौधर्मसुरलोकसद्मा** सौधर्मः–सौधर्मनामा, यः सुरलोकः–देवलोकः, प्रथमदेवलोक इत्यर्थः, स सद्म–निवासस्थानं यस्य तादृशः, **ज्वलनप्रभाभिधानः** ज्वलनस्य अग्नेरिव प्रभा यस्यासौ ज्वलनप्रभः, तदेवाभिधानम्–अन्वर्थनाम यस्य तादृशः, **वैमानिकः** विमानवास्तव्यो देवः, **सम्प्रत्येव** अधुनैव, **नाकतः** स्वर्गतः, **प्रस्थितः** कृतप्रस्थानः, **पुरस्थितेन** अग्रतः स्थितेन, **कियताऽपि** कतिपयेनापि, **परिवारेण** परिजनेन, **अनुगम्यमानः** आश्रीयमाणः सन्, **गगनपथेन** आकाशमार्गेण, गच्छन्, **पथि** मार्गे, **लोकोत्तरं** परमोत्कृष्टम्, इदं **देवायतनं** देवमन्दिरम्, **विलोक्य** दृष्ट्वा, **मनसि** स्वहृदि, **इदम्** अनुपदवक्ष्यमाणप्रकारकं चिन्तनम्, **अकरवम्** अकार्षम्। किमित्याह–**हन्त!** अहो, **स** वक्ष्यमाणयत्पदप्रतिपाद्यत्वेनाभिप्रेतः, **एष** एतन्मन्दिरमधिष्ठितः, **भगवान्** निरतिशयैश्वर्यवान्, ऋषभनामा, **जिनवृषः** जिनेश्वरः, अस्तीति शेषः। कीदृशः? **अशेषजगन्नाभिनाभिकुलकरकुलालङ्कारः** अशेषस्य–समग्रस्य, जगतः–मर्त्यलोकस्य, नाभिः–प्रधानभूतं यत्, नाभिकुलकरस्य–कुलकरत्वेन शास्त्रप्रसिद्धस्य नाभिराजस्य, कुलं–वंशः, तस्यालङ्कारः, 'अशेषजगन्नाभिर्नाभि०' इति पाठे तु अशेषजगन्नाभिः–निखिलविश्वप्रधान ऋषभजिन इत्यर्थो बोध्यः, "नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात्" इत्यमरः, पुनः **सकलव्यवहारसृष्टेः** सकललोकव्यवहाररचनायाः, **कारणं** रचयितेत्यर्थः, पुनः **कालत्रितयवर्तिनाम्** अतीताऽनागत-वर्तमानकालवर्तिनाम्, **भावानां** पदार्थानाम्, **द्रष्टा** युगपदशेषविशेषपुरस्कारेण प्रत्यक्षयिता, पुनः **चिरप्रणष्टस्य** दीर्घकालादुच्छिन्नस्यापि, धर्मतत्त्वस्य, **उपदेष्टा** प्रवर्तयिता, पुनः **सर्वसत्त्वनिर्निमित्तबन्धुः** सर्वेषाम्–एकेन्द्रियपर्यन्तानाम्, सत्त्वानां–जीवानाम्, निर्निमित्तः–निष्कारणः, बन्धुः–हितेच्छुः, पुनः **संसारसिन्धोः** संसारसागरस्योत्तरणाय, **सेतुबन्धः** सेतुरूपो बन्धः, पुनः **धर्मचक्रवर्तिनां** धर्मसम्राजाम्, तीर्थङ्कराणामिति यावत्, **आद्यः** प्रथमः, पुनः **चतुर्विधस्यापि** भुवनपतिव्यन्तर-ज्योतिष्क-वैमानिकेतिभेदचतुष्टयविशिष्टस्यापि, **सुरनिकायस्य** देवसमूहस्य, **आराध्यः** उपास्यः, पुनः **समग्राणाम्** अखिलानाम्, **गणधर-केवलिप्रमुखाणां** गणधराः–त्रिपदीश्रवणमात्रेण द्वादशाङ्गीरचयितारो मुनिविशेषाः, केवलिनः–सर्वज्ञाः, तत्प्रमुखाणां–तत्प्रभृतीनाम्, **महर्षीणां** महामुनीनाम्, **नायकः** श्रेष्ठः। **यस्य** जिनेन्द्रस्य, **पुरा** पूर्वम्, **स्वामिना** अस्मदाद्यधिपतिना, **शक्रेण** इन्द्रेण, **स्वयं** स्वेनैव, **प्रतिष्ठाविधिः** प्रतिष्ठाकार्यम्, अनुष्ठितः कृतः। **च** पुनः, **अवधार्य चैतत्** च–पुनः, एतत्–पूर्वोक्तवृत्तम्, अवधार्य–निश्चित्य, **अधिकोपजातभक्तिः** अधिका–प्रचुरा, उपजाता–उद्भूता, भक्तिः–श्रद्धा यस्य तादृशः सन्, **'आसतामिहैव मुहूर्तमेकं भवन्तः'** मुहूर्तमेकं–क्षणमेकम्, भवन्तः–मदनुचराः, इहैव–अत्रैव, आसतां–तिष्ठन्तु, **इति** अनेन वाक्येन, **पृष्ठानुपातिनः** स्वानुगामिनः, **सुरपदातीन्** पद्भ्यां गन्तॄन् देवान्, **निवर्त्य** अत्रागमनान्निवार्य, **गन्तुम्**

इदानीं गन्ताऽहमधिगतनिर्वृतिर्विलक्षणं रामणीयकेन सकलद्वीपानामपारजलपूरितान्तरिक्षेण सर्वतः कृतपरिक्षेपं नन्दीश्वरनाम्ना नदीनाथेन नन्दीश्वराभिधानं प्रधानद्वीपम्, तत्र मे परममित्रमेकान्ततः स्नेहमयो मयैव सदृशप्रभावर्धिरतिशयेन प्रसादपात्रं वृत्रशत्रोरत्युदाररूप-बल-विभवशाली सुमाली नाम देवो देवलोकतः कौतुकाकृष्टमनसा स्वयम्प्रभाभिधानया देव्या दिव्यवनिताजनादुपश्रुतरम्यतातिशयां जिनायतनश्रियं द्रष्टुमानीतः, सांप्रतमतिशयितनन्दनद्रुमवनेषु दधिमुखाभिधानमहाधराधरेन्द्रषोडशकपरिक्षेपणीनां जम्बूद्वीपप्रमाणपरिमण्डलाकृतीनां पुण्ड्रेक्षुरसशिशिरसुरभिस्वच्छस्वादुसलिलकल्लोलास्फालितविशालमणिशिलासोपानपङ्क्तित्रितयरमणीयानां महापुष्करिणीनामुपान्तवर्तिषु विचित्रतरुकाननेषु कान्तासखः क्रीडासुखमनुभवति [ उ ]।

अस्ति च द्वीपे तत्र दीपभूता मर्त्यलोकस्य मणिमयमहाप्रासादशतशालिनी विततकाञ्चनशिलाशाल-

---

अत्रागमनाय, **अतिमात्रम्** अत्यन्तम्, **उत्सुकः** उत्कण्ठितः, **अङ्गमात्र एव** केवलस्वशरीर एव, न तु चरसहित इत्यर्थः, आगतः, अहमिति शेषः । **च** पुनः, **अशेषकल्मषक्षयहेतुः** निखिलदुरितध्वंसकारणम्, **एष** प्रत्यक्षभूतः, **आदिदेवः** प्रथमतीर्थङ्करः, **दृष्टः** स्वनयनगोचरीकृतः [ ई ]।

**अधिगतनिर्वृतिः** प्राप्ततद्दर्शनानन्दः, अहम्, **इदानीम्** अधुना, **सकलद्वीपानाम्** अशेषद्वीपानां मध्ये, **रामणीयकेन** शोभया, **विलक्षणं** विचित्रम्, **अपारजलपूरितान्तरिक्षेण** अपारं यज्जलं तेन पूरितं-पूर्णतां नीतम्, अन्तरिक्षम्-आकाशं येन तादृशेन, **नन्दीश्वरनाम्ना** तत्संज्ञकेन, **नदीनाथेन** समुद्रेण, **सर्वतः** सर्वदिक्षु, **कृतपरिक्षेपं** कृतपरिवेष्टनम्, **नन्दीश्वराभिधानं** नन्दीश्वरनामकम्, **प्रधानद्वीपं** नानाजिनायतनमण्डिततया सर्वद्वीपमुख्यभूतद्वीपम्, **गन्ता** गमनशीलः, अस्मीति शेषः । **तत्र** तस्मिन् नन्दीश्वरद्वीपे, **मे** मम, **परममित्रं** परमसखः, **एकान्ततः** अतिशयेन, **स्नेहमयः** प्रेमप्रचुरः, मयैव **सदृशप्रभावर्द्धिः** सदृशाः-तुल्यरूपाः, प्रभावाः-महिमानः, ऋद्धयः-आध्यात्मिकसम्पदश्च यस्य तादृशः, **वृत्रशत्रोः** इन्द्रस्य, अतिशयेन, **प्रसादपात्रं** प्रेमास्पदम्, **अत्युदाररूपबलविभवशाली** अत्युदारेण-परममहनीयेन, रूपेण-वर्णेन, बलेन-शक्त्या, विभवेन-सम्पदा च, शालते-शोभते यस्तादृशः, **सुमाली नाम** सुमालीतिसंज्ञकः, देवः, **कौतुकाकृष्टमनसा** कौतुकेन-जिनायतनशोभादर्शनोत्कण्ठया, आकृष्टं-वशीकृतं मनो यस्यास्तादृश्या, **स्वयम्प्रभाभिधानया** स्वयम्प्रभानाम्न्या, देव्या, **दिव्यवनिताजनात्** देवीजनात्, **उपश्रुतरम्यतातिशयाम्** उपश्रुतः-श्रवणकर्मीकृतः, रम्यतातिशयः-मनोहरतोत्कर्षो यस्यास्तादृशीम्, **जिनायतनश्रियं** जिनमन्दिरशोभाम्, द्रष्टुम्, **देवलोकतः** देवलोकात्, **आनीतः** अवतारितः, **साम्प्रतम्** अधुना, **क्रीडासुखं** क्रीडाजन्यानन्दम्, अनुभवति, कीदृशः? **कान्तासखः** स्वभार्यासहचरः सन्, कुत्र? **अतिशयितनन्दनद्रुमवनेषु** अतिशयितम्-अधरीकृतम्, नन्दनं-नन्दनसंज्ञकम्, द्रुमवनं-दिव्यवृक्षवनं यैस्तादृशेषु, **महापुष्करिणीनां** महावापीविशेषाणाम्, **उपान्तवर्तिषु** निकटवर्तिषु, **विचित्रतरुकाननेषु** विलक्षणवृक्षवनेषु, कीदृशीनां महापुष्करिणीनाम्? **दधिमुखाभिधानमहाधराधरेन्द्रषोडशकपरिक्षेपणीनां** दधिमुखाभिधानाः-दधिमुखसंज्ञकाः, ये महाधराधरेन्द्राः-महान्तः पर्वतेन्द्राः, तेषां यत् षोडशकं-षोडशावयवकः सङ्घः, तस्य परिक्षेपणीनां परिवेष्टिनीनाम्, पुनः **जम्बूद्वीपप्रमाणपरिमण्डलाकृतीनां** जम्बूद्वीपस्य यत् प्रमाणम्-आयामविष्कम्भयोर्लक्षयोजनरूपम्, तत्तुल्यप्रमाणा, परिमण्डलाकृतिः-वर्तुला आकृतिर्यासां तादृशीनाम्, पुनः **पुण्ड्रेक्षुरसशिशिरसुरभिस्वच्छस्वादुसलिलकल्लोलास्फालितविशालमणिशिलासोपानपङ्क्तित्रितयरमणीयानां** पुण्ड्रेक्षुः-इक्षुविशेषः, तस्य रस इव शिशिरं-शीतलम्, सुरभि-सुगन्धि, स्वच्छं-निर्मलम्, स्वादु-रसनासुखकरं च, यत् सलिलं-जलम्, तस्य कल्लोलैः-महातरङ्गैः, आस्फालितम्-आहतम्, यत् विशालानां मणिशिलासोपानानां-मणिरूपपाषाणनिर्मितानाम्, सोपानानाम्-आरोहणानाम्, पङ्क्तित्रितयम्, तेन रमणीयानां-मनोहारिणीनाम्, [ उ ]।

**च** पुनः, **तत्र** तस्मिन्, **द्वीपे** नन्दीश्वरद्वीपे, **मर्त्यलोकस्य** मर्त्यभुवनस्य, **दीपभूता** प्रकाशकतया दीपस्वरूपा, यतः **मणिमयमहाप्रासादशतशालिनी** मणिमयानां-रत्ननिर्मितानाम्, महतां प्रासादानां-राजमन्दिराणाम्, शतेन, शालते-शोभते या तादृशी, पुनः **विततकाञ्चनशिलाशालवलया** विततं-विस्तृतम्, काञ्चनशिलानां-सुवर्णशिलानाम्, शाल-

वलया जिनायतनयात्रासु त्रिदशलोकादुपागतानाममरमिथुनानां निवासस्थानमपरेवामरावती परमरम्या रतिविशाला नाम तस्य नगरी । सा चाद्य प्रातरेव कौतुकादितस्ततो विचरद्भिरनुचरैर्मदीयैस्तदीयसंनिधावप्यनाथेवोद्वसितेव प्रनष्टसकलपूर्वशोभा, भूतैरिवाधिष्ठिता, कृतान्तदूतैरिव कटाक्षिता, कलिकालेनेव कवलिता, समग्रपापग्रहपीडाभिरिव क्रोडीकृता, सर्वतोविजृम्भिताविच्छिन्नमलिनच्छाया, चिन्ताविसंस्थुलगृहस्थगीर्वाणपरिहृतसर्वनिजनिजव्यापारा, गलितगर्वगन्धर्वशिथिलितगीतगोष्ठीस्वरविचारा, विषण्णसाध्यपरिषदा, विखिन्नसिद्धनिषिध्यमानगानोन्मुखमुखरकिंनरकुला, पानकेलिनिरपेक्षपक्षिशून्यीकृतोपवनतरुखण्डलतामण्डपा, नष्टहर्षकिंपुरुषनिर्भर्त्स्यमानपरिरम्भणायातवल्लभतरुणीगणा, रणरणकगृहीतगृहदेवता, वनदेवतासदुःखदृश्यमानतत्क्षणम्लानकल्पपादपा, संतापविधुरविषधरवधूसततप्रार्थ्यमानचन्दनलतागृहावस्थाना, स्थानस्थानपूज्यमानखिन्न-

---

**टिप्पनकम्**—साध्याः– देवविशेषाः, आधिः– मानसी पीडा, सिद्धाः– देवविशेषाः, गुटिका सिद्धादयो वा [ऊ] ।

---

वलयं-प्राकारमण्डलं यस्यास्तादृशी, पुनः **जिनायतनयात्रासु** जिनमन्दिरयात्रासु, **त्रिदशलोकात्** त्रिदशानां-देवानाम्, लोकात्, **उपागतानाम्** अवतीर्णानाम्, **अमरमिथुनानां** देवदम्पतीनाम्, **निवासस्थानं** निवासास्पदम्, **परमरम्या** अतिमनोहारिणी, **अपरा** अन्या, **अमरावतीव** इन्द्रपुरी इव, **रतिविशाला** तत्संज्ञिका, **नामेति** वाक्यालङ्कारे, **तस्य** सुमालिदेवस्य, नगरी अस्ति । **सा** रतिविशाला नगरी च, **अद्य** अस्मिन् दिने, **प्रातरेव** प्रातःकाल एव, **कौतुकात्** अपूर्ववस्तुदर्शनौत्सुक्यवशात्, **इतस्ततः** अत्र तत्र स्थाने, **विचरद्भिः** विहरद्भिः, **मदीयैः** मत्सम्बन्धिभिः, **अनुचरैः** भृत्यैः, **दृष्टा** दर्शनगोचरतां गमिता, केव ? **तदीयसंनिधावपि** सुमालिदेवस्य तत्रास्तित्वेऽपि, **अनाथेव** स्वामिशून्या इव, पुनः **उद्वसितेव** विध्वस्तेव, **प्रनष्टसकलपूर्वशोभा** प्रनष्टा–प्रकर्षेण लुप्ता, सकला–समग्रा, पूर्वा–पुरातनी, शोभा–छविर्यस्यास्तादृशी, पुनः **भूतैः** उपद्रावकदेवयोनिविशेषैः, **अधिष्ठितेव** आक्रान्तेव, **कृतान्तदूतैः** यमदूतैः, **कटाक्षितेव** स्वकटाक्षपातत्रासितेव, पुनः **कलिकालेन** कलियुगेन, **कवलितेव** निगीर्णेव, पुनः **समग्रपापग्रहपीडाभिः** समग्राणां–सर्वेषाम्, पापग्रहाणां–शनैश्चराद्यशुभग्रहाणाम्, तत्प्रयुक्ताभिरिति यावत्, **पीडाभिः** अशुभैः, **क्रोडीकृता** आक्रान्ता इव । कीदृशी सा नगरी ? **सर्वतोविजृम्भिताविच्छिन्नमलिनच्छाया** सर्वतः–सर्वदेशावच्छेदेन, विजृम्भिता–व्याप्ता, अविच्छिन्ना–सान्द्रा, मलिना–अन्धकारमयी, छाया–कान्तिर्यस्यास्तादृशी, पुनः **चिन्ताविसंस्थुलगृहस्थगीर्वाणपरिहृतसर्वनिजनिजव्यापारा** चिन्तया विसंस्थुलैः-शिथिलैः, गृहस्थगीर्वाणैः–गृहवासिदेवैः, परिहृतः सर्वः, निजो निजः–स्वः स्वः, व्यापारो यस्यां तादृशी, पुनः **गलितगर्वगन्धर्वशिथिलितगीतगोष्ठीस्वरविचारा** गलितः–नष्टः, गर्वः–गायकत्वाभिमानो येषां तादृशैः, गन्धर्वैः, शिथिलितः–मान्द्यमापादितः, गीतगोष्ठ्यां–गानसभायाम्, स्वरविचारः–स्वरशास्त्रचर्चा यस्यां तादृशी, पुनः **विषण्णसाध्यपरिषदा** विषण्णा–खिन्ना, साध्यानाम्–"मनोमन्ता तथा प्राणो भरोऽपानश्च वीर्यवान् । निर्भयो नरकश्चैव दंशो नारायणो वृषः ॥ प्रभुश्चेति समाख्याताः साध्या द्वादश देवताः" । इत्यन्यत्रोक्तानां देवविशेषजातीयानाम्, परिषदा–सभा यस्यां तादृशी, पुनः **विखिन्नसिद्धनिषिध्यमानगानोन्मुखमुखरकिंनरकुला** विखिन्नाः–विशेषेण खेदाकुलाः, ये सिद्धाः–देवविशेषाः, तैर्निषिध्यमानं–निवार्यमाणम्, यद् गानं तस्मादुन्मुखं–विमुखम्, मुखराणां–गानरतानाम्, किंनराणां–गायकदेवविशेषाणाम्, कुलं–समूहो यस्यां तादृशी, पुनः **पानकेलिनिरपेक्षपक्षिशून्यीकृतोपवनतरुखण्डलतामण्डपा** पानकेलौ–नवपल्लवस्यन्दिरसपानक्रीडायाम्, निरपेक्षाः–तद्विषयकापेक्षाशून्याः, ये पक्षिणस्तैः शून्यीकृतः–विरहितः, उपवनतरुखण्डः–केलिकाननवृक्षसमूहः, लतामण्डपः–लतान्तरितदेशश्च यस्यां तादृशी, पुनः **नष्टहर्षकिंपुरुषनिर्भर्त्स्यमानपरिरम्भणायातवल्लभतरुणीगणा** नष्टः हर्षो रमणेच्छा येषां तादृशैः किंपुरुषैः–देवविशेषैः, निर्भर्त्स्यमानः–वाग्भिस्तिरस्क्रियमाणः, परिरम्भणाय–आलिङ्गनाय, आगतः–उपस्थितः, वल्लभतरुणीनां–प्रिययुवतीनाम्, गणः–समूहो यस्यां तादृशी, पुनः **रणरणकगृहीतगृहदेवता** रणरणकेन उद्वेगेन, गृहीता–आक्रान्ता, गृहदेवता–गृहाधिष्ठातृदेवता यस्यां तादृशी, पुनः **वनदेवतासदुःखदृश्यमानतत्क्षणम्लानकल्पपादपा** वनदेवताः–वनाधिष्ठातृदेवताः, ताभिः सदुःखं–सविषादम्, दृश्यमानाः–स्वस्वदृष्टिगोचरीक्रियमाणाः, तत्क्षणं–तत्कालम्, म्लानाः–म्लानिमापन्नाः, कल्पपादपाः–कल्पवृक्षा यस्यां तादृशी,

सिद्धायतनदेवताप्रतिमा, प्रतिमन्दिरमाकर्ण्यमानश्रवणदुष्टहाकष्टशब्दा दृष्टा [ ऊ ]। मन्दिरमपि तदीयमप्रवृत्तोत्सवं धृतानुचितवेषनिर्व्यापारनिःशेषकलत्रं चित्रशालास्वसंपाद्यमानहरिचन्दनपङ्कोपलेपं मणिकुट्टिमेष्वक्रियमाणकनकपङ्कजोपहारक्षेपं द्वारतोरणरणरणायमानचण्डपवनेरितशुष्ककतिपयप्रवालवन्दनमालं मृदङ्गपटहादिवाद्यध्वनिशून्यनिःशेषनाट्यशालमश्रूयमाणचारणमिथुनमङ्गलोचारमनाकर्ण्यमानकिंनरकन्यकावल्लकीझाङ्कारमप्रमत्तविबुधयोधशतसंरक्ष्यमाणगोपुरप्राकारमसुरापहारभीतभव्याप्सरःपरिहृतस्वेच्छाविहारमुद्यानवापीष्वनारभ्यमाणविभ्रममज्जनमुद्विग्नसकलपरिजनं दृष्टम् [ ऋ ]। इदं चारिष्टमतिकष्टमप्रतिविधेयं विधिवशात् तत्रोपजातं तस्य तत्कलत्रस्य वा प्रधानस्य अचिरकालभाविनं विनाशमवश्यतया निवेदयति, न हि येषु केषु-

---

पुनः **सन्तापविधुरविषधरवधूसततप्रार्थ्यमानचन्दनलतागृहावस्थाना** सन्तापेन–सम्यक् तापेन, विधुराभिः–व्याकुलाभिः, विषधरवधूभिः–भुजङ्गीभिः, सततं प्रार्थ्यमानम्–अपेक्ष्यमाणम्, चन्दनलतागृहावस्थानं–चन्दनलतामयगृहेऽवस्थितिर्यस्यां तादृशी, पुनः **स्थानस्थानपूज्यमानखिन्नसिद्धायतनदेवताप्रतिमा** स्थाने स्थाने–प्रतिदेवस्थानमित्यर्थः, पूज्यमाना–अर्च्यमाना, खिन्ना–परितापवशेन खेदान्विता, सिद्धायतनस्य–सिद्धमन्दिरस्य, तत्रप्रतिष्ठितेत्यर्थः, देवताप्रतिमा यस्यां तादृशी, पुनः **प्रतिमन्दिरं** मन्दिरे मन्दिरे, **आकर्ण्यमानश्रवणदुष्टहाकष्टशब्दा** आकर्ण्यमानाः–श्रूयमाणाः, श्रवणदुष्टाः–श्रुतिकटुत्वदोषान्विताः, हाकष्टशब्दाः–हा कष्टं हन्त ! दुःखमित्येतदर्थकाः शब्दा यस्यां तादृशी [ ऊ ]।

**तदीयं** सुमालिदेवसम्बन्धि, **मन्दिरमपि** भवनमपि, **दृष्टं** दर्शनगोचरतां नीतम्, मदीयैरनुचरैरिति शेषः, कीदृशम्? **अप्रवृत्तोत्सवम्** अप्रवृत्तः–निवृत्तः, उत्सवः–शुभकर्म यस्मिंस्तादृशम्, पुनः **धृतानुचितवेषनिर्व्यापारनिःशेषकलत्रं** धृतः–अगत्या रचितः, अनुचितः–देवाङ्गनाऽयोग्यः, वेषः–कृत्रिमरूपं येन तादृशम्, निर्व्यापारं–चिन्तावशेन व्यापारविमुखम्, निःशेषं–समग्रम्, कलत्रम्–अन्तःपुरवर्गो यस्मिंस्तादृशम्, पुनः **चित्रशालासु** चित्रणालयेषु, **असम्पाद्यमानहरिचन्दनपङ्कोपलेपम्** असम्पाद्यमानः–अक्रियमाणः, हरिचन्दनपङ्कस्य दिव्यचन्दनद्रवस्य, उपलेपो यस्मिंस्तादृशम्, पुनः **मणिकुट्टिमेषु** मणिबद्धभूमिषु, **अक्रियमाणकनकपङ्कजोपहारक्षेपम्** अक्रियमाणः कनकपङ्कजानां–सुवर्णमयकमलानां तद्रूपाणाम्, उपहाराणाम् उपहरणीयवस्तूनाम्, क्षेपः–निवेशो यस्मिंस्तादृशम्, पुनः **द्वारतोरणरणरणायमानचण्डपवनेरितशुष्ककतिपयप्रवालवन्दनमालं** द्वारतोरणेषु–बहिर्द्वारेषु, रणरणायमानैः–ध्वनद्भिः, चण्डपवनैः–उद्धतवायुभिः, ईरिता–कम्पिता, उत्क्षिप्तेत्यर्थः, शुष्का–जीर्णा, कतिपया, प्रवालानां–नवपत्राणाम्, वन्दनमाला–तोरणमाला यस्मिंस्तादृशम्, पुनः **मृदङ्गपटहादिवाद्यध्वनिशून्यनिःशेषनाट्यशालं** मृदङ्ग–पटहादीनां–मृदङ्गढक्कादीनाम्, वाद्यानां ध्वनिभिः, शून्या–विरहिता, निःशेषा–समग्रा, नाट्यशाला–नाट्यगृहं यस्मिंस्तादृशम्, पुनः **अश्रूयमाणचारणमिथुनमङ्गलोच्चारम्** अश्रूयमाणः, चारणमिथुनेन–बन्दिदम्पतिभ्याम्, मङ्गलोच्चारः–माङ्गलिकशब्दोच्चारणं यस्मिंस्तादृशम्, पुनः **अनाकर्ण्यमानकिंनरकन्यकावल्लकीझाङ्कारम्** अनाकर्ण्यमानः–अश्रूयमाणः, किंनरकन्यकानां वल्लकीझाङ्कारः–वीणाक्वाणो यस्मिंस्तादृशम्, पुनः **अप्रमत्तविबुधयोधशतसंरक्ष्यमाणगोपुरप्राकारम्** अप्रमत्तेन-अवहितेन, विबुधयोधानां-देवभटानाम्, शतेन संरक्ष्यमाणः–असुरप्रवेशाद्वार्यमाणः, गोपुरप्राकारः–पुरद्वारदेशस्थदुर्गभूमिर्यस्मिंस्तादृशम्, पुनः **असुरापहारभीतभव्याप्सरःपरिहृतस्वेच्छाविहारम्** असुरैः–राक्षसैः, अपहारात्–अपहरणात्, भीताभिः, भव्याभिः–मनोहारिणीभिः, अप्सरोभिः–स्वर्वेश्याभिः, परिहृतः–त्यक्तः, स्वेच्छाविहारः–यदृच्छभ्रमणं यस्मिंस्तादृशम्, पुनः **उद्यानवापीषु** क्रीडाकाननान्तर्गतपुष्करिणीषु, **अनारभ्यमाणविभ्रममज्जनम्** अनारभ्यमाणम्–अननुष्ठीयमानम्, विभ्रममज्जनं-सविलासस्नानं यस्मिंस्तादृशम्। पुनः **उद्विग्नसकलपरिजनम्** उद्विग्नाः–उद्भ्रान्ताः, सकलाः–अशेषाः, परिजनाः–बान्धवा यस्मिंस्तादृशम् [ऋ]।

**इदं च** अनुपदवर्णितप्रकारकं च, **अतिकष्टं** परमदुःखावहम्, पुनः **अप्रतिविधेयम्** अप्रतिकार्यम्, **अरिष्टम्** अशुभम्, **विधिवशात्** दैवयोगात्, **तत्र** तस्यां नगर्याम्, **उपजातम्** उत्पन्नम्, "अरिष्टमशुभे तक्रे सूतिकागार आसवे" इति विश्व–मेदिन्यौ। **तस्य** सुमालिदेवस्य, **प्रधानस्य** पट्टभूतस्य, **तत्कलत्रस्य** तद्भार्याया वा, **अचिरकालभाविनम्** अविलम्बभाविनम्, **विनाशं** मृत्युम्, **अवश्यतया** ध्रुवतया, **निवेदयति** सूचयति। **हि** यतः, **येषु केषुचित्** साधारणे-

चिदनर्थोपनिपातेषु कदाचिदपि दिव्यानामास्पदेषु संपद्यन्त ईदृशाः पदार्थानां प्रकृतिविपर्ययास्तन्निवासिनां च विबुधलोकानामन्तरत्यन्तशोकातङ्कशंसिनो हृदयायासाः । तेन च मया तत्र गत्वा द्रष्टव्योऽसौ, कदाचिदप्यदृष्टदीर्घमद्विरहदुःखः सखा सुखयितव्यः सर्वकालमभिलषितमद्दर्शनो निजदर्शनेन, शमयितव्या दिव्यलोकच्यवनसुलभा सर्वभावानां विनश्वरस्वभावतावेदनेन हृदयेऽस्य दाहकारिण्यतिवेदना, देयो दिव्यशक्त्यनुरोधेन सुगतिसाधनेषु धर्मकार्येषु सविशेषमुपदेशः, ततस्तेन सह पूर्वानुभूतसुखदुःखवृत्तान्तकथाव्यतिकरेण नीत्वा विभावरीमेतां विभातकाले कथमपि प्रार्थितपुनर्दर्शनेन पुनरपि प्रतीपं निवर्तितव्यम् [ ऋ ] । कर्तव्यं च किमपि कालोचितमकृतकालक्षेपेण ख्यातेः सुखस्य चामुष्मिकस्य साधकं कुशलानुष्ठानम्, यतो ममापि निष्ठितप्रायमायुः, अल्पावशेषा त्रिदशलोकस्थितिः, उपस्थितो दीर्घकालप्ररूढगाढप्रणयैर्नाकिभिः साकमात्यन्तिको विरहः, समासन्नीभूतमुर्वशीप्रमुखसुरवधूमुखारविन्दादर्शनम्, अदृश्यतां गतास्त्रिदशपतिसदसि

---

टिप्पनकम्—आमुष्मिकस्य पारत्रिकस्य [ ऌ ] ।

---

त्वित्यर्थः, **अनर्थोपनिपातेषु** अशुभागमेषु, **कदाचिदपि** कस्मिंश्चिदपि समये, **दिव्यानां** देवानाम्, **आस्पदेषु** स्थानेषु, **ईदृशाः** दर्शितप्रकाराः, **पदार्थानां** वस्तूनाम्, **प्रकृतिविपर्ययाः** स्वभाववैपरीत्यानि, **न सम्पद्यन्ते** न जायन्ते, **च** किञ्च, **तन्निवासिनां** तद्वास्तव्यानाम्, **विबुधलोकानां** देवजनानाम्, **अन्तः** अन्तःकरणे, **अत्यन्तशोकातङ्कशंसिनः** अत्यन्तसन्तापसूचकाः, **हृदयायासाः** हृदयोद्वेगाः, न सम्पद्यन्ते । **तेन** उक्तहेतुना, मया, **तत्र** तस्यां रतिविलासायां नगर्यामिति यावत्, **गत्वा** उपस्थाय, **असौ** सुमाली, **द्रष्टव्यः** दृष्टिगोचरीकर्तव्यः, **कदाचिदपि** कस्मिंश्चित् कालेऽपि, **अदृष्टमद्विरहदुःखः** अदृष्टम्–अननुभूतम्, मद्विरहदुःखं येन तादृशः, पुनः **सर्वकालं** सततमेव, **अभिलषितमद्दर्शनः** अभिलषितम्–अपेक्षितम्, मद्दर्शनं येन तादृशोऽसौ, सुमालीति शेषः, **सखा** सुहृत्, **निजदर्शनेन** स्वदर्शनेन, **सुखयितव्यः** आनन्दयितव्यः, **दिव्यलोकच्यवनसुलभा** देवलोकतश्च्युतिसमये स्वाभाविकी, **अस्य** सुमालिनः, हृदये, **दाहकारिणी** तापजननी, **हृदयस्येति** पाठे हृदयसम्बन्धितापकारिणीत्यर्थः, **अतिवेदना** अतिदुःखम्; **सर्वभावानां** सर्वेषामुत्पत्तिमत्पदार्थानाम्, **विनश्वरभावावेदनेन** विनाशशीलत्वोपदर्शनेन, **शमयितव्या** शमनीया; **दिव्यशक्त्यनुरोधेन** दैविकशक्त्यनुसारेण, **सुगतिसाधनेषु** सद्गतिप्रयोजकेषु, **धर्मकार्येषु** धार्मिकक्रियासु, सविशेषं यथा स्यात् तथा, **उपदेशः** प्रवर्तकवाक्यम्, **देयः** कर्तव्यः, वक्तव्य इति यावत्; **ततः** तदनन्तरम्, **तेन** सुमालिना सह, **पूर्वानुभूतसुखदुःखवृत्तान्तकथाव्यतिकरेण** पूर्वानुभूतानां–पूर्वोपभुक्तानाम्, सुखदुःखानां यो वृत्तान्तः–समाचारः, तत्सम्बन्धिकथाव्यतिकरेण–तत्कथाप्रसङ्गेन, **एताम्** इमाम्, **विभावरीं** रात्रिम्, **नीत्वा** व्यतीत्य, **प्रभातकाले** प्रातःकाले, **कथमपि** केनापि प्रकारेण, प्रयत्नेनापीत्यर्थः, **प्रार्थितपुनर्दर्शनेन** प्रार्थितं–वाञ्छितम्, पुनर्दर्शनं–पुनरपि तदीयदर्शनं येन तादृशेन **मया**, **प्रतीपं** प्रतिकूलं पश्चादिति यावत्, **निवर्तितव्यं** प्रत्यागन्तव्यम् [ ऋ ] ।

**च** पुनः, **अकृतकालक्षेपेण** अकृतः कालक्षेपः–कालातिक्रमः, विलम्ब इति यावत्, येन तादृशेन, मयेति शेषः, **ख्यातेः** यशसः, **च** पुनः, **आमुष्मिकस्य** पारलौकिकस्य, **सुखस्य** सुखसाधनस्य, **साधकं** सम्पादकम्, **कालोचितम्** अवसरानुकूलम्, किमपि **कुशलानुष्ठानं** शुभकार्यं **कर्तव्यं** करणीयम् । **यतः** यस्माद्धेतोः, **ममापि** मदीयमपि, **आयुः** दिव्यजीवनकालः, **निष्ठितप्रायं** समाप्तप्रायम्, स्वल्पावशिष्टमित्यर्थः, तदेवाह–**त्रिदशलोकस्थितिः** देवलोके स्थितिः, **अल्पावशेषा** किञ्चिदवशिष्टा, **दीर्घकालप्ररूढगाढप्रणयैः** दीर्घकालं–चिरकालम्, प्ररूढः–प्रवृद्धः, गाढः–सान्द्रः, प्रणयः–प्रीतिर्येषां तैः, **नाकिभिः** देवैः, **साकं** सह, **आत्यन्तिकः** निरन्तरः, **विरहः** विश्लेषः, **उपस्थितः** प्राप्तकालः, **उर्वशीप्रमुखसुरवधूमुखारविन्दादर्शनम्** उर्वशीप्रमुखानां सुरवधूनां–देववाराङ्गनानाम्, मुखारविन्दस्य–मुखकमलस्य, अदर्शनं–दर्शनाभावः, **समासन्नीभूतं** सन्निहितम्, **त्रिदशपतिसदसि** इन्द्रसभायाम्, **हृदयदस्यवः** मनोहारिणः, **रम्भालास्यकरणप्रयोगाः** रम्भायाः–तन्नाम्न्याः स्वर्वेश्यायाः, लास्यकरणे–नाट्यरचने, प्रयोगाः–व्यापाराः, **अदृश्यतां**

हृदयदस्यवो रम्भालास्यकरणप्रयोगाः, विप्रयोगोन्मुखं तुम्बुरुमुखेन श्रवणरन्ध्रमधुरगान्धारग्राममूर्च्छनाश्रवणम्, उच्छन्नकल्पा कल्पतरुलताच्छन्नेषु नाकमन्दाकिनीकच्छेषु स्वेच्छाविहारक्रीडा, क्रोडीकृतं मनुष्यलोकावतारस्मरणपीडया निबिडमन्तःकरणम्, आकारितदुःखसंहतिरभिमुखीभूता सपरिजनेव गर्भवासनरकगतिः [लृ]। ईदृशे च सर्वतः समुपस्थितेऽतिदुर्निवारव्यसनजाते सर्वतोमुखप्रसृतदुर्विषहशोकसंततौ संतापकारिणि कातराणां वैक्लव्यदायिनि क्लीबानामुपजनितसंसारसुखवैमुख्ये विवेकिनमुदीरितपरोपकारबुद्धावुदारचेतसामतिदारुणदशापाके कथञ्चिदुपजातसंगमस्य सुरपतिप्रशंसाश्रवणदिवसादारभ्य प्रतिदिनसमभिलषितदर्शनप्राप्तेराकारदर्शनेनैव प्रशमितसकलहृदयोद्वेगतमसो महात्मनः सर्वात्मना प्रियं कर्तुमन्तःकरणमुत्सहते मदीयम्, मन्दायते च त्रिभुवनातिशायिसत्त्वमलुब्धतां च तावकीं प्रागुपश्रुतां विचिन्त्य प्रत्याख्यानलाघवमुत्प्रेक्षमाणम्, अतो न शक्नोमि सर्वथै-

---

द्रष्टुमशक्यतां **गताः** प्राप्ताः। **तुम्बुरुमुखेन** तुम्बुरुनामकगन्धर्वविशेषमुखेन, **श्रवणरन्ध्रमधुरगान्धारग्राममूर्च्छनाश्रवणं** श्रवणरन्ध्रमधुरं-कर्णविवरप्रियम्, गान्धारो रागविशेषः, ग्रामः-"यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि। तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते"॥ इत्यन्यत्र परिभाषितस्वरसङ्घातविशेषः, मूर्च्छना-"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते। मूर्च्छनामिति तां प्राहुः कवयो ग्रामसम्भवाम्"॥ इत्यन्यत्रोक्तग्रामजन्यस्वरावस्थाविशेषः, तासां श्रवणं-श्रवणसुखम्, **विप्रयोगोन्मुखं** विरहोद्यतम्, **कल्पतरुलताच्छन्नेषु** कल्पतरुलतया-कल्पवृक्षपङ्क्त्या, आच्छन्नेषु-पिहितेषु, **नाकमन्दाकिनीकच्छेषु** स्वर्गङ्गातटेषु, **स्वेच्छाविहारक्रीडा** यथेच्छभ्रमणात्मिका क्रीडा, **उच्छिन्नकल्पा** निवृत्तप्राया, **मनुष्यलोकावतारस्मरणपीडया** मनुष्यलोके-मर्त्यभुवने, अवतारस्य-आगमनस्य, स्मरणेन या पीडा तया, **निबिडम्** अत्यन्तं यथा स्यात् तथा, अन्तःकरणं **क्रोडीकृतम्** आक्रान्तम्, **आकारितदुःखसंहतिः** आकारिता-आहूता, दुःखसंहतिः-दुःखसमूहो यया तादृशी, **गर्भावासनरकगतिः** गर्भवास एव नरकगतिः-नरकप्राप्तिः, **सपरिजनेव** परिवारसहितेव, **अभिमुखीभूता** सम्मुखीभूता [ लृ ]।

**च** पुनः, **ईदृशे** अनुपदमुपवर्णिते, **सर्वतः** समन्ततः, **समुपस्थिते** सम्यगुपनते, **अतिदुर्निवारव्यसनजाते** अतिदुःखेन निवारयितुं शक्ये, व्यसनजाते-दुःखसमूहे सति, **मदीयं** मामकम्, **अन्तःकरणं** हृदयम्, तव, **सर्वात्मना** सर्वप्रकारेण, **प्रियं** हितम्, कर्तुम्, **उत्सहते** उत्साहमाप्नोति, कीदृशे व्यसनजाते? **सर्वतोमुखप्रसृतदुर्विषहशोके** सर्वतोमुखं यथा स्यात् तथा, सर्वात्मनेत्यर्थः, प्रसृता-प्रवृद्धा, दुर्विषहा-दुस्सहा, शोकसन्ततिः-शोकसमूहो यस्मिन् तादृशे, पुनः **कातराणाम्** अधीराणाम्, **सन्तापकारिणि** अन्तर्दाहजनके, पुनः **क्लीबानां** निर्बलानाम्, आध्यात्मिकशक्तिशून्यामिति यावत्, **वैक्लव्यदायिनि** व्याकुलताऽऽधायके, पुनः **विवेकिनां** सदसद्विचारवताम्, **उपजनितसंसारसुखवैमुख्ये** उपजनितम्-उत्पादितम्, संसारसुखवैमुख्यं-वैराग्यं येन तादृशे, पुनः **उदारचेतसाम्** उदारहृदयानाम्, **उदीरितपरोपकारबुद्धौ** उदीरिता-आविष्कृता, परोपकारबुद्धिः-परहितकर्तव्यत्वबुद्धिर्येन तादृशे, पुनः **अतिदारुणदशापाके** अतिदारुणः-परमभयङ्करः, दशापाकः-देवत्वावस्थाऽवसानं यस्मिंस्तादृशे; कीदृशस्य तव? **कथञ्चिदुपजातसङ्गमस्य** कथञ्चित्-केनापि प्रकारेण, उपजातः-सञ्जातः, सङ्गमः-सम्मेलनं यस्य तादृशस्य, पुनः **सुरपतिप्रशंसाश्रवणदिवसात्** सुरपतिना-इन्द्रेण, या तव प्रशंसा कृताऽऽसीत् तस्याः श्रवणस्य यो दिवसः-दिनं तस्मात्, आरभ्य, प्रतिदिवसं-प्रतिदिनम्, **अभिलषितदर्शनप्राप्तेः** अभिलषिता-अभिवाञ्छिता, दर्शनप्राप्तिर्यस्य तादृशस्य, **आकारदर्शनेनैव** सुधाशीकरोद्गारिस्वरूपदर्शनमात्रेण, **प्रशमितसकलहृदयोद्वेगतमसः** प्रशमितं-प्रकर्षेण शान्तिमापादितम्, सकलं-समस्तम्, हृदयस्य-हृदयसम्बन्धि, उद्वेगतमः-सम्भ्रमरूपान्धकारो येन तादृशस्य, पुनः **महात्मनः** महानुभावस्य। **च** पुनः, **त्रिभुवनातिशायिसत्त्वं** त्रिभुवनातिशायि-त्रिलोकोत्तरम्, सत्त्वं-स्वभावो यस्य तादृशम्-"सत्त्वं गुणे पिशाचादौ बले द्रव्य-स्वभावयोः" इति मेदिनी, मदीयमन्तःकरणम्, **प्राक्** पूर्वम्, **उपश्रुतां** श्रुतिगोचरीकृताम्, **तावकीं** त्वदीयाम्, **अलुब्धतां** क्वापि वस्तुन्यलोलुपताम्, **विचिन्त्य** स्मृत्वा, **प्रत्याख्यानलाघवं** प्रत्याख्याने-मदभ्यर्थ्यमानवरप्रार्थनाप्रतिषेधे, लाघवं-स्वस्यापसादनम्, **उत्प्रेक्षमाणं** सम्भावयत्, **मन्दायते** तदभ्यर्थने मान्द्यमापद्यते, **उत्प्रेक्ष्यमाणमिति** पाठे तु उत्प्रेक्ष्यमाणं-सम्भाव्यमानं

**चोपचारक्रियापराङ्मुखो भवितुम्, नापि यथाभिमतवस्तुप्रार्थनाविषयेणाभ्यर्थनेन कदर्थयितुम्, केवलमवलम्ब्य मध्यमं पन्थानमुपरचयामि तेऽञ्जलिम्, अनुगृहाण मां गृहाण मनःपरितोषाय मे नृपचन्द्र! चन्द्रातपाभिधानं प्रधानमखिलानामपि स्वर्गभूषणानामासत्तिमात्रेणापि कृतसकलदुरितापहारं हारम् [ ल्ह ]। एष किल पीयूषदानकृतार्थीकृतसकलार्थिसुरसार्थेन मथनविरतावब्धिना क्षीरोदेन प्रयत्नरक्षितात् प्रधानरत्नकोशादमृतसंभवशुक्तिगर्भप्रभवाण्यतिप्रभावन्ति परिणतामलकीफलस्थूलनिस्तलानि मुक्ताफलान्यादाय कौतुकेन स्वयं ग्रथितः, कृतश्च स्वयंवरोत्सवानन्तरमसुरारिमन्दिरमाश्रयन्त्याः श्रियो मन्युगद्गदकण्ठेन कण्ठकाण्डमण्डनम्, देव्यापि कमलया कामकेलिक्लान्तिहारी हरेरिति धृतो धृतिमत्या महान्तं कालम्, उपनीतश्च जन्मनि कुमारजयन्तस्य ज्येष्ठजायेति जातपुलकया पुलोमदुहितुः, तयापि परिरम्भविभ्रमेषु निबिडपीडिताखण्डलोरसः सुरगजकुम्भपीठपृथुनो निजस्तनमण्डनस्य कृत्वातिदीर्घकालं मण्डनमर्पितः सखीप्रेमहृतहृदयया मत्प्रियायाः**

---

तादृशलाघवमपि **मन्दायते** त्वदुपचारप्रवृत्तिनिरोधे औदासीन्यमालम्बत इत्यर्थः। **अतः** अस्मात् कारणात्, **सर्वथा** सर्वप्रकारेण, **उपचारक्रियापराङ्मुखः** उपचारक्रियायां–त्वत्सेवात्मककार्ये, पराङ्मुखः–उदासीनः, भवितुं न शक्नोमि। **यथाभिमतवस्तुप्रार्थनाविषयेण** यथाभिमतं–यथाऽपेक्षम्, वस्तूनां–वराणाम्, या प्रार्थना तद्विषयेण, यथाऽभिमतं वरं प्रार्थयस्वेत्याकारकेणेत्यर्थः, **अभ्यर्थनेन** प्रार्थनेन **कदर्थयितुं** त्वां क्लेशयितुम्, अपि न शक्नोमि, किन्तु **मध्यमं** तयोर्मध्यवर्तिनम्, **पन्थानं** मार्गम्, अवलम्ब्य, केवलं **ते** तुभ्यम्, **अञ्जलिं** पाणिपुटम्, **उपरचयामि** विरचयामि, **हे नृपचन्द्र!** नृपाणां मध्ये चन्द्रवदुज्ज्वल! **चन्द्रातपाभिधानं** चन्द्रस्येवातपो द्युतिर्यस्येत्यन्वर्थतन्नामानम्, **अखिलानामपि** सर्वेषामपि, **स्वर्गभूषणानां** स्वर्गालङ्करणानाम्, **प्रधानं** श्रेष्ठम्, **आसत्तिमात्रेण** सान्निध्यमात्रेणापि, **कृतसकलदुरितापहारं** कृतः सकलानां दुरितानाम्–अभ्युदयप्रत्यूहानाम्, अपहारः–विध्वंसनं येन तादृशम्, इमं **हारं** रत्नमाल्यम्, **मे** मम, **मनःपरितोषाय** हृदयसन्तोषाय, **गृहाण** अङ्गीकुरु, तद्ग्रहणेन च माम् **अनुगृहाण** अनुगृहीतं कुरु [ ल्ह ]।

**किल** निश्चयेन, **एष** चन्द्रातपहारः, **पीयूषदानकृतार्थीकृतसकलार्थिसुरसार्थेन** पीयूषदानेन–अमृतवितरणेन, कृतार्थीकृतः–परितोषितः, सकलानां–सर्वेषाम्, अर्थिनां–तत्प्रार्थिनाम्, सुराणां–देवानाम्, सार्थः–समूहो येन तादृशेन, **क्षीरोदेन** क्षीरसमुद्ररूपेण, **मथनविरताब्धिना** मथाद्–विलोडनाद्, विरतेन–निवृत्तेन, अब्धिना–समुद्रेण, **प्रयत्नरक्षितात्** प्रयत्नेन–महता यत्नेन, रक्षितात्, **प्रधानरत्नकोशात्** मुख्यरत्नकोशसकाशात्, **अमृतसम्भवशुक्तिगर्भप्रभवाणि** अमृतसम्भवा–अमृतोत्पन्ना या शुक्तिः, तद्गर्भप्रभवाणि–तद्गर्भोद्भूतानि, **अतिप्रभावन्ति** अतिशयितकान्तिशालीनि, **'अतिमहाप्रभावाणि'** इति पाठे तु अतिमहान्तः प्रभावा माहात्म्यानि येषां तादृशानि, पुनः **परिणतामलकीफलस्थूलनिस्तलानि** परिणतानि–परिपक्वानि, यानि आमलकीफलानि–धात्रीफलानि, तद्वत् स्थूलानि, निस्तलानि–वर्तुलानि च, मुक्ताफलानि, **आदाय** उद्धृत्य, **कौतुकेन** स्नेहातिशयेन, **स्वयं** स्वेनैव, **ग्रथितः** गुम्फितः। **च** पुनः **स्वयंवरोत्सवानन्तरं** स्वयम्–आत्मनैव, वरः–पत्युर्वरणमिति स्वयंवरः, तदुत्सवानन्तरम्, **असुरारिमन्दिरम्** असुरारेः–विष्णोः, मन्दिरम्, **आश्रयन्त्याः** अधितिष्ठन्त्याः, **श्रियः** स्वप्रसूतलक्ष्म्याः, **मन्युगद्गदकण्ठेन** मन्युना–विश्लेषदुःखेन, गद्गदः–अव्यक्तस्वरः, यः कण्ठस्तेन, **कण्ठकाण्डमण्डनं** कण्ठकाण्डस्य–कण्ठनालस्य, मण्डनं भूषणम्, **कृतः** तद्भूषणरूपेण तत्र स्थापित इत्यर्थः। **धृतिमत्या** धैर्यवत्या, देव्या **कमलया** लक्ष्म्या अपि, **हरेः** विष्णोः, **कामकेलिक्लान्तिहारीति** कामकेलौ–रतिक्रीडायाम्, या क्लान्तिः–श्रान्तिः, तस्या हरणशील इति मत्वा, **महान्तं** दीर्घं कालं यावत, **धृतः** स्वग्रीवायां परिहितः। **च** पुनः, **पुलोमदुहितुः** इन्द्राण्याः, **कुमारजयन्तस्य** जयन्तनाम्नः कुमारस्य, **जन्मनि** जन्मोत्सवे, **ज्येष्ठजायेति** ज्येष्ठस्य–स्वपत्युर्ज्येष्ठभ्रातुरिन्द्रस्य, भार्येति हेतोः, **जातपुलकया** आनन्दातिशयोद्भूतरोमाञ्चया, लक्ष्म्येति शेषः, **उपनीतः** तस्यै समर्पितः, इन्द्रस्य विष्णोश्च कश्यपात्मजत्वेन भ्रातृभावात् तयोरिन्द्रस्य ज्येष्ठत्वाच्च तस्या ज्येष्ठभार्यात्वं बोध्यम्। **तया** इन्द्राण्या **अपि**, **परिरम्भविभ्रमेषु** आलिङ्गनकेलिषु, **निबिडपीडिताखण्डलोरसः** निबिडम्–अत्यन्तं यथा स्यात् तथा, पीडितं–मर्दितम्, आखण्डलस्य–इन्द्रस्य, उरः–वक्षःस्थलं येन तादृशस्य, **सुरगजकुम्भपीठपृथुनः** सुरगजस्य–ऐरावतस्य, यः कुम्भपीठः–मूर्धस्थलम्, तद्वत् पृथुनः–स्थूलस्य, **निजस्तनमण्डलस्य** मण्डलाकारस्वस्तनद्वन्द्वस्य, **अतिदीर्घकालम्**

प्रियङ्गुसुन्दर्याः कण्ठदेशे, तयाऽप्यतिशयितशीतरश्मिरोचिषमस्य शुचितागुणं शचीप्रसादं च बहु मन्यमानया मुक्त्वाऽन्यानि कन्धराभरणानि धारितः सुचिरम्, अद्य तु क्वापि धर्म्ये कर्मणि नियुज्य तामागच्छता मया विरहविनोदार्थमारोप्य कण्ठे सुहृद्दर्शनोत्कण्ठितेनानीतः [ ए ]। तदेष संप्रति स्वभावधवलरुचिः कालच्छायाकवलितमरुच्येव मोक्तुकामो मामवाप्य कथमपि पुण्यपरिणत्या प्राच्यया संयोजितं त्वां मुक्तामयवपुषमशेषतो मुक्तामयस्त्रासविरहितमपेतत्रासः स्वच्छाशयमतिस्वच्छो गुणवन्तमतिशयोज्ज्वलगुणः प्राप्नोतु सदृशवस्तुसंयोगजां प्रीतिम् [ ऐ ]। अस्य हि परित्यक्तसुरलोकवासस्य दूरीभूतदुग्धसागरोदरस्थितेस्त्वद्वसतिरेव स्थानम्, न हि त्र्यम्बकजटाकलापमन्तरिक्षं वा विहाय क्षीणोऽपि हरिणलक्ष्मा क्षितौ पदं बध्नाति, मयाऽप्यनन्ययो-

---

**टिप्पनकम्—मुक्तामयवपुषं** मुक्तरोगतनुम्, **मुक्तामयः** मौक्तिकनिर्मितः। **त्रासविरहितं** भयवर्जितम्, **अपेतत्रासः** अपगतत्रासदोषः। आशयः– चित्तम्। **गुणवन्तं** दीप्तादिगुणयुक्तम्, **अतिशयोज्ज्वलगुणः** अतिनिर्मलदवरकः [ ऐ ]।

---

अतिभूरिकालपर्यन्तम्, **मण्डनं** भूषणं कृत्वा, **सखीप्रेमहृतहृदयया** सख्यां यत् प्रेम-स्नेहः, तेन हृतम्–आकृष्टं हृदयं यस्याः तया, **प्रियङ्गुसुन्दर्याः** प्रियङ्गुः–श्यामा लता, तद्वत् सुन्दर्याः, **मत्प्रियायाः** मद्भार्यायाः स्वसख्याः, कण्ठदेशे, **अर्पितः** निहितः, "श्यामा तु महिलाह्वया। लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली" इत्यमरः। **तया** मद्भार्यया अपि, **अतिशयितशीतरश्मिरोचिषम्** अतिशयितं–तिरस्कृतम्, शीतरश्मेः–चन्द्रस्य, रोचिः–प्रकाशो येन तादृशम्, **अस्य** हारस्य, **शुचितागुणम्** उज्वलतारूपं गुणम्, **शचीप्रसादं** शच्याः–इन्द्राण्याः, प्रसादं–प्रसन्नतां च, **बहु मन्यमानया** अधिकं मन्यमानया, **अन्यानि** तदितराणि, **कन्धराभरणानि** ग्रीवाऽलङ्करणानि, **मुक्त्वा** त्यक्त्वा, **सुचिरम्** अतिदीर्घकालं यावत्, **धारितः** ग्रीवायां परिहितः। **अद्य** अस्मिन् दिने तु, **तां** स्वप्रियाम्, **क्वापि** कस्मिंश्चित्, **धर्म्ये** धर्मादनपेते, धार्मिके इत्यर्थः, **कर्मणि** कार्ये, **नियुज्य** तत्कर्तृत्वेन नियम्य, **सुहृद्दर्शनोत्कण्ठितेन** मित्रदेवदर्शनोत्सुकेन, **आगच्छता** अत्रागमनं कुर्वता, मया, **विरहविनोदार्थं** तद्विरहेऽपि तदीयवस्तुना यो विनोदस्तदर्थम्, यद्वा विरहस्य तद्विश्लेषजन्यदुःखस्य, यो विनोदः–विशेषेण नोदः–अपनोदनम्, तदर्थम्, **कण्ठे** स्वग्रीवायाम्, **आरोप्य** धृत्वा, **आनीतः** अत्रोपस्थापितः [ए]।

**तदेषः** सोऽयं हारः, यतः स्वयं **स्वभावधवलरुचिः** स्वभावतः स्वच्छकान्तिः, अतः, **सम्प्रति** दिव्यदेहावसानसमये, **कालच्छायाकवलितं** कालच्छायया–मरणचिह्नभूतया कृष्णकान्त्या, कवलितं माम्, **अरुच्या** अप्रीत्या, इव, **मोक्तुकामः** मोक्तुमिच्छुः, **प्राच्यया** पूर्वानुष्ठितया, **पुण्यपरिणत्या** सुकृतोदयेन, **संयोजितं** सम्बन्धितम्, त्वाम्, **कथमपि** कथञ्चिदपि, **अवाप्य** प्राप्य, संयुज्येत्यर्थः, **सदृशवस्तुसंयोगजाम्** अनुरूपवस्तुसम्बन्धप्रयुक्ताम्, **प्रीतिं** परस्परस्नेहम्, **प्राप्नोतु** अनुभवतु। कथं तयोरानुरूप्यमित्याह–स्वयम् **अशेषतः** साकल्येन **मुक्तामयः** मुक्तामणिमयः, त्वामपि **मुक्तामयवपुषं** मुक्तः–त्यक्तः, आमयः–व्याधिर्येन तादृशं वपुः–शरीरं यस्य तादृशम्, स्वयम् **अपेतत्रासः** अपेतः–विध्वस्तः, त्रासः–धारयितुः त्रासः–अशुभभयं येन तादृशः, त्वामपि **त्रासविरहितं** रिपुभयवर्जितम्, पुनः स्वयम् **अतिस्वच्छः** अतिनिर्मलः, त्वामपि **स्वच्छाशयं** स्वच्छः–निष्कपटः, आशयः–अन्तःकरणं यस्य तादृशम्, पुनः स्वयम् **अतिशयोज्ज्वलगुणः** अतिशयेनोज्ज्वलः–स्फीतः, गुणः–सूत्रं यस्मिंस्तादृशः, त्वामपि **गुणवन्तं** दया-दाक्षिण्यादिगुणविशिष्टम्, सर्वमेतत् 'प्राप्नोतु' इत्यनेनान्वेति [ ऐ ]।

**हि** निश्चयेन, **परित्यक्तसुरलोकवासस्य** परित्यक्तः, सुरलोके–देवलोके, वासः–स्थितिर्येन तादृशस्य, पुनः **दूरीभूतदुग्धसागरोदरस्थितेः** दूरीभूता, दुग्धसागरोदरे–क्षीरसागरमध्ये, स्थितिर्यस्य तादृशस्य, **अस्य** हारस्य, **त्वद्वसतिरेव** त्वद्भवनमेव, **स्थानम्** अधुना तत्तुल्यमाहात्म्यकं द्वितीयं वासस्थानम्। **हि** यतः, **क्षीणोऽपि** क्षयावस्थोऽपि, **हरिणलक्ष्मा** हरिणः–मृगः, लक्ष्म–लाञ्छनं यस्य तादृशः, चन्द्रमा इत्यर्थः, **त्र्यम्बकजटाकलापं** त्रीणि, अम्बकानि–लोचनानि यस्य तस्य, शिवस्य, जटाकलापं–जटासमूहम्, **अन्तरिक्षम्** आकाशं वा, विहाय **क्षितौ** पृथिव्याम्, **पदं** स्वस्थानम्, **न बध्नाति**

ग्योपभोगो भव्यतामस्य भावयता दिव्यदर्शनममोघमिति घोषणां जनस्य किञ्चिच्चरितार्थां चिकीर्षता क्षणमात्रपरिचितमात्मानमीषदनुस्मरणविषयतां नेतुमभिलषता प्रीतिप्रगुणितस्य चात्मनस्तरलतां तिरोधातुमक्षमेणायमुपनीयते, न पुनरुपकाराय प्रीतये वा, सर्वस्वदानेनापि देहिनामुपकुर्वतः परेण प्रार्थितां पृथिवीमपि तृणगणनया परित्यजतः किं तद्वस्तु यत्प्रदानेन प्रीतिरुपकारो वा भविष्यति भवतः, सर्वथा दत्तोऽयं मया [ ओ ]। 'विपत्प्रतीकारासमर्थः क्षीणायुषोऽस्य भिषगिव कथं रिक्थमाहरामि? अलङ्कारः क्षत्रियकुलस्य याचकद्विज इव कथं प्रतिग्रहमङ्गीकरोमि? गृहाभ्यागतेनामुना दीयमानं दुर्गतगृहस्थ इव गृह्णन्नपरं लघिमानमासादयिष्यामि, सुरैरपि कृतस्तुतिराभरणखण्डस्य कृते करं प्रसारयन्नस्यैव वैमानिकस्योपहास्यतां यास्यामि' इत्यनेकविकल्पविप्रलब्धमनसा त्वया मनस्विनां वरेण त्रिदशनाथेऽपि भगवति कदाचिदकृतप्रणयभङ्गस्य मे न कार्यः प्रथमप्रार्थनाभङ्गः, ग्रहीतव्यो निर्विचारेण [ औ ]। यस्मादुपरोधभीरुत्वादगृह्यमाणोऽपि भवता दूरीभूत एवैष

---

टिप्पनकम्—रिक्थं द्रव्यम्। प्रणयः- प्रार्थना [ औ ]। पूर्वजातेः पूर्वजन्मनः [ अं ]।

---

न करोति। **अस्य** हारस्य, **अनन्ययोग्योपभोगाम्** अनन्ययोग्यः-अन्यायोग्यः, उपभोगो यस्यास्तादृशीम्, **भव्यतां** सुन्दरताम्, **भावयता** आलोचयता, पुनः **दिव्यदर्शनं** देवस्य दर्शनम्, **अमोघम्** अव्यर्थम्, भवतीति **जनस्य** लोकस्य, **घोषणां** प्रवादम्, किञ्चित्, **चरितार्थां** सफलाम्, **चिकीर्षता** कर्तुमिच्छता, पुनः **क्षणमात्रपरिचितं** मुहूर्तमात्रदृष्टम्, **आत्मानं** स्वम्, **ईषत्** किञ्चित्, **अनुस्मरणविषयताम्** अनु-पश्चात्, स्मृतिगोचरताम्, **नेतुं** प्रापयितुम्, **अभिलषता** कामयमानेन, **प्रीतिप्रगुणितस्य** प्रीतिपूर्णस्य, **आत्मनः** स्वस्य, **तरलतां** प्रीतिप्रकटनचपलताम्, **तिरोधातुम्** अपलपितम्, **अक्षमेण** असमर्थेन च, मयाऽपि, **अयं** हारः, **उपनीयते** तुभ्यं समर्प्यते, **पुनरुपकाराय** प्रत्युपकाराय, **प्रीतये वा** मयि प्रीतिरस्तु एतदर्थं वा, न उपनीयते, यतः सर्वस्वदानेनापि, **देहिनां** शरीरिणाम्, **उपकुर्वतः** उपकारं कुर्वतः, **परेण** अन्येन, **प्रार्थितां** याचिताम्, **पृथिवीमपि** अखण्डभूमण्डलमपि, **तृणगणनया** तृणबुद्ध्या, **परित्यजतः** ददतः, भवतः, प्रीतिरुपकारो वा, **यत्प्रदानेन** यत्समर्पणेन, **तद्वस्तु किम्** अस्तीति शेषः, न किमपीत्यर्थः, **अयं** हारः, **सर्वथा** सर्वप्रकारेण, न किञ्चित् स्वत्वं रक्षित्वैति यावत्, **दत्तः** तुभ्यमर्पितः [ ओ ]। **इत्यनेकविधविकल्पविप्रलब्धमनसा** इति-एतादृशैः, अनेकविधैः, विकल्पैः, विप्रलब्धं-वञ्चितं मनो यस्य तादृशेन सता, **मनस्विनां** प्रशस्तमनसाम्, **वरेण** श्रेष्ठेन, **त्वया**, **मे** मम, **प्रथमप्रार्थनाभङ्गः** प्रथमायाः, प्रार्थनायाः-हारग्रहणयाच्ञायाः, भङ्गः-उच्छेदः, न, **कार्यः** कर्तुमुचितः, कीदृशस्य मे? भगवति, **त्रिदशनाथेऽपि** इन्द्रेऽपि, तद्विषयेऽपीत्यर्थः, **कदाचित्** कस्मिंश्चिदवसरे, **अकृतप्रणयभङ्गस्य** अकृतप्रेमभङ्गस्य। कीदृशा अनेकविकल्पाः? **क्षीणायुषः** अल्पावशिष्टायुषः, **अस्य** देवस्य, **विपत्प्रतीकारासमर्थः** विपत्तीनां-दुःखानाम्, प्रतीकारे-निवारणे, असमर्थोऽहम्, **भिषगिव** तादृशवैद्य इव, **रिक्थं** धनं हाररूपम्, **कथं** केन प्रकारेण, **गृह्णामि** स्वीकरोमि?, किञ्च **क्षत्रियकुलस्य** क्षत्रियवंशस्य, **अलङ्कारः** भूषणभूतः, अहमिति शेषः, **याचकद्विज इव** याचनात्मकवृत्तिमान् विप्र इव, कथं **प्रतिग्रहं** दीयमानवस्तुग्रहणम्, **अङ्गीकरोमि** स्वीकरोमि, किञ्च **गृहाभ्यागतेन** मद्गृहातिथिभूतेन, **अमुना** देवेन, **दीयमानं** समर्प्यमाणं वस्तु, **दुर्गतगृहस्थ इव** दरिद्रगृहपतिरिव, **गृह्णन्**, **अपरं** पूर्वोक्तातिरिक्तम्, **लघिमानं** नीचत्वम्, **आसादयिष्यामि** प्राप्स्यामि, सुरैरपि, **कृतस्तुतिः** कृता स्तुतिः-वदान्यत्वप्रशंसा यस्य तादृशः, अहमिति शेषः, **आभरणखण्डस्य** एकमात्रस्याभूषणस्य, कृते, **करं** स्वहस्तम्, प्रसारयन्, **अस्यैव** दातुरेव वैमानिकस्य देवस्य, **उपहास्यताम्** उपहासयोग्यताम्, **यास्यामि** प्राप्स्यामि। **निर्विचारेण** ग्रहणाग्रहणविचारशून्येन, भवतेति शेषः, ग्रहीतव्यः, एष हार इति शेषः [ औ ]।

**यस्मात्** यतः, **उपरोधभीरुत्वात्** मदीयान्तःपुरभयात्, भवता, **अगृह्यमाणोऽपि** अस्वीक्रियमाणोऽपि, **एषः**

मे स्वर्गच्च्युतस्य, गृहीतस्तु कदाचिन्मनुष्यलोके लब्धजन्मनः पुनरानन्दयति दृष्टिम्, इष्टतमदर्शनं चैनममरलोकाच्च्युता कालक्रमेण देव्यपि मे प्रियङ्गुसुन्दरी कदाचिदालोकयति । दर्शनाभ्यासजातपूर्वजातिस्मृतिश्च स्मरति रतिकराण्यसकृन्मया सहोपभुक्तानि स्वर्गवासक्रीडासुखानि, विरहदुःखदत्तोद्वेगाच्च प्रवर्तते यथाशक्ति कुशलावाप्तिसाधके कर्मणि, एवं च तस्या अप्युपकृतं भवति । संभवन्ति च भवार्णवे विविधकर्मवशवर्तिनां जन्तूनामनेकशो जन्मान्तरजातसंबन्धैर्बन्धुभिः सुहृद्भिरर्थैश्च नानाविधैः सार्धमबाधिताः पुनस्ते संबन्धाः, स्मरणानि चात्यन्तविस्मयकराणि पूर्वजातेः, अतो 'नायमालापो मोहप्रलाप इति मे समर्थनीयः, कदर्थनीयश्च पुनरहं प्रार्थनाभङ्गदैन्यसंपादनेन' इत्युदीर्य कण्ठादवतार्य किञ्चिदवनतेक्षणो दक्षिणकरेण लग्नधवलनखकिरणमालमुपस्थितनिरवसानसुरलोकविरहव्यथाविदीर्णहृदयोद्गीर्णगर्भामृतच्छटासारमिव हारमुपनिन्ये [ अं ] । नरेन्द्रोऽपि तेन चर्मचक्षुषामगोचरेण तस्य साक्षान्निजदिव्यरूपाविष्करणेन, तेन स्मितोद्भेदपूर्वेण वक्षसि रचित-

---

हारः, **स्वर्गच्च्युतस्य** स्वर्गाद् भ्रष्टस्य, ततोऽत्रावतीर्णस्येत्यर्थः, **मे** मम, दूरीभूत एव स्यादिति, **गृहीतस्तु** लब्धस्तु, भवतेति शेषः, **मनुष्यलोके** मर्त्यभुवने, **लब्धजन्मनः** लब्धं जन्म येन तादृशस्य, ममेति शेषः, **कदाचित्** कस्मिंश्चित् काले, **पुनः** भूयोऽपि, **दृष्टिं** नेत्रम्, **आनन्दयति** वर्तमानसमीपकाले आनन्दयिष्यतीत्यर्थः । **अमरलोकात्** देवलोकात्, **च्युता** अत्रावतीर्णा, **मे** मम, **देवी** प्रिया, प्रियङ्गुसुन्दरी अपि, **कालक्रमेण** कालवशेन, **इष्टतमदर्शनम्** इष्टतमम्-अतिशयेनाभिमतम्, दर्शनं यस्य तादृशम्, **एनं** हारम्, कदाचित्, **आलोकयति** आलोकयिष्यतीत्यर्थः । **च** पुनः, **दर्शनाभ्यासजातपूर्वजातिस्मृतिः** दर्शनाभ्यासेन-दर्शनपौनःपुन्येन, जाता, पूर्वस्याः, जातेः-जन्मनः, स्मृतिः-स्मरणं यस्यास्तादृशी सती, प्रियङ्गुसुन्दरी, **रतिकराणि** प्रीतिजनकानि, मया सह, **उपभुक्तानि** अनुभूतानि, **स्वर्गवासक्रीडासुखानि** स्वर्गवासे-स्वर्गवासावस्थानसम्बन्धीनि यानि, क्रीडासुखानि-केलिसुखानि तानि, **असकृत्** पुनः पुनः, **स्मरति** स्मरिष्यति, एतद्दर्शनोद्बुद्धसंस्कारेणेत्यर्थः । **च** पुनः, **विरहदत्तदुःखोद्वेगात्** विरहदत्तेन-विरहजनितेन, दुःखेन य उद्वेगः-उद्भ्रमः, तद्वशाच्च, **'विरहदुःखदत्तोद्वेगा च'** इति पाठे तु विरहदुःखेन दत्त उद्वेगो यस्यास्तादृशी प्रियङ्गुसुन्दरीत्यर्थो बोध्यः, **कुशलावाप्तिसाधके** शुभप्राप्तिजनके, **कर्मणि** कार्ये, यथाशक्ति, **प्रवर्तते** प्रवर्तिष्यते । **एवं च** अनया रीत्या च, **तस्या अपि** मदीयदेव्या अपि, **उपकृतम्** उपकारः, **भवति** भविष्यति, त्वद्ग्रहणेनेति शेषः । **भवार्णवे** संसारसागरे, **विविधकर्मवशवर्तिनां** शुभाशुभनानाकर्मविपाकवशङ्गतानाम्, **जन्तूनां** जीवानाम्, **जन्मान्तरजातसम्बन्धैः** जन्मान्तरेषु-पूर्वभवेषु, जातः-निष्पन्नः, सम्बन्धो यैस्तादृशैः, **नानाविधैः** अनेकविधैः, **बन्धुभिः** पति-भ्रात्रादिभिः, **सुहृद्भिः** मित्रैः, **अर्थैः** विभवैश्च, **सार्धं** सह, **ते** पुरातनाः, सम्बन्धाः, पुनः, **अबाधिताः** बाधरहिताः, सम्भवन्ति । **पूर्वजातेः** पूर्वभवस्य, स्मरणानि च, **अत्यन्तविस्मयकराणि** अत्याश्चर्यजनकानि, भवन्तीति शेषः । **अतः** अस्माद्धेतोः, अयम्, **मे** मम, **आलापः** प्रेमपूर्वकोक्तिः, **मोहप्रलापः** मोहेन-अज्ञानवशेन, प्रलापः-निष्फलोक्तिरिति, न, **समर्थनीयः** साधनीयः । **च** पुनः, **प्रार्थनाभङ्गदैन्यसम्पादनेन** प्रार्थनाभङ्गेन यद् दैन्यं-दुःखम्, तत्सम्पादनेन, **पुनः** नियमेन, **अहं** न, **कदर्थनीयः** तिरस्करणीयः, इति, **उदीर्य** उक्त्वा, **कण्ठादवतार्य** ग्रीवादेशादधस्तादपसार्य, **किञ्चिद्वनतेक्षणः** किञ्चिदवनते-अधोमुखे, ईक्षणे-नयने यस्य तादृशः सन्, **दक्षिणकरेण** दक्षिणहस्तेन, **लग्नधवलनखकिरणमालं** लग्ना-संक्रान्ता, धवला-विमला, नखानां किरणमाला यस्मिन् तादृशं हारम्, **उपनिन्ये** उपहारीचकार । कमिव ? **उपस्थितनिरवसानसुरलोकविरहव्यथाविदीर्णहृदयोद्गीर्णगर्भामृतच्छटासारमिव** उपस्थितेन-प्राप्तकालेन, **निरवसानेन** निरवधिकेन, सुरलोकविरहेण-देवलोकविश्लेषेण, या व्यथा-वेदना, तया विदीर्णं-भिन्नम्, यद् हृदयं तस्मादुद्गीर्णायाः-निःसृतायाः, गर्भामृतच्छटायाः-अन्तःस्थितामृतप्रभायाः, आसारमिव धारासम्पातमिवेत्युत्प्रेक्षा [ अं ] ।

**नरेन्द्रोऽपि** मेघवाहननृपतिरपि, **परोपचारेषु** परकृतस्वसत्कारविषये, **प्रकृतिनिःस्पृहोऽपि** प्रकृत्या-स्वभावेन, निःस्पृहोऽपि-इच्छाशून्योऽपि, **अतिस्पृहयालुरिव** लोलुभ इव, **सत्वरं** शीघ्रम्, **उपसृत्य** तत्समीपं गत्वा, **अग्रतः**

कोमलकराञ्जलिना प्रथमाभिभाषणेन, तेन सुरपतिप्रशंसाप्रकाशनपुरःसरेण विस्तरवता स्ववृत्तान्तकथनेन, तेन च दूरं परिहृतदिव्यतावलेपस्पृहणीयेन प्रतिग्राहणाय भूयोभूयः कृतेन प्रणयप्रार्थनेन दूरमावर्जितमनाः प्रकृतिनिःस्पृहोऽपि परोपचारेष्वतिस्पृहयालुरिव सत्वरमुपसृत्य प्रसार्य करयुगलमग्रतस्तं जग्राह [ अः ] ।

देवोऽप्यसावलक्षितगतिस्तस्मिन्नेव क्षणे झटित्यदर्शनमगमत् । तिरोभूते च तस्मिन्नुपजातविस्मयो नरपतिर्निरीक्ष्य चक्षुषा निश्चलेन तं हारमुत्तरीयाञ्चलैकदेशे बबन्ध । प्रविश्य च शक्रावतारायतनमध्यमाराध्य भगवन्तमतिचिरमादिदेवमागत्य निजसदनमुपपाद्य भक्त्यतिशयेन श्रियः सायंतनीं सपर्यामभिमुखीभूय तन्मुखनिहितनिश्चललोचनो निषसाद । निजगाद च—'भगवति! त्वच्चरणारविन्दसेवानुभावोऽयम्, यदस्मादृशामपि मनुष्यमात्राणामशेषत्रिभुवनमाननीया वासवसमानौजसो वैमानिकाः संनिधिमभिलषन्ति, योगिज्ञानगोचरं चात्मनो रूपमध्यक्षविषयीकुर्वन्ति, प्रकटितसंभ्रमाश्च दृष्टिदानसंभाषणादिना बहुमानेन

---

तदग्रे, **करयुगलं** हस्तद्वयम्, प्रसार्य च तं हारं **जग्राह** गृहीतवान् । कीदृशः सन्? **दूरं** दूरे, **आवर्जितमनाः** आकृष्टहृदयः सन्, केन? **चर्मचक्षुषां** चर्मोपहितचक्षुरिन्द्रियवताम्, बाह्यदृशामित्यर्थः, आध्यात्मिकदृष्टिशून्यानामिति यावत्, **अगोचरेण** अप्रत्यक्षभूतेन, **तेन** तत्कालमनुभूतेन, **तस्य** देवस्य, **साक्षात्** प्रत्यक्षात्मना, **निजदिव्यरूपाविष्करणेन** निजं-स्वकीयम्, यद् दिव्यं-स्वर्गीयं, दिव्यस्य-देवसम्बन्धि वा, रूपं-स्वरूपम्, तस्य, आविष्करणेन-प्रकटनेन, पुनः **स्मितोद्भेदपूर्वेण** मन्दहासोद्गमपूर्वकेण, **वक्षसि** वक्षःस्थले, **रचितकोमलकराञ्जलिना** रचितः-निर्मितः, कोमलयोः करयोः, अञ्जलिः-सम्पुटो यत्र तादृशेन, **तेन** तत्कालमनुभूतेन **प्रथमाभिभाषणेन** प्राथमिकालापेन, पुनः **सुरपतिप्रशंसाप्रकाशनपुरस्सरेण** सुरपतिना-देवेन्द्रकर्तृका, या प्रशंसा-तस्य राज्ञो गुणकीर्तनम्, तस्य प्रकाशनमनुवादस्तत्पूर्वकेण, **विस्तरवता** विस्तीर्णेन, **तेन** तत्कालमनुभूतेन **स्ववृत्तान्तकथनेन** स्वस्य-राज्ञः, वृत्तान्तस्य वर्णनेन, **च** पुनः, **दूरं** दूरे, **परिहृतदिव्यतावलेपस्पृहणीयेन** परिहृतः-परिवर्जितो यो, दिव्यतावलेपः-देवत्वाभिमानः, तेन स्पृहणीयेन-मनोहारिणा, **प्रतिग्राहणाय** स्वीकारयितुम्, **भूयो भूयः** पुनः पुनः, **कृतेन** विहितेन, **तेन** तत्कालमनुभूतेन प्रणयप्रार्थनेन [ अः ] ।

असौ देवोऽपि, **अलक्षितगतिः** अलक्षिता-अदृष्टा, गतिः-गमनं यस्य तादृशः, **तस्मिन्नेव क्षणे** तत्कृतहारग्रहणक्षण एव, **झटिति** शीघ्रम्, **अदर्शनम्** अन्तर्ध्यानम्, अगमत् । **तस्मिन्** देवे, **तिरोभूते** अन्तर्हिते सति, **उपजातविस्मयः** उपजातः-उत्पन्नः, विस्मयः-सद्योऽदर्शनाश्चर्यं यस्य तादृशः, **नरपतिः** मेघवाहननृपतिः, **निश्चलेन** स्थिरेण, **चक्षुषा**, तं हारं **निरीक्ष्य** दृष्ट्वा, **उत्तरीयाञ्चलैकदेशे** उत्तरीयस्य-स्कन्धोपरिधृतवस्त्रस्य, यदञ्चलम्-अग्रभागः, तदेकदेशे-तदेककोणे, **बबन्ध** बद्धवान् । **च** पुनः, **शक्रावतारायतनमध्यं** शक्रावतारायतनस्य-शक्रावतारमन्दिरस्य, मध्यं-मध्यभागम्, प्रविश्य, **अतिचिरम्** अतिदीर्घकालम्, भगवन्तम्, **आदिदेवम्** आदिनाथम्, **आराध्य** अर्चित्वा, **निजसदनं** स्वभवनम्, आगत्य, **भक्त्यतिशयेन** परमभक्त्या, **श्रियः** लक्ष्म्याः, **सायन्तनीं** सायंकालिकीम्, **सपर्याम्** अर्चाम्, **उपपाद्य** अनुष्ठाय, **अभिमुखीभूय** लक्ष्म्याः सम्मुखीभूय, **तन्मुखनिहितनिश्चललोचनः** तस्याः-लक्ष्म्याः, मुखे, निहिते-स्थापिते, निश्चले-स्थिरे, लोचने यस्य तादृशः सन्, **निषसाद** उपविवेश । **च** पुनः, **निजगाद** निगदितवान् । किमित्याह **भगवति ! अयम्** अनुपदमनुभूतः स्वयमुपेतवैमानिकसाक्षात्कारसंलापादिः; **त्वच्चरणारविन्दसेवानुभावः** त्वच्चरणारविन्दयोः, सेवायाः-आराधनायाः, अनुभावः-फलम्, **यत्** यस्माद्धेतोः, **अशेषत्रिभुवनमाननीयाः** अशेषस्य-समस्तस्य, त्रिभुवनस्य-स्वर्ग-मर्त्य-पाताललोकानाम्, माननीयाः-पूजनीयाः, **वासवसमानौजसः** वासवेन-इन्द्रेण, समानं-सदृशम्, ओजः-शक्तिर्येषां तादृशाः, **वैमानिकाः** विमानवास्तव्यदेवाः, **अस्मादृशाम्** अस्मद्विधानाम्, **मनुष्यमात्राणां** साधारणमनुष्याणामपि, **सन्निधिं** सङ्गमम्, **अभिलषन्ति** कामयन्ते, **च** पुनः, **योगिज्ञानगोचरं** योगिमात्रप्रत्यक्षविषयम्, **आत्मनः** स्वस्य, देवस्येत्यर्थः, **रूपं** स्वरूपम्, **अध्यक्षविषयीकुर्वन्ति** मानवसामान्यप्रत्यक्षविषयतामापादयन्ति, **च** पुनः, **प्रकटितसम्भ्रमाः** प्रकटितः-आविष्कृतः, सम्भ्रमः-कौतुकं यैस्तादृशाः सन्तः, **दृष्टिदानसम्भाषणादिना** दृष्टिदानं-दृष्टिपातः, सम्भाषणं-प्रेमालापः, तदादिना, **बहुमानेन** भूयसाऽऽदरेण, **महिमानं** महत्त्वम्, **आरोपयन्ति**

महिमानमारोपयन्ति, एतच्च यद्यपि अनिमित्तबन्धुना परोपकारपराधीनमानसेन महात्मना तेन दिव्यपुरुषेण स्वाङ्गभूषणीकृतमाभरणमेकं दत्तम्, तथापि त्वदीयमेतत्, अतो न मे शरीरस्पर्शमर्हति, दिव्या हि मूर्तयो भाजनं दिव्याभरणानाम्, तेन तावक एव परिवारलोके भवतु कस्यचित्, अनुभवतु वाऽदृष्टोदयान्मनुष्यलोकमागतमपि पुनस्त्रिदशलोकस्थितिसमुचितं शोभातिशयम्' इत्यभिधाय तं हाररत्नं देवतायाश्चरणयोः पुरस्तादमुञ्चत् [ क ] ।

अत्रान्तरे नितान्तभीषणो विशेषजनितस्फातिरास्फालिताशातटैः प्रतिफलद्भिरतिपरिस्फुटैः प्रतिशब्दकैः शब्दमयमिवादधानस्त्रिभुवनमुद्भ्रान्तनयनतारकाकान्तिकर्बुरीकृतदिग्भिराकर्णितः सभयमुभयकर्णदत्तहस्ताभिरायतनदेवताभिः कुलिशताडितकुलाचलशिखरसमकालनिपतद्गण्डशैलनिवहनादोद्धुरो हासध्वनिरुदलसत् [ख] । उपश्रुत्य च तमश्रुतपूर्वमुर्वीपतिरुपजातविस्मयः पस्पर्श चेतसा कियन्तमपि हासम्, न तु स्वल्पमात्रमपि संत्रासम् [ ग ] । अनुज्झितस्वभावावस्थितिश्च स्थित्वा मुहूर्तमुद्भूतकौतुकस्तदनुसारेण संचारयामास

---

उद्भावयन्ति । **च** पुनः, यद्यपि, **अनिमित्तबन्धुना** अकारणबन्धुत्वमापन्नेन, **परोपकारपराधीनमानसेन** परोपकारे–परहिताचरणे, पराधीनं–परायणं मानसं यस्य तेन, **महात्मना** महानुभावेन, **तेन** प्रस्तुतेन, **दिव्यपुरुषेण** देवेन, **स्वाङ्गभूषणीकृतं** स्वशरीरभूषणतामापादितम्, **एतत्** निकटस्थम्, एकम्, **आभरणम्** आभूषणम्, **दत्तं** समर्पितम्, **तथाऽपि** मह्यं दानेऽपि, एतत्, **त्वदीयं** त्वत्सम्बन्धि, वर्तत इति शेषः । **अतः** अस्मात् कारणात्, **मे** मम, **शरीरस्पर्शम्** अङ्गसम्पर्कम्, **न अर्हति** तदयोग्यमस्ति, एतदिति शेषः, **हि** यतः, **दिव्याः** स्वर्गीया एव, **मूर्तयः** शरीराणि, **दिव्याभरणानां** स्वर्गीयालङ्करणानाम्, **भाजनं** पात्रम्, तत्कृतशोभाऽऽस्पदमित्यर्थः, भवतीति शेषः, **तेन** तस्मात् कारणात्, **तावक एव** त्वदीय एव, **परिवारलोके** परिजनवर्गे, **कस्यचित्** कस्यापि, **भवतु** अस्तु, भूषणमिति शेषः, **वा** अथवा, **अदृष्टोदयात्** भाग्योदयात्, **मनुष्यलोकं** मर्त्यभुवनम्, **आगतमपि** अवतीर्णमपि, **त्रिदशलोकस्थितिसमुचितं** त्रिदशलोके–देवलोके, स्थितेः, समुचितं–योग्यम्, **शोभातिशयं** शोभाविशेषम्, **अनुभवतु** प्राप्नोतु, इति, **अभिधाय** उक्त्वा, **देवतायाः** लक्ष्मीदेव्याः, चरणयोः, **पुरस्तात्** अग्रे, **तं** देवार्पितम्, **हाररत्नं** हारश्रेष्ठम्, **अमुञ्चत्** अत्याक्षीत् [ क ] ।

**अत्रान्तरे** अस्मिन्नवसरे, **हासध्वनिः** हासकृतशब्दविशेषः, **उदलसत्** आविर्बभूव, स कीदृशः ? **नितान्तभीषणः** अत्यन्तभयङ्करः, पुनः **आस्फालिताऽऽशातटैः** आस्फालितानि–सङ्घटितानि, आशातटानि–दिक्तटानि, यैस्तादृशैः, **फलद्भिः** परितः प्रसरद्भिः, **अतिपरिस्फुटैः** अत्यन्तव्यक्तैः, **प्रतिशब्दैः** प्रतिध्वनिभिः, **विशेषजनितस्फातिः** विशेषेण–अतिशयेन, जनिता–उत्पादिता, स्फातिः–वृद्धिर्यस्य तादृशः, अत एव **त्रिभुवनं** स्वर्ग-मर्त्य-पाताललोकान्, **शब्दमयमिव** शब्दपूर्णमिव, **आदधानः** कुर्वाणः, पुनः **आयतनदेवताभिः** मन्दिरदेवताभिः, **सभयं** भयपूर्वकम्, **आकर्णितः** श्रवणगोचरतामापादितः, कीदृशीभिस्ताभिः ? **उद्भ्रान्तनयनतारकाकान्तिकर्बुरीकृतदिग्भिः** उद्भ्रान्तानाम्–उद् ऊर्ध्वं भ्रमणान्वितानाम्, नयनानां यास्तारकाः–कनीनिकाः, तासां कान्तिभिः छविभिः, कर्बुरीकृताः–चित्रिताः, दिशो याभिस्तादृशीभिः, पुनः **उभयकर्णदत्तहस्ताभिः** उभयोः–द्वयोरपि कर्णयोः–श्रोत्रयोः, दत्तौ–गभीरध्वनिकृताघातभयेन निवेशितौ, हस्तौ याभिः तादृशीभिः, पुनः कीदृशः ? **कुलिशताडितकुलाचलशिखरसमकालनिपतद्गण्डशैलनिवहनादोद्धुरः** कुलिशेन–वज्रेण, ताडितानि–प्रहृतानि, यानि कुलाचलानां–महापर्वतानां शिखराणि, तत्समकालं–तैः सहेत्यर्थः, निपततां गण्डशैलानां–पर्वतच्युतस्थूलपाषाणानाम्, निवहस्य–समूहस्य, नाद इव–ध्वनिरिव, उद्धुरः–गम्भीरः, "गण्डशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः [ ख ] । **उर्वीपतिः** मेघवाहननृपतिः, **अश्रुतपूर्वं** पूर्वमश्रुतम्, **तं** ध्वनिम्, **उपश्रुत्य** श्रवणगोचरीकृत्य, **उपजातविस्मयः** उत्पन्नाश्चर्यः सन्, **चेतसा** मनसा, **कियन्तमपि** कतिपयमपि, हासं **पस्पर्श** स्पृष्टवान्, हसितवानित्यर्थः, **स्वल्पमात्रमपि** ईषदपि, **संत्रासं** भयं तु न, पस्पर्शेति शेषः [ ग ] । **च** पुनः, **अनुज्झितस्वभावस्थितिः** अनुज्झिता–अत्यक्ता, स्वभावस्थितिः–स्वभावमर्यादा, येन तादृशः, **मुहूर्तं** क्षणम्, स्थित्वा, **उद्भूतकौतुक**

तिर्यग्वलिततारकं चक्षुः [ घ ]। अद्राक्षीच दक्षिणेतरविभागे संनिहितमेव देवतायाः [ ङ ], झगिति दत्तदर्शनम् [ च ], निदर्शनमिवाशेषत्रिभुवनभीषणानाम् [ छ ], अतिकृशप्रांशुविकरालकर्कशकायम् [ ज ], अलिकुलकोमलेन प्रसरता समन्ततः कान्तिकालिम्ना कज्जलमयीमिव सशैलद्वीपकाननामुर्वीं कुर्वाणम् [ झ ], अनतिपुराणशुक्तिकाश्रेणिसितभासा हासदूरप्रकटिताया दन्तपङ्क्तेः प्रतिमयेव पुरः स्फुरन्त्या स्थूलपृथुलया नखपरम्परया प्रकाशितनिजप्रभातिमिरतिरोहितचरणयुगलाङ्गुलिविभागम् [ ञ ], आबद्धास्थिनूपुरेण स्थवीयसा चरणयुगलेन रासभप्रोथधूसरं नखप्रभाविसरमनेकवातिकमण्डलभ्रमणलग्नं रक्षाभूतिरज इव दिक्षु विक्षिपन्तम् [ ट ], अक्षुद्रसरलशिरादण्डनिचितेन निश्चेतुमुच्छ्रायमूर्ध्वलोकस्य सगृहीतानेकमानरज्जुनेवोपलक्ष्यमाणेन गगनसीमोल्लङ्घिना जङ्घाद्वितयेन निरन्तरारूढविततव्रततिजालयमलतालशिखरनिषण्णमिव दृश्यमानम् [ ठ ],

---

टिप्पनकम्—प्रोथं– तुण्डम्, वातिकाः– मन्त्रवादिनः [ ट ]।

---

प्रादुर्भूतदिदृक्षाविशेषः, **तदनुसारेण** तस्य–कौतुकस्य, वशेन, **तिर्यग्वलितारकं** तिर्यक्–कुटिलं यथा स्यात् तथा, वलिता–चलिता, तारका–कनीनिका यस्य तादृशम्, चक्षुः, **सञ्चारयामास** व्यापारयामास [ घ ]। **च** पुनः, **अद्राक्षीत्** पश्यति स्म, कम्? **'एकं वेतालम्'** इति दूरेणान्वयः, वेतालः–दैत्यविशेषः, कीदृशं वेतालम्? **देवतायाः** लक्ष्मीदेव्याः, **सन्निहितमेव** निकटस्थितमेव [ ङ ], पुनः कीदृशं तम्? **झटिति** शीघ्रम्, **दत्तदर्शनं** दत्तं–कारितम्, दर्शनं येन तादृशम् [ च ]। पुनः कीदृशम्? **अशेषत्रिभुवनभीषणानां** त्रिभुवने, अशेषाः–समस्ता ये, भीषणाः–भयङ्कराः, तेषाम्, **निदर्शनमिव** दृष्टान्तमिव [ छ ]। पुनः कीदृशम्? **अतिकृशप्रांशुविकरालकर्कशकायम्** अतिशयेन कृशः, प्रांशुः–उन्नतः, विकरालः–भयङ्करः, कर्कशः–कठिनः, कायः–शरीरं यस्य तादृशम् [ज]। पुनः कीदृशम्? **समन्ततः** परितः, **प्रसरता** प्रचारं प्राप्नुवता, **अलिकुलकोमलेन** अलिकुलवत्–भ्रमरसमूहवत्, कोमलेन–मनोहरेण, **कान्तिकालिम्ना** स्वशरीरद्युतिकृष्णवर्णेन, **सशैलद्वीपकाननां** शैलैः–पर्वतैः, द्वीपैः–जलमध्यस्थलैः, काननैः–वनैश्च, सहिताम्, **उर्वीं** पृथ्वीम्, **कज्जलमयीमिव** कृष्णवर्णाञ्जनपूर्णामिव, **कुर्वाणं** रचयन्तम् [ झ ]। पुनः कीदृशम्? **नखपरम्परया** नखपङ्क्त्या, **प्रकाशितनिजप्रभातिमिरतिरोहितचरणयुगलाङ्गुलिविभागं** प्रकाशितः, निजप्रभातिमिरेण–स्वकान्तिरूपान्धकारेण, तिरोहितः–अलक्ष्यतां गमितः, चरणयुगलस्य–पादद्वयस्य, विभागः–पार्थक्यं येन तादृशम्; कीदृश्या तया? **अनतिपुराणशुक्तिकाश्रेणिसितभासा** अनतिपुराणा–किञ्चित् पुराणा, या शुक्तिका तस्याः, श्रेणिः–पङ्क्तिरिव, सिता–शुभ्रा, भाः–कान्तिर्यस्यास्तादृश्या, पुनः **हासदूरप्रकटितायाः** हासेन, दूरप्रकटितायाः–दूरपर्यन्ताभिव्यक्तायाः, दन्तपङ्क्तेः–दन्तसमूहस्य, **प्रतिमया** प्रतिबिम्बेनेव, **पुरः** अग्रे, **स्फुरन्त्या** दीप्यमानया, पुनः **स्थूलपृथुलया** सान्द्रया पृथुलया विस्तृतया च [ ञ ]। पुनः कीदृशम्? **आबद्धास्थिनूपुरेण** आबद्धम्–आलम्बितम्, अस्थिनिर्मितं नूपुरं–पादालङ्करणं यत्र तादृशेन, **स्थवीयसा** अतिस्थूलेन, **चरणयुगलेन** चरणद्वयेन, **रासभप्रोथधूसरं** रासभस्य–गर्दभस्य, प्रोथः–तुण्डम्, तद्वद् धूसरं–किञ्चित्पीतश्वेतम्, **नखप्रभाविसरं** नखकान्तिकलापम्, **दिक्षु** प्रतिदिशम्, **विक्षिपन्तं** विस्तारयन्तम्, किमिव? **अनेकवातिकमण्डलभ्रमणलग्नम्** अनेकानि यानि वातिकानां मन्त्रवादिनाम्, मण्डलानि–समूहाः, तेषु भ्रमणेन श्मशानभूम्यादौ परिभ्रमणेन, लग्नं–सम्बद्धम्, **भूतिरज इव** रक्षांशानिव, **'रक्षाभूतिरज इव'** इति पाठे रक्षायै–रक्षणाय, यद् भूतिरजः–रक्षापदवाच्यभस्मांशास्तानिवेति व्याख्येयम् [ ट ]। पुनः कीदृशम्? **जङ्घाद्वितीयेन** जङ्घाद्वयेन, **निरन्तरारूढव्रततिजालयमलतालशिखरनिषण्णमिव** निरन्तरं–निर्विच्छिन्नं यथा स्यात् तथा, आरूढम्–उपरि गतम्, विततानां–विस्तृतानाम्, व्रततीनां–लतानाम्, जालं–समूहो यस्मिंस्तादृशस्य यमलतालस्य–तालवृक्षयुगलस्य, शिखरे–उपरि, **निषण्णम्** उपविष्टमिव, **दृश्यमानं** प्रतीयमानमित्युत्प्रेक्षा, कीदृशेन तेन? **अक्षुद्रसरलशिरादण्डनिचितेन** अक्षुद्राः–विस्तृताः, सरलाः–ऋजुभूताश्च, याः शिराः–चर्मतन्तवः, तद्रूपैर्दण्डैः, निचितेन–व्याप्तेन, अतः **ऊर्ध्वलोकस्य** उपरितनलोकस्य, **उच्छ्रायम्** उच्चताम्, **निश्चेतुं** प्रमातुम्, **संगृहीतानेकमानरज्जुनेव** संगृहीताः–सञ्चिताः, अनेका मानरज्जवः–उन्मापकरज्जवो येन तादृशेनेव, **उपलक्ष्यमाणेन** प्रतीयमानेन, पुनः **गगनसीमोल्लङ्घिना** गगनस्य–आकाशमण्डलस्य, या सीमा–ऊर्ध्वावधि, तदुल्लङ्घिना, ततोऽप्यूर्ध्वं-

**उल्वणास्थिग्रन्थिना जानुयुगलेन क्षीणमांसेन च निकाममूरुकाण्डद्वयेन विश्राणितपरस्परगुणप्रकर्षम् [ ड ], अघृणाञ्चनादाननोद्वान्तगरेण जरदजगरेण गाढीकृतक्षतजकाथरक्तार्द्रशार्दूलचर्मसिचयम् [ ढ ], असृक्प्रवाहपाटलया वैतरणीसरित्सलिलवेणिकयेव पृथुलदीर्घया रोमलतया सीमन्तितकरालकुक्षिकुहरपातालम् [ ण ], आर्द्रपङ्कपटलश्याममतिकृशतया कायस्य दूरदर्शितोन्नतीनां पर्शुकानामन्तरालद्रोणीषु निद्रायमाणशिशुसरीसृपं सीरगतिमार्गनिर्गताविरलविषकन्दलं साक्षादिवाधर्मक्षेत्रमुरःप्रदेशं दर्शयन्तम् [ त ], अचिरखण्डितं मन्त्रसाधकमुण्डमिन्दुखण्डश्रद्धया धवलकुटिलान् दंष्ट्रानिर्गमानपहरन्तमासादितं विधुन्तुदमिव गलावलम्बितं बिभ्राणम् [ थ ], अतिभारविघटिताङ्गुलीसंनिवेशगलितमुच्छलितरुधिरच्छटाच्छोटितायतनस्तम्भकुम्भिकमाशाकरिकुम्भस्थलास्थिस्थूलमतिदूरलुठितमपि रक्तासवकपालमनुभावदर्शितात्यद्भुतभुजायामेन पाणिना वामेन**

---

**टिप्पनकम्**— अघृणाञ्चनं–निर्दयखञ्जनम् [ ढ ]। वैतरणी– नदी, [ ण ]। **पर्शुकानां** पंशुलीनाम्, सीरं–हलम् [ त ]। **विधुन्तुदं** राहुम्, [ थ ]।

---

नेत्यर्थः [ड]। पुनः कीदृशम्? **उल्वणास्थिग्रन्थिना** उल्वणा–स्थूलतया व्यक्तेत्यर्थः, अस्थिग्रन्थिः–अस्थिरूपा–ग्रन्थिर्यस्मिन् तादृशेन, **जानुयुगलेन** जङ्घोरुमध्यावयवद्वयेन, **निकामम्** अत्यन्तं यथा स्यात् तथा, **क्षीणमांसेन** अल्पमांसेन, **ऊरुकाण्डद्वयेन** सक्थिदण्डद्वयेन **विश्राणितपरस्परगुणप्रकर्षः** विश्राणितः–सम्पादितः, परस्परगुणस्य, प्रकर्षः–उत्कर्षो यस्मिंस्तादृशम् [ड]। पुनः कीदृशम्? **अघृणाञ्चनात्** निर्दयगमनात्, **आननोद्वान्तगरेण** आननात्–मुखात्, उद्वान्तम्–उद्गीर्णम्, गरं–विषं येन तादृशेन, **जरदजगरेण** जरता–जीर्णेन, परिणतविषेणेति यावत्. अजगरेण–सर्पराजेन, **गाढीकृतक्षतजकाथरक्तार्द्रशार्दूलचर्मसिचयं** गाढीकृतानि सान्द्रीकृतानि, यानि क्षतानि-व्रणानि, तेभ्यो जातैः, काथरक्तैः–परिणतरुधिरैः, आर्द्रः–क्लिन्नः, शार्दूलचर्मसिचयः–व्याघ्रचर्मोत्तरीयवस्त्रं यस्य तादृशम् [ढ]। पुनः कीदृशम्? **रोमलतया** रोमावल्या, **सीमन्तितकरालकुक्षिकुहरपातालं** सीमन्तितं–सीमन्तः–केशवेशः, स सञ्जातो यस्मिंस्तादृशम्, करालम्, कुक्षिकुहररूपम्–उदरविवररूपं पातालं यस्य तादृशम्, कीदृश्या तया? **असृक्प्रवाहपाटलया** असृजां–रुधिराणाम्, प्रवाहेण, पाटलया–रक्तवर्णया, पुनः **पृथुलदीर्घया** विस्तृतया आयतया च, कयेव? **वैतरणीसरित्सलिलवेणिकयेव** वैतरण्याः–तन्नाम्न्याः सरितः, यमद्वारस्थनद्याः. सलिलवेणिकयेव–जलावर्तेनेव पातालपक्षे सलिलरूपया वेण्या केशपाशेनेति व्याख्येयम् [ ण ]। पुनः कीदृशम्? **उरःप्रदेशं** वक्षःप्रदेशम्, दर्शयन्तम्, कीदृशं तं प्रदेशम्? **आर्द्रपङ्कपटलश्यामम्** आर्द्रं यत् पङ्कपटलं–कर्दमसमूहः, तद्वत् श्यामं–नीलवर्णम्, पुनः **कायस्य** शरीरस्य, **अतिकृशतया** कार्श्यातिशयेन हेतुना, **दूरदर्शितोन्नतीनां** दूराद् दर्शिता–प्रकटिता, उन्नतिः–उच्चत्वं यासां तादृशीनाम्, **पर्शुकानाम्** उभयपार्श्वलम्बमानानामस्थ्नाम्, पंशुलीनामित्यर्थः, **अन्तरालद्रोणीषु** मध्यभूतासु, द्रोणीषु–वैणवपात्रविशेषेषु, निद्रायमाणाः–स्वापसुखमनुभवन्तः, शिशुसरीसृपाः–बालसर्पा यस्मिंस्तादृशम्, किमिव? **सीरगतिमार्गनिर्गताविरलविषकन्दलं** सीरस्य–हलस्य, यो गतिमार्गः–गमनमार्गः, तस्मान्निर्गतानि, विषकन्दलानि–विषमयनवाङ्कुरा यस्मिंस्तादृशम्, साक्षाद् **अधर्मक्षेत्रमिव** अधर्मभूमिमिवेत्युत्प्रेक्षा [ त ]। पुनः कीदृशं तम्? **अचिरखण्डितं** तत्क्षणच्छिन्नम्, **मन्त्रसाधकमुण्डं** मन्त्रसिद्धिप्रयोजकं मुण्डम्, **गलावलम्बितं** गले–ग्रीवायाम्, अवलम्बितं–लम्बमानाकारेण, **बिभ्राणं** धारयन्तम्, **कमिव? इन्दुखण्डश्रद्धया** अर्धचन्द्रप्रीत्या, तद्बुद्ध्येति यावत्, **कुटिलान्** वक्ररूपान्, **दंष्ट्रानिर्गमान्** दंष्ट्रानिर्गततेजःपुञ्जान्, **अपहरन्तं** ग्रसन्तम्, **आसादितं** कुतश्चिन्निगृह्य गृहीतम्, **विधुन्तुदमिव** राहुमिवेत्युत्प्रेक्षा [ थ ]। पुनः कीदृशं तम्? **वामेन** दक्षिणेतरेण, **पाणिना** हस्तेन, **रक्तासवकपालं** रक्तस्य–रक्तवर्णस्य रुधिररूपस्य वा, आसवस्य–मद्यस्य, कपालं–पात्रम्, **आददानं** गृह्णन्तम्, कीदृशं तत्? **अतिभारविघटिताङ्गुलीसन्निवेशगलितम्** अतिभारेण–भारातिशयेन, विघटितः–विश्लेषितः, यः, अङ्गुलिसन्निवेशः–अञ्जलीनां सम्पुटीभावः, तेन गलितं–पतितम्, पुनः **उच्छलितरुधिरच्छटाच्छोटिताऽऽयतनस्तम्भकुम्भिकम्** उच्छलितया–उद्वेलितया, रुधिरच्छटया–शोणितधारया, आच्छोटिता–उत्सिक्ता, आयतनस्य–मन्दिरस्य, स्तम्भानां-स्थूणानाम्, कुम्भिका–कुम्भाकारविभागो येन तादृशम्, पुनः **आशाकरिकुम्भस्थलास्थिस्थूलम्** आशाकरिणां–दिग्गजानाम्, यानि कुम्भस्थलानि–मस्तकस्थलानि, तेषाम् अस्थिवत् स्थूलम्, पुनः **अतिदूरलुण्ठितमपि** अत्यन्तदूरे प्रक्षिप्तमपि, **वामेन**

तथैवोर्ध्वस्थितमाददानम् [ द ], दक्षिणेन च प्रतिक्षणव्यापारितनिशितकर्तिकेन वामकक्षान्तरक्षिप्तकन्धरस्य दृढनिरुद्धनिःश्वासनिर्गमत्वादध्वरपशोरिव तत्तदतिकरुणमन्तःक्रन्दतो दत्तनिष्फलकृपाणघातस्य वेतालसाधकस्य साधितमुत्सर्पता परिकराशीविषवदनविषपावकेन गात्रपिशितमुत्कृत्योत्कृत्य कीकशोपदंशमश्नन्तम् [ ध ], कवलितपिशितचर्वणायासचञ्चलेन कपिलतासंविभागदानाय त्रिभुवनोदरचारिणीनामचिररोचिषामारब्धसंज्ञा-समाह्वानेनेव क्षयानलवर्चसा कूर्चकचकलापेन कवचितमखिलरोमरन्ध्रनिर्गलद्रुधिरगण्डूषमिव प्रलम्बपृथुलं चिबुकमुद्वहन्तम् [ न ], अतिकठिनखर्वपर्वभिरङ्गुलीवेणुदण्डिकाभिः परिगृहीतैः कुटिलतीक्ष्णायताग्रकोटिभिः

---

टिप्पनकम्—साधितं पक्वम्, कीकसोपदंशम् अस्थिसालनकम् [ ध ]। कवचितं वेष्टितम् [न]।

---

**पाणिना** वामपाणिद्वारा, **तथैव** पूर्ववदेव, **ऊर्ध्वस्थितम्** उपरिस्थितम्, कीदृशेन तेन पाणिना? **अनुभावदर्शितात्यद्भुतभुजायामेन** अनुभावेन–सामर्थ्यवशेन, दर्शितः, अत्यद्भुतः–अत्याश्चर्यावहः, भुजस्य–बाहोः, आयामः–दैर्घ्यं येन तादृशेन [ द ]। पुनः कीदृशं तम्? **प्रतिक्षणव्यापारितनिशितकर्तिकेन** प्रतिक्षणम्, व्यापारिता–प्रयुक्ता, निशिता–तीक्ष्णा, कर्तिका–शस्त्रविशेषो येन तादृशेन, दक्षिणेन पाणिना, **गात्रपिशितं** शरीरमांसम्, **उत्कृत्य उत्कृत्य** उच्छिद्य उच्छिद्य, **कीकसोपदंशं** कीदृशं पिशितम्? **साधितं** पक्वम्, केन? **उत्सर्पता** ऊर्ध्वं प्रसरता, **परिकराशीविषवदनविषपावकेन** परिकराः–परिवारभूताः, ये आशीविषाः–सर्पविशेषाः, तेषां यानि वदनानि–मुखानि, तेभ्यो निर्गतं यद् विषं तद्रूपो यो पावकः–अग्निः, तेन, कीकसेन–अस्थ्ना, उपदश्य, अस्थ्ना सहेति यावत्, **अश्नन्तं** भुञ्जानम्, "कीकसं कुल्यमस्थि च" इत्यमरः, किंसम्बन्धि तत् पिशितम्? **वेतालसाधकस्य** वेतालसिद्धिव्यापृतस्य पुरुषस्य, कीदृशस्य तस्य? **वामकक्षान्तरक्षिप्तकन्धरस्य** वामकक्षान्तरे–वामपार्श्वमध्यभागे, क्षिप्ता–निवेशिता, कन्धरा–ग्रीवा यस्य तादृशम्, पुनः **दृढनिरुद्धनिःश्वासनिर्गमत्वात्** दृढं यथा स्यात् तथा निरुद्धः, निःश्वासनिर्गमः–निःश्वासनिःसरणं यस्य तत्त्वाद्धेतोः, **अध्वरपशोरिव** यज्ञपशोरिव, **तत् तत्** अनेकविधम्, अतिकरुणं यथा स्यात् तथा, **अन्तः** हृदि, **क्रन्दतः** रुदतः, पुनः **दत्तनिष्फलकृपाणघातस्य** दत्तः–कृतः, निष्फलः–निरर्थकः, निष्फलस्य–फलकरहितस्य वा, कृपाणस्य–खड्गस्य, घातः प्रहारो यस्मिंस्तादृशस्य [ ध ]। पुनः कीदृशम्? **प्रलम्बपृथुलं** प्रलम्बम्–अतिदीर्घम्, पृथुलं–विस्तृतं च, **चिबुकम्** ओष्ठाधोभागम्, **उद्वहन्तम्** उद्–ऊर्ध्वम्, वहन्तं–धारयन्तम्, कीदृशं चिबुकम्? **कूर्चकचकलापेन** श्मश्रुकेशसमूहेन, **कवचितं** व्याप्तम्, कीदृशेन तेन? **कवलितपिशितचर्मणायासचञ्चलेन** कवलितं–भक्षितम्, यत् पिशितं–वेतालसाधकशरीरमांसम्, तस्य चर्मणायासेन–चर्वणप्रयासेन हेतुना, चञ्चलेन–चपलेन, पुनः **त्रिभुवनोदरचारिणीनां** त्रिभुवनमध्यसञ्चरणशीलानाम्, **अचिररोचिषां** विद्युताम्, **कपिलतासंविभागदानाय** कपिलतायाः–कपिलवर्णस्य, यः संविभागः सम्यग्विभागः, तस्य दानाय–सम्पादनाय, **आरब्धसंज्ञासमाह्वानेनेव** आरब्धम्, संज्ञया–अर्थसूचकचेष्टया, समाह्वानं सम्यगाह्वानं येन तादृशेनेवेत्युत्प्रेक्षा, पुनः **क्षयानलवर्चसा** क्षयः–प्रलयः, तत्कालिको योऽनलः–अग्निः, तत्तुल्यं वर्चः–तेजो यस्य तादृशेन, पुनः कीदृशं चिबुकम्? **अखिलरोमरन्ध्रनिर्गलद्रुधिरगण्डूषमिव** अखिलेभ्यः–समग्रेभ्यः, रोमरन्ध्रेभ्यः, निर्गलतः–निःसरतः, रुधिरस्य, गण्डूषं–चुलुकमिवेत्युत्प्रेक्षा [ न ]। पुनः कीदृशम्? **कररुहकुद्दालैः** करे–हस्ते, रोहन्ति–उद्भवन्ति ये ते कररुहाः–नखाः, तद्रूपैः कुद्दालैः–खननास्त्रविशेषैः, **कृतोद्यमं** कृतप्रयासम्, किं कर्तुमिव? **असुरकन्यारिरंसया** असुराणां–पातालवासिदैत्यानाम्, याः कन्याः, ताभिः सह, रिरंसया–रमणेच्छया, **रसातलगतान्** पातालनिविष्टान्, **अलीकसाधकान्** मिथ्यासाधकजनान्, **उद्धर्तुमिव** ऊर्ध्वमानेतुमिवेत्युत्प्रेक्षा, कीदृशैस्तैः कुद्दालैः? **अतिकठिनखर्वपर्वभिः** अतिकठिनं–परमकठोरम्, खर्वं–ह्रस्वं च, पर्व–ग्रन्थिर्यासां तादृशीभिः, **अङ्गुलीवेणुदण्डिकाभिः** अङ्गुलिरूपाभिः, वेणुदण्डिकाभिः वंशदण्डैः, **परिगृहीतैः** अवलम्बितैः, पुनः **कुटिलतीक्ष्णायताग्रकोटिभिः** कुटिला–वक्ररूपा, तीक्ष्णा–निशिता, आयता–

करुरुहकुद्दालैरसुरकन्यारिरंसया रसातलगतानलीकसाधकानुद्धर्तुमिव कृतोद्यमम् [ प ], विपुलवर्तिमण्डलमालोललवपाशं श्रवणयुग्ममूर्ध्ववलितपुच्छनालनिबिडालिङ्गिताङ्गमुत्फुल्लफणाकर्परं कालसर्पद्वयमिवोद्वहन्तम् [ फ ], शिखिकणारुणया तिर्यग्विसर्पिण्या फणमणिकिरणमालया जटालीकृतसरलभोगनालाभ्यामलघुना निष्पतन्तमोघेन घोणापुटश्वासमुभयतः पातुमवतीर्णाभ्यां कर्णाभरणविषधराभ्यां द्विधाप्यधःकृतोष्ठपृष्ठलोमलेखम् [ ब ], मुहुरुदञ्चता मुहुर्न्यञ्चता मुहुः प्राञ्चता तिर्यगजगरदेहदीर्घपृथुलेन जिह्वालताग्रेण ललाटचिबुकसृक्कप्रान्तगतमार्द्रार्द्रमङ्गरागमेदःकर्दममास्वादयन्तम् [ भ ], अन्तर्ज्वलितपिङ्गलोग्रतारकेण करालपरिमण्डलाकृतिना नयनयुगलेन यमुनाप्रवाहमिव निदाघदिनकरप्रतिबिम्बगर्भोदरेणावर्तद्वयेनातिभीषणम् [ म ], आभोगिना ललाटस्थलेन सद्यःस्थापितमसृक्पङ्कपञ्चाङ्गुलं पचनाय नरजाङ्गलानामुपसंगृहीतं चिताग्निमिव सहज-

---

**टिप्पनकम्—द्विधापि** अधःकृतोष्ठपृष्ठलोमलेखं कृष्णत्वेन तिरस्कृता, अधस्ताद् विहिता च [ ब ]। जाङ्गलं–मांसम् [ य ]।

---

दीर्घा च, अग्रकोटिः–अग्रभागो येषां तादृशैः [ प ]। पुनः कीदृशं तम्? **श्रवणयुग्मं** कर्णयुगलम्, **उद्वहन्तं** धारयन्तम्, कीदृशं तत्? **विपुलवर्तिमण्डलं** विपुलं–बृहद्रूपम्, वर्तिमण्डलं–विवरमण्डलं यस्मिन् तादृशम्, पुनः **आलोललवपाशम्** आलोलः–आ–समन्तात्, लोलः–चञ्चलः, लवपाशः–लोमसमूहो यस्मिंस्तादृशम्, "लवः कालभिदि च्छिदि। विलासे रामजे लेशे तथा किञ्जल्क-पक्ष्मणोः। गोपुच्छलोमस्वपि च" इति हैमः, अत एव **ऊर्ध्ववलितपुच्छनालनिबिडालिङ्गिताङ्गम्** ऊर्ध्ववलितम्—उपरि प्रसृतम्, यत् पुच्छरूपं नालं–दण्डः, तेन निबिडम्–अत्यन्तं यथा स्यात् तथा, आलिङ्गितं–परिवेष्टितम्, अङ्गं–गात्रं यस्य तादृशम्, पुनः **उत्फुल्लफणाकर्परम्** उत्फुल्लं–विकस्वरं स्थूलमिति यावत्, फणाकर्परं–फणारूपं कर्परं कपालः, मूर्धन्यमस्थीति यावत्, यस्य तादृशम्, **कालसर्पद्वयमिव** प्रलयकालिकसर्पयुग्ममिवेत्युत्प्रेक्षा [ फ ]। पुनः कीदृशं तम्? **कर्णाभरणविषधराभ्यां** कर्णाभरणे–कर्णाभूषणे, तद्रूपाभ्यां विषधराभ्यां–सर्पाभ्याम्, **द्विधापि** दक्षिणवामभागाभ्यामपि, यद्वा द्युति–भाररूपप्रकारद्वयेनापि, **अधःकृतोष्ठपृष्ठलोमलेखम्** अधःकृता–न्यूनतामापादिता, अधोदेशस्थापिता च, ओष्ठपृष्ठस्य–ओष्ठोर्ध्वभागस्य, लोमलेखा–श्मश्रुश्रेणी याभ्यां तादृशम्, कीदृशाभ्यां ताभ्याम्? **फणमणिकिरणमालया** फणगतमणीनाम्, किरणमालया–रश्मिसमूहेन, **जटालीकृतसरलभोगनालाभ्यां** जटालीकृतं–व्याप्तम्, सरलम्–ऋजुरूपम्, भोगनालं–शरीरदण्डो ययोस्तादृशाभ्याम्, पुनः **अलघुना** महता, **ओघेन** प्रवाहरूपेण **निष्पतन्तं** निर्गच्छन्तम्, **घोणापुटश्वासं** नासापुटवायुम्, **उभयतः** उभयपार्श्वतः, **पातुं** पानकर्मीकर्तुम्, **अवतीर्णाभ्याम्** उपनताभ्याम्, "घोणा नासा च नासिका" इत्यमरः [ ब ]। पुनः कीदृशं तम्? **अङ्गरागमेदःकर्दमम्** अङ्गविलेपनात्मकं यन्मेदः–मांसजधातुविशेषः, तस्य कर्दमं–पङ्कम्, आस्वादलिहन्तम्, कीदृशं तम्, **मुहुर्मुहुः** वारं वारम्, **उदञ्चता** उद्गच्छता, **न्यञ्चता** अधो गच्छता, **प्राञ्चता** तिर्यग्गच्छता, **तिर्यगजगरदेहदीर्घपृथुलेन** तिर्यक्–कुटिलाकारेण स्थितः, योऽजगरः–महासर्पः, तस्य देहवत्, दीर्घेण–आयतेन, पृथुलेन–विशालेन च, **जिह्वालताग्रेण** जिह्वारूपाया लताया अग्रभागेन, **ललाट-चिबुकसृक्कप्रान्तगतं** ललाटस्य–कपालस्य, चिबुकस्य–ओष्ठाधोभागस्य, सृक्कणोः–ओष्ठान्तभागयोश्च, प्रान्ते–एकदेशे गतं–स्थितम्, "प्रान्तावोष्ठस्य सृक्कणी" इत्यमरः, पुनः **आर्द्रार्द्रम्** अत्यन्तमार्द्रम् [ भ ]। पुनः कीदृशं तम्? **नयनयुगलेन** नेत्रद्वयेन, **अतिभीषणम्** अत्यन्तभयङ्करम्, कीदृशेन तेन? **अन्तर्ज्वलितपिङ्गलोग्रतारकेण** अन्तः–मध्ये, ज्वलिते–दीप्ते, पिङ्गले–पीतवर्णे, उग्रे–भीषणे च, तारके–कनीनिके यस्य तादृशेन, पुनः **करालपरिमण्डलाकृतिना** कराला–भीषणा, परिमण्डला–वर्तुला च, आकृतिः–आकारो यस्य तादृशेन, केन कमिव? **निदाघदिनकरप्रतिबिम्बगर्भोदरेण** निदाघदिनकरस्य–ग्रीष्मकालिकसूर्यस्य, प्रतिबिम्बं, गर्भः–अन्तःस्थितो यस्य तादृशमुदरं–मध्यं यस्य तादृशेन, **आवर्तद्वयेन** चक्राकारेण जलभ्रमणद्वयेन, यमुनायाः–तन्नाम्न्या नद्याः, प्रवाहमिवेति प्रतिबिम्बोपमा [ म ]। पुनः कीदृशं तम्? **असृक्पङ्कपञ्चाङ्गुलम्** असृक्पङ्कस्य–रुधिरकर्दमस्य, तन्मयमिति यावत्, पञ्चाङ्गुलं–पञ्चानामङ्गुलीनां तदाकृतिचिह्नानां समाहारम्, **दधानं** धारयन्तम्,

भ्रुकुटिधूमान्धकारपरिगतं दधानम् [ य ], ऊर्ध्वस्थितेन स्थिरतडित्तन्तुसंतानस्थानकविडम्बिना कपिशभासुरेण केशभारेण भर्त्सयन्तमुपरि जाज्वल्यमानज्वालाखण्डमुत्पातधूमदण्डम् [र], आयतनभित्तिसङ्गिना बलिप्रदीपप्रभाप्रकाशितेन केशनखदशनवर्जमात्मनो निर्विशेषच्छायेन प्रतिच्छायापुरुषेण पार्श्वचारिणा सानुचरमिव दृश्यमानम् [ ल ], घोणयाप्युत्फुल्लस्फारपुटया धृतातिविकटपत्रपुटयेव पीयमानवदननिर्यद्वसामोदम् [ व ], दशनमालयाऽप्यन्तरालप्रविष्टकुणपास्थिशकलया सकलत्रिभुवनाभ्यवहाराय सहायीकृतानन्तदन्तयेवाक्रान्तमुखकुहरम् [ श ], चरणाङ्गुलीभिरपि स्फुरितपाण्डुनिम्नोदरनखाभिर्मुखार्पितकपालकर्पराभिरिव प्रतीष्यमाणोत्तरीयनरचर्मक्षरत्क्षतजकणवर्षम् [ ष ], अस्थिनूपुरैरपि पदप्रयोगमुखरैर्भयप्रस्तुतस्तुतिभिरिव सततसेवितचरणम्

---

**टिप्पनकम्**—कुणपं– मृतकम् [ श ] ।

---

कीदृशं तत् ? **आभोगिना** विस्तारिणा, **ललाटस्थलेन** ललाटकुड्येन, सद्यः **स्थापितं** स्वस्मिन् विलिख्य धृतम्, कमिव ? **नरजाङ्गलानां** मनुष्यमांसानाम्, **पचनाय** पाकार्थम्, **उपसंगृहीतं** सञ्चितम्, **सहजभ्रुकुटिधूमान्धकारपरिगतं** सहजे-स्वाभाविक्यौ, ये भ्रुकुटी-भ्रूलतिके, तद्रूपधूमान्धकारेण परिगतं-व्याप्तम्, **चिताग्निमिव** श्मशानाग्निमिवेत्युत्प्रेक्षा [ य ] । पुनः कीदृशं तम् ? **केशभारेण** स्वकीयकेशकलापेन, **उपरिजाज्वल्यमानज्वालाखण्डम्** उपरि जाज्वल्यमानाः-देदीप्यमानाः, ज्वालानां खण्डा भागा यस्य तादृशम्, **उत्पातधूमदण्डं** धूमो दण्डो यस्य स धूमदण्डः, अग्निः, उत्पाते-प्रलयवेलायां, धूमदण्डः-उत्पातधूमदण्डः, प्रलयाग्निः, तं **भर्त्सयन्तं** तिरस्कुर्वन्तम्, कीदृशेन तेन ? **कपिशभासुरेण** कपिशेन-कृष्णपीतवर्णेन, भासुरेण-दीप्रेण च, पुनः **ऊर्ध्वस्थितेन** उपरि लम्बितेन, अत एव **स्थिरतडित्तन्तुसन्तानस्थानकविडम्बिना** स्थिरस्य-स्थायिनः-तडित्तन्तुसन्तानस्य-विद्युद्रश्मिसमूहस्य, यत् स्थानकं-स्थानम्, तद्विडम्बिना-तदनुकारिणा [ र ] । पुनः कीदृशं तम् ? **पार्श्वचारिणा** पार्श्वगामिना, **प्रतिच्छायापुरुषेण** प्रतिबिम्बात्मकपुरुषेण, **सानुचरमिव** अनुचरसहितमिव, **दृश्यमानं** प्रतीयमानम्, कीदृशेन तेन ? **आयतनभित्तिसङ्गिना** मन्दिरकुड्यसंक्रामिणा, पुनः **बलिदीपप्रभाप्रकाशितेन** बलिदीपानां-पूजोपकरणदीपानाम्, प्रभाभिः प्रकाशितेन, पुनः **केशनखदशनवर्जं** केशान्, नखान्, दशनानि-दन्तांश्च, वर्जयित्वा, **आत्मनः** स्वस्य, **निर्विशेषच्छायेन** सदृशकान्तिशालिना, कृष्णवर्णेनेत्यर्थः, केशादीनां तु कपिशवर्णत्वादिना तद्वर्जनमिति बोध्यम् [ ल ] । पुनः कीदृशं तम् ? **उत्फुल्लस्फारपुटया** उत्फुल्लौ-विकसितौ, स्फारौ च, पुटौ-पुटाकारपार्श्वद्वयं यस्यास्तादृश्या, अत एव **धृतातिविकटपत्रपुटयेव** धृतौ, अतिविकटौ-विकरालौ, पत्रपुटौ यया तयेवेत्युत्प्रेक्षा, **घोणया** नासिकया, **पीयमानवदननिर्यद्वसामोदं** पीयमानः-घ्रायमाणः, वदनात्-मुखात्, निर्यन्त्याः-निर्गच्छन्त्याः, वसायाः-मज्जायाः, आमोदः-अतिगन्धो येन तादृशम् [ व ] । पुनः कीदृशं तम् ? **अन्तरालप्रविष्टकुणपास्थिशकलया** अन्तराले-मध्ये, प्रविष्टानि, कुणपस्य-शवस्य, अस्थ्नाम्, शकलानि-खण्ड यस्यां तादृश्या, अत एव **सकलत्रिभुवनाभ्यवहाराय** सकलस्य-समग्रस्य, त्रिभुवनस्य-स्वर्ग-मर्त्य-पाताललोकानाम्, अभ्यवहाराय-भक्षणाय, **सहायीकृतानन्तदन्तयेव** सहायीकृताः-सहायरूपेणाश्रिताः, अनन्ताः-असंख्याः, दन्ता यया तादृश्येवेत्युत्प्रेक्षा, **दशनमालया** दन्तपङ्क्त्या, **आक्रान्तमुखकुहरम्** आक्रान्तः-व्याप्तः, मुखकुहरः-मुखविवरं यस्य तादृशम् [ श ] । पुनः कीदृशं तम् ? **स्फुरितपाण्डुनिम्नोदरनखाभिः** स्फुरिताः-दीप्ताः, पाण्डवः-पाण्डुवर्णाः, निम्नोदराः-गभीरमध्यभागाः, नखा यासु तादृशीभिः, अत एव **मुखार्पितकपालकर्पराभिरिव** मुखे अर्पिताः, कपालरूपाः-शिरःस्थास्थिरूपाः, कर्पराः-तत्संज्ञककटाहाख्यपात्रविशेषो याभिस्ताभिरिवेत्युत्प्रेक्षा "कर्परस्तु कटाहे स्यात्" इति हैमः, "कपालोऽस्त्री शिरोऽस्थ्नि स्यात्" इत्यमरः, चरणाङ्गुलीभिरपि, **प्रतीष्यमाणोत्तरीयनरचर्मक्षरत्क्षतजकणवर्षं** प्रतीष्यमाणं-धार्यमाणम्, उत्तरीयभूतात्, नरचर्मणः-मनुष्यचर्मसकाशात्, क्षरतां-स्यन्दमानानाम्, क्षतजकणानां-रुधिरकणानाम्, वर्षं वृष्टिर्येन तादृशम् [ ष ] । पुनः कीदृशं तम् ? **पदप्रयोगमुखरैः** पदप्रयोगेण-पादविक्षेपेण, मुखरैः-शब्दायमानैः, अत एव **भयप्रस्तुतस्तुतिभिरिव** भयेन-सेव्यभयेन, प्रस्तुता-प्रारब्धा, स्तुतिर्यैस्तादृशैरिवेत्युत्प्रेक्षा,

[स], आभरणभुजगैरपि ज्वलदुन्मयूखफणमणिभिरात्तप्रदीपैरिवावगाह्यमानकज्जलकालकायप्रभान्धतमसम् [ह], मांसेनापि खादनभीतेनेव सास्रेण परित्यक्तसर्वावयवम् [ क्ष ], अवयवानप्यस्थिसारानतिविकृतरूपदर्शनभयात् पलायितुकामानिव स्नायुग्रन्थिगाढनद्धान् दधानम्, आजानुलम्बमानशवशिरोमालमेकं वेतालम् [ ज्ञ ],

तं च क्रमानुसारिण्या दृशा चरणयुगलादामस्तकं प्रत्यवयवमवलोक्य किञ्चित्कृतस्मितो नरपतिरुवाच— 'महात्मन्? अनेन ते प्रवृद्धेन सहसाकाशसंनिभप्रभाभारभरितककुभा स्फुटोत्फुल्लनयननासापुटेन मुखप्रवृत्त-संततास्रस्रोतसा प्रकटितकरालदंष्ट्रामण्डलेन विदारितविकटसृक्कणा निकामभीषणश्रवणेन वपुषेव भुवनत्रयत्रास-

---

**टिप्पनकम्—**अस्रं– रुधिरं नयनवारि च [ क्ष ]। स्नायुः– नशा [ ज्ञ ] ॥

**टिप्पनकम्—मुखप्रवृत्तसंततास्रस्रोतसा** एकत्र मुखे, अन्यत्र मुखात्, अस्रं– नेत्रवारि रुधिरं च। **निकामभीषणश्रवणेन** श्रवणौ– कर्णौ, श्रवणम्– आकर्णनम्, शेषाणि विशेषणानि द्वयोरपि समानार्थानि [ अ ]।

---

**अस्थिनूपुरैरपि** अस्थिमयपादालङ्करणविशेषैरपि, **सततसेवितचरणं** सततं–निरन्तरम्, सेवितौ–अलङ्कृतौ, चरणौ यस्य तादृशम् [ स ] । पुनः कीदृशं तम्? **ज्वलदुन्मयूखफणमणिभिः** ज्वलन्तः–स्फुरन्तः, उन्मयूखाः–उद्–उद्गच्छन्तः, मयूखाः–किरणा येषां तादृशाः, फणमणयः–फणागतमणयो येषां तादृशैः, अत एव **आत्तप्रदीपैरिव** आत्ताः–गृहीताः, प्रदीपा यैस्तादृशैरिवेत्युत्प्रेक्षा, **आभरणभुजगैरपि** अलङ्करणभूतसर्पैरपि, **अवगाह्यमानकज्जलकालकायप्रभान्धतमसम्** अवगाह्यमानं–प्रविश्योद्धिद्यमानम्, कज्जलकालस्य–'कज्जलवत्कृष्णवर्णस्य, कायस्य–शरीरस्य, प्रभारूपम्, अन्धतमसं–गाढान्धकारो यस्य तादृशम् [ ह ] । पुनः कीदृशं तम्? **सास्रेण** अस्रेण–रुधिरेण, अश्रुणा च, सहितेन, मांसेनापि, **खादनभीतेनेव** वैतालिककर्तृकभक्षणभयान्वितेनेवेत्युत्प्रेक्षा, **परित्यक्तसर्वावयवं** परित्यक्ताः–विमुक्ताः, सर्वेऽवयवाः–अङ्गानि यस्य तादृशम् [ क्ष ]। कीदृशं तम्? पुनः **अस्थिसारान्** अस्थिमात्रावशेषान्, **अतिविकृतरूपदर्शनभयात्** अतिविकृतस्य–परमविकरालभूतस्य, रूपस्य–स्वीयाकारस्य, दर्शनजन्यभयात्, **पलायितुकामानिव** पलायितुमिच्छूनिव, **स्नायुग्रन्थिगाढनद्धान्** स्नायुग्रन्थिभिः–नाडीग्रन्थिरूपरज्जुभिः, गाढं–सुदृढं यथा स्यात् तथा, नद्धान्–निगडितान्, **अवयवानपि, दधानं** धारयन्तम्। पुनः कीदृशं तम्? **आजानुलम्बमानशवशिरोमालम्** आजानु–जानुपर्यन्तम्, लम्बमाना–नमन्ती, शवशिरोमाला–मृतमस्तकमाला यस्य तादृशम्। एकं **वेतालं** दानवजातीयम्, **अद्राक्षीत्** दृष्टवान् [ ज्ञ ] ॥

**च** पुनः, **तं** वेतालम्, **क्रमानुसारिण्या** क्रमेण संचरन्त्या, **दृशा** दृष्ट्या, **आचरणयुगलात्** पादद्वयमारभ्य, **आमस्तकं** मस्तकपर्यन्तम्, **प्रत्यवयवं** सर्वावयवावच्छेदेन, **अवलोक्य** निरीक्ष्य, **किञ्चित्** ईषत्, **कृतस्मितः** कृत-मन्दहासः सन्, **नरपतिः** मेघवाहनो राजा, **उवाच** उक्तवान्। किमित्याह–**महात्मन्!** भगवन्!, **ते** तव, **अनेन हर्षाट्टहासेन** हर्षजनितमहाहासेन, **मे** मम, **अतिमहत्** अत्यधिकम्, **कुतूहलम्** औत्सुक्यम्, आश्चर्यमिति यावत्, **जनितम्** उत्पादितम्, कीदृशेन तेन? **प्रवृद्धेन** परमोत्कटेन, **सहसा** शीघ्रम्, **आकाशसन्निभप्रभाभारभरित-ककुभा** आकाशसन्निभायाः–विस्तारेण वर्णेन वा आकाशतुल्यायाः, प्रभायाः–कान्तेः, भारेण–पुञ्जेन, भरिताः–पूरिताः, ककुभः–दिशो येन तादृशेन, पुनः **स्फुटोत्फुल्लनयननासापुटेन** स्फुटं–स्पष्टं यथा स्यात् तथा, उत्फुल्ले–उन्मीलिते, नयने नासापुटौ च यस्मिंस्तादृशेन, पुनः **मुखप्रवृत्तसन्ततास्रस्रोतसा** मुखे, प्रवृत्तं–प्रादुर्भूतम्, सन्ततं–निरन्तरम्, अस्रस्रोतः–अश्रुप्रवाहो येन तादृशेन, पुनः **प्रकटितकरालदंष्ट्रामण्डलेन** प्रकटितं–व्यक्तम्, करालं–भीषणम्, दंष्ट्रामण्डलं–बृहद्दन्त-मण्डलं यस्मिंस्तादृशेन, पुनः **विदारितविकटसृक्कणा** विदारिते–विश्लेषिते, सृक्कणी–ओष्ठप्रान्तभागौ यस्मिंस्तादृशेन, पुनः **निकामभीषणश्रवणेन** निकामभीषणम्–अत्यन्तभीषणम्, श्रवणम्–आकर्णनं यस्य तादृशेन, पुनः **भुवनत्रयत्रास-कारिणा** भुवनत्रयभयङ्करेण, केनेव? **वपुषेव** स्वशरीरेणेव, अत्र पक्षे **मुखप्रवृत्तसन्ततास्रस्रोतसा** मुखात् प्रवृत्तं सततम् अस्रस्रोतः–रुधिरप्रवाहो यत्र तादृशेन, **निकामभीषणश्रवणेन** निकामं भीषणौ श्रवणौ–कर्णौ यत्र तादृशेन, इति

कारिणा हर्षाट्टहासेन जनितमतिमहत् कुतूहलं मे, कथय किमेतदसमञ्जसं हस्यते [अ], स जगाद—'राजन्! न किञ्चिदन्यत्, त्वदीयमेव चेष्टितम्, त्वया हि फलमभिलष्य किञ्चिदियमस्मत्स्वामिनी श्रीरनुदिवसमासेवितुमुपक्रान्ता, सेवकाश्च फलप्राप्तिकामाः प्रथममुपचारेण गृहीतवाक्यं परिग्रहलोकमावर्जयन्ति, ततस्तेन कृतपक्षपरिग्रहेण ग्राहितसम्बन्धाः प्रभूणामसक्तमात्मभक्तिमुपदर्शयन्ति, एष तावज्जगति दृश्यते व्यवहारः, त्वया तु विपरीतः प्रस्तुतोऽयं सेवाविधिः [आ], तथाहि—स्नपनवस्त्रमाल्यानुलेपनालङ्कारादिभिः सततमेनां देवतामुपचरसि, यस्तु प्रणयपात्रमस्याः सर्वदा सविधवर्ती कार्यकर्ता जनोऽयं सर्वपरिजनप्राग्रहरस्तमाहारदानमात्रयाऽपि नामन्त्रयसे, मित्रीकृते हि मयि साधकानामभीष्टसिद्धिः; किमियमैश्वर्यमदनिश्चेतना वितन्यमानमतिमहान्तमपि त्वया पूजोपचारं पश्यति? दृष्ट्वा च किं प्रकृतिचञ्चला चेतस्यवधारयति? कृतावधारणाऽपि किमेकान्ततो वीरपुरुषसाहसाक्षिप्तहृदया पक्षपातं गृह्णाति? गृहीतपक्षपाताऽपि किमवज्ञया विपक्षीकृतेन मया कृतप्रतिबन्धा बध्नाति वरप्रदानाय बुद्धिम्? तदलमबुद्धिपूर्वकेण बुधजनहासकारिणा निरवधिक्लेशैकफलेन फल्गुनानेन सेवाप्रकारेण; यदि स्फुटमेव फलमुत्कृष्टमीप्ससि, लिप्ससे वा विघ्नविरहितं जपध्यानादिकर्म, कामयसे वा

---

**टिप्पनकम्**—**प्राग्रहरः** प्रधानः [ आ ] ।

---

व्याख्येयम्, शेषाणि विशेषणानि द्वयोरपि समानि **किं** किमर्थम्, **एतत्** एवम्, **असमञ्जसं** विचित्रम्, हस्यते, इति **कथय** ब्रूहि [ अ ] । **स** वेतालः, **जगाद** उक्तवान्, राजन्!, **किञ्चित्** किमपि, अन्यत्, न, हासकारणमिति शेषः, किन्तु **त्वदीयमेव** तावकीनमेव, **चेष्टितं** चेष्टा, हि यतः, त्वया, **किञ्चित्** किमपि, फलम्, **अभिलष्य** उद्दिश्य, **अस्मत्स्वामिनी** अस्माकमधिपतिरूपदेवी, इयं **श्रीः** लक्ष्मीः, **अनुदिवसं** प्रतिदिनम्, **आसेवितुम्** आराधयितुम्, **उपक्रान्ता** आरब्धा । **फलप्राप्तिकामाः** फलाभिलाषिणः, **सेवकाः** आराधकाः, **प्रथमं** पूर्वम्, **उपचारेण** विनयेन, **गृहीतवाक्यम्** आदृतवचनम्, **परिग्रहलोकं** पार्श्ववर्तिजनम्; **आवर्जयन्ति** अनुकूलयन्ति, **ततः** तदनन्तरम्, **कृतपक्षपरिग्रहेण** कृतपक्षपातेन, **तेन** परिग्रहलोकेन, **ग्राहितसम्बन्धाः** कारितसम्बन्धाः, सेवका इति शेषः, **प्रभूणां** सेव्यानाम्, **असक्तम्** फलासङ्गरहितं यथा स्यात् तथा, **आत्मभक्तिं** स्वभक्तिम्, **उपदर्शयन्ति** प्रकटयन्ति, **तावदि**ति वाक्यालङ्कारे, **एष** ईदृश एव, जगति, **व्यवहारः** साङ्गस्यैवाधिष्ठातृदेवस्याराधनाचारः, दृश्यते, त्वया तु **विपरीतः** अङ्गं वर्जयित्वा अङ्गिन एवेत्यर्थः, **सेवाविधिः** आराधनाक्रमः, **प्रस्तुतः** प्रारब्धः [ आ ] । तदेव वैपरीत्यमभिव्यनक्ति—**तथाही**ति । **एनां** लक्ष्मीदेवताम्, **स्नपनवस्त्रमाल्यानुलेपनालङ्कारादिभिः** स्नपनेन—अभिषेकेण, वस्त्रेण, माल्येन, अनुलेपनेन—चन्दनद्रवलेपनेन, अलङ्कारादिभिश्च, **उपचरसि** आराधयसि, परन्तु यस्तु, **अस्याः** लक्ष्मीदेव्याः, **प्रणयपात्रं** स्नेहास्पदम्, सर्वदा, **सविधवर्ती**, पार्श्ववर्ती, कार्यकर्ता, **सर्वपरिजनप्राग्रहरः** सर्वेषु—समस्तेषु, परिजनेषु—परिवारेषु, **प्राग्रहरः** मुख्यः, **अयं** प्रत्यक्षवक्ता, जनः, तम्, **आहारदानमात्रयाऽपि** केवलाहारदानलेशेनापि, न, **आमन्त्रयसे** सत्करोषि । **हि** यतः, **मयि** वेताले, **मित्रीकृते** बलिवितरणादिना मित्रत्वमापादिते सति, **साधकानाम्** आराधकानाम्, **अभीष्टसिद्धिः** अभिलषितफलप्राप्तिः, स्यादिति शेषः । **ऐश्वर्यमदनिश्चेतना** ऐश्वर्याभिमानविमूढा, **इयं** लक्ष्मीदेवी, त्वया, **वितन्यमानं** विस्तार्यमाणम्, **अतिमहान्तमपि** अत्यन्तप्रचुरमपि, **पूजोपचारं** पूजोपकरणम्, **किं पश्यति**? नेत्यर्थः । **दृष्ट्वा च** दृष्टिगोचरीकृत्यापि, **प्रकृतिचञ्चला** स्वभावतश्चपला, लक्ष्मीदेवीति शेषः, **चेतसा** मनसा, **किम् अवधारयति**? गणयति?, नेत्यर्थः । **कृतावधारणाऽपि** कृततद्गणनाऽपि, **वीरपुरुषसाहसाक्षिप्तहृदया** वीरपुरुषाणां—शूरजनानाम्, साहसेन—शौर्येण, आक्षिप्तं—प्रभावितम् आकृष्टं हृदयं यस्यास्तादृशी, **एकान्ततः** अवश्यम्, **पक्षपातं** साधकपक्षावलम्बनम्, **किं गृह्णाति**? करोति?, नेत्यर्थः । **गृहीतपक्षपाताऽपि** कृतपक्षग्रहणाऽपि सा देवी, **अवज्ञया** त्वत्कृतानादरेण, **विपक्षीकृतेन** शत्रुत्वमापादितेन, मया **कृतप्रतिबन्धा** कृतः, प्रतिबन्धः—वरप्रदानावरोधो यस्यास्तादृशी सती, **वरप्रदानाय** इष्टार्थवितरणाय, **बुद्धिम्** अध्यवसायम्, किं **बध्नाति**? करोति?, नेत्यर्थः । **तत्** तस्माद्धेतोः, **अबुद्धिपूर्वकेण** अविवेकपूर्वकेण, **बुध-**

मनःप्रसादयितुमचिरेण देव्याः, तदस्मदुपचारपूर्वमद्यप्रभृति सर्वमुपकल्पय क्रियाकल्पम्, अन्यथा वृथा क्लेशो भविष्यति तवैष सेवावेशः' [ इ ] । इति वादिनस्तस्य वचनमनुवर्तमानो मेदिनीपतिर्विहस्य किञ्चित्सोपहासमवदत्—'सर्वमुपपन्नमभिहितम्, उपदिष्टमक्लिष्टया युक्त्या, प्रबोधिता वयम्, यथा निदर्शितः सूक्ष्मदर्शिना तथैवैष सेवामार्गः, परिग्रहजने संनिधौ सति कोऽधिकारः प्रभूणामग्रपूजायाम्? महती मूढता। गाढमविवेकविलसितम्, अप्रतिविधेया वैधेयतेयम्, यदस्माभिः सर्वसेव्यगुणसंपदुपेतं भवन्तमपहाय प्रमादादिदोषोपहतचित्तवृत्तिभिरियमग्रत एव देवता सेवितुमुपक्रान्ताः, कृतश्च पूजाविधेरकरणेन कियानप्यबहुमानः [ ई ] । अथवा जन्मनः प्रभृत्यकृतपरसेवानामत्र लवमात्रोऽपि नास्माकं दोषः, तवैव प्रमत्तताऽसौ, यज्जानतापि नीतिमार्गमादित एव नोपदिष्टोऽस्मभ्यमेष क्रमः, किमिदानीं कुर्मः, प्रस्तुतमिदं कर्म, कृतश्च

---

**टिप्पनकम्**—वैधेयता मूर्खता [ ई ] । कल्पः अनुष्ठानम् [ उ ] ।

---

**अनहासकारिणा** विद्वज्जनकर्तृकोपहासप्रयोजकेन, **निरवधिक्लेशैकफलेन** निरवधिः–अवधिरहितः, क्लेश एव—आराधनापेक्षितकष्टमेव, एकं फलं यस्य तादृशेन, **फल्गुना** असारभूतेन, तुच्छेनेति यावत्, अनेन, **सेवाप्रकारेण** आराधनक्रमेण, **अलं** किमपि न प्रयोजनम् । यदि, **स्फुटमेव** स्पष्टमेव, निःसंकोचमेवेत्यर्थः, **उत्कृष्टम्** उत्तमम्, फलम्, **ईप्ससि** प्राप्तुमिच्छसि; **वा** अथवा, **विघ्नविरहितजपध्यानादिकर्म** निर्विघ्नजपादिक्रियाम्; **लिप्ससे** लब्धुं–सम्पादयितुमित्यर्थः, इच्छसि; **वा** अथवा, **देव्याः** लक्ष्म्याः, **अचिरेण** अविलम्बेन, मनः, **प्रसादयितुं** वरप्रदानोन्मुखीकर्तुम्, **कामयसे** वाञ्छसि; **तत्** तर्हि, **अद्यप्रभृति** अद्यारभ्य, **अस्मदुपचारपूर्वकम्** आस्माकीनपूजनपूर्वकम्, सर्वं **क्रियाकलापम्** आराधनक्रमम्, **उपकल्पय** प्रकल्पय, **अन्यथा** इत्थमकरणे, तव एष **सेवाऽऽवेशः** आराधकत्वाभिमानः, **वृथा** व्यर्थ एव, **क्लेशः** क्लेशमात्रफलकः, भविष्यति [ इ ] । **इति** अनया रीत्या, **वादिनः** प्रतिपादयितुः, **तस्य** वेतालस्य, **वचनं** वाक्यम्, **अनुवर्तमानः** अनुसरन्, **मेदिनीपतिः** मेघवाहननृपतिः, **विहस्य** हासं कृत्वा, **किञ्चित्** ईषत्, **सोपहासम्** उपहासपूर्वकम्, **अवदत्** उक्तवान् । सर्वम्, **उपपन्नम्** युक्तिपूर्णम्, **अभिहितम्** उक्तम्, त्वयेति शेषः । **अक्लिष्टया** सरलया, **युक्त्या** उपपत्त्या, **हितं** हितकरं कर्म, **उपदिष्टं** कर्तव्यत्वेनावेदितम्, वयं **प्रबोधिताः** अनवधाननिद्रामुन्मोच्य जागारिताः, सावधानीकृता इत्यर्थः, **सूक्ष्मदर्शिना** तत्त्वदर्शिना, त्वयेति शेषः, **यथा** यादृशः, **निदर्शितः** बोधितः, **तथैव** तादृश एव, एष **सेवामार्गः** आराधनप्रकारः । **परिग्रहजने** अनुचरलोके, **सन्निधौ** निकटस्थिते सति, **प्रभूणां** मुख्यदेवानाम्, **अग्रपूजायां** प्रथमपूजायाम्, कः अधिकारः ? कोऽपि नेत्यर्थः । **महती** अत्यन्ता, **मूढता** मूर्खता, ममेति शेषः, **गाढम्** अत्यन्तम्, **अविवेकविलसितम्** अविचारविलासः, इयम्, **वैधेयता** जडता, अविवेकितेत्यर्थः, **अप्रतिविधेया** अप्रतिकार्या । **यत्** यस्माद्धेतोः, **सर्वसेव्यगुणसम्पदुपेतं** सर्वेषाम्, सेव्यगुणानाम्–उपास्योचितगुणानाम्, सम्पदा–आधिक्येन, उपेतं–युक्तम्, **भवन्तं** त्वाम्, **अपहाय** वर्जयित्वा, **प्रमादादिदोषोपहतचित्तवृत्तिभिः** प्रमादादिदोषैः–अनवधानादिदोषैः, उपहताः–दूषिताः, चित्तवृत्तयो मनोवृत्तयो येषां तादृशैः, अस्माभिः, **अग्रत एव** प्रथममेव, त्वत्सेवनात् पूर्वमेवेति यावत्, **इयं** लक्ष्मीः, **देवता** देवी, **सेवितुम्** उपासितुम्, **उपक्रान्ता** प्रारब्धा । **च** पुनः, **पूजाविधेः** आराधनप्रकारस्य, **अकरणेन** अननुष्ठानेन, **कियानपि** कतिपयोऽपि, **अबहुमानः** अपमानः, कृतः, तवेति शेषः [ ई ] । अथवा **जन्मनः प्रभृति** जन्मारभ्य, **अकृतपरसेवानाम्** अननुष्ठितान्यदीयाराधनानाम्, अस्माकम्, **लवमात्रोऽपि** लेशमात्रोऽपि, न, **दोषः** अपराधः, अस्तीति शेषः, **तवैव** प्रत्युत त्वदीयैव, **असौ** अनुपदोक्ता, **प्रमत्तता** अनवधानता, **यत्** यस्मात् कारणात्, **नीतिमार्गं** नीतिरीतिम्, **जानताऽपि** अवगच्छताऽपि, त्वयेति शेषः, अस्मभ्यम्, **आदित एव** पूर्वत एव, एष **क्रमः** आराधनाप्रकारः, **न उपदिष्टः** न आवेदितः । **इदानीम्** आराधनारम्भोत्तरकालेऽस्मिन्, **किं कुर्मः** प्रतिकुर्मः, न किमपीत्यर्थः, **इदम्** आराधनात्मकम्, **कर्म** अनुष्ठानम्, **प्रस्तुतम्** आरब्धम्, **मनसि**

निश्चलो मनसि संकल्पः, यावन्नैष परिसमाप्तः कल्पस्तावदल्पाप्यनुवृत्तिरुपचारो वा न कस्यचिद्दैवतस्य विवक्षितफलापेक्षया कर्तव्योऽस्माभिः । अवधार्य चेदं धीमता न कार्यः प्रस्तुतेऽस्मिन्नस्मत्कर्मणि कार्यसिद्धिविषयो विचारः, नापि कतिचिद्दिनानि प्रार्थनीयः पूजोपचारः, यदि चाभ्यवहारेण प्रयोजनं पूज्यस्य ततः सज्जा वयं तदुपपादनाय, गृह्यतामयमुपयुज्यतां च विविक्तमस्यैव देवतागृहस्य स्पृहणीयतममाश्रित्य कोणमेकमखिलोऽप्येष देव्या विशेषपूजार्थमाहृतोऽद्य हृद्यानेकफलमूलोपदंशो दृष्टमात्रः क्षुदुपबृंहणो मोदकादिः प्रभूतभक्ष्यबलिः' [ उ ] । इत्युक्तवति भूपे भूयोऽप्यसौ सहासमवदत्—'नरेन्द्र! न वयं पक्षिणः, न पशवः, न मनुष्याः, कथं फलानि मूलान्यन्नं चाहरामः? क्षपाचराः खलु वयम्, व्याघ्राणामिवास्माकमात्मभुजविक्रमोपक्रीतमामिषमाहारः, तस्य चिन्तय प्राप्त्युपायम्, किमनेन कर्णोद्वेगजनकेन द्विजस्येव मदिरास्वादसौन्दर्यकथनेन भक्ष्येतरवस्तुतत्त्वप्रकाशनेन । यदि वान्येऽपि बहवः क्षुद्रसाधकाः संप्रति खलीकर्तुमुद्यताः स्वामिनीम्, तदीयदेहावयवेष्वेव सिद्धा तत्प्राप्तिः, आस्स्व तावन्निराकुलः, केवलं याचे किञ्चन त्वाम्,

---

टिप्पनकम्—क्षत्रियनरेन्द्रः- एकत्र मन्त्रवादी अन्यत्र राजा [ ऊ ] ।

---

हृदि, एष **निश्चलः** सुदृढः, **संकल्पः** प्रतिज्ञा, कृतः, कीदृगित्याह—**यावत् यावत्कालपर्यन्तम्** एष **कल्पः** अनुष्ठानक्रमः, **परिसमाप्तः** परिपूर्णः, न स्यात्, **तावत्** तावत्कालपर्यन्तम्, **कस्यचित्** कस्यापि, **दैवतस्य** अन्यदेवस्य, **अल्पापि** ईषदपि, **अनुवृत्तिः** अनुगमनम्, **उपचारः** आराधना वा, **विवक्षितफलापेक्षया** अभिलषितफलानुरोधेन, **अस्माभिः**, न, **कर्तव्यः** कर्तुमुचितः । **इदं** पूर्वोक्ततत्त्वम्, **अवधार्य** निश्चित्य, **प्रस्तुते** प्रारब्धे, अस्मिन्, **अस्मत्कर्मणि** अस्माकमनुष्ठाने, **कार्यसिद्धिविषयः** फलप्राप्तिविषयः, **विचारः** वितर्कः, **धीमता** विदुषा, भवतेति शेषः, **न कार्यः** न कर्तुं योग्यः, **कतिचिद्दिनानि** कतिपयदिनानि यावत्, **पूजोपचारः** पूजनात्मकसेवाप्रकारः, **नापि** नैव, **प्रार्थनीयः** प्रार्थयितुमुचितः, यदि **पूज्यस्य** पूजार्हस्य भवतः, अभ्यवहारेण—भोजनेन प्रयोजनम्, **ततः** तर्हि, **तदुपपादनाय** तत्समर्पणाय, **वयं सज्जाः** सन्नद्धाः, उपस्थिता इत्यर्थः, **अयं** प्रभूतभक्ष्यबलिः, **गृह्यतां** स्वीक्रियताम्, **उपयुज्यतां च** पुनः सफलत्वमापाद्यताम्, उपभुज्यतामित्यर्थः, किं कृत्वा ? अस्यैव **देवतागृहस्य** देवमन्दिरस्य, **विविक्तं** पवित्रं निर्जनं वा, "विविक्तौ पूतं-विजनौ" इत्यमरः, **स्पृहणीयतमम्** अतिरमणीयम्, एकं **कोणं** पर्यन्तप्रदेशम्, **आश्रित्य** अधिष्ठाय । **अद्य** अस्मिन्नहनि, **देव्याः** लक्ष्म्याः, **विशेषपूजार्थं** सविधिपूजानिमित्तम्, आहृतः—उपस्थापितः, एषः, **अखिलोऽपि** समस्तोऽपि, **हृद्यानेकफलमूलोपदंशः** हृद्यानि—हृदयप्रियाणि, अनेकानि यानि फलमूलानि तद्रूपा उपदंशाः—उपदंशनीयवस्तूनि यस्मिंस्तादृशः, **दृष्टमात्रः** दर्शनगोचरीभूत एव, **क्षुदुपबृंहणः** क्षुधः—बुभुक्षायाः, उपबृंहणः—वर्धकः, **मोदकादिः** लड्डूकादिकः, **प्रभूतभक्ष्यबलिः** प्रभूतः—प्रचुरः, भक्ष्यः—भक्षणीयः, बलिः—नैवेद्यम्, वर्तत इति शेषः [ उ ] ।

**भूपे** मेघवाहननृपे, **इति** अनुपदोक्तम्, **उक्तवति** कथितवति सति, **असौ** वेतालः, **भूयोऽपि** पुनरपि, **सहासं** हासपूर्वकम्, **अवदत्** उक्तवान्, **नरेन्द्र !** नृपते !, वयं **पक्षिणः** पक्षिजातयः, न, स्म इति शेषः, **पशवः** पशुजातयः, न, **मनुष्याः** मनुष्यजातयः, न; अतः पक्षित्वाभावात् फलानि, पशुत्वाभावात् मूलानि, मनुष्यत्वाभावाच्च अन्नम्, **कथं** केन प्रकारेण, **आहरामः ?** खादामः ? । **खलु** निश्चयेन, वयं **क्षपाचराः** राक्षसाः, स्म इति शेषः, **आत्मभुजविक्रमोपक्रीतम्** आत्मभुजविक्रमेण—स्वबाहुबलेन, उपक्रीतम्—उपार्जितम्, **आमिषम्**—मांसमेव, **अस्माकं** राक्षसानाम्, **व्याघ्राणामिव**, **आहारः** भक्ष्यम्, **तस्य** मांसस्य, **प्राप्त्युपायं** लाभोपायम्, **चिन्तय** पर्यालोचय, **द्विजस्य** विप्रस्य, **मदिरास्वादसौन्दर्यकथनेनेव** मदिरास्वादस्य—मद्यरसास्वादस्य, यत् सौन्दर्यं—रुचिरत्वम्, तद्वर्णनेनेव, **कर्णोद्वेगजनकेन** कर्णक्लेशावहेन, अनेन, **भक्ष्येतरवस्तुतत्त्वप्रकाशनेन** भक्ष्येतरस्य—भक्षणायोग्यस्य, वस्तुतत्त्वस्य—वस्तुसारस्य, प्रकाशनेन—प्रतिपादनेन, **किम्** न किमपीत्यर्थः । **यदि वा** अथवा, **सम्प्रति** इदानीम्, **बहवः** अधिकाः, अन्येऽपि, **क्षुद्रसाधकाः** साधारणसिद्ध्यर्थिनः, **स्वामिनीं** देवीं लक्ष्मीमिति यावत्, **खलीकर्तुं** सिद्धेरवैधत्वेन फलानिष्पत्त्या खलत्वमापादयितुम्, उपालब्धुमिति यावत्, **उद्यताः** प्रवृत्ताः, सन्तीति शेषः, **तदीयदेहावयवेषु** तत्सम्बन्धिशरीरावयवेषु, **तत्प्राप्तिः** मांस-

त्वया हि बहवः कृताः संग्रामाः, हताश्च संख्यातीताः क्षत्रियक्षोणीपतयः, तत्र येन कदाचिदपि नानुभूतो भङ्गः संगरेषु, न दर्शितं वैमुख्यमर्थिजनप्रार्थनासु, न कृतः प्रणामः प्राणसंशयेऽपि शत्रोः, तस्य भुवनत्रयश्लाघनीयचरितस्य नरपतेः प्रकृत्यैव पावनमतिप्रशस्तललितललाटलेखाक्षरमरूक्षच्छविच्छत्रसदृशाकारमर्पय मे कपालकर्परं प्रत्यग्रमेकम्, यदपवर्जितैरसृग्भिः पुण्यासु कृष्णचतुर्दशीषु दुर्विनीतक्षत्रियनरेन्द्रनिहतस्य जनयितुर्जामदग्न्यमुनिरिव मुहुर्मुहुः करोमि तर्पणम्' [ ऊ ]। इति ब्रुवाणं च किञ्चिद् विहस्य पुनरुवाच नक्तञ्चरं नृपतिः—'प्रेतनाथ! नान्यथोदितं भवता, तथ्यमेवेदम्, कृताः शतकृत्वो मया संग्रामाः, हताश्च संख्यातीताः क्षत्रियक्षोणीपतयः, किं त्वनेकराजकार्यव्यापृततया कदाचिदकुर्वता दिव्यकार्यपर्यालोचनम्, अतीन्द्रियज्ञानविकलतया स्वयमनावेदितम्, अजानता परेषां हृदयगतमर्थम्, अशृण्वता च युष्मद्विधानामत्र विषये कुतश्चिदप्यर्थित्वमुद्यमं च धर्मक्रियाकल्पविषयम्, अल्पमपि न कृतस्तत्कपालानां संग्रहः, तद्यदि नातिमात्रमवसीदति पितृप्रयोजनम्, अनभ्यर्णवर्ती वा पूर्वसूचितः पुण्यदिवसः, तत् प्रतीक्षस्व कतिचिद्दिनानि, यावत् कचित् तदवाप्तिर्भवति। अथ न सह्यः कालातिपातः, तदिदमेव मे स्वीकुरु शिरः, केवलं त्रिलोकय,

---

लाभः, **सिद्धैव** सम्पन्नैव, **तावदिति** वाक्यालङ्कारे, **निराकुलः** अव्यग्रः सन्, **आस्स्व** उपविश, केवलं **किञ्चन** किञ्चित्, **याचे** त्वां प्रार्थये, **हि** यतः, **त्वया बहवः** बहुतराः, **संग्रामाः** युद्धानि, **कृताः** विहिताः, **च** पुनः, **संख्यातीताः** असंख्याः, **क्षत्रियक्षोणीपतयः** क्षत्रियपृथ्वीपतयः, **हताः** मारिताः, **तत्र** हतक्षत्रियनृपेषु मध्ये, **येन** नृपेण, **सङ्गरेषु** युद्धेषु, **भङ्गः** पराजयः, **कदाचिदपि** कस्मिंश्चिदपि काले, न **अनुभूतः** प्राप्तः, **अर्थिजनप्रार्थनासु** याचकजनयाच्ञासु, तद्याच्यमानवस्तुवितरणे, **वैमुख्यम्** औदासीन्यम्, न **दर्शितं** प्रकटितम्, अपि तु यथाकामं समर्पितमित्यर्थः, **प्राणसंशयेऽपि** प्राणापायसन्देहेऽपि, शत्रोः **प्रणामः** स्वरक्षार्थं प्रणिपातः, न **कृतः** विहितः, **तस्य** तादृशस्य, **भुवनत्रयश्लाघनीयचरितस्य** भुवनत्रये–लोकत्रये, श्लाघनीयं–प्रशंसनीयम्, चरितं यस्य तादृशस्य, **नरपतेः** राज्ञः, एकं **प्रत्यग्रम्** अभिनवम् उन्नतं वा, **कपालकर्परं** मूर्धन्यास्थिकटाहम्, **मे** मह्यम्, **अर्पय** देहि, कीदृशम्? **प्रकृत्यैव** स्वभावत एव, **पावनं** पवित्रम्, पुनः **अतिप्रशस्तललाटलेखाक्षरम्** अतिप्रशस्तानि–अत्यन्तप्रशस्तानि, ललितानि–सुन्दराणि च, ललाटलेखाक्षराणि–ललाटरेखारूपाणि अक्षराणि यस्मिंस्तादृशम्, पुनः **अरूक्षच्छवि** अरूक्षा–स्निग्धा, छविः–कान्तिर्यस्य तादृशम्, पुनः **छत्रसदृशाकारं** छत्रसदृशवर्तुलाकारम्। **यदपवर्जितैः** येन कपालकर्परेण, अपवर्जितैः–गृहीतैः, **असृग्भिः** शोणितैः, **पुण्यासु** पवित्रासु, कृष्णचतुर्दशीषु, **दुर्विनीतक्षत्रियनरेन्द्रनिहतस्य** दुर्विनीतेन–दुष्टविनीतेन, मायाविनेत्यर्थः, क्षत्रियेण–तज्जातिकेन, नरेन्द्रेण–नृपेण, पक्षे मनुष्यश्रेष्ठेन मन्त्रवादिनेत्यर्थः, निहतस्य–मारितस्य, **जनयितुः** पितुः, **जामदग्न्यमुनिरिव** जमदग्नेरपत्यं जामदग्न्यः परशुरामः, स चासौ मुनिरिव, **मुहुर्मुहुः** अनेकवारम्, **तर्पणं** तृप्तिजनकक्रियाम्, करोमि, [ ऊ ]। **इति** अनुपदोक्तम्, **ब्रुवाणं** कथयन्तम्, **नक्तञ्चरं** राक्षसम्, **नृपतिः** मेघवाहनः, **किञ्चित्** ईषत्, **विहस्य** हासं विधाय, **पुनः** पुनरपि, **उवाच** उक्तवान्। किमित्याह–**प्रेतनाथ!** वेतालाधिपते!, **भवता** त्वया, **अन्यथा** मिथ्या, न **उदितम्** उक्तम्, अपि तु **इदं** त्वदुक्तम्, **तथ्यमेव** सत्यमेव, मया **शतकृत्वः** शतं वारान्, **संग्रामाः** युद्धानि, कृताः, **च** पुनः, **संख्यातीताः** असंख्येयाः, **क्षत्रियक्षोणीपतयः** क्षत्रियभूमिपतयः **हताः** व्यापादिताः, किन्तु **अल्पमपि** ईषदपि, **तत्कपालानां** क्षत्रियनृपकपालानाम्, **संग्रहः** सञ्चयः, न कृतः, कीदृशेन मया? **अनेकराजकार्यव्यापृततया** अनेकानि–बहूनि, यानि राजकार्याणि तत्र व्यापृततया–व्यासक्ततया, **कदाचित्** कस्मिंश्चित् काले, **दिव्यकार्यपर्यालोचनं** दिव्यकार्यस्य–देवसम्बन्धिनस्तदुपयोगस्य, पर्यालोचनं–विचारम्, अकुर्वता; पुनः **अतीन्द्रियज्ञानविकलतया** अतीन्द्रियवस्तुविषयकज्ञानशून्यतया, **स्वयं** स्वेनैव, **अनावेदितम्** अनवगतम्, **परेषां** भवादृशामन्येषाम्, **हृदयगतम्** आन्तरिकम्, **अर्थं** प्रयोजनम्, **अजानता** अन्यद्वाराऽपि अनवगच्छता; **च** पुनः, **अत्र** अस्मिन्, पूर्वोक्तप्रकारके इति यावत्, **विषये** आराधनकार्ये, **युष्मद्विधानां** भवादृशानाम्, **अर्थित्वं** याचकत्वम्, **च** पुनः, **धर्मक्रियाकल्पविषयं** धार्मिककार्मकस-

चिरं विचारय च चेतसा, यदि संभवन्ति कतिचिदिह पूर्वसूचिता गुणाः, प्रीयते वा चक्षुरुत्तमाङ्गलक्षणविधिविचक्षणस्य, तन्न किञ्चिदन्यान्वेषणेन' [ऋ]। स पुनरब्रवीत्—'नृपवरिष्ठ! सुष्ठु शुभलक्षणम्, सुष्ठु चक्षुष्यम्, किं विलोक्यते। किं वा विचार्यतेऽस्य जात्यस्येव जातरूपस्य रूपशोभासौभाग्यम्, भाग्यवानहं यस्य प्रार्थनामन्तरेण समुपस्थितमिदम्' इति व्याहृत्य वामकरतलवर्तिनः कपालस्य कर्णवर्तौ निर्दयावृत्तिकषणप्रकीर्णवह्निस्फारविस्फुरत्स्फुलिङ्गव्रातामुत्पातमेघलेखामिव विमुक्तघनरुधिरबिन्दुवर्षाममर्षवक्रीकृतकृतान्तभ्रुकुटिविकरालां कालायसकर्तिकां निजघर्ष, हर्षोत्तालकृततुमुलकिलिकिलारवश्च साटोपमेत्य विकटपातिभिः पदैरनतिनिकटमवनमितपूर्वकायः

---

विषयकम्, **उद्यमं** प्रयत्नम्, **कुतश्चित्** कस्मादपि, जनात्, **अशृण्वता** श्रुतिगोचरतामनापादयता। **तत्** तस्माद्धेतोः, यदि **पितृप्रयोजनं** पितृतर्पणरूपं प्रयोजनम्, **अतिमात्रम्** अतिशयेन, न **अवसीदति** भ्रंशते, **वा** अथवा, **पूर्वसूचितः** अनुपदमावेदितः, **पुण्यदिवसः** कृष्णचतुर्दशीरूपः पितृतर्पणप्रयुक्तपुण्यकालः, **अनभ्यर्णवर्ती** अनिकटवर्ती, यदीति शेषः, **तत्** तर्हि, **कतिचिद् दिनानि** कतिपयदिनानि, **प्रतीक्षस्व** तदर्थं यापय, **यावत्** यावद्दिनपर्यन्तम्, **क्वचित्** क्वचित् स्थाने, **तदवाप्तिः** तदुपलब्धिर्भवति। अथ यदि **कालातिपातः** समयातिक्रमः, **न सह्यः** सोढुमशक्यः, **तत्** तर्हि, **इदमेव** प्रत्यक्षभूतमेव, **मे** मम, शिरः—कपालं **स्वीकुरु,** गृहाणेत्यर्थः, **केवलं** किन्तु, **विलोकय** पश्य, मत्कपालमित्यर्थः, **च** पुनः, चेतसा **विचारय** पर्यालोचय, एतद्गुणानित्यर्थः, यदि **इह** मदीयकपाले, **पूर्वसूचिताः** पूर्वमावेदिताः, **कतिचित्** कतिपये, गुणाः **सम्भवन्ति** उपलभ्यन्ते, **वा** अथवा, **उत्तमाङ्गलक्षणविधिविचक्षणस्य** उत्तमाङ्गस्य—शिरसः, यानि लक्षणानि—चिह्नानि, तद्विधौ—तन्निरूपणे, विचक्षणस्य—निपुणस्य, भवत इति शेषः, चक्षुः **प्रीयते** तदवलोकनेन सन्तुष्यति, **तत्** तर्हि, **अन्यान्वेषणेन** अन्यस्य कपालस्य गवेषणेन, न **किञ्चित्** किमपि, प्रयोजनमिति शेषः [ **ऋ** ]। **सः** वेतालः, पुनः, **अब्रवीत्** उक्तवान्, किमित्याह—**नृपवरिष्ठ!** नृपश्रेष्ठ!, **सुष्ठु** सम्यक्, विस्पष्टमिति यावत्, **शुभलक्षणं** शुभानि—राजोचितानि, लक्षणानि यस्मिंस्तादृशम्, तावकीनं शिर इति यावत्, **सुष्ठु** सम्यक्, **चक्षुष्यं** चक्षुःप्रियम्, तदिति शेषः, **जातरूपस्येव** सुवर्णस्येव, **जात्यस्य** सुन्दरस्य, **अस्य** शिरसः, **रूपशोभासौभाग्यं** रूपसौन्दर्यसौष्ठवम्, तत्सौन्दर्यातिशय इति यावत्, **किं** किमर्थं **विलोक्यते** दृश्यते, **किं वा** किमर्थं वा **विचार्यते** निरूप्यते, तत् सर्वं वृथेति भावः, **अहं भाग्यवान्** भाग्यशाली, अस्मीति शेषः, **यस्य** मम, **प्रार्थनाम्** अन्यस्य याच्ञाम्, प्रयासमिति यावत्, **अन्तरेण** विनैव, **इदं** शिरः, **समुपस्थितं** समुपनतम्। **इति** इत्थम्, **व्याहृत्य** उक्त्वा, **वामकरतलवर्तिनः** वामहस्तस्थितस्य, **कपालस्य** शीर्षोपरितनास्थिरूपकर्परस्य, **कर्णवर्तौ** कर्णलेखायाम्, **कालायसकर्त्तिकां** कालायसं—लोहविशेषः, तन्मयीं कर्त्तिकां—तत्संज्ञकमस्त्रविशेषम्, **निजघर्ष** निघृष्टवान्, छेदनार्थं तत्र संघृष्टवान् इति यावत्, कीदृशीम्? **निर्दयाऽऽवृत्तिकषणप्रकीर्णवह्निस्फारविस्फुरत्स्फुलिङ्गव्रातां** निर्दयं—दयारहितं यथा स्यात् तथा, आवृत्त्या पौनःपुन्येन, यत् कषणं—घर्षणम्, तेन प्रकीर्णाः—परितो विक्षिप्ताः, ये स्फाराः—प्रचुराः, विस्फुरन्तः—प्रज्वलन्तः, स्फुलिङ्गाः—अग्निकणाः, तेषां व्रातः—समूहो यस्यां तादृशीम्; पुनः **विमुक्तरुधिरबिन्दुवर्षां** विमुक्तं—निस्यन्दितम्, घनं—सान्द्रम्, रुधिरबिन्दुवर्षं—शोणितबिन्दुवृष्टिर्यया तादृशीम्; कामिव? **उत्पातमेघलेखामिव** प्रलयकालिकमेघरेखामिव, तत्कालिकमेघरेखयाऽपि विस्फुलिङ्गानां रुधिरबिन्दूनां च वर्षणादिति भावः, पुनः **अमर्षवक्रीकृतकृतान्तभ्रुकुटिविकरालाम्** अमर्षेण—रोषेण, वक्रीकृता—कुटिलीकृता, या कृतान्तस्य यमराजस्य, भ्रुकुटिः—नयनोपरि रोमराजिः, तामिव विकरालां—भीषणाम्, **भ्रूकोटिविकरालमिति** पाठे भ्रुवो या कोटिः—कोणः, तद्वद्विकरालामिति व्याख्येयम्, "कृतान्तो यमुनाभ्राता शमनो यमराड् यमः" इति, "कोणः पाल्यश्रिकोटयः" इति चामरः। **च** पुनः, **हर्षोत्तालकृततुमुलकिलकिलारवः** हर्षोत्तालेन—हर्षोत्कर्षेण, कृतः, तुमुलः—सान्द्रः, किलकिलारवः—किलकिलात्मकशब्दो येन तादृशः सन्; **विकटपातिभिः** विकटं—भयानकं यथा स्यात् तथा, पतन्ति—अधोनिविशन्ते यानि तानि विकटपातीनि, तादृशैः, **पदैः** पादैः, **अनतिनिकटं** किञ्चिन्निकटम्, **साटोपम्** आटोपेन—आडम्बरेण, सहितं यथा स्यात् तथा, **एत्य** आगत्य, **अवनमितपूर्वकायः** अवनमितः—नम्रीकृतः पूर्वकायः—कायस्य स्वशरीरस्य,

प्रकोष्ठचलितपन्नगप्रतिसरेण समुपनिन्ये सव्येतरकरेण [ऋ] । क्षोणीपतिरप्यजातसंक्षोभः स्तिमितबद्धलक्ष्येण चक्षुषा चिरमवेक्ष्य तां सधीरमुवाच—'क्षपाचरेन्द्र! दिव्यमायुधमिदं नार्हति करस्पर्शमस्मद्विधानाम्, विधानेन महता धार्यमेतन्न यथाकथञ्चित्, अतस्तिष्ठतु तवैव हस्ते, त्वत्प्रयोजनमसावेव मे सर्वदा सविधवर्ती निर्वर्तयिष्यति निसर्गनिष्कृपः कृपाणः' इति वदन्नेव सविधवर्तिनः कुशस्रस्तरस्य शिरसि तत्क्षणमेव निक्षिप्तमाक्षेपदूरविक्षिप्ताक्षवलयेन दक्षिणपाणिना जग्राह कृपाणम् । आमेचकांशुमिषविमुक्तपटुविषच्छटाभीणं च विचकर्ष संकर्षणानुज इव कलिन्दतनयातरङ्गात् कालियमिन्द्रनीलखण्डखचिताच्चर्मकोशात् । निष्ठुरकराङ्गुष्ठतर्जनीकोटिमार्जितातितीक्ष्णश्लक्ष्णधारे च तत्र प्रसन्नधवलायतामायुधार्चिर्विषये च विकचविचकिलस्रग्बन्धुरां बबन्ध दृष्टिम् । आबद्धपरिकरश्च कृत्वा देवतायाः प्रणाममूर्ध्वधृतनिष्कम्पजङ्घेन वामाङ्घ्रिणा तिर्यगावर्जितेन च

---

**टिप्पनकम्**—प्रतिसरः- कङ्कणम् [ ऋ ] ।

---

पूर्वभागो येन तादृशः सन्; **प्रकोष्ठचलितपन्नगप्रतिसरेण** प्रकोष्ठे-कूर्पराधःप्रदेशे, चलिताः—पन्नगप्रतिसराः—सर्परूपहस्तकङ्कणानि यस्मिंस्तादृशेन, **सव्येतरकरेण** दक्षिणहस्तेन, **समुपनिन्ये** समीपं प्रापितवान्, उपहारीकृतवानित्यर्थः [ ऋ ] । **क्षोणीपतिरपि** मेघवाहननामा पृथ्वीपतिरपि, **अजातसंक्षोभः** अनुत्पन्नभयसम्भ्रमः, **स्तिमितबद्धलक्ष्येण** स्तिमितेन—स्थैर्येण, बद्धं—सम्बद्धम्, लक्ष्यं—दृश्यं येन तादृशेन, **चक्षुषा** नेत्रेण, **तां** कर्त्तिकाम्, **चिरं** दीर्घकालम्, **अवेक्ष्य** दृष्ट्वा, **सधीरं** धीरेण—गम्भीरेण स्वरेण, सहितं यथा स्यात् तथा, **उवाच** उक्तवान्, किमित्याह-**क्षपाचरेन्द्र!** दानवेन्द्र!, **दिव्यं** दिवि—स्वर्गे, भवम्, देवसम्बन्धीत्यर्थः, **इदं** पुरोवर्ति, दीयमानमिति यावत्, **आयुधम्** अस्त्रम्, **अस्मद्विधानाम्** अस्मत्सदृशानां सामान्यजनानाम्, **करस्पर्शं** हस्तसंयोगम्, **न अर्हति** तदयोग्यमित्यर्थः, महता **विधानेन** विधिना नियमेन, **एतत्** आयुधम्, **धार्यं** धारयितुं योग्यम्, **यथाकथञ्चिद्** येन केनापि प्रकारेण, न, धार्यमिति शेषः । **अतः** अस्माद्धेतोः, **तवैव** त्वदीय एव हस्ते न त्वन्यदीय इत्यर्थः, **तिष्ठतु** अस्तु । **सर्वदा** सदैव, **मे** मम, **सविधवर्ती** निकटवर्ती सन्, **निसर्गनिष्कृपः** स्वभावतः क्रूरः, असौ **कृपाणः** खड्गः, **त्वत्प्रयोजनं** कपालार्पणरूपं प्रयोजनम्—इष्टम्, **निर्वर्तयिष्यति** सम्पादयिष्यति । **इति** इत्थम्, वदन्नेव, स राजेति शेषः, **कुशप्रस्तरस्य** दर्भमयकटस्य, **शिरसि** अग्रभागे, **निक्षिप्तं** स्थापितम्, **कृपाणं** कोशोपहितखड्गम्, **आक्षेपदूरविक्षिप्ताक्षवलयेन** आक्षेपेण—तिरस्कारेण, अवक्षिप्तं—दूरे विक्षिप्तम्, अक्षवलयं—जपमाला येन तादृशेन, **दक्षिणपाणिना** दक्षिणहस्तेन, **जग्राह** गृहीतवान्; **च** पुनः, **आमेचकांशुमिषविमुक्तपटुविषच्छटाभीषणम्** आ—समन्तात्, मेचकांशूनां—श्यामकिरणानाम्, मिषेण—व्याजेन, विमुक्ता—विकीर्णा, या पटुः—तीव्रा, विषच्छटा—विषच्छविः, तया भीषणं—भयङ्करं यथा स्यात् तथा, **इन्द्रनीलखण्डखचितात्** इन्द्रनीलसंज्ञकश्याममणिखण्डैः, खचितात्—व्याप्तात्, **चर्मकोशात्** चर्ममयकोशात्, **विचकर्ष** आकृष्य उद्धृतवान्, कं कस्मात् क इव? **कालियं** तन्नामकं सर्पम्, **कलिन्दतनयातरङ्गात्** कलिन्दस्य—पर्वतविशेषस्य, तनया—पुत्री यमुना, तस्यास्ततो निर्गमेन तत्पुत्रीत्वव्यपदेशात्, तस्याः, तरङ्गात्—तरङ्गसकाशात्, **सङ्कर्षणानुज इव** सङ्कर्षणस्य—बलरामस्य, अनुजः—श्रीकृष्णचन्द्र इव । **च** पुनः, **दृष्टिं** नेत्रम्, **बबन्ध** बद्धवान्, स्थिरीचकारेत्यर्थः, क कीदृशीं दृष्टिम्? **निष्ठुरकराङ्गुष्ठतर्जनीकोटिमार्जितातितीक्ष्णश्लक्ष्णधारे** निष्ठुरस्य—कठोरस्य, करस्य—तदीयहस्तस्य, अङ्गुष्ठतर्जन्योः कोटिभ्याम्—अग्रभागाभ्याम्, मार्जिता—विशोधिता, अतितीक्ष्णा, श्लक्ष्णा—स्निग्धा च, धारा यस्य तादृशे, **तत्र** तस्मिन् कृपाणे, **प्रसन्नधवलायतां** कृपाणानुगुण्येन प्रसन्नां—स्वच्छाम्, धवलां—शुभ्राम्, आयतां—दीर्घां च, कृपाणाकारेण परिणतामिति यावत्, **च** पुनः **आयुधार्चिर्विषये** आयुधस्य—प्रकृतस्य कृपाणस्य, यानि अर्चींषि—किरणाः, तद्विषये—तत्सम्बन्धविचारणा याम्, **विकचविचकिलस्रग्बन्धुरां** तत्किरणकलापानुगुण्येन विकचा—विकस्वरा, विचकिलस्रक्—मल्लिकाकुसुममाला, तद्वद् बन्धुराम्—उन्नतानताम्, तत्तुल्याकारेण परिणतामिति यावत् । **च** पुनः, **आबद्धपरिकरः** आबद्धः—आ समन्ताद्, बद्धः—सम्पादितः, परिकरः—सुदृढगात्रबन्धो येन तादृशः सन्, **देवतायाः** लक्ष्मीदेव्याः, **प्रणामं** प्रणामं कृत्वा, **ऊर्ध्वधृतनिष्कम्पजङ्घेन** ऊर्ध्वम्—उपरि, धृता—धारिता, निष्कम्पा—निश्चला, जङ्घा येन तादृशेन, **वामाङ्घ्रिणा** वामचरणेन, तिर्यक्—कुटिलं यथा स्यात्

दक्षिणजानुपर्वणा सगर्वमास्फालितमणिकुट्टिमः शिरःकपालपलायनशङ्कयेव वामकरपल्लवेन कवलितोर्ध्वबद्धमूर्धजकलापः कृतान्तकोपानलधूमदण्डानुकारिणं कृपाणमुज्झितकृपः स्कन्धपीठे न्यधापयत् [ल्ह] ।

अथ भीमकर्मावलोकनोद्भूतभीतिभिरिव स्थायिभिरपि शोकभयजुगुप्साप्रभृतिभिः परित्यक्तधीः, असाधारणधैर्यदर्शनादाहितव्रीडैरिव सात्त्विकैरपि स्वेदवैवर्ण्यवेपथुस्तम्भादिभिरपास्तसंनिधिः, अव्याजसाहसावर्जितमनोवृत्तिभिरिव व्यभिचारिभिरप्यमर्षमदहर्षगर्वोग्रतापुरःसरैरालिङ्गितः सर्वाङ्गेषु भावैः, वामेन विभ्रमदोलायमान-

---

**टिप्पनकम्—सात्त्विकैः** असत्त्वभ्रंसेन चरन्तीति सात्त्विकाः [ल्ह] ।

---

तथा, **आवर्जितेन** नमितेन, **दक्षिणजानुपर्वणा** दक्षिणजानुरूपग्रन्थिना, **सगर्वं** साभिमानं यथा स्यात् तथा, **आस्फालितमणिकुट्टिमः** ताडितमणिबद्धभूमिः सन्, **शिरःकपालपलायनशङ्कयेव** शिरःकपालस्य–मस्तकार्धघटस्य, पलायनं–निर्गमनम्, तस्य शङ्कया–संशयेनेवेत्युत्प्रेक्षा, **वामकरपल्लवेन** वामहस्तरूपनवदलेन, **कवलितोर्ध्वबद्धमूर्धजकलापः** कवलितः–उद्गृहीतः, ऊर्ध्वबद्धानाम्–उपरि नियन्त्रितानाम्, मूर्धजानां–मस्तककेशानाम्, कलापः–समूहो येन तादृशः सन्, **कृतान्तकोपानलधूमदण्डानुकारिणं** कृतान्तस्य–यमराजस्य, यः कोपानलः–क्रोधाग्निः, तस्य यो धूमदण्डः–दण्डाकारधूमः, धूमरेखेत्यर्थः, तदनुकारिणं–तदनुकरणशीलम्, तत्तुल्याकारकमित्यर्थः, **कृपाणं** खड्गम्, **उज्झितकृपः** त्यक्तदयः सन्, **स्कन्धपीठे** स्कन्धफलके, **न्यधापयत्** अस्थापयत् [ ल्ह ] ।

**अथ** स्कन्धे कृपाणस्थापनानन्तरम्, **तत्क्षणं** सद्यः, **रमणीयभीषणं** रमणीयं–सुन्दरम्, भीषणं–भयङ्करं च, **रूपं** स्वरूपम्, **अधत्त** धृतवान्, असौ राजेति शेषः । कीदृशः ? **भीमकर्मावलोकनोद्भूतभीतिभिरिव** भीमस्य–भयानकस्य, कर्मणः–स्वस्कन्धोपरि कृपाणस्थापनात्मकस्य, **अवलोकनेन** दर्शनेन, उद्भूता–उत्पन्ना, भीतिः–भयं येषां तादृशैरिवेति हेतूत्प्रेक्षा, **स्थायिभिरपि** स्थिरैरपि, **शोक-भय-जुगुप्साप्रभृतिभिः** शोकः–प्रियविश्लेषजन्यदुःखाकारान्तःकरणवृत्तिः, भयम्–अनिष्टसम्भावनाजन्यदुःखात्मिकाऽन्तःकरणवृत्तिः, जुगुप्सा–घृणात्मिकाऽन्तःकरणवृत्तिः, तत्प्रभृतिभिः, **परित्यक्तधीः** परित्यक्ता–वर्जिता, धीः–अन्तःकरणं यस्य तादृशः, स्थायित्वे स्वाश्रयपरित्याग इति विरोधः, तदुद्धारस्तु **स्थायिभिः** रसविशेषे स्थायिभावभूतैरिति व्याख्यया बोध्यः, तेषु शोकः करुणरसे, भयं भयानकरसे, जुगुप्सा बीभत्सरसे स्थायिभावो भवतीति बोध्यम् । पुनः **असाधारणधैर्यदर्शनादाहितव्रीडैरिव** असाधारणस्य–परमोत्कृष्टस्य, धैर्यस्य–त्वदीयधीरतायाः, दर्शनाद् आहिता–जनिता, व्रीडा–लज्जा येषां तादृशैरिवेति हेतूत्प्रेक्षा, **सात्त्विकैरपि** सत्त्वगुणसम्पन्नैरपि, सम्भ्रमशून्यैरपीत्यर्थः; **स्वेद-वैवर्ण्य-वेपथु-स्तम्भादिभिः** स्वेदः–शोकादिकृतोऽङ्गसलिलस्यन्दः, वैवर्ण्यं–मुखादिमालिन्यम्, वेपथुः–भयादिजन्यकम्पः, स्तम्भः–जुगुप्सादिजन्य इन्द्रियादिव्यापारनिरोधः, तत्प्रभृतिभिः, **अपास्तसन्निधिः** अपास्तः–त्यक्तः, सन्निधिः–सामीप्यं यस्य तादृशः, सात्त्विकत्वे सम्भ्रमाद्ययोगादाश्रयत्याग इति विरोध आभासते, तदुद्धारे तु **सात्त्विकैः** सत्त्वोद्रेकजन्यै रसास्वादकालिकैरनुभावरूपैरित्यर्थो बोध्यः, **स्वरवैवर्ण्ये**ति पाठे स्वरस्य वैवर्ण्यं–शोकादिजन्यो ध्वनिभङ्गः, गद्गदत्वमिति यावत्, तेषु स्वेद-वैवर्ण्ये स्वरवैवर्ण्यं वा शोकादेः, वेपथुर्भयस्य, स्तम्भो जुगुप्सादेः कार्यतया अनु पश्चाद् भवन्तीत्यर्थकानुभावपदव्यपदेश्याः कार्यविधया करुणादिरसानास्वादयन्तीति साहित्यशास्त्रोक्तसरणिः, **पुनः अव्याजसाहसावर्जितमनोवृत्तिभिरिव** अव्याजेन–कपटरहितेन, वास्तविकेनेति यावत्, साहसेन–धाष्टर्येन, आवर्जिता–आक्रान्ता, मनोवृत्तिर्येषां तादृशैरिवेति हेतूत्प्रेक्षा, "साहसं तु दमे दुष्करकर्मणि अविमृश्य कृतौ धाष्टर्ये" इति हैमः, **व्यभिचारिभिरपि** सञ्चारिभिरपि, अनवश्यम्भाविभिरपीति यावत्, **अमर्ष-मद-हर्ष-गर्वोग्रतापुरस्सरैः** अमर्षः–असहनशीलता, मदः–अभिमानः, हर्षः–इष्टावाप्तिजन्य आनन्दः, गर्वः "ऐश्वर्य-रूप-तारुण्य-कुल-विद्याबलैरपि । इष्टलाभादिनाऽन्येषामवज्ञा गर्व ईरितः" ॥ इत्यभियुक्तोक्तावज्ञाविशेषः, उग्रता–उज्ज्वलस्वभावता, तत्पुरस्सरैः–तत्प्रभृतिभिः, **भावैः** वस्तुभिः, **सर्वाङ्गेषु** सर्वावयवेषु, **आलिङ्गितः** व्याप्तः, सञ्चरणशीलैरपि वस्तुभिः सर्वालिङ्गनमिति विरोधः, तदुद्धारे तु **व्यभिचारिभिर्भावैः** व्यभिचरन्ति–वीरादिरसेषु नावश्यम्भवन्तीत्यर्थकव्यभिचारिभावपदेन साहित्यशास्त्रप्रसिद्धैरित्यर्थः । पुनः कीदृगसौ राजा ? वामेन दक्षिणेन च **श्रवणेन** कर्णेन **उद्भासमानः** उद्दीप्यमानः, कीदृशेन वामेन ? **सविभ्रमं** विभ्रमेण–विलासेन सहितं यथा स्यात् तथा, **दोलायमानम्** इतस्तत आन्दोल्यमानम्,

विततेन्द्रनीलकुण्डलेन कठिनकण्ठास्थिदलनकुण्ठितकरालधारं करवालमिव शाणया निशातुं कृतक्षणेन दक्षिणेन चावतंसितविततदेवतानिर्माल्यपल्लवेन घनशिरावलिखण्डखण्डध्वनिं श्रोतुमवितृप्त्या सहायीकृतापरश्रवणेनेव श्रवणेनोद्भासमानः, विसर्पदतिबहलखड्गप्रभानुलेपश्यामलितविग्रहतया प्रत्येकमेकावलीमौक्तिकादर्शदृश्यमानप्रतिमागतोत्तमाङ्गतया च प्रणत्यनादरकुपितपार्वतीप्रसादनार्थमुपक्रान्तद्वितीयकण्ठच्छेद इव रावणः, तत्क्षणमधत्त रमणीभीषणं रूपम् [ल्ह] । अर्धावकृत्तकन्धरे च शिरसि सहसैवास्य केनापि धृत इव स्तम्भित इव नियन्त्रित इवाक्रान्त इव नाल्पमपि चलितुमक्षमत दक्षिणो बाहुः, अतितीक्ष्णधारोऽपि कुण्ठीभूत इव कठिनास्थिकोटिसंदंशदष्ट इव स्त्यानलोहितपङ्कलग्न इव निरायतशिरातन्तुसंयत इव प्रततस्नायुपाशसंदानित इव मन्दमपि पूर्वच्छेदतः परेण प्रसर्पितुं न शशाक निस्त्रिंशः । किमेतदिति संजातविस्मयश्च नृपतिः स्तम्भनिश्चलाङ्गुलीगाढगृहीतत्सरुं

---

**टिप्पनकम्—कृतक्षणेन** विहितव्यापारेण, **श्रवणेन** कर्णेन [ल्ह] । संदंशः—लोहलोहकारोपकरणम् [ प ] ।

---

**विततं** दीर्घम्, **इन्द्रनीलकुण्डलं** मरकतमणिमयकर्णालङ्करणविशेषो यस्मिंस्तादृशेन, पुनः **कठिनकण्ठास्थिदलनकुण्ठितकरालधारं** कठिनानि—कठोराणि, यानि कण्ठास्थीनि—कण्ठसम्बन्धीनि अस्थीनि, तेषां दलनेन—छेदनेन, कुण्ठिता—प्रतिहततीक्ष्णताका, कराला—भीषणा, धारा यस्य तादृशम्, **करवालं** खड्गम्, **शाणया** तीक्ष्णीकरणयन्त्रेण, **निशातुमिव** तीक्ष्णीकर्तुमिव, **कृतक्षणेन** कृतं—लब्धम्, क्षणमवसरो येन तादृशेन, व्यापृतेनेत्यर्थः; कीदृशेन दक्षिणेन ? **अवतंसितविततदेवतानिर्माल्यपल्लवेन** अवतंसितः—अलङ्करणीकृतः, विततः—विस्तृतः, देवतायाः—लक्ष्मीदेव्याः, निर्माल्यः—पूजोच्छिष्टः, पल्लवो येन तादृशेन, अत एव **घनशिरावलिखण्डखण्डध्वनिं** घनाः—सान्द्राः, याः शिराः—नाड्यः, तासाम् आवलेः—पङ्क्तेः, खण्डखण्डस्य—प्रत्येकखण्डस्य, यो ध्वनिः, तम्, **श्रोतुम्** एकाकिना गोचरीकर्तुम्, **अवितृप्त्या** विशिष्टतृप्तिविरहेण, **सहायीकृतापरश्रवणेन** सहायीकृतं—सहायित्वेनोपरि धृतम्, अपरं श्रवणं—श्रवणेन्द्रियं येन तादृशेनेवेत्युत्प्रेक्षा, केन हेतुना क इवासौ तादृशं रूपमधत्त ? **विसर्पदतिबहलखड्गप्रभानुलेपश्यामलितविग्रहतया** विसर्पन्त्यः—प्रसरन्त्यः, या अतिबहलाः—अतिप्रचुराः, खड्गप्रभाः—कृपाणदीप्तयः, तद्रूपैः, अनुलेपैः—विलेपनैः, श्यामलितः—श्यामतामापादितः, विग्रहः—शरीरं यस्य तादृशतया, **च** पुनः, **प्रत्येकमेकावलीमौक्तिकादर्शदृश्यमानप्रतिमागतोत्तमाङ्गतया** प्रत्येकम्—एकैकस्मिन्, एकावलीमौक्तिके—एकावल्याम्—एकहारयष्टौ, यन्मौक्तिकं—मुक्तामणिः, तद्रूपेषु आदर्शेषु, दृश्यमानानि—लक्ष्यमाणानि, प्रतिमागतानि—प्रतिबिम्बगतानि, उत्तमाङ्गानि—शिरांसि यस्य तादृशतया, **प्रणत्यनादरकुपितपार्वतीप्रसादनार्थं** प्रणतौ—प्रणामविषये, योऽनादरः, तेन कुपितायाः—क्रुद्धायाः, पार्वत्याः, यत् प्रसादनम्—अनुरञ्जनम्, तदर्थम्; **उपक्रान्तद्वितीयकण्ठच्छेदः** उपक्रान्तः—आरब्धः, द्वितीयकण्ठस्य, छेदः—कर्तनं येन तादृशः, रावण इवेत्युत्प्रेक्षा, अतिकृष्णविग्रहवत्त्वात् प्रतीयमानदशमस्तकत्वाच्च रावणस्येव भीषणमुक्तविशेषणवत्त्वाद् रमणीयं च तदानीन्तनं तस्य रूपमिति भावः [ल्ह] । **शिरसि** मस्तके, **अर्धावकृत्तकन्धरे** अर्धा अवकृत्ता—छिन्ना, कन्धरा—ग्रीवा यस्मिंस्तादृशे सति, **अस्य** राज्ञः, दक्षिणो **बाहुः** हस्तः, **सहसैव** अकस्मादेव **केनापि** केनचिज्जनेन, **धृत इव** निगृहीत इव, **स्तम्भित इव** निवारित इव, **नियन्त्रित इव** बद्ध इव, **आक्रान्त इव** अभिभूत इव, **अल्पमपि** किञ्चिदपि, **चलितुम्** उद्यन्तुम्, न, **अक्षमत** समर्थोऽभूत् । **अतितीक्ष्णधारोऽपि** अतितीक्ष्णा—परमप्रखरा, धारा यस्य तादृशोऽपि, **निस्त्रिंशः** त्रिंशतोऽङ्गुलिभ्यो निर्गतः, तदधिकप्रमाणक इत्यर्थकसंज्ञकः खड्गः, **पूर्वच्छेदतः** पूर्वश्छेदो यस्मिंस्तत्प्रदेशात्, **परेण** अग्रे, **मन्दमपि** मन्दं यथा स्यात् तथाऽपि, **प्रसर्पितुं** प्रसर्तुं छेत्तुमिति यावत्, न **शशाक** समर्थोऽभूत्, कथम्भूत इव ? **कुण्ठीभूत इव** प्रतिहतकर्तनशक्तिरिव, पुनः, **कठिनास्थिकोटिसंदंशदष्ट इव** कठिनानां—कठोराणाम्, अस्थ्नां याः कोटयः—अग्रभागाः, तद्रूपैः संदंशैः—लोहकारोपकरणविशेषैः, दष्टः—निगृहीत इव, पुनः **स्त्यानलोहितपङ्कलग्न इव** स्त्यानं—घनीभूतम्, यल्लोहितं—शोणितम्, तत्पङ्के—तत्कर्दमे, लग्नः—संश्लिष्ट इव, पुनः, **निरायतशिरातन्तुसंयत इव** निरायतैः—अतिदीर्घैः, शिरातन्तुभिः—नाडीरूपरज्जुभिः, संयतः—बद्ध इव, पुनः, **प्रततस्नायुपाशसन्दानित इव** प्रतताः—विस्तृताः, या स्नायवः—अङ्गप्रत्यङ्गसन्धिस्थानस्थितनाड्यः, तद्रूपैः पाशैः—विशेषाकृतिविशिष्टरज्जुभिः, सन्दानितः—सर्वतो बद्ध इवेति सर्वत्रोत्प्रेक्षा । **नृपतिः** मेघवाहनः, **एतत्** खड्गावरोधनम्, **किं** किंकारणकमिति, **सञ्जातविस्मयः** उत्पन्नाश्चर्यः सन्, **स्तम्भनिश्चलाङ्गुलीगाढगृहीतत्सरुं** स्तम्भवत्—

मत्सरादिवानिच्छतो मोक्तुमाच्छिद्य दक्षिणकरादितरेण पाणिना कृपाणं जग्राह । करविमुक्तमौलिबन्धनिरालम्बकन्धरे च छेदमार्गमिव सुखच्छेदाय विकटावकाशं कर्तुमधोमुखमवनते शिरसि निर्दयं व्यापारयितुमाहितप्रयत्नस्तत्कालमुल्लासितेन मन्दीकृताखिलेन्द्रियशक्तिना मूर्च्छागमेन विरलविलुप्तसंज्ञः स्वप्न इवाकालजलधरध्वनिक्षुभितराजहंसीकुलकोलाहलध्वनिकलमविश्रान्तसंततिना रत्नवलयावलीशिञ्जितेन व्यञ्जितोत्तालकरतलावधूननमतिश्रव्यतया सुधारसेनेव श्रवणविवरमाध्मापयन्तमश्रुतपूर्वममरसुन्दरीजनस्य हाहारवमश्रृणोत् [ ए ] ॥

तदनुसारप्रहितदृष्टिश्चाग्रतो नातिनिकटे झगिति दत्तदर्शनाम् [ ऐ ], आक्रान्तदशदिशा शङ्खधवलेन देहप्रभाप्रवाहेण क्षीरसागरगतामिव विभाव्यमानाम् [ ओ ], विततदलसहस्रफणावलयशोभिनि पृथुलदीर्घनाल-

---

गृहाधारभूतस्तम्भवत्, निश्चलाः–स्थिराः, या अङ्गुल्यः, ताभिर्गाढं–यथा स्यात् तथा, गृहीतः–धृतः, त्सरुः–मुष्टिर्यस्य तादृशम्, **कृपाणं** खड्गम्, **मत्सरादिव** वामहस्तोत्कर्षविद्वेषादिव, **मोक्तुं** त्यक्तुम्, **अनिच्छतः** अकामयमानात्, **दक्षिणकरात्** दक्षिणहस्तात्, **आच्छिद्य** बलाद् गृहीत्वा, **इतरेण** दक्षिणेतरेण, वामेनेत्यर्थः, **पाणिना** हस्तेन, **जग्राह** गृहीतवान् । **अमरसुन्दरीजनस्य** देवाङ्गनाजनस्य, **हाहारवं** हाहाकारम्, **अश्रृणोत्** श्रुतवान्, स राजेति शेषः, कीदृशं तम् ? **अकालजलधरध्वनिक्षुभितराजहंसीकुलकोलाहलध्वनिकलम्** अकाले–अनवसरे, प्रावृडन्यकाल इत्यर्थः, यो जलधरध्वनिः–मेघध्वनिः, तेन क्षुभितं–सम्भ्रान्तम्, यद् राजहंसीकुलं–राजहंसीवृन्दम्, तस्य यः कोलाहलध्वनिः–कलकलशब्दः, तद्वत् कलं-मधुरम्, पुनः **अविश्रान्तसन्ततिना** अविश्रान्ता–अविरता, अविच्छिन्नेति यावत्, सन्ततिः–धारा यस्य तादृशेन, **रत्नवलयावलीशिञ्जितेन** रत्नमयं यद् वलयं तत्संज्ञकप्रकोष्ठाभरणम्, तस्य या आवली–पङ्क्तिः, तस्याः शिञ्जितेन–ध्वनिना, **व्यञ्जितोत्तालकरतलावधूननं** व्यञ्जितं–सूचितम्, उत्तालानाम्–उत्क्षिप्तप्रदेशानाम्, करतलानाम्, विधूननं–कम्पनं यस्मिंस्तादृशम्, पुनः **अतिश्रव्यतया** अतिशयेन श्रोतुं योग्यतया, अतिमधुरतयेति यावत्, **सुधारसेनेव** अमृतरसेनेवेत्युत्प्रेक्षा, **श्रवणविवरमपि** कर्णबिलमपि, **आध्मापयन्तं** समन्ताद् नादयन्तम्, पुनः **अश्रुतपूर्वं** पूर्वमश्रुतप्रकारकम् । कीदृगसौ राजा ? **शिरसि** मस्तके, **निर्दयं** दयारहितं यथा स्यात् तथा, **व्यापारयितुं** छेदने प्रवर्तयितुम्, कृपाणमिति शेषः, **आहितप्रयत्नः** कृतप्रयासः, । कीदृशे शिरसि ? **अधोमुखम्** अधोदेशाभिमुखम्, **अवनते** नम्रतामापन्ने, किमर्थम् ? **सुखच्छेदाय** अनायासच्छेदाय, **छेदमार्गं** छेदनस्थलम्, **विकटावकाशं** विकटः–विस्तीर्णः, अवकाशः–कृपाणनिकषनस्थानं यस्य तादृशम्, प्रकटावकाशमित्यर्थः, कर्तुमिवेत्युत्प्रेक्षा, पुनः कीदृशे शिरसि ? **करविमुक्तमौलिबन्धनिरालम्बकन्धरे** करेण–हस्तेन, विमुक्तः–त्यक्तः, यो मौलिबन्धः–शिरोगतकेशपाशः, तेन निरालम्बा–आलम्बनरहिता, कन्धरा–ग्रीवा यस्य तादृशे, **च** पुनः, कीदृगसौ राजा ? **विरलविलुप्तसंज्ञः** विरलं–किञ्चिद्, विलुप्ता–नष्टा, संज्ञा–चैतन्यं यस्य तादृशः, **केन** ? **मूर्छागमेन** मूर्छागमनेन, मूर्छोद्भवेनेति यावत्, कीदृशेन ? **तत्कालं** तत्क्षणम्, **उल्लसितेन** आविर्भूतेन, पुनः **मन्दीकृताखिलेन्द्रियशक्तिना** मन्दीकृता–मान्द्यमापादिता, अखिलानां सर्वेषाम्, इन्द्रियाणां शक्तिः–सामर्थ्यं येन तादृशेन, अतः **स्वप्न इव** स्वप्नकाल इवेति 'अश्रृणोत्' इत्यनेनान्वेति [ ए ] । **च** पुनः, **तदनुसारप्रहितदृष्टिः** तस्य–हाहारवस्य, अनुसारेण–आभिमुख्येन, हाहाशब्दोद्गमविभागाभिमुख्येनेत्यर्थः, प्रहिता–प्रेरिता, दृष्टिः–चक्षुर्येन तादृशः, स राजेति शेषः, **अग्रतः** अग्रे, **नातिनिकटे** किञ्चिन्निकटे, **झटिति** शीघ्रम्, **झगिति** पाठे अकस्मादाविर्भावेन, तैजसवस्तुनोऽकस्मादाविर्भावेन तत्प्रसिद्धेः, **दत्तदर्शनां** दत्तं कारितम्, दर्शनं–स्वावलोकनं यया तादृशीम्, **श्रियं** लक्ष्मीदेवीम्, **अपश्यत्** दृष्टवान् [ ऐ ] । कीदृशीम् ? **क्षीरसागरगतामिव** क्षीरसागरस्थितामिव, **विभाव्यमानां** प्रतीयमानाम्, केन ? **आक्रान्तदशदिशा** आक्रान्ताः–व्याप्ताः, दश दिशो येन तादृशेन, पुनः **शङ्खधवलेन** शङ्खप्रभावच्छुभ्रेण, **देहप्रभाप्रवाहेण** शरीरद्युतिप्रवाहेण [ ओ ] । पुनः कीदृशीम् ? **पुण्डरीके** श्वेतपद्मे, **शेषभुजगे** शेषनागे, **मेदिनीं** पृथिवीमिव, **कृतावस्थानां** कृतस्थितिकाम्, कीदृशे तत्र ? **विततदलसहस्रफणावलयशोभिनि** विततानि–विस्तृतानि, यानि दलानि–कमलपत्राणि, तेषां यत् सहस्रं तदेव फणावलयं तेन शोभते यत्, तादृशे, पक्षे **विततदलानीव** याः सहस्रफणाः, तद्वलयेन–तन्मण्डलेन, शोभनशीले; पुनः **पृथुलदीर्घनालभोगे** पृथुलं–स्थूलम्, दीर्घं च यन्नालं–मृणालदण्डः, तदेव पक्षे तदिव भोगः–शरीरं यस्य

भोगे शेषभुजग इव मेदिनीमिन्दुकरपाण्डुरत्विषि पुण्डरीके कृतावस्थानाम् [ औ ], अब्जिनीखण्डसंचरणसंक्रान्तकमलधर्ममिव सुकुमारारुणं चरणद्वितयमुद्वहन्तीम् [अं], अस्थूललघुनापि पीवरोरुणा राजमानां जङ्घाद्वितयेन [ अः ],

विततमेखलागुणपिनद्धमच्छधवलं दिव्यदुकूलमम्बुजवनप्रीत्या पद्मिनीनालसूत्रेणेव कारितमलघुना जघनमण्डलेनोद्वहन्तीम् [ क ], आयतिशालिनीभिः शक्तिभिरिव वलीभिस्तिसृभिरुद्भासितेन नीतिमार्गेणेवातिसूक्ष्मदृष्टिलक्ष्येण मध्यभागेन भ्राजमानाम् [ ख ], गतिविलासहसितैः सहवासिभिः क्षीरोदजलवारणैरुपनीतेन कुम्भाभोगेनेव निरङ्कुशप्रवृद्धेन स्तनभारेणोद्भासिताम् [ग], उदधिमथने सुधारसच्छटावलयमिव लग्नमानाभिलम्बं कम्बुपरिमण्डलेन कण्ठनालेन मुक्ताकलापं कलयन्तीम् [ घ ], अलिकुलक्वाणमुखरया शतमखहृतै-

---

**टिप्पनकम्—पुण्डरीके** सितपद्मे [ औ ]। **अस्थूललघुनाऽपि** यद् अस्थूलं– कृशम्, लघु– अविस्तीर्णम्, तत् कथं पीवरम् उरु च, अन्यत्र पीवरावूरू– बृहज्जङ्घे यत्र तत् तथोक्तं तेन **पीवरोरुणा** [ अः ]। **अतिसूक्ष्मदृष्टिलक्ष्येण** एकत्र निपुणज्ञानगम्येन, अन्यत्र अतिसूक्ष्मनेत्रदर्शनोपलभ्येन [ ख ]। आभोगेन– विस्तारेण [ ग ]।

---

तादृशे; पुनः **इन्दुकरपाण्डुरत्विषि** इन्दुकरस्येव–चन्द्रकिरणस्येव, पाण्डुरा–किञ्चित्पीतश्वेता, त्विट्–कान्तिर्यस्य तादृशे, इति पक्षद्वयानुगतोऽर्थः [ औ ]। पुनः कीदृशीम्? **अब्जिनीखण्डसञ्चरणसंक्रान्तकमलधर्ममिव** अब्जिनीखण्डे–कमलवने, यत् सञ्चरणं–विहारः, तेन हेतुना, संक्रान्तः–सम्प्राप्तः, कमलस्य, धर्मः–सौकुमार्यारुण्यरूपो गुणो येन तादृशमिव, **सुकुमारारुणं** सुकुमारं च–मृदुलं च, अरुणं च–रक्तं च, **चरणद्वितयं** चरणद्वयम्, **उद्वहन्तीं** धारयन्तीम् [ अं ]। पुनः कीदृशीम्? **अस्थूललघुनापि** अस्थूलेन–कृशेन, लघुना–ह्रस्वेनापि, **पीवरोरुणा** पीवरेण–स्थूलेन, उरुणा–विस्तृतेनेति विरोधः, तदुद्धारे तु पीवरौ–ऊरू जानूपरिभागौ यस्य तादृशेन, **जङ्घाद्वितयेन** जङ्घाद्वयेन, **राजमानां** शोभमानाम् [ अः ]। पुनः कीदृशीम्? **विततमेखलागुणपिनद्धं** विततः–विस्तृतः, यो मेखलागुणः–कटिवेष्टनरज्जुः, तेन पिनद्धं–बद्धम्, **अच्छधवलम्** अच्छं–निर्मलम्, धवलं शुभ्रं च, अत एव **अम्बुजवनप्रीत्या** कमलवनानुरागेण हेतुना, **पद्मिनीनालसूत्रेण** कमलिनीमृणालतन्तुना, **कारितमिव** निर्मापितमिव, **दिव्यदुकूलम्** उत्कृष्टवस्त्रम्, **अलघुना** स्थूलेन, **जघनमण्डलेन** कट्यग्रभागमण्डलेन, **उद्वहन्तीं** धारयन्तीम् [ क ]। पुनः कीदृशीम्? **अतिसूक्ष्मदृष्टिलक्ष्येण** अतिसूक्ष्मया–अतिशयसूक्ष्मया, दृष्ट्या–चक्षुषा, लक्ष्येण–प्रत्येतव्येन, **मध्यभागेन** कटिप्रदेशेन, **भ्राजमानां** शोभमानाम्, केनेव? **नीतिमार्गेणेव,** तत्पक्षे अतिसूक्ष्मा दृष्टिर्बुद्धिर्येषां ते अतिसूक्ष्मदृष्टयः पण्डिताः, तैर्लक्ष्येण–अधिगन्तव्येनेत्यर्थः, पुनः कीदृशेन? **आयतिशालिनीभिः** दैर्घ्यशोभिनीभिः, **तिसृभिः** त्रित्वसंख्याविशिष्टाभिः, **वलीभिः** उदररेखाभिः, **उद्भासितेन** उद्दीपितेन, काभिरिव? **आयतिशालिनीभिः** विस्तृतिशोभिनीभिः, **तिसृभिः** प्रभावोत्साहमन्त्ररूपैस्त्रिभिः कारणैरुद्भूताभिः, **शक्तिभिः** पराक्रमैरिव, नीतिमार्गो यथा तादृशीभिः शक्तिभिरुद्भासते तथैव तन्मध्यभागस्तादृशीभिर्वलिभिरुद्भासित आसीदिति भावः [ ख ]। पुनः कीदृशीम्? **निरङ्कुशप्रवृद्धेन** निरङ्कुशं–निष्प्रतिबन्धं यथा स्यात् तथा, प्रवृद्धेन–समेधितेन, **स्तनभारेण** कुचमण्डलगौरवेण, **उद्भासिताम्** उज्ज्वलिताम्, केनेव? **गतिविलासहसितैः** गतिविलासेन–गमनविभ्रमेण, गमनसौष्ठवेनेति यावत्, हसितैः–तिरस्कृतैः, जितैरिति यावत्, **सहवासिभिः** क्षीरसागररूपैकस्थानवासिभिः, **क्षीरोदजलवारणैः** क्षीरसागरसम्बन्धिजलहस्तिभिः, **उपनीतेन** उपहृतेन, **कुम्भाभोगेन** मस्तकविस्तारेण, इवेत्युत्प्रेक्षा [ ग ]। पुनः कीदृशीम्? **उदधिमन्थने** सागरालोडनकाले, **लग्नं** सम्बद्धम्, **सुधारसच्छटावलयमिव** अमृतरसच्छविमण्डलमिवेत्युत्प्रेक्षा, **आनाभिलम्बं** नाभिपर्यन्तं लम्बमानम्, **मुक्ताकलापं** मौक्तिकमालाम्, **कम्बुपरिमण्डलेन** शङ्खवद्वर्तुलाकारेण, **कण्ठनालेन** ग्रीवायष्टिकया, **कलयन्तीं** धारयन्तीम् [ घ ]। पुनः कीदृशीम्? **अलिकुलक्वाणमुखरया** अलीनां–भ्रमराणाम्, कुलं–पुञ्जः, तस्य क्वाणैः गुञ्जनात्मकध्वनिविशेषैः, मुखरया–वाचालया, अत एव **शतमखहृतैरावणादिसहोदरोदग्रदानाय** शतमखेन–इन्द्रेण, हृताः–अपहृताः, ये ऐरावतादयः–हस्तिविशेषादयः,

रावणादिसहोदरोदन्तदानाय प्रहितया पारिजातदूत्येव स्निग्धसान्द्रया मन्दारमञ्जर्या समाश्रितैकश्रवणाम् [ ङ ], संक्षोभितसुरासुरलोकमलसवलितकोमलाङ्गुलिना वामकरतलेन कज्जलकूटकालं कालकूटमिव केशपाशं पुनः पुनः पृष्ठे बद्धुमामृशन्तीम् [ च ], शशिकलासंनिभललाटभित्तिना कौस्तुभाताम्रबिम्बाधरेण सुधाधवललोललोचनतरङ्गेण मदिरासुरभिनिःश्वासमारुतामोदेन वदनेन्दुना निजसहोदरसमाजमिव समुदितं दर्शयन्तीम् [छ], काभिश्चिदलसचलितश्वेतवालव्यजनाभिः क्षीरोददत्ताभिः परिवारापगाभिरिव निपतदुत्पतद्राजहंसाभिः काभिरपि करसंश्लिष्टयष्टिदीपिकाकिरणपटलपल्लवितदेहलावण्याभिः शैलकटकौषधीभिरिव धन्वन्तरिप्रहिताभिरपराभिः

---

**टिप्पनकम्— संक्षोभितसुरासुरलोकं** त्रासितदेवदानवजनम्, कृतसादरदेवदानवं च [ च ]।

---

सोदराः–लक्ष्मीदेव्याः समानोदर्याः, तेषामपि समुद्रोद्भूतत्वेन तत्सोदरत्वात्, तेषामुदन्तस्य–तदपहरणवार्तायाः, दानाय–कथनाय, **प्रहितया** प्रेषितया, **पारिजातदूत्येव** पारिजातस्य–तत्संज्ञकस्य देववृक्षस्य, दूत्या–वार्ताहारिण्या, इवेत्युत्प्रेक्षा, **स्निग्धसान्द्रया** स्निग्धया–श्लक्ष्णया, सान्द्रया–निबिडया च, **मन्दारमञ्जर्या** मन्दारस्य–तत्संज्ञकदेववृक्षस्य, मञ्जर्या, **समाश्रितैकश्रवणां** समाश्रितं–सम्यगधिष्ठितम्, एकं श्रवणं–कर्णोपरिभागो यस्यास्तादृशीम्? ऐरावतपारिजातमन्दारादिवृक्षलक्ष्म्यः क्षीरसागरोदरजाततया परस्परसोदरत्वस्नेहभाजः सन्ति, तेष्वैरावतादिकमिन्द्रो जहारेति स्वसोदरापहरणवार्तां निवेदयितुं पारिजातप्रेषिता मञ्जरीरूपा दूती लक्ष्म्याः कर्णोपरि स्थित्वा स्वनिलीनभ्रमरनिकरझाङ्कारव्याजेन तद्वार्तां कथयतीवेत्युत्प्रेक्षा। "ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः" इति, "पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्" ॥ इति चामरः [ ङ ]। पुनः कीदृशीम्? **अलसवलितकोमलाङ्गुलिना** अलसं–कोमलतातिशयेन मन्दं यथा स्यात् तथा, वलिताः–चलिताः, कोमलाङ्गुलयो यस्य तादृशेन, **वामकरतलेन** वामहस्ततलेन, **कज्जलकूटकालं** कज्जलौघमिव कृष्णम्, **केशपाशं** केशकलापम्, **पृष्ठे** पश्चाद् भागे, **पुनः पुनः** अनेकवारम्, **आमृशन्तीं** संस्पृशन्तीम्, कमिव? **संक्षोभितसुरासुरलोकं** संक्षोभितः–भयेन संभ्रमितः, प्रकृतपक्षे व्यामोहितः, सुरासुरलोकः–देवदैत्यजनो येन तादृशम्, **कालकूटमिव** विषौघमिवेत्युत्प्रेक्षा [ च ]। पुनः कीदृशीम्? **वदनेन्दुना** स्वमुखचन्द्रेण, **समुदितं** सम्मिलितम्, **निजसहोदरसमाजं** चन्द्रकौस्तुभादिस्वसहोदरगणम्, **दर्शयन्तीमिव** दृष्टिपथमुपस्थापयन्तीमिवेत्युत्प्रेक्षा, कथमिति तद्विशेषणमुखेन दर्शयितुं वदनेन्दुं विशिनष्टि—**शशिकलासन्निभललाटभित्तिने**ति–शशिकलासन्निभा–चन्द्रकलासदृशी, तदाकारेत्यर्थः, ललाटरूपा भित्तिर्यस्य तादृशेन, पुनः **कौस्तुभाताम्रबिम्बाधरेण** कौस्तुभो नाम "कौस्तुभस्तु महातेजाः कोटिसूर्यसमप्रभः" इत्यभियुक्तोक्तः समुद्रनिर्गतो मणिविशेषः, तद्वदाताम्रः–उज्ज्वलरक्तवर्णः, बिम्बाधरः–बिम्बोष्ठो यस्य तादृशेन, पुनः **सुधाधवललोललोचनतरङ्गेण** सुधाधवलाः–अमृतवच्छुभ्राः, लोललोचनयोः–चञ्चलचक्षुषोः, तरङ्गाः–कान्तिप्रवाहा यस्य तादृशेन, पुनः **मदिरासुरभिनिःश्वासमारुतामोदेन** मदिरा–मद्यम्, तद्वत् सुरभिः–सुन्दरः, निःश्वासमारुतस्य–श्वासवायोः, आमोदः–गन्धो यत्र तादृशेन, शशि-कौस्तुभ-सुधा-मदिराणां क्षीरसागरान्निर्गमेन लक्ष्म्याः सोदरत्वेन स्नेहास्पदतया ललाटाद्युपमानविधया तत्संमेलनमुत्प्रेक्षितम् [ छ ]। पुनः कीदृशीम्? **काभिश्चित्** कतिपयाभिः, **समीपवर्तिनीभिः** पार्श्ववर्तिनीभिः, सहचारिणीभिरिति यावत्, **अमराङ्गनाभिः** देवाङ्गनाभिः, **परिवृतां** परिवेष्टिताम्, कीदृशीभिः? **अलसचलितश्वेतवालव्यजनाभिः** अलसं–मन्दं मन्दं यथा स्यात् तथा, चलितानि–उत्क्षिप्तानि, श्वेतानि–शुभ्राणि, वालव्यजनानि–व्यजन्ति विक्षिपन्ति लोकाः पवनमनेनेति व्यजनम्, वालानां–चमर्याख्यमृगविशेषकेशानाम्, व्यजनमिति वालव्यजनम्, तानि, चामराणीत्यर्थः, याभिस्तादृशीभिः, अतः **क्षीरोददत्ताभिः** क्षीरसागरसमर्पिताभिः, **निपतदुत्पतद्राजहंसाभिः** निपतन्तः–नीचैर्गच्छन्तः, उत्पतन्तः–उच्चैर्गच्छन्तश्च, उच्छलन्तश्चेति यावत्, राजहंसा यासु तादृशीभिः, **परिवाराऽऽपगाभिः** परिवारभूताभिर्नदीभिरिवेत्युत्प्रेक्षा, आपगास्थानीया देवाङ्गनाः, ऊर्ध्वाधोभावेन तत्करोत्क्षिप्यमाणचामराणि च निपतदुत्पतद्राजहंसश्रेणीस्थानीयानीति बोध्यम्; **काभिरपि** कतिपयाभिः, **करसंश्लिष्टयष्टिदीपिकाकिरणपटलपल्लवितदेहलावण्याभिः** करेण–हस्तेन, संश्लिष्टाः–संगताः, धृता इति यावत्, यष्टयः–आधारदण्डा यासां तादृशीनाम्, दीपिकानाम्, किरणपटलेन–ज्योतिःपुञ्जेन, पल्लवितं–समुपचितम्, देहलावण्यं–शरीरसौन्दर्यं यासां तादृशीभिः,

कनकगौरपीनोद्धुरपयोधराभिः पद्मिनीभिरिव सचक्रवाकयुगलाभिर्नालानुकारिणः किरणकण्टकितान् वेत्रदण्डानुल्लासयन्तीभिरन्याभिरात्तसदृशसितनेपथ्याभिरादिभूपालकीर्तिभिरिव समीपवर्तिनीभिरसराङ्गनाभिः परिवृताम् [ ज ], प्रदोषचन्द्रकलामिव विनिद्रकोकनदविनिवेशितकराम् [ झ ], सुग्रीवसेनामिव स्फुरत्तारनीलाङ्गदाम् [ ञ ], गृहीतसर्वाङ्गीणप्रसाधनामप्येकाङ्गकल्पिताङ्गरागाम् [ ट ], धीरतरवारिवासिनीमपि प्रकटितपृथुप्रतापां श्रियमपश्यत् [ ठ ]॥

---

**टिप्पनकम्—विनिद्रकोकनदविनिवेशितकराम्** विकसितपद्मारोपितहस्ताम्, अन्यत्र गतनिद्रचक्रवाकनिक्षिप्तकराम् [ झ ]। **स्फुरत्तारनीलाङ्गदाम्** एकत्र चलत्तारनीलाङ्गदाभिधानवानरत्रयाम्, अन्यत्र दीप्यमानोज्ज्वलमरकतकेयूराम् [ ञ ]। **गृहीतसर्वाङ्गीणप्रसाधनामपि** या आत्तसकलदेहसम्बन्धिमण्डना सा कथं एकाङ्गकल्पिताङ्गरागा? अन्यत्र चन्दनकृतविलेपनाम् [ ट ]। **धीरतरवारिवासिनीमपि** या गम्भीरतरजलवासिनी सा कथं प्रकटितपृथुप्रतापा—प्रकाशितोरुप्रकृष्टतापा?... [ ठ ]।

---

अतः **धन्वन्तरिप्रहिताभिः** धन्वन्तरिणा—"नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान्। पुरा समुद्रमथने समुत्तस्थौ महोदधेः"॥ इत्यन्यत्रोपाख्यातोत्पत्तिकेन स्वर्वैद्येन, प्रहिताभिः—भगिनीत्वस्नेहेनोपहारविधया प्रेषिताभिः, **शैलकटकौषधिभिरिव** पर्वतनितम्बभागस्थितौषधीभिरिवेत्युत्प्रेक्षा; **अपराभिः** अन्याभिः, **नालानुकारिणः** मृणालदण्डसदृशान्, **किरणकण्टकितान्** द्युतिरूपकण्टकाकीर्णान्, **वेत्रदण्डान्** वेत्रयष्टीः, **उल्लासयन्तीभिः** उद्यच्छन्तीभिः, **कनकगौरपीनोद्धुरपयोधराभिः** कनकवत्—सुवर्णवत्, गौरौ, पीनौ—स्थूलौ, उद्धुरौ—उन्नतौ च, पयोधरौ यासां तादृशीभिः, अतः **सचक्रवाकयुगलाभिः** चक्रवाकाख्यपक्षिविशेषद्वन्द्वान्विताभिः, **पद्मिनीभिरिव** कमलिनीभिरिवेत्युत्प्रेक्षा, कमलिनीरूपासु देवाङ्गनासु वेत्रदण्डस्य मृणालदण्डस्थानीयत्वं तदीयद्युतीनां कण्टकस्थानीयत्वं पयोधरयोश्च चक्रवाकद्वन्द्वस्थानीयत्वं बोध्यम्; **अन्याभिः** तदितराभिः, **आत्तसदृशसितनेपथ्याभिः** आत्तं—धृतम्, सदृशं—तुल्यम्, सितं—श्वेतम्, नेपथ्यं—कृत्रिमरूपं याभिस्तादृशीभिः, अतः **आदिभूपालकीर्तिभिरिव** आदिभूपालानां—प्राचीननृपाणां कीर्तिभिरिवेत्युत्प्रेक्षा [ ज ]। पुनः कीदृशीम्? **प्रदोषचन्द्रकलामिव** प्रदोषे—रात्र्यारम्भकाले, या चन्द्रकला—चन्द्ररेखा, तामिव, **विनिद्रकोकनदविनिवेशितकरां** विनिद्रे—विकसिते, कोकनदे—रक्तकमले, विनिवेशितौ—विशेषेण निहितौ, करौ—हस्तौ यया तादृशीम्, पक्षे विशिष्टा, निद्रा—निमीलनं येषां तादृशेषु, संकुचितेष्वित्यर्थः, कोकनदेषु—रक्तकमलेषु, विनिवेशिताः—विक्षिप्ताः, कराः—किरणा यया तादृशीम्, अथवा विनिद्राः—प्रियाविश्लेषदुःखेन विगतनिद्राः, कोकाः—चक्रवाका येषु तादृशनदेषु, विनिवेशिताः—विक्षिप्ताः, कराः—किरणा यया तादृशीम् [ झ ]। पुनः कीदृशीम्? **सुग्रीवसेनामिव** सुग्रीवः—वानरजातीयविद्याधरविशेषः, तत्सम्बन्धिनीं सेनामिव, **स्फुरत्तारनीलाङ्गदां** स्फुरन्ती—विभासमाने, तारे—मनोहरे, नीलाङ्गदे—नीलमणिमयबाहुभूषणे यस्यास्तादृशीम्, पक्षे स्फुरन्तः—पराक्रमेणोज्ज्वलन्तः, तारनीलाङ्गदाः—तारनामा नीलनामा अङ्गदनामा च वानरो यस्यां तादृशीम् [ ञ ]। पुनः कीदृशीम्? **गृहीतसर्वाङ्गीणप्रसाधनामपि** गृहीतं—धृतम्, सर्वाङ्गीणं—सर्वाङ्गसम्बन्धि, प्रसाधनं—मण्डनोपकरणभूतद्रव्यं यया तादृशीम्, अपि, **एकाङ्गकलिताङ्गरागाम्** एकाङ्गे—एकस्मिन्नेवाङ्गे, कल्पितः—रचितः, अङ्गरागः—विलेपनं यया तादृशीमिति विरोधः, तदुद्धारे तु **गृहीतसर्वाङ्गीणप्रसाधनां** धृतसर्वाङ्गीणाभरणाम्, अथ च एकाङ्गे—एकस्मिन्—मुखरूपे अङ्गे, कल्पिताङ्गरागामिति व्याख्येयम् [ ट ]। पुनः कीदृशीम्? **धीरतरवारिवासिनीमपि** धीरतरम्—अतिगम्भीरम्, यद् वारि जलम्, तत्र वास्तव्यामपि, **प्रकटितपृथुप्रतापां** प्रकटितः पृथुः—विपुलः प्रकृष्टः—तीव्रः, तापो यस्यास्तादृशीमिति विरोधः, तदुद्धारे तु प्रथमविशेषणार्थः पूर्ववत्, यद्वा धीराणां—धैर्यवतां जनानाम्, ये तरवारयः—कृपाणाः—तद्वासिनीम्, तदाश्रयामिति यावत्, न तु कातराश्रयामित्यर्थः, द्वितीयविशेषणार्थस्तु प्रकटितः, पृथुः—प्रचुरः, प्रतापः—प्रभावो यस्यास्तादृशीम् [ ठ ]।

अनन्यदेवतासामान्यचिह्नदर्शनेन श्रीरसावित्युपजातनिश्चयोऽपि किञ्चिदुत्पन्नबिभीषिकाशङ्कः प्राकृतामिव स्त्रियमदर्शितसंभ्रमस्तामपृच्छत्—'भद्रे! का त्वम्, किमर्थं वा देवतायतनमिदमागतासि', सा त्ववादीत्—'राजन्! न जानासि माम्? अहं हि सकलभूपालवृन्दवन्दितपादा राजलक्ष्मीस्त्वदभिकाङ्क्षितवस्तुसंपादनार्थमागता, कथय किं ते प्रियं कर्तव्यम्' इति, पार्थिवोऽपि तदवस्थानुरूपदर्शितादरः प्रणम्य तां तदागमनजन्मना हर्षेण करणवैक्लव्येन च दरस्खलितवचनः शनैरलपत्—'भगवति! कृतार्थोऽहम्, यस्य मे समुपस्थितायाममुष्यामन्तिमावस्थायामुपेत्य भगवत्या प्रकाशितमिदमदर्शनीयमन्येषामल्पपुण्यानां मानवानामशेषापायप्रशमनं दिव्यमात्मीयं रूपम्, अभ्युपगता च मनीषितवस्तुसिद्धिः। इदं देवि! मेऽभिमतममुष्य महात्मनस्त्वत्परिग्रहाग्रेसरस्य नक्तञ्चरपतेः प्रयोजनवशादुपदर्शितार्थिभावस्य दातुमुत्तमाङ्गं मया परिकल्पितम्, अर्धकल्पिते चास्मिन्नकस्मादपगतपरिस्पन्दौ सन्दानिताविव केनाप्यकिञ्चित्करौ करौ संवृत्तौ, तदनयोर्यथा

---

**अनन्यदेवतासामान्यचिह्नदर्शनेन** अन्यदेवतासामान्यम्-अन्यदेवतासाधारणम्, न अन्यदेवतासामान्यमित्यनन्यदेवतासामान्यं देवतान्तरव्यावृत्तम्, यच्चिह्नं तद्दर्शनेन, असौ **श्रीः** लक्ष्मीरिति, **उपजातनिश्चयोऽपि** उपजातः, निश्चयः-निश्चयात्मकं ज्ञानं यस्य तादृशोऽपि, **किञ्चिदुत्पन्नबिभीषिकाशङ्कः** किञ्चिदुत्पन्ना-ईषदुद्भूता, बिभीषिकायाः-भयस्य, शङ्का यस्य तादृशः, स राजेति शेषः, **अदर्शितसम्भ्रमः** न संदर्शितः सम्भ्रमः-भयाकुलीभावो येन तादृशः सन्, **प्राकृतां स्त्रियमिव** सामान्यस्त्रियमिव, **तां** लक्ष्मीदेवीम्, **अपृच्छत्** पृष्टवान्। किमित्याह—**भद्रे!** कल्याणि!, **का त्वं?** त्वं काऽसि? **किमर्थं वा** किंनिमित्तं च, इदं **देवतायतनं** देवतामन्दिरम्, आगता असि। **सा तु** लक्ष्मीस्तु, **अवादीत्** उक्तवती, किमित्याह—**राजन्!** नृपते!, मां **न जानासि** न परिचिनोषि, **सकलभूपालवृन्दवन्दितपादा** सकलानां-सर्वेषाम्, भूपालानां-राज्ञाम्, वृन्देन-समूहेन, वन्दितौ-अभिवादितौ स्तुतौ वा, पादौ यस्यास्तादृशी, **राजलक्ष्मीः** राजवैभवाधिष्ठात्री देवी, अहम्, **त्वदभिकाङ्क्षितवस्तुसम्पादनार्थं** त्वया अभिकाङ्क्षितम्-अभीप्सितम्, यद् वस्तु-पुत्ररत्नरूपम्, तत्सम्पादनार्थं-तत्साधनार्थम्, **आगता** अत्रोपस्थिता, अस्मीति शेषः। **ते** तव, **प्रियम्** अभीष्टम्, किं **कर्तव्यं** मया करणीयम्, इति **कथय** निवेदय। **पार्थिवोऽपि** स राजाऽपि, **तदवस्थानुरूपदर्शितादरः** तदवस्थानुरूपः-कण्ठच्छेदनोद्यमावस्थोचितः, दर्शितः-कृतः, आदरः-सम्मानो येन तादृशः सन्, **तां** लक्ष्मीदेवीम्, **प्रणम्य** अभिवाद्य, **तदागमनजन्मना** तस्याः-लक्ष्मीदेव्याः, आगमनात्, जन्म-उत्पत्तिर्यस्य तादृशेन, तदागमनजनितेनेत्यर्थः, **हर्षेण** आनन्देन, **च** पुनः, **करणवैक्लव्येन** करणस्य-शरीरस्य, वैक्लव्येन-अस्वास्थ्यवशेन, **दरस्खलितवचनः** दरम्-ईषत्, स्खलितं-भ्रष्टम्, वचनं यस्य तादृशः, **शनैः** मन्दं मन्दम्, **अलपत्** अचकथत्। **भगवति!** महैश्वर्यशालिनि!, अहं **कृतार्थः** त्वद्दर्शनसौभाग्येन सिद्धार्थः, अस्मीति शेषः, यस्य **मे** मम, **अमुष्यां** स्वशिरश्छेदनरूपायाम्, **अन्तिमावस्थायां** मरणावस्थायाम्, **उपस्थितायां** प्राप्तायाम्, **भगवत्या** त्वया, **उपेत्य** उपागत्य, **अन्येषां** मद्भिन्नानाम्, **अल्पपुण्यानाम्** अनधिकपुण्यवताम्, **मानवानां** मनुष्याणाम्, **अदर्शनीयं** द्रष्टुमशक्यम्, पुनः **अशेषापायप्रशमनम्** अशेषाणां-समग्राणाम्, अपायानाम्-उपद्रवाणाम्, प्रशमनं-निवारणकारणम्, **दिव्यं** मनोहरम्, **आत्मीयं** स्वकीयम्, **इदं** प्रत्यक्षभूतम्, **रूपं** स्वरूपम्, **दर्शितं** मदीयदृष्टिपथमवतारितम्; **च** पुनः, **मनीषितवस्तुसिद्धिः** मनीषितस्य-मनोनीतस्य, अभिलषितस्येत्यर्थः, वस्तुनः सिद्धिः-निष्पत्तिः, **अभ्युपगता** स्वीकृता। हे देवि! **मे** मम, **अभिमतम्** अभिलषितम्, इदम् **उत्तमाङ्गं** शिरः, **त्वत्परिवाराग्रेसरस्य** भवत्परिवारप्रधानभूतस्य, पुनः **प्रयोजनवशात्** कार्यवशात्, **उपदर्शितार्थिभावस्य** उपदर्शितः-प्रकटितः, अर्थिभावः-तद्याच्ञा येन तादृशस्य, **महात्मनः** महानुभावस्य, **अमुष्य** तस्य, **नक्तञ्चरपतेः** दानवाधिपतेः, **दातुं** समर्पयितुम्, **परिकल्पितं** निश्चितम्। **अस्मिन्** शिरसि, **अर्धकल्पिते** अर्धे छिन्ने सति, **अकस्मात्** अकारणमेव, **अपगतपरिस्पन्दौ** निवृत्तचेष्टौ, **करौ** मदीयहस्तौ, केनापि **सन्दानिताविव** बद्धाविव, **अकिञ्चित्करौ** किमपि कर्तुमसमर्थौ,

स्वसामर्थ्यलाभो भवति भूयस्तथा प्रसीद, येनाहमनृणो भूत्वा निर्वाणमधिगच्छामि' [ड] । देव्यपि श्रीस्तेन तस्यातिमात्रकष्टायामपि दशायामनुज्झितावष्टम्भेन वचसा जनितविस्मयाऽवलोक्य तद्वाक्यश्रवणभावितानामभ्यर्णवर्तिनीनां सखीनामानन्दपुलकितानि वारं वारमास्यकमलानि द्विगुणजातपक्षपाता प्रीतिविकसिततरङ्गायतापाङ्गस्य चक्षुषः क्षरता क्षीरधवलेनांशुविसरेण सुधारसेनेवाप्याययन्ती हिमजलेनेव स्नापयन्ती मलयजाङ्गरागेणेव लिम्पन्ती मालतीमुकुलदामभिरिवाच्छादयन्ती मूर्च्छागमविलुप्तसंज्ञं राज्ञो वपुः पुनरवादीत—'नरेन्द्र ! बाढमविदितमत्स्वरूपोऽसि, तेनैवं वदसि, सर्वदा सौम्यपरिजनपरिवाराहम्, न मे नक्तञ्चराः संनिधावपि चरन्ति, दूरे भृत्यत्वम् । य एष विकृतवेषाकारधारी वेतालबुद्ध्याऽध्यवसितस्त्वया, नायं यातुधानः, प्रधानभूतो मत्प्रतीहाराणां महोदरो नाम यक्ष एषः, परीक्षितुमनेन सत्त्वमप्रतीक्षितमदीयागतिना झटित्यागत्य सत्याभासमिदमनेकप्रकारमात्मीयया दिव्यशक्त्या विनिर्मितं मायाजालमखिलमपि ते प्रदर्शितम्, अतस्त्यज विषादम्, उत्सृज मृषागृहीतमिममात्मविग्रहस्य निग्रहविधावाग्रहम्, ब्रूहि चात्मनोऽभिलाषम् । अनेन तव सर्वाति-

---

**टिप्पनकम्—निर्वाणं सुखम् [ ड ] ।**

---

**संवृत्तौ** संजातौ, **तत्** तस्मात्, **अनयोः** करयोः, **भूयः** पुनः, यथा **स्वसामर्थ्यलाभः** स्वशक्तिप्राप्तिः, **भवति** भवेत्, **तथा** तदर्थं **प्रसीद** अनुगृहाण, **येन** तदर्थत्वत्प्रसादेन, अहम्, **अनृणः** दानवाधिपयाचितार्थरूपादृणाद् विमुक्तः, **निर्वाणं** सुखम्, **अधिगच्छामि** प्राप्नोमि [ ड ] । **श्रीः** लक्ष्मीः, देव्यपि, **अतिमात्रकष्टायामपि** अतिकष्टात्मिकायामपि, **दशायाम्** अवस्थायाम्, मरणावस्थायामपीति यावत्, **अनुज्झितावष्टम्भेन** अनुज्झितः—अत्यक्तः, अवष्टम्भः—धैर्यं येन तादृशेन, धैर्यद्योतकेनेत्यर्थः, **वचसा** वचनेन, **जनितविस्मया** जनितः—उत्पादितः, विस्मयः—आश्चर्यं यस्यास्तादृशी, **तद्वाक्यश्रवणभावितानां** तद्वचनाकर्णनप्रसादितानाम्, **अभ्यर्णवर्तिनीनां** पार्श्ववर्तिनीनाम्, **सखीनां** सहचरीणाम्, **आनन्दपुलकितानि** तदीयधैर्यदर्शनानन्दरोमाञ्चितानि, **आस्यकमलानि** मुखारविन्दानि, **वारं वारम्** अनेकवारम्, अवलोक्य **द्विगुणजातपक्षपाता** द्विगुणोत्पन्नतद्रक्षणाभिनिवेशा सती, **प्रीतिविकसिततरङ्गायतापाङ्गस्य** प्रीत्या—प्रेम्णा, विकसितः—विस्तृतः, तरङ्गः—कान्तिप्रवाहो यस्य तादृशः, आयतः—दीर्घः, अपाङ्गः—नेत्रप्रान्तप्रदेशो यस्य तादृशस्य, चक्षुषः, **क्षीरधवलेन** दुग्धवच्छुभ्रेण, **क्षरता** प्रवहता **अंशुविसरेण** किरणकलापेन, **मूर्च्छागमविलुप्तसंज्ञं** मूर्च्छागमेन—मूर्च्छोद्भवेन, विलुप्ता—नष्टा, संज्ञा—चैतन्यं यस्य तादृशम्, **राज्ञः** मेघवाहननृपतेः, **वपुः** शरीरम्, **सुधारसेनेव** अमृतरसेनेव, **आप्याययन्ती** उज्जीवयन्ती, हिमजलेनेव **स्नापयन्ती** आह्लादयन्ती, **मलयजाङ्गरागेणेव** चन्दनद्रवेणेव, **लिम्पन्ती** लेपनं कुर्वती, **मालतीमुकुलदामभिरिव** मालतीकुड्मलमालाभिरिव, **मालतीकुसुमे**ति पाठे तत्कुसुममालाभिरिव, आच्छादयन्ती सती, पुनः, **अवादीत्** उक्तवती, किमित्याह—**नरेन्द्र ! बाढम्** अत्यन्तम्, **अविदितमत्स्वरूपोऽसि** अविदितम्—अज्ञातम्, मत्स्वरूपं येन तादृशोऽसि, **तेन** हेतुना, **एवम्** अनेन प्रकारेण, **वदसि** राक्षसाधिपतेर्मत्परिवारत्वं कथयसि, **सर्वदा** सर्वकाले, अहं **सौम्यपरिजनपरिवारा** सौम्याः—सात्त्विकाः, ये परिजनाः—आत्मीयजनाः, त एव परिवाराः—अनुचराः, सेवका इति यावत्, यस्यास्तादृशी, अस्मीति शेषः, **नक्तञ्चराः** राक्षसास्तु, **मे** मम, **सन्निधावपि** निकटेऽपि, न **चरन्ति** गच्छन्ति, **भृत्यत्वं** तेषु मम सेवकत्वं तु दूरे, अस्त्विति शेषः । यः **विकृतवेषाकारधारी** बीभत्सवेषाकृतिमान्, एषः, **वेतालबुद्ध्या** अयं वेताल इति बुद्ध्या, त्वया **अध्यवसितः** निश्चितः, **अयं** सोऽयम्, **यातुधानः** वेतालः, न, अस्तीति शेषः, किन्तु **मत्प्रतीहाराणां** मदीयद्वारपालानाम्, **प्रधानभूतः** अधिनायकभूतः, **महोदरो नाम** महोदरसंज्ञकः, **यक्षः** सौम्यदेवजातीयः, **अप्रतीक्षितमदीयागतिना** अप्रतीक्षिता—अनपेक्षिता, मदीया—मामिका, आगतिः—आगमनं येन तादृशेन, मदागमनादर्वागेवेत्यर्थः, **अनेन** यक्षेण, **सत्त्वं** भवत्पराक्रमम्, परीक्षितुम्, **झटिति** शीघ्रम्, **आगत्य** उपस्थाय, **आत्मीयया** स्वकीयया, **दिव्यशक्त्या** अलौकिकशक्त्या, **विनिर्मितं** प्रकल्पितम्, **सत्याभासं** सत्यवदवभासमानम्, वस्तुतोऽसत्यमिति यावत्, **अनेकप्रकारं** विविधप्रकारम्, **अखिलमपि** सर्वमपि, **इदं** प्रत्यक्षभूतम्, **मायाजालम्** इन्द्रजालम्, **ते** तव, **प्रदर्शितं** दृष्टिपथमवतारितम् । **अतः** तदसत्यत्वहेतोः, **विषादं** खेदम्, **त्यज** मुञ्च । **आत्मविग्रहस्य** स्वशरीरस्य, **निग्रहविधौ** हत्यात्मककार्ये, **मृषा गृहीतं** वृथैव कृतम्, इमम्, **आग्रहम्** अभिनिवेशम्, **उत्सृज** परित्यज । **च** पुनः, **आत्मनः** स्वस्य, **अभिलाषं** मनोरथम्, **ब्रूहि** कथय । **सर्वातिशायिना** सर्वोत्कृष्टेन,

शायिना सत्त्वेन साहसेन धैर्येण चित्तौदार्येण प्रज्ञाविशेषेण पूजाविशेषेण निःशेषितप्रमादनिर्मलेन च व्रतचरणेन चन्द्रमण्डलमिव शिशिरात्ययेन, मानससरस्तोयमिवागस्त्योदयेन, सुकविकाव्यमिव सज्जनपरिग्रहेण, गगनतलमिव शरत्कालागमेन, सप्रसादमपि किमपि मे प्रसादितं हृदयम् [ ढ ] । आचक्ष्व कार्यं विचक्षण!, किमद्य ते संपादयामि ? किं तावन्मदनुभावासादितदिव्यशक्तिः प्रत्यहमितो गत्वा गृहीतविकटप्रसाधनशुद्धान्तवनितावृन्दपरिवृतः कनकगिरिकन्दरप्रभानुलिप्तपादपेषु कल्पतरुतलनिषण्णकिन्नरारब्धगान्धारग्रामगीतिरमणीयेष्वितस्ततःप्रवृत्तमुखरमन्दाकिनीस्रोतःसरणिसिच्यमानबालपारिजातालवालकेषु सविभ्रमभ्राम्यदभ्रमूकलभकरावभज्यमानसंतानकसरसपल्लवेषु हरिचन्दनलतागृहोदरप्रसुप्तसुरतखिन्नसुरवनिताभिनन्द्यमानमन्दानिलानीतशीतलसुधाकुण्डशीकरेषु नन्दनवनाभ्यन्तरेषु सविस्मयत्रिदशबालिकावलोकितः क्रीडासुखमनुभवसि ? [ ण ] ।

---

**टिप्पनकम्—अभ्रमूः**—ऐरावणभार्या [ ण ] ।

---

**अनेन** अनुभूयमानेन, तव, **सत्त्वेन** पराक्रमेण, **साहसेन** दुष्करकर्मणा, धार्ष्ट्येन वा, **धैर्येण** अकातरत्वेन, **चित्तौदार्येण** हृदयोदारभावेन, **प्रज्ञाविशेषेण** प्रज्ञोत्कर्षेण, **पूजाविशेषेण** श्रद्धोत्कर्षेण, **निःशेषितप्रमादनिर्मलेन** निःशेषितः—अनवशेषितः, यः प्रमादः—अनवधानम्, तेन निर्मलेन—विशुद्धेन, **व्रतचरणेन** नियमाचरणेन, **सप्रसादमपि** स्वतः प्रसन्नमपि, **मे** मम, हृदयं **किमपि** सातिशयम्, **प्रसादितं** प्रसन्नतामापादितम् । केन किमिव ? **शिशिरात्ययेन** शिशिरऋतोरपगमेन, वसन्तऋतोरागमनेनेति यावत्, चन्द्रमण्डलमिव, पुनः **अगस्त्योदयेन** अगस्त्याख्यनक्षत्रोद्गमेन, **मानससरस्तोयमिव** मानसाख्यसरोवरस्य जलमिव, पुनः **सज्जनपरिग्रहेण** प्रतिपादकतया सत्पुरुषसम्बन्धेन, **सुकविकाव्यमिव** सत्कविकृतिरिव, पुनः **शरत्कालागमेन** शरदृतुप्रादुर्भावेन, **गगनतलमिव** आकाशमण्डलमिवेत्युपमामालालङ्कारः । **हे विचक्षण!** प्राज्ञ! अद्य, **ते** तव, त्वदभिवाञ्छितम्, किं **कार्यं** कृत्यं, **सम्पादयामि** करोमि [ ढ ] **आचक्ष्व** कथय । **तावदिति** वाक्यालङ्कारे, **मदनुभावात्** मत्प्रभावात्, **आसादितदिव्यशक्तिः** प्राप्तालौकिकशक्तिः सन्, **इतः** अस्माल्लोकाद्, गत्वा, **गृहीतविकटप्रसाधनशुद्धान्तवनितावृन्दपरिवृतः** गृहीतानि, विकटानि—प्रकटानि, महोज्ज्वलानीति यावत्, प्रसाधनानि—आभरणानि याभिस्तादृशीनाम्, शुद्धान्तवनितानाम्—अन्तःपुरस्त्रीणाम्, वृन्देन—मण्डलेन, परिवृतः—परिवेष्टितः, **प्रत्यहं** प्रतिदिनम्, **नन्दनवनाभ्यन्तरेषु** नन्दनाख्येन्द्रवनमध्येषु, **सविस्मयत्रिदशबालिकावलोकितः** सविस्मयं—साश्चर्यं यथा स्यात् तथा, त्रिदशबालिकाभिः—देवकन्यकाभिः, अवलोकितः—निरीक्षितः, त्वमिति शेषः, **क्रीडासुखं** विहारजन्यमानन्दम्, **अनुभवसि** अनुभविष्यसि किम्?, कीदृशेषु नन्दनवनाभ्यन्तरेषु ? **कनकगिरिकन्दरप्रभानुलिप्तपादपेषु** कनकगिरेः—सुमेरुपर्वतस्य, ये कन्दराः—गुहाः, तेषां प्रभाभिः—कान्तिभिः, अनुलिप्ताः—व्याप्ताः, पादपाः—वृक्षा येषु तादृशेषु; पुनः **कल्पतरुतलनिषण्णकिन्नरारब्धगान्धारग्रामगीतिरमणीयेषु** कल्पतरुतलेषु—कल्पवृक्षाधोभागेषु, निषण्णैः—उपविष्टैः, किन्नरैः—गायकदेवजातीयैः, आरब्धा—प्रारब्धा, गान्धारः—गन्धानां समूहो गान्धम्, तत् इयर्ति—प्राप्नोतीत्यन्वर्थस्तदाख्यः "वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः । नानागन्धवहः पुण्यैर्गान्धारस्तेन हेतुना ॥" इत्यन्यत्रोक्तः स्वरविशेषो रागविशेषो वा, ग्रामो नाम—"यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥" इत्यन्यत्रोक्तः स्वरसन्दोहः, ताभ्यां या गीतिस्तया रमणीयेषु—मनोहरेषु; पुनः **इतस्ततः प्रवृत्तमुखरमन्दाकिनीस्रोतःसरणिसिच्यमानबालपारिजातालवालकेषु** इतस्ततः—यतस्ततः, प्रवृत्ताः—गङ्गातो निर्गताः, मुखराः—शब्दायमानाः, या मन्दाकिन्याः—गङ्गासम्बन्धिन्यः; स्रोतः—प्रवाह एव, सरणिः—मार्गो यासां ताः स्रोतःसरणयः, नद्यः, क्षुद्रनद्य इति यावत्, ताभिः सिच्यमानानि आप्लाव्यमानानि, बालपारिजातानाम्—अभिनवोद्भिन्नदेवद्रुमविशेषाणाम्, आलवालानि—मूलरचितजलाधारस्थलानि येषु तादृशेषु; पुनः **सविभ्रमभ्राम्यदभ्रमूकलभकरावभज्यमानसन्तानकसरसपल्लवेषु** सविभ्रमं—सविलासं यथा स्यात् तथा, भ्राम्यन्तः—विहरन्तः, ये अभ्रमूकलभाः—दिव्यहस्तिशिशवः, तेषां करैः—शुण्डादण्डैः, अवभज्यमानानि—छिद्यमानानि, सन्तानकानां—देववृक्षविशेषाणाम्, सरसानि—रसवन्ति, पल्लवानि—नवदलानि येषु तादृशेषु; पुनः **हरिचन्दनलतागृहोदरप्रसुप्तसुरतखिन्नसुरवनिताभिनन्द्यमानमन्दानिलानीतशीतलसुधाकुण्डशीकरेषु**

अथाधुनैवाधिगतविद्याधरेन्द्रभावः संकल्पानन्तरोपनतमनल्पवातायनसहस्रालंकृतममलचीनांशुकवितानलम्बमानमुग्धमौक्तिकप्रालम्बमनिलदोलायमानद्वारवन्दनमालाप्रवालमुपहारकुसुमसौरभान्धमधुकरझङ्कारमुखरमणिकुट्टिमं विमानमधिरुह्य विदग्धवल्लभाप्तसुहृत्कदम्बकानुयातो विलोकयन् विविधान्याश्चर्याणि सशैलद्वीपकाननामुदधिमर्यादां मेदिनीं पर्यटसि ? [ त ] । अथ मदीयप्रार्थनामुदितपुरन्दरानुमोदितेन भरतमुनिना स्वयमागत्य सूत्रितमनाहतध्वनन्मेघमुरजमनोहरमेकदेशोपविष्टतुम्बुरुताड्यमानवीणारणद्गान्धारग्राममागृहीतवेणुकिन्नरगणोप-

---

**टिप्पनकम्**—चन्द्रशाला–शिरोगृहम् [ थ ] ।

---

हरिचन्दनलतागृहाणां–देववृक्षविशेषमण्डपानाम्, उदरेषु–मध्यभागेषु, प्रसुप्ताभिः–गाढनिद्रिताभिः, सुरतखिन्नाभिः–मैथुनश्रान्ताभिः, सुरवनिताभिः–देवाङ्गनाभिः, अभिनन्द्यमानाः–स्तूयमानाः, मन्दानिलानीताः–मन्दानिलेन–मन्दपवनेन, आनीताः–आहृताः, शीतलसुधाकुण्डानां–शीतामृताशयानाम्, शीकराः–कणाः, येषु तादृशेषु [ ण ] ।

अथ **अधुनैव** सद्य एव, **अधिगतविद्याधरेन्द्रभावः** अधिगतः–प्राप्तः, विद्याधरेन्द्रभावः–विद्याधराधिपत्यं येन तादृशः, त्वमिति शेषः, **संकल्पानन्तरोपनतं** संकल्पानन्तरं–कामनाव्यवहितोत्तरक्षणे, उपनतं–स्वयमुपस्थितम्, पुनः **अनल्पवातायनसहस्रालङ्कृतम्** अनल्पानां–विविधानाम्, वातायनानां–गवाक्षाणाम्, सहस्रेण अलङ्कृतं–विभूषितम्, पुनः **अमलचीनांशुकवितानलम्बमानमुग्धमौक्तिकप्रालम्बम्** अमलाः–स्वच्छाः, ये चीनांशुकवितानाः–चीनदेशोद्भवसूक्ष्मवस्त्रनिर्मिता वितानाः–उल्लोचाः, तेषु लम्बमानानि–अवनमन्ति, मुग्धानां–मनोहराणाम्, मौक्तिकानाम्, प्रालम्बानि–माल्यानि यस्मिंस्तादृशम्, पुनः **अनिलदोलायमानद्वारवन्दनमालाप्रवालम्** अनिलेन–वायुना, दोलायमानानि–व्याधूयमानानि, द्वारवन्दनमालायाः–द्वारस्य सम्बन्धिन्याः, वन्दनमालायाः–माङ्गल्यमालायाः, प्रवालानि–पल्लवानि यस्मिंस्तादृशम्, पुनः **उपहारकुसुमसौरभान्धमधुकरझङ्कारमुखरमणिकुट्टिमम्** उपहारभूतानां–लोकैरुपहृतानाम्, कुसुमानाम्, सौरभेण–सौगन्ध्येन, अन्धाः–अन्धीभूताः, व्यामोहिता इति यावत्, ये मधुकराः–भ्रमराः, तेषां झङ्कारेण–ध्वनिना, गुञ्जितेनेति यावत्, मुखरं–शब्दायमानम्, मणिकुट्टिमं–मणिबद्धभूमिर्यस्मिंस्तादृशम्, **विमानं** व्योमयानम्, **अधिरुह्य** आरुह्य, **विदग्धवल्लभानां** चतुरप्रेयसीनाम्, **आप्तसुहृदां** विश्वस्तमित्राणां च, **कदम्बेन** समूहेन, **अनुयातः** अनुसृतः, सहित इति यावत्, **विविधानि** अनेकविधानि, **आश्चर्याणि** अद्भुतानि वस्तूनि कार्याणि वा, **विलोकयन्** कौतुकेन पश्यन्, **सशैलद्वीपकाननां** शैलैः–पर्वतैः, द्वीपैः–जलमध्यवर्तिप्रदेशैः, काननैः–वनैश्च, सहिताम्, **मेदिनीं** पृथिवीम्, **पर्यटसि** वर्तमानसमीपे विहरिष्यसि किम् ? [ त ] । **अथ** किं वा, **उन्नतप्रासादशिखरचन्द्रशालायाम्** उन्नतस्य–गगनचुम्बिनः, प्रासादस्य–राजमन्दिरस्य, शिखरे शृङ्गे, या चन्द्रशाला–शिरोगृहं तत्र, "चन्द्रशाला शिरोगृहम्" इत्यमरः, **रचितरङ्गभूमिः** रचिता–कल्पिता, रङ्गभूमिः–नाट्यशालास्थानं येन तादृशः सन्, **अवसरेषु** नाट्यदर्शनावसरेषु, **द्रष्टुं** नाट्यदर्शनार्थम्, **आगतानाम्** उपस्थितानाम्, **अष्टादशद्वीपमेदिनीपतीनाम्** अष्टादशद्वीपसम्बन्धिनां मेदिनीपतीनां–नृपतीनाम्, तादृशनृपतीनित्यर्थः, षष्ठ्याः सम्बन्धसामान्यार्थकत्वात्, **दिव्यं** स्वर्गीयं मनोहरं वा, **प्रेक्षाविधिं** नाट्यविधिम्, **दर्शयसि** वर्तमानसमीपे दर्शयिष्यसि ?, कीदृशं तम् ? **मदीयप्रार्थनामुदितपुरन्दरानुमोदितेन** मदीयया प्रार्थनया–भरतमुनिप्रेक्षणाभ्यर्थनया, मुदितेन–प्रसन्नेन, पुरन्दरेण–इन्द्रेण, अनुमोदितेन–अनुमतेन, **भरतमुनिना** तदाख्यनाट्याचार्यवर्येण, **स्वयं** स्वेनैव, **आगत्य** मर्त्यलोकमवतीर्य, **सूत्रितं** प्रवर्तितम्, पुनः **अनाहतध्वनन्मेघमुरजमनोहरम्** अनाहताः–अताडिता एव ध्वनन्तो ये मेघमुरजाः–मेघनादा मुरजा मृदङ्गाः, तैर्मनोहरं रम्यम्; पुनः **एकदेशोपविष्टतुम्बुरुताड्यमानवीणारणद्गान्धारग्रामम्** एकदेशे–नाट्यशालैककोणे, उपविष्टैः–आसितैः तुम्बुरुभिः–गन्धर्वविशेषैः ताड्यमानाभिः–अभिहन्यमानाभिः, वीणाभिः, रणन्तौ–ध्वनन्तौ, गान्धारग्रामौ–गान्धारो रागविशेषः, ग्रामः–स्वरसन्दोहः, तौ यस्मिंस्तादृशम्; पुनः **आगृहीतवेणुकिन्नरगणोपगीयमानविबुधसद्मप्रसिद्धमूर्च्छनम्** आ–समन्ताद्, गृहीताः–धृताः, वेणवः–वंशीसंज्ञकवाद्यविशेषा येन तादृशेन, किन्नरगणेन–दिव्यगायकजातीयगणेन, उपगीयमाना–गायनेनाभिव्यज्यमाना, विबुधसद्मप्रसिद्धा–स्वर्गलोकविश्रुता, मूर्च्छना–"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते । मूर्च्छनामिति तां प्राहुः कवयो ग्रामसम्भवाम् ॥" इत्यभियुक्तजनपरि-

गीयमानविबुधसद्मप्रसिद्धमूर्च्छनमुद्विलासरम्भाभिनीयमानरघुपुरस्सरादिभूपालचरितमुन्नतप्रासादशिखरचन्द्रशालायां रचितरङ्गभूमिरवसरेषु द्रष्टुमागतानामष्टादशद्वीपमेदिनीपतीनां दर्शयसि दिव्यं प्रेक्षाविधिम्? [थ]। किं बहुना, अन्यदपि यत् ते मनसि वर्तते तत् सर्वमावेदय, येनाचिरात् संपादयामि' इति वादिनीमेव तां नरपतिरुपजातसंमदः सप्रश्रयमवादीत्—'देवि! सर्वमुपपन्नमेतत्, किं न संभाव्यते, प्रणतसुरसहस्रमौलिविश्रान्तपादः पुरन्दरोऽपि देवस्त्वत्प्रसादादासादयति सुरलोकराज्यसुखानि, वासुकिरपि त्वयि सानुरागायामुरगकामिनीचामरकलापोपवीज्यमानतनुः पालयति पातालनगराणि, कुबेरोऽपि त्वत्संनिधानान्निधीनां नाथो जातः, सागरोऽपि त्वयि संभूतायां रत्नाकरत्वमुपगतः। तिष्ठन्तु चैते। नीचप्रकृतयोऽपि त्वया परिगृहीता जगति गुरुतां परामागता दृश्यन्ते, तथाहि—प्राणिविशेषास्थिशकलमपि मुख्यः पावनानां शङ्खः, भुजङ्गकुलसङ्गदूषितमपि वन्द्यं

---

**टिप्पनकम्**—**सप्रश्रयं** सविनयम्। **भुजङ्गकुलसङ्गदूषितमपि** एकत्र भुजङ्गः–षिङ्गः, अन्यत्र सर्पः; **प्राकृतजनगृहीतदण्डमपि** एकत्र दण्डः–करः, अन्यत्र यष्टिः; **असकृदासादितकलङ्कः** एकत्र कलङ्कः–मलः, अन्यत्र परिवारः; **तिर्यञ्चलोऽपि** अशुचिरपि, अन्यत्र स्वरूपकथनम् [ द ]।

---

भाषितो ग्रामोत्तरकालिकस्वरावस्थाविशेषो यस्मिंस्तादृशम्, पुनः **उद्विलासरम्भाभिनीयमानरघुपुरस्सरादिभूपालचरितम्** उद्विलासाभिः–उत्–उद्भूतः, विलासः–शृङ्गारचेष्टाविशेषो यासां तादृशीभिः, रम्भाभिः–दिव्यवेश्याभिः, अभिनीयमानानि–अभिनयैः–चेष्टाविशेषैः, अभिव्यज्यमानानि, अनुक्रियमाणानीति यावत्, रघुपुरस्सराणां–रघुप्रभृतीनाम्, आदिभूपालानां–प्राचीननृपतीनाम्, चरितानि–चरित्राणि यस्मिंस्तादृशम् [ थ ]। **किं बहुना** अलमधिकप्रश्नेन, **ते** तव, **मनसि** हृदये, यत् **अन्यदपि** उक्तेभ्योऽतिरिक्तमपि, अभिमतकार्यमिति शेषः, **वर्तते** अस्ति, तत् **सर्वम्** अशेषम्, **आवेदय** विज्ञापय, **येन** यस्मात् कारणात्, **अचिरात्** शीघ्रम्, **सम्पादयामि** साधयामि। **नरपतिः** मेघवाहनः, **उपजातसम्मदः** उत्पन्नप्रमोदः सन्, **इतिवादिनीमेव** उक्तपूर्वाभिधायिनीमेव, **तां** लक्ष्मीदेवीम्, **सप्रश्रयं** सविनयम्, **अवादीत्** उक्तवान्, किमित्याह–**देवि!** भगवति!, **एतत्** उक्तपूर्वम्, सर्वम्, **उपपन्नं** युक्तम्, निश्चितमिति यावत्, **किं न सम्भाव्यते?** सर्वमेवेत्यर्थः, **प्रणतसुरसहस्रमौलिविश्रान्तपादः** प्रणताः–पादयोर्निपतिताः, ये सुराः–देवाः, तेषां सहस्रस्य, मौलिषु–मस्तकेषु, विश्रान्तौ–स्थितौ, पादौ–चरणौ यस्य तादृशः, देवाधिपोऽपीत्यर्थः, **पुरन्दरः** इन्द्रः, **त्वत्प्रसादात्** त्वदनुग्रहादेव, **सुरलोकराज्यसुखानि** स्वर्गलोकाधिपत्यसौख्यानि, **आसादयति** प्राप्नोति। किञ्च, **वासुकिरपि** सर्पाधिपोऽपि, **त्वयि** भगवत्याम्, **सानुरागायाम्** अनुरक्तायां सत्यामेव, **उरगकामिनीचामरकलापोपवीज्यमानतनुः** उरगकामिनीभिः–भुजङ्गभार्याभिः, चामरकलापेन–चामरपुञ्जेन, उपवीज्यमाना–समीपे वीज्यमाना, तनुः–शरीरं यस्य तादृशः, **पातालनगराणि** अधोभुवनपुराणि, **पालयति** रक्षति। **कुबेरोऽपि** उत्तरदिक्पालोऽपि, **त्वत्सन्निधानात्** त्वत्साहचर्यादेव, **निधीनाम्**, "महापद्मश्च पद्मश्च शङ्खो मकर-कच्छपौ। मुकुन्द कुन्दनीलाश्च खर्वश्च निधयो नव॥" इति परिगणितनवप्रकाराणां कोषाणाम्, **नाथः** अधिपतिः, **जातः** संवृत्तः। त्वयि **सम्भूतायाम्** अविर्भूतायामेव, **सागरोऽपि** समुद्रोऽपि, **रत्नाकरत्वं** रत्नखनित्वम्, **उपगतः** प्राप्तः। **एते** पुरन्दरादय उच्चप्रकृतयो व्यक्तयः, **तिष्ठन्तु** पृथक् सन्तु। **नीचप्रकृतयोऽपि** तुच्छस्वभावका अपि पदार्थाः, त्वया **परिगृहीताः** प्रीतिगोचरतां गमिताः, **जगति** लोके, **परां** महतीम्, **गुरुतां** गौरवम्, **आगताः** प्राप्ताः **दृश्यन्ते** अनुभूयन्ते, तानेव विशिष्य दर्शयति–**तथाहीति**। **प्राणिविशेषास्थिशकलमपि** प्राणिविशेषस्य–कस्यचिज्जीवविशेषस्य, यद् अस्थि, तस्य शकलमपि–खण्डभूतोऽपि, पक्षे प्राणिविशेषस्य–द्वीन्द्रियप्राणिनः–शङ्खस्य द्वीन्द्रियप्राणित्वेन प्रसिद्धेः, **शङ्खः** तदाख्ययाख्यातः समुद्रजातवस्तुविशेषः, **पावनानां** पवित्रवस्तूनां मध्ये, **मुख्यः** शुभ्रत्वदक्षिणावर्ततारध्वनिप्रसवित्वादिगुणाश्रया प्रधानः, अभूदिति शेषः, एवं **भुजङ्गकुलसङ्गदूषितमपि** भुजङ्गकुलस्य–जारसमाजस्य, पक्षे सर्पसन्दोहस्य, सङ्गेन–अनवरतसम्पर्केण, दूषितमपि–दुराचारदोषकलितमपि, पक्षे प्राणसन्देहजननदोषकलितमपि, **चन्दनं** श्रीखण्डद्रुमः, **वन्द्यं**

चन्दनम्, प्राकृतजनगृहीतदण्डमपि छायार्थिभिरुत्तमाङ्गोपरिस्थं धार्यते छत्रम्, असकृदासादितकलङ्कोऽपि हरिणाङ्कधवलस्य यशसो भाजनं करवालः, तिर्यङ्मलोऽपि गोमयो हरितः श्लाघ्यः [ द ]। किं च वर्ण्यते? क्षीरजलधिगर्भसंभवाद्द्वितीया कामधेनुस्त्वम्, सुरद्रुमसहवासिनी जङ्गमा कल्पलता, चक्रवर्तिचक्रकृतार्चना चेतनश्चिन्तामणिः, किं न प्रयच्छसि प्रसन्ना प्रणयिनाम्, किं वा न विदधासि कल्याणमाराध्यमानाऽनुजीविनाम्। यद्यपि त्वया कथञ्चिदुपजातकृपया मनोरथानामप्यपथभूताः सकललोकहृदयहारिणः सुप्रसादसदृशाः पृथक्पृथग्दर्शिताः समृद्धिविशेषाः, तथाप्येतेषु नास्ति मेऽभिलाषः, अमुनैव पूर्वपुरुषप्रभावोपार्जितेन विभवलेशेन कृतार्थोऽहम्, न मे प्रयोजनं दिव्यजनोचितैरुपभोगैः। अथ येन केनचित् प्रकारेणानुग्राह्योऽयं जनो ग्राहयितव्यश्च कमप्यभिप्रेतमर्थम्, तदलमन्येनेदमेव प्रार्थिताऽसि—यथाहमेषामशेषभुवनवन्दितावदातचरि-

---

तापोपशमनादिगुणश्रिया अभिवाद्यं स्तुत्यं वा, अभूत्। **प्राकृतजनगृहीतदण्डमपि** प्राकृतजनेन–साधारणजनेन, गृहीतः–आत्तः, पक्षे हस्तावलम्बितः, दण्डः–करः, पक्षे आधारभूतयष्टिः–यस्य तादृशमपि, **छत्रम्** आतपत्रम्, **छायार्थिभिः** छायाभिलाषिभिः, आतपादात्मानं रक्षितुकामैर्लोकैरित्यर्थः, **उत्तमाङ्गोपरिस्थं** तापनिवारणादिगुणश्रिया मस्तकोपरिस्थम्, **धार्यते** गृह्यते, क्रियत इत्यर्थः। **असकृदासादितकलङ्कोऽपि** असकृत्–मुहुर्मुहुः, आसादितः–प्राप्तः, कलङ्कः–अपवादः, पक्षे लोहमलो येन तादृशोऽपि, **करवालः** खड्गः, रक्षणादिगुणश्रिया, **हरिणाङ्कधवलस्य** चन्द्रवदुज्ज्वलस्य, **यशसः** शौर्यादिख्यातेः, **भाजनम्** आधारः, भवतीति शेषः। एवं **तिर्यङ्मलोऽपि** तिरः–तिरस्कारम्, अञ्चति–गच्छतीति तिर्यङ्, तिरस्कारास्पदमित्यर्थः, मलोऽपि–पुरीषस्वरूपोऽपि, पक्षे तिरश्चः–गोरूपपशोः, मलोऽपि–मलस्वरूपोऽपि गोमयः, भ्रमरिकाविषवारणादिगुणश्रिया, **श्लाघ्यः** प्रशंसनीयः, अभूदिति शेषः [ द ]। किं **च वर्ण्यते** नाधिकं वर्णयितुं पार्यते। **क्षीरजलधिगर्भसम्भवात्** क्षीरजलधेः–क्षीरसागरस्य, गर्भात्–उदरसकाशात्, यः सम्भवः–उद्भवः, तस्माद्धेतोः, त्वं **द्वितीया** अपरा, **कामधेनुः** कामगवी, कामधेनोरपि लक्ष्म्या सहैव क्षीरोदधेरुद्भवस्य प्रसिद्धेः, एवं **सुरद्रुमसहवासिनी** सुरद्रुमेण–कल्पवृक्षेण, सहवासिनी–क्षीरोदधिरूपैकाधिकरणवासिनी, **जङ्गमा** गमनशीला, **कल्पलता** कल्पवल्ली, त्वमित्यनुवर्तते पूर्वतः। एवं **चक्रवर्तिचक्रकृतार्चना** चक्रवर्तिनां–खण्डषट्कावच्छिन्नपृथिवीपतीनाम्, चक्रेण–समूहेन, कृतं–विहितम्, अर्चनं–पूजनं यस्यास्तादृशी, त्वं **चेतनः** चैतन्यशाली, **चिन्तामणिः** तदाख्यमणिविशेषः, अत्र सर्वत्र असीतिक्रियापदाध्याहारः। **प्रसन्ना** प्रीता सती, **प्रणयिनां** प्रीतिमताम्, किं न **प्रयच्छसि**? ददासि? सर्वमेवेत्यर्थः, **वा** अथवा, **आराध्यमाना** अर्च्यमाना सती, **अनुजीविनाम्** आराधकानाम्, किं **कल्याणं** मङ्गलं, न **विदधासि**? करोषि? सर्वविधमेवेत्यर्थः। यद्यपि **कथञ्चित्** केनापि प्रकारेण, **उपजातकृपया** उपजाता–उत्पन्ना, कृपा–अनुग्रहो यस्यास्तादृश्या, त्वया, **मनोरथानामपि** अभिलाषाणामपि, **अपथभूताः** अविषयभूताः, **सकललोकहृदयहारिणः** सर्वजनहृदयाकर्षणशीलाः, **सुप्रसादसदृशाः** स्वकीयसम्यक्प्रसादानुरूपाः, **समृद्धिविशेषाः** उक्तविशिष्टविशिष्टसमृद्धयः, **पृथक् पृथक्** असंकीर्णप्रकारेण, **दर्शिताः** मदीयलिप्साजिज्ञासनमुखेनोपस्थापिताः, तथापि **एतेषु** उक्तपूर्वसमृद्धिविशेषेषु, **मे** मम, **अभिलाषः** लिप्सा, नास्ति, किन्तु अहं **पूर्वपुरुषप्रभावोपार्जितेन** स्वपूर्वपुरुषप्रतापोपनीतेन, **विभवलेशेन** अल्पविभवेन, **कृतार्थः** सन्तुष्टः, अस्मीति शेषः, **दिव्यजनोचितैः** देवजनयोग्यैः, **उपभोगैः** समृद्धिसुखोपभोगैः, **मे** मम, न प्रयोजनम्, किमपीति शेषः। **अथ** अनन्तरम्, **येन केनचित् प्रकारेण** कयाऽपि रीत्या, **अयं** भगवत्याः पुरस्ताद् वक्ता, **जनः** अहमित्यर्थः, **अनुग्राह्यः** अनुग्रहीतुं योग्यः, **च** पुनः, **कमपि** अनिर्दिष्टनामानम्, **अर्थं** वस्तु, **ग्राहयितव्यः** प्रापयितव्यः। तत् किं किं वस्त्विति जिज्ञासायामाह–**अनेन** वस्त्वन्तरेण, **अलं** नास्ति प्रयोजनम्, किन्तु **इदमेव** अनुपदवक्ष्यमाणमेव वस्तु, **प्रार्थिताऽसि** मया याचिताऽसि। किमित्याह–**अहं** मेघवाहनः, **इक्ष्वाकुवंश्यानाम्** इक्ष्वाकुवंशोत्पन्नानाम्, **अवनीभृतां** राज्ञाम्, **पश्चिमः** पश्चाद्भवः, अन्त्यः, अधम इति यावत्, **यथा** येन प्रकारेण, न **भवामि** भवेयम्, कीदृशानां तेषाम्? **अशेषभुवनवन्दितावदातचरितानाम्** अशेषभुवनेन–निखिलजगता, वन्दितानि–स्तुतानि, अवदातानि–विशुद्धानि, पवित्राणीति यावत्, चरि-

तानां चतुरुदधिवेलावधिवसुन्धराभुजामखिलदिङ्मुखविसर्पितोदग्रप्रतापतया तुलितनिजवंशादिपुरुषादित्ययशसामिक्ष्वाकुवंश्यानामवनीभृतां पश्चिमो न भवामि, यथा च देवी मदिरावती जगदेकवीरात्मजप्रसविनीनामस्मत्पूर्वपुरुषमहिषीणां महिमानमनुविधत्ते, तथा विधेहि [ ध ], इत्यभिधाय लज्जया किञ्चिदवनतमुखोऽभवत् । देव्यपि श्रीरीषदवनमितवदनतामरसाऽस्य वचसो विचिन्वती तात्पर्यमुज्झितापाङ्गनिस्तरङ्गतारकेण चक्षुषा क्षणमात्रमतिष्ठत् । मुहूर्ताच्च किञ्चिदुन्नमितवदना शरज्ज्योत्स्नाविशदेन दशनांशुजालकेन स्वमनसः प्रसादमिव दर्शयन्ती मन्दं मन्दं विजहास, व्याजहार, च—'नरेन्द्र ! निजगोत्रसंततेरविच्छेदाय मदिरावत्याः पुत्रमिच्छसीति निश्चितं मया, केवलमिदं पृच्छामि—किमेष वक्रया वचनभङ्ग्या युक्तिगम्यः कृतोऽर्थः, पुत्रं देहि मदिरावत्या इति व्यक्तमेव किं नोक्तम्, अन्यथोक्ते कुतोऽपि वृत्तान्तमुपलभ्य समुपजातेर्ष्याः कदर्थयिष्यन्ति मामन्या अपि प्रणयिन्य इति कच्चिदाशङ्का ? न कश्चिदत्रास्ति दुर्जनः प्रतिपक्षो वा तवास्मत्परिजने, यस्तासां निवेदयिष्यति, एको महोदरः प्रयत्नेन रक्षणीयः, तेन त्वीदृशेष्वतिनिपुणदृष्टिना गोपितोऽपि

---

तानि—चरित्राणि येषां तादृशानाम्, पुनः **चतुरुदधिवेलावधिवसुन्धराभुजां** चतुर्णां—पूर्वपश्चिमोत्तरदक्षिणानाम्, उदधीनां या वेलाः—तटाः, ता एवावधयः—सीमानो यस्यास्तादृश्याः, वसुन्धरायाः—पृथिव्याः, भुजां—पालकानाम्, पुनः **अखिलदिङ्मुखविसर्पितोदग्रप्रतापतया** अखिलेषु—समस्तेषु, दिङ्मुखेषु—दिक्कोणेषु, विसर्पितः—प्रसारितः, उदग्रः—उत्कृष्टः, प्रतापो येन तादृशतया, **तुलितनिजवंशादिपुरुषादित्ययशसां** तुलितः—उपमितः, निजवंशस्य—स्वकुलस्य, आदिपुरुषः—प्रथमपुरुषभूतः, आदित्ययशाः—तन्नामको राजा यैः, यद्वा तुलितं निजवंशादिपुरुषस्य आदित्यस्य—सूर्यस्य यशो यैस्तादृशानाम् । **च** पुनः, **यथा** येन प्रकारेण, **देवी** राज्ञी मदिरावती, **जगदेकवीरात्मजप्रसविनीनां** जगति—लोके, एकवीराः—अद्वितीयवीराः, ये आत्मजाः—सुताः, तत्प्रसविनीनां— तदुत्पादयित्रीणाम्, **अस्मत्पूर्वपुरुषमहिषीणाम्** अस्माकं पूर्वे—प्राचीनाः, ये पुरुषाः, तेषां महिषीणां—पट्टराज्ञीनाम्, महिमानं—माहात्म्यम्, **अनुविधत्ते** अनुसरति, अनुकरोतीत्यर्थः, **तथा** तेन प्रकारेण, **विधेहि** कुरु [ ध ] । **इति** इत्थम्, **अभिधाय** उक्त्वा, **लज्जया** लज्जावशेन, **किञ्चित्** ईषत्, **अवनतमुखः,** नम्रमुखः, **अभवत्** बभूव । **श्रीः** लक्ष्मीः, देव्यपि, **ईषदवनतवदनतामरसा** ईषदवनतं—किञ्चिदवनतम्, वदनतामरसं—मुखकमलं यस्यास्तादृशी सती, **अस्य** मेघवाहनेनानुपदमुदीरितस्य, **वचसः** वाक्यस्य, **तात्पर्यम्** अभिप्रायम्, **विचिन्वती** आलोचयन्ती, **उज्झितापाङ्गनिस्तरङ्गतारकेण** उज्झितः—त्यक्तः, योऽपाङ्गः—नेत्रप्रान्ततिर्यक्सञ्चारः, तेन निस्तरङ्गा निश्चला, तारका—कनीनिका यस्य तादृशेन, **चक्षुषा** नेत्रेण, **क्षणमात्रं** किञ्चित्कालमात्रम्, **अतिष्ठत्** समाहितमनाः तस्थौ । **च** पुनः, **मुहूर्तात्** क्षणादूर्ध्वं, **किञ्चिदुन्नमितवदना** ईषदुत्थापितमुखी सती, **शरज्ज्योत्स्नाविशदेन** शरत्कालिकचन्द्रिकावद्धवलेन, **दशनांशुजालेन** दन्तकान्तिकलापेन, **स्वमनसः** स्वहृदयस्य, **प्रसादं** प्रसन्नताम्, **दर्शयन्तीव** प्रकटयन्तीव, **मन्दं मन्दं** किञ्चित् किञ्चित्, **विजहास** विहसितवती । **च** पुनः, **व्याजहार** उक्तवती, किमित्याह—**नरेन्द्र !** भो राजन् !, **निजगोत्रसन्ततेः** स्ववंशपरम्परायाः, **अविच्छेदाय** अव्याघाताय, मदिरावत्याः पुत्रम् **इच्छसि** अभिलषसि, इति मया **निश्चितं** निश्चयः कृतः, **केवलं** किन्तु, **एतत्** इदम्, **पृच्छामि** जिज्ञासे, किमित्याह—**वक्रया** कुटिलया, अविस्पष्टार्थकयेति यावत्, **वचनभङ्ग्या** वचनच्छटया, **एष** तत्पुत्राभिलाषरूपः, अर्थः, **किं** किमर्थम्, **युक्तिगम्यः** व्यञ्जनयाऽवगम्यः, **कृतः** कल्पितः । **मदिरावत्याः** तत्संज्ञकधर्मपत्न्याः, पुत्रं **देहि** भावय, इति **व्यक्तमेव** विस्पष्टमेव, अभिधायैवेति यावत्, किं कस्माद्धेतोः, **नोक्तं** न प्रतिपादितम् । **कच्चित्** किमु, **अन्यथा** विस्पष्टतया, **उक्ते** वाक्ये कथिते सति, **कुतोऽपि** कस्माच्चित्, **वृत्तान्तं** मदिरावत्याः पुत्रप्रार्थनोदन्तम्, **उपलभ्य** श्रुत्वा, **समुपजातेर्ष्याः** समुत्पन्नेर्ष्याः, **अन्या अपि** तद्व्यतिरिक्ता अपि, **प्रणयिन्यः** प्रेयस्यः, राज्य इत्यर्थः, **मां** मेघवाहनम्, **कदर्थयिष्यन्ति** तदर्थमाग्रहीष्यन्ति, **इति** इयम्, **आशङ्का** संशयः 'अस्ति' इति शेषः । **अत्र** अस्मिन् स्थाने, **अस्मत्परिजने** अस्मत्परिवारमध्ये, **दुर्जनः** पिशुनः, तव, **प्रतिपक्षः** विद्वेषी वा, **कश्चित्** कोऽपि, **नास्ति** न वर्तते यः, **तासां** तदितरप्रणयिनीनाम्, **निवेदयिष्यति** प्रकृतवृत्तान्तं विज्ञापयिष्यति, किन्तु, **एकः** मत्परिजनेष्वेकमात्रम्, **महोदरः** तन्नामा यक्षः, **प्रयत्नेन** प्रयासेन, **रक्षणीयः**

गाढमवगाढस्त्वदीयालापस्य तात्पर्यार्थः, कथयिष्यति च केनापि प्रकारेण निष्कारणापकारी नियतमेष जाल्मः, प्रकृतिकेलिप्रियतया कोपयिष्यति च ताः, काममेवं च बुद्धिकौशलेन रक्षितमपि बलात् तवागतं व्यसनमप्रतिविधेयम्' इत्युक्त्वा विरराम [ न ] ।

क्षितीशोऽपि तेन प्रसादातिशयशंसिना श्रियः परिहासवादेन द्विगुणतरोपजातसंमदः स्मित्वाऽमन्दमवदत्—'देवि ! प्राञ्जलोक्त्या कृतं प्रार्थनमतिव्रीडाकरमिति मन्यमानेन मया प्रयुक्तेयमीदृशी वचनयुक्तिर्न तु भयेन, त्वया हि प्रसादपरया संप्रति कृतः स्वीकारः, पुरंदरादप्यहं न बिभेमि, किं पुनर्महोदरात्, किं विलम्बते, यात्वयमिदानीमेव गुह्यकः, शक्नोति यदि न रक्षितुं गुह्यम्, आवेदयतु शतगुणीकृत्य ताभ्यो मद्भाषितमिदम्, ता अपि सपत्नीबहुमाननिशमनोत्पन्नमत्सराः कुप्यन्तु कामं पुत्रकाम्यन्त्यः, किं मे करिष्यन्ति कुपिता अपि, मया नैव ता प्रसादनीयाः, त्वयि कृतप्रसादायामिदानीमपगता मे तदीयचिन्ता, यथा मदिरावत्यास्तथा तासामपि त्वया पुत्रा जनयितव्याः, एवं च तत्कृता कदर्थना मे नास्ति, वृथैव मां भगवती

---

तद्वृत्तान्तव्याहाराद् वारणीयः, **तेन तु** महोदरेण तु, **ईदृशेषु** एवंविधेष्वपि, अविस्पष्टार्थकेष्वपीत्यर्थः, त्वद्वाक्येष्विति शेषः, **अतिनिपुणदृष्टिना** परमसूक्ष्मदृष्टिशालिना, भवता **गोपितोऽपि** संवृतोऽपि, **तात्पर्यार्थः** भावार्थः, **गाढम्** अत्यन्तं यथा स्यात् तथा, **अवगाढः** आलोडितः, ज्ञात इति यावत् । **च** पुनः, **निष्कारणापकारी** अकारणविद्वेषी, एष **जाल्मः** असमीक्ष्यकारी, **केनापि** केनचित्, **प्रकारेण** रूपेण, **नियतम्** अवश्यम्, **कथयिष्यति** निवेदयिष्यति, "जाल्मोऽसमीक्ष्यकारी स्यात्" इत्यमरः, **च** पुनः, **प्रकृतिकलिप्रियतया** प्रकृत्या–स्वभावेन, कलिः–कलहः, प्रियः–प्रीतिविषयो यस्य तादृशतया, **ताः** अन्याराज्ञीः, **कोपयिष्यति** क्रोधयिष्यति । **एवम्** उक्तप्रकारेण, **बुद्धिकौशलेन** बुद्धिचातुर्येण, **कामम्** अत्यन्तम्, **रक्षितमपि** वारितमपि, **अप्रतिविधेयम्** अप्रतिकार्यम्, तव, **व्यसनं** कष्टम्, **बलात्** हठात्, **आगतम्** उपनतम्, **इति** इत्थम्, **उक्त्वा** कथयित्वा, **विरराम** विरता, लक्ष्मीदेवीति शेषः [ न ] ।

**क्षितीशोऽपि** मेघवाहनोऽपि, **श्रियः** लक्ष्म्याः, **प्रसादातिशयशंसिना** प्रसन्नताऽतिशयद्योतकेन, **तेन** अनुपदमभिहितेन, **परिहासवादेन** विनोदवाक्येन, **द्विगुणतरोपजातसम्मदः** द्विगुणतरः–पूर्वापेक्षयाऽतिद्विगुणः, उपजातः–उत्पन्नः, सम्मदः–प्रमोदो यस्य तादृशः सन्, **मन्दं** किञ्चित्, **स्मित्वा** हसित्वा, **अवदत्** उक्तवान्, किमित्याह–**देवि!** भगवति!, **प्राञ्जलोक्त्या** सरलयोक्त्या, **कृतं प्रार्थनं** विहिता प्रार्थना, **अतिव्रीडाकरम्** अतिलज्जाजनकम्, इति **मन्यमानेन** विचारयता मया , **ईदृशी** उक्तप्रकारा, **इयम्** उक्तपूर्वा, **वचनयुक्तिः** वाक्यरचना, **प्रयुक्ता** कृता, न तु **भयेन** अन्यराज्ञीकोपभयेन । **हि** निश्चयेन, **प्रसादपरया** प्रसन्नतानिरतया, **त्वया** भवत्या, **सम्प्रति** अधुना, **स्वीकारः** प्रार्थितवरदानाङ्गीकारः कृतः । अहं पुरन्दरादपि न **बिभेमि** भयं करोमि, **महोदरात्** तन्नामकयक्षात्, पुनः **किम्**, नैवेत्यर्थः, **किं** किमर्थं, **विलम्बते** विलम्बं करोति, वृथैव विलम्ब इति भावः । **अयं** पुरोवर्ती, **गुह्यकः** यक्षः, **इदानीम्** अधुनैव, **यातु** गच्छतु, **गुह्यं** प्रकृतरहस्यम् , **रक्षितुं** गोपयितुम्, यदि न **शक्नोति** प्रभवति, तर्हि **इदं** कथितपूर्वम्, **मद्भाषितं** मद्वचनम्, **शतगुणीकृत्य** शतगुणं कल्पयित्वा, **ताभ्यः** अन्यराज्ञीभ्यः, **आवेदयतु** विज्ञापयतु, **सपत्नीबहुमाननिशमनोत्पन्नमत्सराः** सपत्न्याः–मदिरावत्याः, बहुमानस्य–पुत्रवराभ्यर्थनद्वारा अधिकाऽऽदरस्य, निशमनेन–श्रवणेन, उत्पन्नः, मत्सरः–द्वेषो यासां तादृश्यः, **ता अपि** राज्योऽपि, **पुत्रकाम्यन्त्यः** आत्मनः पुत्रमिच्छन्त्यः, **कामं** बाढं, **कुप्यन्तु** क्रुध्यन्तु । **कुपिता अपि** क्रुद्धा अपि, **मे** मम, **किम्** अनिष्टं करिष्यति, न किमपीत्यर्थः । **मया** मेघवाहनेन, **ताः** राज्यः, नैव **प्रसादनीयाः** अनुकूलयितव्याः । **त्वयि** लक्ष्मीदेव्यां, **कृतप्रसादायां** प्रसादमापन्नायां, **मे** मम, **तदीयचिन्ता** तत्प्रसादचिन्ता, **इदानीं** अधुना, **अपगता** नष्टा । **यथा** येन प्रकारेण, **मदिरावत्याः**–तन्नामकराज्ञ्याः, **तथा** तेन प्रकारेण, **तासामपि** अन्यासामपि राज्ञीनाम्, त्वया पुत्रः **जनयितव्यः** प्रादुर्भावयितव्यः । **एवं च** अनया रीत्या च, **तत्कृता** अन्यराज्ञीकर्तृका, **कदर्थना** पीडा, **मे** मम, **नास्ति** नैव स्यात्, **भगवती** त्वं, **वृथैव** परिहासेनैव, मां **भीषयते** भयमनुभाव-

भीषयेः' [प], इत्युक्तवति राजनि विहस्य जातहर्षा लक्ष्मीः पुनरवोचत—'राजन्! कृतमतः परम्, नर्मकर्मणा जिता त्वयाऽहम्, किन्त्वतिमात्रचतुरोऽपि वञ्चितस्त्वमेतेन दर्शितालीकोन्नतिना महापुरुषताभिमानग्रहेण, येनैवमुपदर्शितप्रसादायामपि मयि न किञ्चित् त्वया प्रार्थितम्, सर्वथा यदस्ति तदस्तु, कस्ते मनोरथानां प्रतिपन्थी? भविष्यति तवाशेषभुवनत्रयख्यातकीर्तिरार्तजनपरित्राणक्षमः क्ष्मापतिवृन्दवन्दितचरणारविन्दो बन्दीकृताष्टादशद्वीपभूपालसुन्दरीसादरविधीयमानशुद्धान्तवधूचरणपरिचर्यश्चतुरुदधिवेलाशिलोच्चयशिखानिखातमणिशिलादारुमयजयस्तम्भो मत्प्रभावादचिरेण भोक्ता भूमिगोचरखेचराधिपतिराज्ययोः प्रतापवान् पुत्रः, यस्योत्पत्रभङ्गचित्राष्टापदपादपीठप्रान्तसततनिषण्णः सविभ्रमोत्क्षिप्तैर्दक्षिणकरैः प्रचलयन्नवसरेषु बालव्यजनकानि विलासयन्त्रपुत्रिकाविदग्धतां धास्यति प्रकटिताष्टबाहुदेहद्वयो जनोऽयम्' [फ], इत्युदीर्य

---

यति [प]। इति अनया रीत्या, राजनि मेघवाहने, उक्तवति कथितवति सति, विहस्य हासं कृत्वा, जातहर्षा उत्पन्नानन्दा, लक्ष्मीः, पुनः पुनरपि, अवोचत् उक्तवती। किमित्याह—राजन्! नृपते!, अतः परम् अतोऽधिकम्, कृतं व्यर्थम्, अहं लक्ष्मीः, त्वया भवता, नर्मकर्मणा हास्यक्रियया, जिता वशीकृता। किन्तु परन्तु, अतिमात्रचतुरोऽपि स्वार्थनिष्पादनेऽत्यन्तचतुरोऽपि, त्वम्, दर्शितालीकोन्नतिना दर्शिता—आविष्कृता, अलीका—मिथ्या, उन्नतिः—स्वोत्कर्षो येन तादृशेन, एतेन अनुभूयमानेन, महापुरुषताभिमानग्रहेण अहं महापुरुषोऽस्मीत्येतादृग्गर्वग्रहणेन, वञ्चितः प्रतारितः, येन यस्मात् कारणात्, एवम् अनेन प्रकारेण, मयि उपदर्शितप्रसादायामपि प्रकटितस्वप्रसन्नतायामपि सत्याम्, त्वया न किञ्चित् किमपि, प्रार्थितं याचितम्। सर्वथा सर्वप्रकारेण, यत् वस्तु, अस्ति तव वर्तते, तद् अस्तु निर्विघ्नं तिष्ठतु। ते तव, मनोरथानां कामनानाम्, कः प्रतिपन्थी विद्वेषी, न कोऽपीत्यर्थः। किन्तु मत्प्रभावात् मत्सामर्थ्यात्, अचिरेण शीघ्रम्, तव पुत्रो भविष्यति। कीदृशः? अशेषभुवनत्रयख्यातकीर्तिः अशेषं—समस्तम्, यद् भुवनत्रयं—स्वर्ग-मर्त्य-पाताललोकत्रयम्, तत्र ख्याता—प्रसिद्धा, कीर्तिः—यशो यस्य तादृशः, पुनः आर्तजनपरित्राणक्षमः दीनजनपरिरक्षणसमर्थः, पुनः क्ष्मापतिवृन्दवन्दितचरणारविन्दः क्ष्मापतिवृन्देन—नृपतिगणेन, वन्दितम्—आराधितम्, चरणारविन्दं यस्य तादृशः, पुनः बन्दीकृताष्टादशद्वीपभूपालसुन्दरीसादरविधीयमानशुद्धान्तवधूपरिचर्यः बन्दीकृतानां—कारागारबद्धानाम्, अष्टादशद्वीपभूपालानाम्—अष्टादशद्वीपनिवासिनृपाणाम्, सुन्दरीभिः—राज्ञीभिः, सादरम्—आदरसहितं यथा स्यात् तथा, विधीयमाना—क्रियमाणा, शुद्धान्तवधूनाम्—अन्तःपुरस्त्रीणाम्, चरणपरिचर्या—पादसेवा यस्य तादृशः, पुनः चतुरुदधिवेलाशिलोच्चयशिखानिखातमणिशिलादारुमयजयस्तम्भः चतुर्णाम्, उदधीनां—समुद्राणाम्, ये वेलाशिलोच्चयाः—तटवर्तिपर्वताः, तेषां शिखासु—शिखरेषु, निखाताः—नितरां खनित्वा स्थापिताः, मणिशिलादारुमयाः—मणिमयाः शिलामया दारुमयाश्च, यद्वा मणिशिला—मणिरूपपाषाणः, तद्रूपं यद् दारु—काष्ठम्, तन्मयाः, जयस्तम्भाः—जयस्थूणा येन तादृशः, पुनः भूमिगोचरखेचराधिपतिराज्ययोः भूमिगोचराः—भूमिचारिणः, तेषामधिपतिः—नराधिपतिः, खेचराः—गगनविहारिणो विद्याधराः, तेषामधिपतिः—विद्याधरेन्द्रः, तयो राज्ययोः, भोक्ता सुखानुभविता, पुनः प्रतापवान् तेजस्वी। यस्य त्वत्पुत्रस्य, अयं वर्तमानवक्तृव्यक्तिरूपः, जनः लक्ष्मीरूपो जनः, विलासयन्त्रपुत्रिकाविदग्धतां विलासाय यो यन्त्रः, तत्र निर्मिता या पुत्रिका—पुत्तलिका, कन्याप्रतिकृतिः, तस्या या विदग्धता—यन्त्रसञ्चालनोत्तरं व्याधूयमानदक्षिणकरेण व्यजनोत्क्षेपणदाक्षिण्यम्, ताम्, धास्यति ग्रहीष्यति। किं कुर्वन्? अवसरेषु उचितसमयेषु, सविभ्रमोत्क्षिप्तैः सविभ्रमं—सविलासं यथा स्यात् तथा, उत्क्षिप्तैः—उद्धूतैः, दक्षिणकरैः सव्यहस्तैः, बालव्यजनकानि चामराणि, प्रचलयन् उद्धुन्वन्, कुत्रोपविष्टः सन्? उत्पत्रभङ्गचित्राष्टापदपादपीठप्रान्तसततनिषण्णः उत्पत्रभङ्गेन—उत्कृष्टपत्ररचनया, चित्रं—चित्रवर्णम्, यद् अष्टापदस्य—सुवर्णस्य, तन्निर्मितमित्यर्थः, पादपीठं—पादस्थापनासनम्, तत्प्रान्ते—तन्निकटे, सततम्—अनवरतम्, निषण्णः—उपविष्टः सन्, कीदृशः? प्रकटिताष्टबाहुदेहद्वयः अष्टौ बाहवो—भुजा यस्मिंस्तादृशं देहद्वयं—शरीरद्वयम्, प्रकटितं—प्रकल्पितं येन तादृशः [फ]। इति एवम्, उदीर्य उक्त्वा, भूयः पुनरपि, जगाद उवाच,

भूयो जगाद—'नृपचन्द्र! योऽयमसदृशभक्तिहृतहृदयेन महापुरुषचित्तवृत्तिसहचरीमौचित्यमुद्रामाद्रियमाणेन चन्द्रातपाभिधानो दिव्यमुक्ताकलापः पूजार्थमुपकल्पितस्त्वया मे, सोऽनल्पमभ्युदयमभिलषन्त्या भवत एव मया प्रदत्तः सर्वथा प्रयत्नेन रक्षणीयः, यदा च नवयौवनश्रिया प्रतिपन्नसर्वाङ्गस्तवाङ्गजो भविष्यति तदा तस्य भूषणार्थमुपनेतव्यः । यद्यपि सुचिरकालसंचितेन सततानुगामिना सद्भृत्येनेव शुभकर्मणा कृतरक्षाणां महापुरुषाणां सर्वदापि दूरवर्तीन्येव दुरितानि, तथापि नीतिरनुसर्तव्या, यतोऽस्य संग्रामभूमिमवतरतोऽपि विपक्षदुर्गाणि गाहमानस्य विषमाटवीषु कार्यवशेन विशतोऽन्येषु च संभाव्यमानापत्तिषु स्थानकेषु व्यवहरतोऽसौ विशेषतः संनिधापयितव्यः, सर्वदा निर्विघ्नमस्तु ते प्रयोजनम् [ब] अनुजानीहि मां गमनाय, मयाऽपि प्रसङ्गेनैव निर्गतया निजनिवासात् कतिचिदप्यहानि दक्षिणाशाविभूषणेषु त्रिकूटमलयादिषु वेलापर्वतेषु क्षीरोदप्रभृतिषु महार्णवेषु नन्दीश्वरप्रमुखेषु द्वीपेष्वन्येषु चातिरमणीयेषु प्रदेशेषु विहृत्य भूयस्तत्रैव तुहिनाचलशिखरवनराजिराजतदर्पणे स्वसद्मनि पद्मनाम्नि महाह्रदे गन्तव्यम् । त्वमपि मदनुज्ञया गच्छाधुना स्वमावासम्,

---

श्रीरिति शेषः । किमित्याह—**नृपचन्द्र!** भो नृपश्रेष्ठ!, **असदृशभक्तिहृतहृदयेन** असदृश्या—असाधारणया, भक्त्या—प्रीत्या, हृतम्—आवर्जितम्, हृदयम्—अन्तःकरणं, येन तादृशेन, पुनः **महापुरुषचित्तवृत्तिसहचरीं** महापुरुषाणाम्—उत्तमपुरुषाणाम्, चित्तवृत्तेः—अन्तःकरणवृत्तेः, सहचरीं—सहावस्थायिनीम्, **औचित्यमुद्राम्** औचित्यरक्षणाचारम्, **आद्रियमाणेन** रक्षता, त्वया, **चन्द्रातपाभिधानः** चन्द्रातपसंज्ञकः, योऽयं **दिव्यमुक्ताकलापः** चारुमुक्तामणिहारः, **मे** मम, **पूजार्थं** प्रीत्यर्थम्, **उपकल्पितः** उपहृतः, **स** हारः, **अनल्पम्** अधिकम्, **अभ्युदयम्** पुत्रादिरूपां तवोन्नतिम्, **अभिलषन्त्या** कामयमानया, मया, **भवत एव** तुभ्यमेव, **प्रदत्तः** प्रत्यर्पितः, **प्रयत्नेन** महता यत्नेन, **रक्षणीयः** स्थापनीयः, भवतेति शेषः । तव **अङ्गजः** पुत्रः, **यदा** यस्मिन् समये, **नवयौवनश्रिया** अभिनवतारुण्यरामणीयकेन, **प्रतिपन्नसर्वाङ्गः** प्रतिपन्नं—स्वीकृतं व्याप्तमिति यावत्, सर्वं—सकलम्, अङ्गं—शरीरम्, अङ्गानि—शरीरावयवा वा यस्य तादृशः, **भविष्यति** सम्पत्स्यते, **तदा** तस्यामवस्थायाम्, **भूषणार्थम्** अलङ्करणार्थम्, **उपनेतव्यः** तस्मै त्वया दातव्यः, स हार इति शेषः । यद्यपि **सुचिरकालसञ्चितेन** अतिदीर्घकालसंगृहीतेन, **सद्भृत्येनेव** समीचीनभृत्येन इव, **सततानुगामिना** अनवरतमनुवर्तिना, **शुभकर्मणा** सुकृतेन, सत्कर्मजनितपुण्येनेत्यर्थः, **कृतरक्षाणां** रक्षितानाम्, **महापुरुषाणां** सत्पुरुषाणाम्, **सर्वदाऽपि** सर्वकालेऽपि, **दूरवर्तीन्येव** दूरस्थायीन्येव, **दुरितानि** विघ्नाः, भवन्तीति शेषः, तथापि **नीतिः** "श्रेयांसि बहुविघ्नानि भवन्ति महतामपि" इत्यादिनीतिशास्त्रोक्तवाक्यम्, **अनुसर्तव्या** आश्रयितव्या, **यतः** यस्माद्धेतोः, **अस्य** बुद्धिस्थस्य त्वत्पुत्रस्य, **संग्रामभूमिं** रणक्षेत्रम्, **अवतरतोऽपि** आगच्छतोऽपि, एवं **विपक्षदुर्गाणि** स्वरिपुप्राकारान्, **गाहमानस्य** प्रविशतोऽपि, तथा **विषमाटवीषु** भीषणारण्येषु, **कार्यवशेन** प्रयोजनवशेन, **विशतः** प्रविशतोऽपि, **च** पुनः, **अन्येषु** तद्भिन्नेष्वपि, **सम्भाव्यमानापत्तिषु** संशय्यमानविपत्तिकेषु, **स्थानकेषु** स्थलेषु, **व्यवहरतः** विचरतः, **असौ** हारविशेषः, **विशेषतः** नियमतः, **सन्निधापयितव्यः** परिधापयितव्यः । **ते** तव, **प्रयोजनम्** अभिलषितम्, **निर्विघ्नं** विघ्नेन—बाधकदुरितेन, रहितम्, **अस्तु** भवतु [ब] । **गमनाय** इतः प्रस्थानाय, माम् **अनुजानीहि** अनुमन्यस्व । **मया** लक्ष्मीदेव्या अपि, **प्रसङ्गेनैव** कार्यवशेनैव, **निजनिवासात्** स्वकीयाऽऽवासात्, **निर्गतया** निष्क्रान्तया, **कतिचिदपि** कतिपयान्यपि, **अहानि** दिनानि, **दक्षिणाशाविभूषणेषु**, दक्षिणदिङ्मण्डनायमानेषु, **त्रिकूट-मलयादिषु** त्रिकूट-मलयप्रमुखेषु, **वेलापर्वतेषु** समुद्रतटवर्तिपर्वतेषु, तथा **क्षीरोदप्रभृतिषु** क्षीरसागरप्रमुखेषु, **महार्णवेषु** महासागरेषु, तथा **नन्दीश्वरप्रमुखेषु** नन्दीश्वरप्रभृतिषु, **द्वीपेषु** जलमध्यवर्तिप्रदेशेषु, तथा **अन्येषु च** तद्भिन्नेष्वपि, **रमणीयेषु** सुन्दरेषु, **प्रदेशेषु** स्थलेषु, **विहृत्य** विहारं विधाय, पुनः **तुहिनाचलशिखरवनराजिराजतदर्पणे** तुहिनाचलस्य—हिमाचलस्य, शिखरे या वनराजिः—वनपङ्क्तिः, तद्रूपा नायिका, तस्या राजतदर्पणे—रौप्यमयदर्पणरूपे, **तत्रैव** तस्मिन्नेव, **स्वसद्मनि** स्वस्थानभूते, **पद्मनाम्नि** पद्मसंज्ञके, **महाह्रदे** अगाधजलाशयविशेषे, **गन्तव्यं** प्रस्थातव्यम् । राजन्! **मदनु-**

अध्यास्स्व राज्यधुराम्, आधेहि विषयोपभोगसुखेषु प्रणयम्, आत्मदर्शनामृतेन विरहाकुलीकृतप्राणाः प्रीणीहि सर्वाः प्रणयिनीः, प्रवर्तय यदृच्छया सुहृज्जनेन सार्धमग्राम्यनर्मालापरम्या रहस्यगोष्ठीः, अनुभव तुरगरथ-सिन्धुराधिरोहणसुखानि, विधेहि कृत्रिमनदीतरङ्गमारुतावतारशीतलेषु प्रमदवनसहकारपादपतलेष्वनुत्तालगुञ्जन्मुरजरवमनोहरमन्तःपुरपुरन्ध्रिजनेन सार्धमनिवारितमनःप्रसरः पुराणवारुणीपानोत्सवम्, कुरु सफलानि रङ्गशालासु लासिकाजनस्य निजावलोकनेन लास्यलीलायितान्यपराण्यपि नियमग्रहणकालत्यक्तानि, चिन्तय निराकुलः सकलानि राजकार्याणि, अद्यैव तव मया व्यपनीतो नियमनिगडग्रन्थिबन्धः।' इत्यभिधाय दत्त्वा च शंसितप्रभावमवतार्य करतलाद् बालारुणाभिधानं प्रधानरत्नाङ्गुलीयकमीषत्प्रचलितोत्तमाङ्गा कराञ्जलिबन्धसमकालस्मितमुखी झगित्यदर्शनमगात् [ भ ]

गतायां च तस्यां सविषादविस्मयः स्थित्वा पार्थिवः क्षणं कोणमेकमायतनस्याश्रित्य परिचारकैः पूर्वमेव

---

**मया** मदनुमत्या, त्वमपि **अधुना** सम्प्रति, **स्वं** स्वकीयम्, **आवासं** गृहम्, **गच्छ** याहि । **राज्यधुरां** राज्यभारम्, **अध्यास्स्व** गृहाण, तथा **विषयोपभोगसुखेषु** शब्दस्पर्शादयो ये विषयाः—इन्द्रियार्थाः, तेषां य उपभोगः—आस्वादनम्, तज्जन्यसुखेषु, **प्रणयं** प्रीतिम्, **आधेहि** कुरु । तथा **विरहाकुलीकृतप्राणाः**—विरहेण—स्ववियोगेन, आकुलीकृताः—व्यथिताः, प्राणा यासां ताः, **सर्वाः** समस्ताः, **प्रणयिनीः** प्रियाः, **आत्मदर्शनामृतेन** स्वदर्शनजन्यसन्तोषामृतेन, **प्रीणीहि** तर्पय । तथा **यदृच्छया** स्वेच्छया, **सुहृज्जनेन** स्वसुहृत्सङ्घेन, **सार्धं** सह, **अग्राम्यनर्मालापरम्याः** अग्राम्यैः—वैदग्ध्यपूर्णैः, नर्मालापैः—परिहासवचनैः, रम्याः—मनोहराः, **रहस्यगोष्ठीः** गुप्तसभाः, **प्रवर्तय** प्रारभस्व । तथा **तुरग-रथ-सिन्धुराधिरोहण-सुखानि** तुरगेषु—अश्वेषु, रथेषु, सिन्धुरेषु-गजेषु च, यदधिरोहणम्—आरोहणं, तज्जन्यसुखानि, **अनुभव** भुङ्क्ष्व । तथा **कृत्रिम-नदीतरङ्गमारुतावतारशीतलेषु** कृत्रिमाणां—क्रियया निर्वर्तितानाम्, नदीनां ये तरङ्गमारुताः—तरङ्गाभिघातिनो वाताः, तेषाम् अवतारेण—आगमनेन, शीतलेषु—शैत्यगुणशालिषु, **प्रमदवनसहकारपादपतलेषु** प्रमदवने—अन्तःपुरोद्याने, ये सहकारपादपाः—अतिसुरभिचूतवृक्षाः, तेषां तलेषु—अधःस्थलेषु, **अन्तःपुरपुरन्ध्रिजनेन** अन्तःपुरवधूजनेन, **सार्धं** सह, **अनुत्तालगुञ्जन्मुरजरवमनोहरम्** अनुत्तालं—मन्दं यथा स्यात् तथा, गुञ्जतां—ध्वनताम्, मुरजानां—मृदङ्गानाम्, रवैः—नादैः, मनोहरं—रम्यम्, **पुराणवारुणीपानोत्सवं** परिणतमदिराऽऽस्वादनोत्सवम्, **अनिवारितमनःप्रसरः** अनिवारितः—अनिरुद्धः, मनः प्रसरः—मनःप्रवृत्तिर्येन तादृशः, त्वमिति शेषः, **विधेहि** कुरु । तथा **रङ्गशालासु** नाट्यालयेषु, **लासिका-जनस्य** नर्तकीजनस्य, **लास्यलीलायितानि** नृत्यकौतुकानि, एवं **नियमग्रहणकालत्यक्तानि** देव्याराधनव्रतारम्भकाले वर्जितानि, **अपराण्यपि** अन्यान्यपि राजोचितकार्याणि, **निजावलोकनेन** स्वयमवलोकनेन, **सफलानि** फलशालीनि, **कुरु** विधेहि । अथवा 'अपराण्यपि नियमग्रहणकालत्यक्तानि' इत्यस्योत्तरत्रान्वयः, तथा च नियमग्रहणकालत्यक्तानि, **अपराण्यपि** उक्तव्यतिरिक्तान्यपि, **सकलानि** सर्वाणि, **राज्यकार्याणि** राज्यसम्बन्धिकर्तव्यानि, **निराकुलः** स्वस्थचित्तः सन्, **चिन्तय** विचारय । मया तव **नियमनिगडग्रन्थिबन्धः** नियमनिगडस्य—व्रतरूपशृङ्खलायाः, ग्रन्थिबन्धः—सवेष्टनबन्धः, **अद्यैव** अस्मिन्नेव दिने, **व्यपनीतः** उन्मोचितः । **इति** अनेन प्रकारेण, **अभिधाय** उक्त्वा, **च** पुनः, **शंसितप्रभावं** शंसितः—कथितः, प्रभावः—माहात्म्यं यस्य तादृशम्, **बालारुणाभिधानं** बालादित्यद्युतिमत्तया बालारुणेत्यन्वर्थसंज्ञकम्, **प्रधानरत्नाङ्गुलीयकं** महारत्नमयमङ्गुलीयकम्, **करतलादवतार्य** कराङ्गुलेर्निष्कास्य, **दत्त्वा** तस्मै अर्पयित्वा, **ईषत्प्रचलितोत्तमाङ्गा** किञ्चित्कम्पितमस्तका सती, **कराञ्जलिबन्धसमकालस्मितमुखी** कराञ्जलिबन्धस्य—हस्तयुगलसंयोजनस्य, समकाले—एककाले, स्मितं—मन्दहसितं मुखं यस्यास्तादृशी, **झटिति** शीघ्रम्, **झगिति** पाठे तैजसतया तिरोभावप्रकारेण, **अदर्शनं** दर्शनागोचरताम्, **अगात्** प्रापत् [ भ ] ।

**च** पुनः, **तस्यां** देव्याम्, **गतायां** तिरोभूतायां सत्याम्, **पार्थिवः** मेघवाहननृपः, **सविषादविस्मयः** विषादेन—तददर्शनखेदेन, विस्मयेन—आकस्मिकतदागमनगमनाश्चर्येण च, सहितः सन्, **क्षणं** मुहूर्तम्, **स्थित्वा** तूष्णीम्भूय, **आयतनस्य** मन्दिरस्य, **एकं कोणं** भागम्, **आश्रित्य** अधिष्ठाय, **परिचारकैः** भृत्यैः, **पूर्वमेव** तदागमनात् प्रागेव, **प्रकल्पितं** रचितं

प्रकल्पितं कुशतल्पमगात्। निषण्णस्य चास्य संजातपरमनिर्वृतेरतीतमनुष्यभावमिव देवभूयं गतमिव सर्वलोकविलक्षणतामापन्नमिवाणिमादिगुणाधिष्ठितमिव भुवनत्रयसृष्टिसंहारक्रियाक्षममिव देवताकृतबहुमानमात्मानं मन्यमानस्य, क्षणं शक्रावतारगमनमुत्प्रेक्षमाणस्य, क्षणं ज्वलनप्रभस्य रूपसंपदं निरूपयतः, क्षणमुत्सृष्टदिव्यताभिमानमधुराणि तदाभाषणवचांसि चिन्तयतः, क्षणमिन्द्रसदसि नाकिभिः प्रस्तुतामात्मगुणस्तुतिं हृदयेनावर्तयतः, क्षणं शक्रावतारायतनलब्धस्य मुक्ताफलहारस्य प्रभावमद्भुतं भावयतः, क्षणमात्मनः कण्ठच्छेदकर्मणि कठोराशयतां विमृशतः, क्षणमादरव्यापारितासेः स्वभुजदण्डस्य सर्वशक्तिविघातमकाण्ड एव जातमालोचयतः, क्षणमग्रतः सहसैव दर्शितनिजदिव्यरूपां राजलक्ष्मीं ध्यायतः, क्षणं तस्याः प्रकटितप्रसादातिरेकस्पृहणीयानि श्रवणामृतस्यन्दीनि जन्मफलभूतानि जल्पितानि स्मरतो विस्मयमयीव कौतुकमयीवाश्चर्यमयीव प्रमोदमयीव क्रीडामयीवोत्सवमयीव निर्वृतिमयीव धृतिमयीव हासमयीव सा विभावरी विराममभजत [ म ]।

---

**टिप्पनकम्**—[ **विस्मयमयीव कौतुकमयीव आश्चर्यमयीव**— ] विस्मयः—असम्भावनागर्भप्रतिपत्तिः, विकारावलोकनबुद्धिः—कौतुकम्, असम्भाव्यं सम्भावितं संजातम्—आश्चर्यम्, इत्येष भेद एषामिति केचित्, अन्ये तु कियद्भेदापेक्षया भेदेनाभिधानम् [ म ]।

---

निहितमिति यावत्, **कुशतल्पं** कुशशय्याम्, **अगात्** उपाविक्षत्। **निषण्णस्य** तत्रोपविष्टस्य, **जातपरमनिर्वृतेः** उत्पन्नात्यन्तसुखस्य, **अस्य** मेघवाहनस्य, **च** तु, सा **विभावरी** रात्रिः, **विरामं** समाप्तिम्, **अभजत्** प्रापदित्यनेन वक्ष्यमाणेनान्वेति। किं कुर्वतः? **देवताकृतबहुमानं** देवीकृताधिकादरम्, **आत्मानं** स्वम्, **अतीतमनुष्यभावमिव** अतीतः—निवृत्तः, मनुष्यभावः—मनुष्यत्वं यस्य तमिव, अत एव **देवभूयं गतमिव** देवत्वमापन्नमिव, **सर्वलोकविलक्षणतां** सकललोकोत्तरताम्, **आपन्नं** प्राप्तमिव, अतः **अणिमादिगुणाधिष्ठितमिव** अणिमाद्यैश्वर्यसम्पन्नमिव, अतः **भुवनत्रयसृष्टिसंहारक्रियाक्षममिव** भुवनत्रयस्य—स्वर्गादिलोकत्रयस्य, सृष्टि-संहारक्रिययोः—उत्पादन-विध्वंसनकार्ययोः, क्षमं—समर्थमिव, **मन्यमानस्य** जानानस्य। पुनः **क्षणं** मुहूर्तम्, **शक्रावतारगमनं** तदाख्यतीर्थप्रस्थानम्, **उत्प्रेक्षमाणस्य** संकल्पमानस्य, पुनः **क्षणं** मुहूर्तम्, **ज्वलनप्रभस्य** तदाख्यदेवविशेषस्य, **रूपसम्पदं** कान्तिसम्पदम्, **निरूपयतः** आलोचयतः, पुनः **क्षणं** मुहूर्तम्, **उत्सृष्टदिव्यताभिमानमधुराणि** उत्सृष्टेन—उज्झितेन, दिव्यताभिमानेन—देवत्वाभिमानेन, तद्राहित्येनेत्यर्थः, मधुराणि—श्रवणाऽऽस्वाद्यानि, **तदाभाषणवचांसि** तदालापात्मकवचनानि, **चिन्तयतः** स्मरतः। पुनः **क्षणं** मुहूर्तम्, **इन्द्रसदसि** इन्द्रसभायाम्, **नाकिभिः** देवैः, **प्रस्तुतां** प्रकृताम्, **आत्मस्तुतिं** स्वकीयगुणगाथाम्, **हृदयेन** मनसा, **आवर्तयतः** स्वयमेव पुनः पठतः। पुनः **क्षणं** मुहूर्तम्, **शक्रावतारायतनलब्धस्य** शक्रावतारमन्दिरप्राप्तस्य, **मुक्ताफलहारस्य** चन्द्रातपाख्यदिव्यमुक्तामणिमयमाल्यस्य, **अद्भुतम्** आश्चर्यावहम्, **प्रभावं** माहात्म्यम्, **भावयतः** विचारयतः। पुनः **क्षणं** मुहूर्तम्, **आत्मनः** स्वस्य, **कण्ठच्छेदकर्मणि** स्वकण्ठकर्तनकार्ये, **कठोराशयतां** निष्ठुरहृदयताम्, **विमृशतः** विचारयतः। पुनः **क्षणं** मुहूर्तम्, **आदरव्यापारितासेः** आदरेण—प्रयोजनापेक्षया, व्यापारितः—उद्यतः, असिः—खड्गो येन तादृशस्य, **स्वभुजदण्डस्य** स्वबाहुरूपदण्डस्य, **अकाण्ड एव** अनवसर एव, अकस्मादेवेत्यर्थः, **जातम्** उत्पन्नम्, **सर्वशक्तिविघातम्** अशेषसामर्थ्यक्षयम्, **आलोचयतः** विचारयतः। पुनः **क्षणं** मुहूर्तम्, **सहसैव** शीघ्रमेव, **अग्रतः** अग्रे, सम्मुख इत्यर्थः, **दर्शितनिजदिव्यरूपां** दर्शितम्—आविष्कृतम्, निजं—स्वकीयम्, दिव्यम्—उत्तमम्, रूपं यया तादृशीम्, **राजलक्ष्मीं** राजोपास्यदेवीम्, **ध्यायतः** भावयतः। पुनः **क्षणं** मुहूर्तम्, **प्रकटितप्रसादातिरेकस्पृहणीयानि** प्रकटितेन—प्रकाशितेन, प्रसादातिरेकेण—स्वप्रसन्नतातिशयेन, स्पृहणीयानि—मनोहारीणि, पुनः **श्रवणामृतस्यन्दीनि** श्रवणयोः—कर्णयोः, अमृतस्यन्दीनि—अमृतसेचीनि, पुनः **जन्मफलभूतानि** जन्मनः—स्वकीयोत्पत्तेः, फलभूतानि—फलस्वरूपाणि, **तस्याः** देव्याः, **जल्पितानि** भाषितानि, **स्मरतः** विचिन्तयतः। कीदृशीव निशा? **विस्मयमयीव** आश्चर्यमयीव, पुनः **कौतुकमयीव** चमत्कारमयीव, पुनः **आश्चर्यमयीव** आकस्मिकापूर्वमयीव, पुनः **प्रमोदमयीव** आनन्दमयीव, पुनः **क्रीडामयीव** विलासमयीव, पुनः **उत्सवमयीव** आनन्दावहव्यापारमयीव, पुनः **निर्वृतिमयीव** निरतिशयानन्दमयीव, पुनः **धृतिमयीव** अन्तःसन्तोषमयीव, पुनः **हासमयीव** हासपूर्णेव, अत्र सर्वत्राप्युत्प्रेक्षा [ म ]।

जातप्रभोद्भेदायां च पाकशासनककुभि शयनादुत्थितस्य निर्वर्त्तितनिरवशेषप्रभातावश्यकविधेरवसरोपस्थायिना स्वकर्म संपादयितुमादृतेन दृतिवारिभिर्वारिकजनेन विरजीकृतविविक्ततलायामविरलप्रसूनप्रकरभाजि देवतागृहप्राङ्गणवितर्दिकायामुपविष्टस्य नातिनिकटवर्तिना निर्वर्तितप्रातःसवनक्रियेण सद्यो जलक्षालनविमलनिरायामक्षौमधारिणा क्षितावुपविष्टेन विशिष्टाप्तपरिचारकगणेनोपास्यमानस्यास्य दर्शनार्थिनः सकलदर्शनार्थपरिभावनालब्धबुद्धिप्रकर्षा महर्षयः श्रोत्रियाः प्रधानमन्त्रिणोऽमात्यवृद्धा मूर्धाभिषिक्तनृपतयो महासामन्ता ज्ञातयः सुहृदः समग्रनगरलोकाग्रेसराश्च पौराः समाजग्मुः [ य ] । प्रतीहारसूचिताश्च प्रविश्य यथोचितकृतप्रणामाः परिजनविश्राणितेषु यथास्वमासनेषूपाविशन् । क्षणमात्रनिभृतैश्च तैरपूर्ववदनच्छायावलोकनोल्लसितचित्तवृत्तिभिर्देवताप्रसादविषये कृतप्रश्नः शक्रावतारगमनपुरःसरं राजलक्ष्मीस्वस्थानगमनपर्यवसानं सर्वमेव यथावृत्तं प्रदोषवृत्तान्तमकथयत्, आदिष्टान्यतमपरिचारकोपनीतं च तं त्रिदशादासादितं दिव्यहारमञ्जु-

---

च पुनः, **जातप्रभोद्भेदायां** जातः—उत्पन्नः, प्रभायाः—अरुणद्युतेः, उद्भेदः—उद्गमो यस्यां तादृशि, **पाकशासनककुभि** पाकशासनस्य—इन्द्रस्य, ककुभि—दिशि, पूर्वदिशीत्यर्थः, सत्यामिति शेषः । **शयनात्** शय्यातलात्, **उत्थितस्य** उत्थाय बहिरागतस्य, **अस्य** मेघवाहननृपस्य, **दर्शनार्थिनः** दर्शनाकाङ्क्षिणः, **पौराः** पुरवासिजनाः, **समाजग्मुः** समागताः । कीदृशस्य तस्य ? **निर्वर्तितनिरवशेषप्रभातावश्यकविधेः** निर्वर्तितः—सम्पादितः, निरवशेषः—समस्तः, प्रभाते—प्रातःकाले, आवश्यकः—अवश्यकर्तव्यः, विधिः—कार्यं येन तादृशस्य । पुनः **देवतागृहप्राङ्गणवितर्दिकायां** देवतागृहस्य—देवीमन्दिरस्य, प्राङ्गणे—चत्वरे, या वितर्दिका—वेदिका, तस्याम्, **उपविष्टस्य** कृतोपवेशनस्य, कथम्भूतायाम् ? **अवसरोपस्थायिना** अवसरे—उचितसमये, उपस्थायिना—उपस्थितिशीलेन, **स्वकर्म** स्वकीयकार्यम्, **सम्पादयितुं** कर्तुम्, **आदृतेन** अवहितहृदयेन, **वारिकजनेन** जलसेचकजनेन, **दृतिवारिभिः** चर्मभाण्डस्यन्दिसलिलैः, **विरजीकृतविविक्ततलायां** विरजीकृतं—निर्धूलीकृतम्, विविक्तं—पूतम्, तलम्—ऊर्ध्वभागो यस्यां तादृश्याम्, पुनः **अविरलप्रसूनप्रकरभाजि** सान्द्रकुसुमसन्दोहशालिन्याम् । पुनः कीदृशस्य ? **विशिष्टाप्तपरिचारकगणेन** विशिष्टाप्तः—परमविश्वस्तः, यः परिचारकः—सेवकः, तस्य गणेन—समूहेन, **उपास्यमानस्य** सेव्यमानस्य, कीदृशेन तेन ? **नातिनिकटवर्तिना** किञ्चिन्निकटस्थायिना, पुनः **निर्वर्तितप्रातःसवनक्रियेण** निर्वर्तिता—निष्पादिता, कृतेत्यर्थः, प्रातःसवनक्रिया—प्रातःकालिकस्नानरूपा क्रिया येन तादृशेन, पुनः **सद्यः** तत्कालम्, **जलक्षालनविमलनिरायामक्षौमधारिणा** जलक्षालनेन—जलद्वारा विशोधनेन, विमलं—निर्मलम्, यत् निरायामम्—अविस्तृतं लघुभूतम्, क्षौमं—सूक्ष्मवस्त्रम्, तद्धारिणा—तत्परिधायकेन, **क्षितौ** भूमौ, **उपविष्टेन** कृतोपवेशनेन । कीदृशास्ते पौराः ? **सकलदर्शनार्थपरिभावनालब्धबुद्धिप्रकर्षाः** सकलानि—समस्तानि, यानि दर्शनानि—दर्शनशास्त्राणि, तदर्थपरिभावनया—तदर्थालोचनया, लब्धः—प्राप्तः, बुद्धिप्रकर्षः—बुद्धेरुत्कर्षो यैस्तादृशाः, **महर्षयः** परमर्षयः, **श्रोत्रियाः** वेदाध्येतारः, **प्रधानमन्त्रिणः** सर्वश्रेष्ठसचिवाः, **अमात्यवृद्धाः** प्राचीनामात्याः, **मूर्धाभिषिक्तनृपतयः** मूर्धनि—मस्तके, अभिषिक्ताः—कृतराज्याभिषेकाः, नृपतयः—राजानः, **महासामन्ताः** महान्तः—विशिष्टाः, सामन्ताः—अवान्तरनृपाः, **ज्ञातयः** बन्धवः, **सुहृदः** मित्रभूताः, **च** पुनः, **समस्तनगरलोकाग्रेसराः** समग्राणां—समस्तानाम्, नगरलोकानां—नागरिकजनानाम्, अग्रेसराः—प्रधानभूताः [ य ] । **च** पुनः, **प्रतीहारसूचिताः** दौवारिकनिवेदिताः, **प्रविश्य** अन्तःप्रवेशं कृत्वा, **यथोचितकृतप्रणामाः** यथायोग्यविहितनमस्काराः, **परिजनविश्राणितेषु** परिचारकदत्तेषु, **आसनेषु** उपवेशनाधारेषु, **यथास्वं** यथायोग्यम्, **उपाविशन्** उपविष्टाः, **क्षणमात्रनिभृतैः** मुहूर्तमात्रस्थिरैः, **अपूर्ववदनच्छायावलोकनोल्लसितचित्तवृत्तिभिः** अपूर्वायाः—विलक्षणायाः, वदनच्छायायाः—मुखकान्तेः, अवलोकनेन—दर्शनेन, उल्लसिता—हृष्टा, चित्तवृत्तिर्येषां तादृशैः, **तैः** पौरैः, **देवताप्रसादविषये** देवीप्रसन्नताविषये, **कृतप्रश्नः** पृष्टः सन्, स राजेति शेषः । **शक्रावतारगमनपुरस्सरं** शक्रावतारगमनमारभ्य **राजलक्ष्मीस्वस्थानगमनपर्यवसानं** राजलक्ष्म्याः—राजोपास्यलक्ष्मीदेव्याः, यत् स्वस्थानगमनं—स्वकीयस्थानप्रस्थानम्, तत्पर्यन्तम्, **यथावृत्तं** यथानिष्पन्नम्, **सर्वमेव** समस्तमेव, **प्रदोषवृत्तान्तं** प्रदोषकालिकसमाचारम्, **अकथयत्** कथितवान्, **च** पुनः, **आदिष्टा-**

लीयकं चादर्शयत् । तत्क्षणोपजातपरमप्रीतिभिश्च तैः कौतुकवशेन मुहुः कथामावर्तयद्भिः, मुहुः प्रभावमावर्णयद्भिः, मुहुर्धर्मसामर्थ्यं समर्थयमानैः, मुहुः सात्त्विकतामुदाहरद्भिः, मुहुः सत्यादिगुणगणं गृणद्भिः, मुहुर्महिमानमुत्कीर्तयद्भिः, मुहुः साहसिकतामुद्घट्टयद्भिः, मुहुः पुण्यपरिणतिं प्रपञ्चयद्भिः, विस्मयस्मेरदृष्टिभिरनेकप्रकारमभिनन्द्यमानः परां मुदमधत्त [ र ] । प्रस्तुतकथाविच्छेदे च तैः प्रवर्तितो गृहगमनाय किमपि ध्यात्वा तिर्यग्वलितदृष्टिरनतिदूरोपविष्टमनुल्बणोदारवेषाकारधारिणं महोदधिनामानं प्रधानरत्नाध्यक्षमैक्षत । ससंभ्रमोपसृतं च तं विनयवामनीकृतदेहायामं वामपाणिस्पृष्टवसुधातलमितरकरधृतोत्तरीयपल्लवप्रान्तमुद्रितमुखमुन्मुखेक्षणं सादरमवदत्—'भद्र ! चन्द्रातपाभिधानोऽयं हारः प्रतिदिवसमर्चनीयानां चिन्तामणिप्रभृतीनां प्रधानरत्नानां मध्यवर्ती कर्तव्यः, अयमपि बालारुणाख्यो दिव्याङ्गुलीयकालङ्कारः स्वमर्यादातिवर्तिनां दुष्टसामन्तानां दमनाय दक्षिणापथमधितिष्ठतो वज्रायुधस्य प्रस्थापनीयः, वक्तव्यश्च तत्प्रधानप्रणयी

---

**टिप्पनकम्—सम्भ्रमोपसृतम्** आदरोपागतम् [ ल ] ।

---

**न्यतमपरिचारकोपनीतम्** आदिष्टेन–आनेतुमाज्ञप्तेन, अन्यतमपरिचारकेण–एकतरभृत्येन, **उपनीतम्** आनीतम्, **त्रिदशादासादितं** देवताल्लब्धम्, **दिव्यहारं** देवतासम्बन्धिमाल्यम्, **अङ्गुलीयकं** अङ्गुलिभूषणं च, **अदर्शयत्** दर्शितवान् । **तत्क्षणोपजातपरमप्रीतिभिः** तत्क्षण एवोपजाता–प्रादुर्भूता, परमा–अत्यन्ता, प्रीतिः–स्नेहो येषां तादृशैः, **तैः** पौरजनैः, **अनेकप्रकारं** बहुविधं यथा स्यात् तथा, **अभिनन्द्यमानः** धन्यवादैरभिवर्ध्यमानः, राजेति शेषः, **पराम्** अत्यन्ताम्, **मुदं** हर्षम्, **अधत्त** धृतवान्, किं कुर्वद्भिस्तैः पौरैः ? **कौतुकवशेन** औत्सुक्यवशेन, **कथां** श्रुतवरदानवार्ताम्, **मुहुः** अनेकवारम्, **आवर्तयद्भिः** अनुवदद्भिः, तथा **मुहुः** असकृत्, **प्रभावं** देवतामहिमानम्, **आवर्णयद्भिः** आ–समन्तात्, वर्णयद्भिः,–उपपादयद्भिः, तथा **मुहुः** पुनः पुनः, **धर्मसामर्थ्यं** सुकृतशक्तिम्, **समर्थयमानैः** परिपुष्यद्भिः, **मुहुः** अनेकवारम्, **सात्त्विकतां** राज्ञः समधिकसत्त्वगुणवत्ताम्, **उदाहरद्भिः** व्याहरद्भिः, **मुहुः** बहुवारम्, **सत्यादिगुणगणं** सत्यसाहसादितदीयगुणसन्दोहम्, **गृणद्भिः** कथयद्भिः, **मुहुः** अनेकधा, **महिमानं** तदीयमाहात्म्यम्, **उत्कीर्तयद्भिः** उदीरयद्भिः, **मुहुः** वारं वारम्, **साहसिकतां** दुष्करकार्यसम्पादनशीलताम्, **उद्घाटयद्भिः** प्रकटयद्भिः, **मुहुः** अनेकवारं, **पुण्यपरिणतिं** पुण्यपरिणामम्, **प्रपञ्चयद्भिः** विस्तारयद्भिः, पुनः **विस्मयस्मेरदृष्टिभिः** आश्चर्यविकस्वरलोचनशालिभिः [ र ] ।

**प्रस्तुतकथाविच्छेदे** प्रकृतकथासमाप्तौ सत्याम्, **गृहगमनाय** गृहम्–अन्तःपुरम्, गमनाय–प्रस्थातुम्, **तैः** पौरजनैः, **प्रवर्तितः** प्रेरितो राजा, **किमपि** किञ्चिद्, **ध्यात्वा** विचिन्त्य, **तिर्यग्वलितदृष्टिः** तिर्यक्–कुटिलं यथा स्यात् तथा, नमितदृष्टिः सन्, **अनतिदूरोपविष्टं** किञ्चिन्निकटस्थितम्, **अनुल्बणोदारवेषाकारधारिणम्** अनुल्बणः–अनुत्कटः, सज्जनोचितः, उदारः–स्फीतश्च, वेषः–नेपथ्यं यस्मिंस्तादृशो य आकारः–आकृतिः तद्धारिणम्, **महोदधिनामानं** तत्संज्ञकम्, **प्रधानरत्नाध्यक्षं** प्रधानानि–उत्तमानि, यानि रत्नानि तेषाम्, अध्यक्षम्–अधिष्ठातारम्, **ऐक्षत** अपश्यत् । **च** पुनः, **ससम्भ्रमोपसृतम्** सत्वरमुपागतम्, पुनः **विनयवामनीकृतदेहायामं** विनयेन–नम्रभावेन, वामनीकृतः–ह्रस्वीकृतः, संकोचित इति यावत्, देहायामः–स्वशरीरविस्तारो येन तादृशम्, **वामपाणिस्पृष्टवसुधातलं** वामपाणिना–वामकरेण, स्पृष्टं–गृहीतम्, वसुधातलं–भूतलं येन तादृशम्, पुनः **इतरकरधृतोत्तरीयपल्लवप्रान्तमुद्रितमुखम्** इतरकरेण–दक्षिणहस्तेन, धृतस्य–गृहीतस्य, उत्तरीयपल्लवस्य–किसलयकोमलोत्तरीयवस्त्रस्य, प्रान्तेन–अञ्चलेन, मुद्रितम्–आवृतम्, मुखं यस्य तादृशम्, पुनः **उन्मुखेक्षणम्** उत्फुल्ललोचनम्, **तं** महोदधिनामानं रत्नकोषाध्यक्षम्, **सादरम्** आदरपुरस्सरम्, **अवदत्** उवाच । किमित्याह–**भद्र** ! भो कल्याणशालिन् !, अयं **चन्द्रातपाभिधानः** तन्नामा, **हारः** माल्यम्, **प्रतिदिवसं** प्रतिदिनम्, **अर्चनीयानां** पूजनीयानाम्, **चिन्तामणिप्रभृतीनां** चिन्तामणिप्रमुखानाम्, **प्रधानरत्नानां** महामणीनाम्, **मध्यवर्ती** मध्यस्थः, **कर्तव्यः** मध्ये स्थापयितव्य इत्यर्थः । **बालारुणाख्यः** बालारुणनामकः, **दिव्याङ्गुलीयकालङ्कारः** देवताऽङ्गुलिभूषणम्, **स्वमर्यादातिवर्तिनां** निजमर्यादातिक्रमिणाम्, **दुष्टसामन्तानाम्** उद्धतावान्तरनृपतीनाम्, **दमनाय** आयत्तीकरणाय, **दक्षि-**

विजयवेगः—एष यामिनीयुद्धेषु विषमशत्रुसैन्यसंनिरुद्धस्य वज्रायुधस्य पाणिप्रणयितां त्वया नेतव्यः, [ल]। 'तथा' इति तेनाङ्गीकृतादेशश्चोत्थाय तैः प्रधानराजलोकैः परिवृतः प्रवर्त्यमानकुलदेवताविशेषपूजम् अभ्यर्च्यमानमुनिजनम् आरभ्यमाणगुरुभक्तिगौरवम् आराध्यमानचिन्तामणिगणम् आरभ्यमाणदिग्देवताबलिकर्मक्रमम् क्रियमाणदीनानाथलोकशोकोच्छेदम् आरब्धनिर्विच्छेदसान्तानिककर्मकाम्यक्रतुशालम् आगृहीतकनकभृङ्गारेण हरितकुशगर्भपाणिना पुरोहितेन तत इतः प्रकीर्यमाणशान्त्युदकशीकरम् उपकल्प्यमानपञ्चमीश्राद्धम् अधिगतविविधपूजाप्रीतमानसैर्द्विजन्मभिः सत्रमण्डपाजिरमण्डलकसंनिधावाबद्धमण्डलैर्मन्त्रोच्चारविरतौ युगपद् घुष्यमाणनृपतिसंतानोदयम् [व] अहरहः श्रोत्रियविश्राणनार्थमाह्रियमाणानां कुण्डपरिमण्डलोध्नीनां गवामुत्कर्णतर्णकानुसृताभिः परम्पराभिरापूर्यमाणबाह्यकक्षान्तरम् आघ्रातधूपपरिमलाविष्टाभि-

---

णापथम् ऋक्षवदवन्तिनगरीमतिक्रम्य दक्षिणदिग्वर्तिदेशविशेषम्, **अधितिष्ठतः** आश्रयतः, **वज्रायुधस्य** तत्संज्ञकस्य सेनापतेः, **प्रस्थापनीयः** पार्श्वे प्रेषणीयः । **च** पुनः, **तत्प्रधानप्रणयी** तस्य मुख्यस्नेही, **विजयवेगः** तदाख्य उपसेनापतिः, **वक्तव्यः** निवेदयितव्यः । किमित्याह-**यामिनीयुद्धेषु** रात्रिसंग्रामेषु, **विषमशत्रुसैन्यसंनिरुद्धस्य** विषमेण-बलवता, शत्रुसैन्येन-रिपुसेनया, संनिरुद्धस्य-सम्यङ्निगृहीतस्य, वज्रायुधस्य **पाणिप्रणयितां** हस्तस्नेहिताम्, हस्तालङ्कारताम्, **नेतव्यः** प्रापयितव्यः [ल]। **तथा** तेनैव प्रकारेण करिष्यामीति **तेन** महोदधिना, **अङ्गीकृतादेशः** अङ्गीकृतः-स्वीकृतः, आदेशः-आज्ञा यस्य तादृशः, **उत्थाय** आसनमुत्सृज्य, **तैः** उक्तपूर्वैः, **राजलोकैः** राजकीयपुरुषैः, **परिवृतः** परिवेष्टितः, **राजकुलं** राजमन्दिरम्, **अगच्छत्** गतवानिति दूरेणान्वेति। कीदृशं राजकुलम्? **प्रवर्त्यमानकुलदेवताविशेषपूजं** प्रवर्त्यमाना-प्रारभ्यमाणा, कुलदेवतानां-कुलाधिष्ठातृदेवतानाम्, विशेषपूजा-विशेषेण आराधना यस्मिंस्तादृशम्। पुनः **अभ्यर्च्यमानमुनिजनम्** अभ्यर्च्यमाना-अभि सर्वतोभावेन, पूज्यमाना मुनिजना यस्मिंस्तादृशम्। पुनः **आरभ्यमाणगुरुभक्तिगौरवम्** आरभ्यमाणं-क्रियमाणम्, गुरूणां-धर्माचार्याणां विद्याचार्याणां च, भक्तिगौरवं-तद्विषयकप्रीतिचाढ्यं यस्मिंस्तादृशम्। पुनः **आराध्यमानचिन्तामणिगणम्** आराध्यमानः-उपास्यमानः, चिन्तामणेः-मणिविशेषस्य, गणः-समूहो यस्मिंस्तादृशम्। पुनः **आरभ्यमाणदिग्देवताबलिकर्मक्रमम्** आरभ्यमाणः-सम्पाद्यमानः, दिग्देवतानां-दिगधिष्ठातृदेवतानाम्, इन्द्रादिदिक्पालदेवतानामिति यावत्, बलिकर्मक्रमः-भोज्यभागवितरणरूपकार्यक्रमो यस्मिंस्तादृशम्। पुनः **क्रियमाणदीनानाथलोकशोकोच्छेदं** क्रियामाणः-विधीयमानः, दीनानां-दरिद्राणाम्, अनाथानां-निराश्रयाणां च लोकानाम्, शोकोच्छेदः-दुःखध्वंसो यस्मिंस्तादृशम्। पुनः **आरब्धनिर्विच्छेदसान्तानिककर्मकाम्यक्रतुशालम्** आरब्धं-प्रवर्तितम्, निर्विच्छेदं-निरन्तरम्, सान्तानिकं-सन्तानोद्देश्यकम्, कर्म-अनुष्ठानं यस्यामीदृशी, काम्यक्रतुशाला-काम्ययज्ञमण्डपो यस्मिंस्तादृशम्। पुनः **पुरोहितेन** पुरोधसा, **तत इतः** तत्र तत्र, **प्रकीर्यमाणशान्त्युदकशीकरं** प्रकीर्यमाणाः-विक्षिप्यमाणाः, शान्त्युदकशीकराः-शान्तिफलकजलकणा यस्मिंस्तादृशम्, कीदृशेन? **आगृहीतकनकभृङ्गारेण** धृतसुवर्णमयजलपात्रेण, पुनः **हरितकुशगर्भपाणिना** हरितवर्णकुशयुक्तहस्तेन । पुनः **उपकल्प्यमानपञ्चमीश्राद्धम्** उपकल्प्यमानं-क्रियमाणं पञ्चम्यां तिथौ श्राद्धं-पित्राद्युद्देश्यककर्मविशेषो यस्मिंस्तादृशम् । पुनः **अधिगतविविधपूजाप्रीतमानसैः** प्राप्तानेकप्रकारकसम्मानतृप्तहृदयैः, **सत्रमण्डपाजिरमण्डलकसन्निधौ** सत्रमण्डपानां-क्रतुशालानाम्, यानि अजिराणि-चत्वराणि, तन्मण्डलस्य-तत्समूहस्य, सन्निधौ, **आबद्धमण्डलैः** रचितसमूहैः, **द्विजन्मभिः** ब्राह्मणैः, **मन्त्रोच्चारविरतौ** मन्त्रोच्चारणसमाप्तौ, **युगपत्** एकक्षणावच्छेदेन, **घुष्यमाणनृपतिसन्तानोदयं** घुष्यमाणः-उच्चैरुच्चार्यमाणः, नृपतेः-मेघवाहनस्य, सन्तानोदयः-पुत्रोद्भवाशीर्वाक्यं यस्मिंस्तादृशम् [व]।

पुनः **उत्कर्णतर्णकानुसृताभिः** उत्-ऊर्ध्वस्थौ, कर्णौ येषां तादृशाः, तर्णकाः-वत्साः, तैः, अनुसृताभिः-अनुगताभिः, **गवां** धेनूनाम्, **परम्पराभिः** यूथैः, **आपूर्यमाणबाह्यकक्षान्तरम्** आपूर्यमाणं-सम्यक् पूर्यमाणम्, बाह्यकक्षान्तरम्-अन्तःपुरबाह्यभागान्तरं यस्मिंस्तादृशम्, कीदृशीनां गवाम्? **अहरहः** प्रतिदिनम्, **श्रोत्रियविश्राणनार्थं** श्रोत्रियेभ्यः-वेदाध्येतृभ्यः, दानार्थम्, **आह्रियमाणानाम्** आनीयमानानाम्, पुनः **कुण्डपरिमण्डलोध्नीनां** कुण्डः-पात्रविशेषः,

रनेकभङ्गिभिः कृताङ्गभङ्गाभिराभङ्गुरभ्रुकुटिभीषणमुखीभिरग्रतो विनयविरचिताञ्जलिना राजकुलवृद्धाजनेन किं किमित्याकुलाकुलमापृच्छ्यमानाभिः क्षुद्रप्रव्रजिताभिरभिलषितवस्त्वनुगुणैर्वचोभिराश्वास्यमानपरिजनम् [श] उपनीतकुसुमफलताम्बूलेन पुरोवर्तिना नृपतिज्ञातिलोकेन होराकृष्टिषु नियुञ्जानेनाङ्कुष्ठकादिप्रश्नं प्रति प्रवर्तयता कर्णपिशाचिकाविधानेष्ववधापयता दृष्टशुभस्वप्नफलानि पृच्छता दिवानिशमुपास्यमाननैमित्तिकम् अवितथादेशसामुद्रविदाख्यातप्रसवलक्षणानां क्षोणिपालकन्यानामुद्वाहनाय राज्ञः प्रणयिलोकैः प्रवर्त्यमानामात्यम् [ष] अवधीरितापरकथेन स्थानस्थानेषूपविष्टेन देशकालान्तरितनरेन्द्रपरिज्ञानानि प्रशंसता विवक्षितपुरुषफलावाप्तिदृष्टान्तैरभीष्टदेवतासेवाप्रभावमुद्भावयता निरपत्यपूर्वनृपतिपुत्रलाभोपायप्रधानाः पौराणिककथाः

---

**टिप्पनकम्—अवधापयता** अवधानं कारयता । **उद्वाहनाय** परिणयनाय [ ष ] ।

---

तद्वत् परिमण्डलं–**वर्तुलम्**, ऊधः–स्तनभागो यासां तादृशीनाम् । पुनः **क्षुद्रप्रव्रजिताभिः** किञ्चिदाचारच्युतपरिव्राजिकाभिः, **अभिलषितवस्त्वनुगुणैः** वाञ्छितार्थानुकूलैः, **वचोभिः** वचनैः, **आश्वास्यमानपरिजनम्** आश्वास्यमानः–क्रियमाणाभिलषितार्थसिद्धिविषयकाऽऽश्वासनः, परिजनः–परिवारो यस्मिंस्तादृशम्, कीदृशीभिस्ताभिः ? **आघ्रातधूपपरिमलाविष्टाभिः** आघ्रातः–आ समन्ताद् घ्राणगृहीतगन्धः, यो धूपः–गुग्गुल्वादिद्रव्यम्, तत्परिमले–तद्गन्धे, आविष्टाभिः–आवेशवतीभिः, व्यासक्ताभिरिति यावत्, पुनः **अनेकभङ्गिभिः** अनेकप्रकारैः, **कृताङ्गभङ्गाभिः** कृतः–रचितः, अङ्गभङ्गः–शारीरिकचेष्टाचमत्कारो याभिस्तादृशीभिः, पुनः **आभङ्गुरभ्रुकुटिभीषणमुखीभिः** आभङ्गुराभ्यां–चपलाभ्याम्, भ्रुकुटिभ्यां–नयनोपरितनरोमरेखाभ्याम्, भीषणं–भयानकम्, मुखं यासां तादृशीभिः, पुनः **अग्रतः** अग्रे, **विनयविरचिताञ्जलिना** विनयेन विरचितः–निर्मितः, अञ्जलिः–करसम्पुटाकारो येन तादृशेन, **राजकुलवृद्धाजनेन** अन्तःपुरस्थवृद्धस्त्रीजनेन, **"किं किम्" इति** किं किमभिलषितं सिध्येदिति, **आकुलाकुलं** कौतुकपूर्णं यथा स्यात् तथा, **आपृच्छ्यमानाभिः** समन्तात् पृच्छ्यमानाभिः [ श ] । पुनः **पुरोवर्तिना** अग्रवर्तिना, **नृपतिज्ञातिलोकेन** राज्ञो बन्धुजनेन, **दिवानिशं** रात्रिंदिवम्, **उपास्यमाननैमित्तिकम्** उपास्यमानाः–आराध्यमानाः, नैमित्तिकाः–निमित्तज्ञाः, शकुनशास्त्रज्ञा इत्यर्थः, यस्मिंस्तादृशम्, कीदृशेन ज्ञातिलोकेन ? **उपनीतकुसुमफलताम्बूलेन** उपनीतानि–उपहृतानि, कुसुमानि–पुष्पाणि, फलानि–पूगीफलादीनि, ताम्बूलानि–नागवल्लीदलानि येन तादृशेन, पुनः **होराकृष्टिषु** लग्नानयनेषु, **नियुञ्जानेन** प्रवर्तयता, पुनः **अङ्कुष्ठकादिप्रश्नं प्रति** मन्त्रादिनाऽङ्कुष्ठनखतलावतारितदेवतायाः सकाशात् सरलबालादिद्वारा पुत्रविषयकप्रश्नं प्रति, अङ्गुष्ठादिरेखाफलप्रश्नोत्तरकार्ये वा, **प्रवर्तयता** प्रेरयता, पुनः **कर्णपिशाचिकाविधानेषु** कर्णपिशाचिका नाम–अतीतानागतार्थवेदकविद्याविशेषः, यन्महिम्ना पिशाचः कर्णाभ्यर्णमागत्य अतीतानागतार्थमावेदयति, तस्या विधानेषु–प्रयोगेषु, उपयोगेष्विति यावत्, **अवधापयता** अवहितहृदयं कुर्वता, पुनः **दृष्टशुभस्वप्नफलानि** दृष्टा ये शुभाः–शोभनाः, स्वप्नास्तेषां फलानि, **पृच्छता** जिज्ञासमानेन, पुनः **अवितथादेशसामुद्रविदाख्यातप्रसवलक्षणानाम्** अवितथः–सत्यभूतः, आदेशः–फलकथनं येषां तादृशैः, सामुद्रविद्भिः–सामुद्रं नाम हस्तरेखादिना शुभाशुभप्रतिपादकः समुद्रनाम्ना महर्षिणा प्रणीतो महाग्रन्थविशेषः, तदभिज्ञैः, आख्यातानि–प्रतिपादितानि, प्रसवलक्षणानि–अपत्योत्पादनचिह्नानि यासां तादृशीनाम्, **क्षोणिपालकन्यानां** नृपात्मजानाम्, **उद्वाहनाय** विवाहनाय, **राज्ञः** मेघवाहनस्य, **प्रणयिलोकैः** स्नेहास्पदजनैः, **प्रवर्त्यमानामात्यं** प्रवर्त्यमानाः–प्रेर्यमाणाः, अमात्याः–मन्त्रिणो यस्मिंस्तादृशम् [ ष ] । पुनः **राजलोकेन** राजकीयजनेन, **अतिवाह्यमानदिवसम्** अतिवाह्यमानाः–फलप्रतीक्षया याप्यमानाः, दिवसाः–दिनानि, यस्मिंस्तादृशम्, कीदृशेन तेन ? **अवधीरितापरकथेन** अवधीरिता–तिरस्कृता, उपेक्षितेत्यर्थः, अपरा–राजपुत्रोत्पत्तिविषयककथाभिन्ना कथा, येन तादृशेन, पुनः **स्थानस्थानेषु** तत्तत्स्थानेषु, **उपविष्टेन** स्थितेन, पुनः **देशकालान्तरितनरेन्द्रपरिज्ञानानि** देशेन कालेन च अन्तरिताः–व्यवहिताः, देशान्तरीयाः कालान्तरीयाश्च, ये नरेन्द्राः–राजानः, तेषां परिज्ञानानि–बुद्धिवैभवान्, **प्रशंसता** प्रकृतनृपतिबुद्धिवैभवैस्तुलयितुं श्लाघमानेन, यद्वा प्रकृतस्यैव नृपतेर्देशान्तरीयाणि कालान्तरीयाणि च परिज्ञानानि **प्रशंसता** वर्णयता, पुनः **विवक्षितपुरुषफलावाप्तिदृष्टान्तैः** विवक्षितानां–बुद्धिस्थानाम्, पुरुषाणाम्, या फलावाप्तिः–फलप्राप्तिः, तद्रूपदृष्टान्तैः, **अभीष्टदेवता-**